श्रीमद्वाल्मीकिरामायणम्

श्रीमाधवयोगीयामृतकतकव्याख्यायुतम्

(तृतीयसंपुटः—अयोध्याकाण्डः-२)

प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यानिलयः

मैसूरु

१९६५

ORIENTAL RESEARCH INSTITUTE SANSKRIT SERIES 111

GENERAL EDITOR:

H. DEVEERAPPA, M.A.,
Director

ŚRĪMADVĀLMĪKI RĀMĀYAṆA

WITH

AMṚTAKATAKA OF MĀDHAVAYOGI

(VOL. III—AYODHYĀKĀṆḌA-II)

EDITOR:

VIDWAN K. S. VARADACHARYA,
Research Assistant

ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE
MYSORE
1965

प्राच्यविद्यासंशोधनालयसंस्कृतग्रन्थमाला १११

प्रधानसम्पादकः

एस्. देवीरप्प, एम्.ए.,

डैरेक्टर्

श्रीमद्वाल्मीकिरामायणम्

श्रीमाधवयोगीयामृतकतकव्याख्यायुतम्

(तृतीयः सम्पुटः—अयोध्याकाण्डः-२)

सम्पादकः

विद्वान् के. एस्. वरदाचार्यः,

रिसर्च् असिस्टेण्ट्

प्राच्यविद्यासंशोधनालयः

मैसूरुविश्वविद्यानिलयः

मैसूरु

१९६५

PREFACE

WE are glad to present to the public the second part of Ayodhyākāṇḍa (III Volume of the Rāmāyaṇa in our series) with Kataka Commentary. It is gratifying to note that we have been able to bring out this volume within a short time since the publication of the previous ones and that the succeeding volume is also simultaneously published along with this.

Vidwan Sri K. S. Varadacharya, has kept up his uniform excellence in editing the work. His zeal for research in the field of Sanskrit is really commendable.

We offer our thanks to the authorities of Mysore Palace Sarasvatī Bhaṇḍāra, the Government Oriental Manuscripts Library, Madras, and the Kūḍali Śṛṅgeri Mutt, who kindly lent the manuscripts of the Kataka Commentary for collation.

The Superintendent and staff of the Government Text Book Press, Mysore, have been successful in completing this work early. We are thankful to them.

MYSORE,
Dated 9-8-1965

H. DEVEERAPPA,
Director,
Oriental Research Institute.

प्रस्तावना

आपादचूडमनवद्येऽस्मिन् रमणीये रामायणे विशिष्यत एवायमयोध्याकाण्डः इतरकाण्डेभ्यः बहुभिः कारणैः—सर्वाङ्गीण-सुन्दरेऽपि शरीरे मुखमिव—इति पूर्वसंपुटप्रस्तावनायामेव प्रास्तावि। तदेतस्य अयोध्याकाण्डस्यातिविस्तृतस्य विषयानुगुणतो विमर्शने—रामचित्रकूटवासान्तः एको घट्टः, तदनन्तरं भरतागमनादिपरश्च घट्टः विविक्ततयोपलभ्यत एव स्वरसतः। तत्रादिमो घट्टः पूर्वसंपुटे क्रोडीकृतः, अपरश्चास्मिन् संपुटे ॥

तत्राद्ये भागे रामायणप्रधाननायकस्य श्रीरामस्य कल्याणगुणाः यथा व्यक्तीभूयात्मानं प्रदर्शयन्ति, तथाऽस्मिन् भागे तेन सह—किमुत! ततोऽप्यतिशयेन—भरतकल्याणगुणाः व्यक्तीभवन्ति। रामोऽपि हि भरतस्यानवद्यं गुणं अभिवीक्ष्य विस्मयमग्नो भवति,* यन्मूलतया च वदिष्यति अग्रे 'न सर्वे भ्रातरस्तात! भवन्ति भरतोपमाः†' इति। एवमस्य भागस्य भरतगुणप्रकाशकस्य 'भरत काण्डः' इति कथनमपि युक्तमिव ॥

---

* अथोत्थाय जलं स्पृष्ट्वा भरतो वाक्यमब्रवीत्।
शृण्वन्तु मे परिषदः! मन्त्रिणः श्रेणयस्तथा ॥ अयो. 111-24.

न याचे पितरं राज्यं नानुशासामि मातरम्।
आर्यं परमधर्मज्ञं नानुजानामि राघवम् ॥ ,,—111-25.

यदि त्ववश्यं वस्तव्यं कर्तव्यं च पितुर्वचः।
अहमेव निवत्स्यामि चतुर्दश समा वने ॥ ,,—111-26.

धर्मात्मा तस्य तथ्येन भ्रातुर्वाक्येन विस्मितः।
उवाच रामः............................ ॥ ,,—111-27.

† रामा. युद्ध. 18-15.

एवं भरतस्य सद्गुणान् वीक्ष्य यथा रामो विस्मयाक्रान्तोऽभवत्, तथा रामभरतयोरुभयोरपि सद्गुणान् वीक्ष्य सर्वेऽपि विस्मयमापेदिरे इति वदत्यादिकविः, स्वयमपि विस्मयमापन्नः सन्—

'तमप्रतिमतेजोभ्यां भ्रातृभ्यां रोमहर्षणम् ।
विस्मिताः सङ्गमं प्रेक्ष्य समवेता महर्षयः'* इति ॥

राजवंशजानां स्वभावं श्रीराम एव एवं वर्णयति—

'अमित्रास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः ।
व्यसनेषु प्रहर्तारः......................॥
एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभनः' † इति ॥

इममादिकवेराशयं वरकविः कालिदासः एवं स्पष्टयति—'दुरितैरपि कर्तुमात्मसात् प्रयतन्ते नृपसूनवो हि यत्' ‡ इति। अत्र 'यत्' शब्दस्य राज्यमर्थः। राज्यहेतोः सर्वमप्यकृत्यं बुद्धिपूर्वकमेव कर्तुं सन्नद्धता राजवंशजानां सहजा। एवं सति स्वयं प्राप्तमपि राज्यं भरतः नाङ्गीकरोति स्म। एवं भरतेन प्रत्यर्पितं निष्कण्टकमपि राज्यं रामोऽपि नाङ्गीचकार हि। प्रत्युत, परस्परं राज्यत्यागाय विचित्रा युक्तीः अन्वेषेते किल—इति विचित्रमेव राजकुलवृत्तान्तं जानताम् ॥

अथवा युक्तमेवेदं रघुकुलजानां सहजत्यागशीलानाम्। श्रीरामोऽपि 'राघवः' इति यन्नाम्नोपलाल्यते, तस्मिं रघुं रामपूर्वजमधिकृत्य एतादृश एव कश्चन विचित्रप्रसङ्गः प्रस्तुतः वरकविना कालिदासेन रघुवंशे पञ्चमसर्गे§—

महामना रघुः विश्वजिद्यागे स्वीयं सर्वमप्यर्थं सत्पात्रेभ्यो वितीर्य शरीरमात्रावशेषः यदा तिष्ठति, तदा वरतन्तुमहर्षेश्शिष्यः कौत्सः गुरवे देयां चतुर्दशकोटिमितां दक्षिणां रघोः सकाशात् प्रेप्सुः तमुपसर्पति। रघुस्तु गत्यन्तराभावात् कुबेरादेव तावद्वित्तं बलादाहर्तुं

* रामा. अयो. 112-1. † रामा. युद्ध. 18-10, 11. ‡ रघुवंश-8-2.
§ रघुवंश-५ सर्ग-१-३० श्लो.

यदा संकल्पयति, तदैव कुबेरः रघोः कोशागारं वित्तवर्षेण पूरयामास ॥

तच्च ज्ञात्वा रघुः कौत्समाहूय 'गृह्यतामिदं सर्वं भवदीयं वित्तम्' इति वदति। कौत्सस्तु 'चतुर्दशकोटय एव मया याचिताः। तदधिकं नाहं गृह्णीयाम्' इति वदति। रघुस्तु 'भवदर्थमागतत्वात् सर्वं भवदीयमेव। अतो भवतैव ग्राह्यम्' इति निर्बन्धयति। एवं त्यागे परस्परं स्पर्धमानौ तौ वीक्ष्य तत्रत्या जनाः विस्मिता बभूवुरिति सरसैरक्षरैरेवं रञ्जयति सहृदयान्तरङ्गाणि वरकविः—

'जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ।
गुरुप्रदेयाधिकनिस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च' *इति॥

युज्यत एव हि एतादृशस्य रघोः कुले जातयोः रामभरतयोः त्यागे परस्परस्पर्धा ॥

परन्त्वत्र सन्दर्भविशेषवशात् भरतः राममप्यतिशेत इव किञ्चित्। यदा भरतश्चित्रकूटमागत्य रामं राज्यस्वीकाराय निर्बन्धयति, तदा रामः 'तुभ्यं राज्यस्य, मह्यं वनवासस्य च पित्राऽऽदिष्टत्वात् उभाभ्यां तत्परिपालनीयमेव' इति वदति†। भरतस्तु 'सत्यं पितृवचनमप्यहं परिपालयाम्येव। तेन दत्ते मदीये राज्ये मम हि पूर्णोऽधिकारः। अहमेव बुद्धिपूर्वकं राज्यं तुभ्यं ददामि। को वाऽत्र धर्मलोपः'‡ इति पृच्छति भ्रातरं रामम्। एवञ्च चतुरेण भरतेन पितृवाक्यमपि परिपालितम्, स्वेष्टमपि साधितम्। अतोऽस्मिन् प्रकरणे भरतो रामं जिग्य एव, यस्य च निदर्शनं रामेण राज्याय स्वपादुकाप्रदानम्। अत एव भासोऽपि भरतं एवं परिचाययत्यस्माकं—

---

* रघुवंश-5-31. † 'त्वया राज्यमयोध्यायां प्राप्तव्यं लोकसत्कृतम्। वस्तव्यं दण्डकारण्ये मया वल्कलवाससा' अयो. 104–23, 'पित्रा दत्तं यथाभागं उपभोक्तुं त्वमर्हसि।' 104–25. ‡ 'सान्त्विता मामिका माता दत्तं राज्यमिदं मम। तद्ददामि पुनस्तुभ्यं भुङ्क्ष्व राज्यमकण्टकम्' अयो. 105–1.

'सुचिरेणापि कालेन यशः किञ्चिन्मयाऽऽर्जितम् ।
अचिरेणैव कालेन भरतेनाद्य सञ्चितम्' * इति ॥

सन्त्येतादृशानि सहृदयहृदयङ्गमानि प्रकरणानि बहून्यस्मिन् काण्डे इति नूनं विशिष्यत एवायमयोध्याकाण्डः । अधिकं पश्चाद्विचारयामः ॥

एतत्संपुटसंपादनेऽपि पूर्वसंपुटप्रतिपादिता एव कोशाः आदृता इति नास्त्यधिकं वक्तव्यम् । उपरितनभागानप्यचिरेणैव कालेन प्रकटीचिकीर्षूणामस्माकं मनोरथान् पूरयतु भगवान् श्रीरामचन्द्रः ॥

मैसूरु,
9-8-1965

नव्यमङ्गलाभिजनः,
वरदाचार्यः.

---

* प्रतिमानाटके, रामवाक्यं 4–26.

श्रीमद्वाल्मीकिरामायणायोध्याकाण्डस्य

विषयानुक्रमणिका

* गोविन्दराजादिदृष्ट्या अयं सर्गः १०४ सर्गात्तेन पठनीयः । अत्र वक्तव्यं तत्प्रकरणटीकायां (पु. ३५७–३५८) उक्तम् ॥

श्रीमद्वाल्मीकिरामायणम्

अमृतकतकव्याख्यासहितम्

अयोध्याकाण्डः २

॥ श्रीः ॥

॥ श्रीरामचन्द्रपरब्रह्मणे नमः ॥

श्रीमद्वाल्मीकिरामायणम्

श्रीमन्माधवयोगिविरचितया

अमृतकतकाख्यव्याख्यया सहितम्

अयोध्याकाण्डः

सप्तपञ्चाशः सर्गः

[सुमन्त्रप्रत्यागमनम्]

कथयित्वा तु दुःखार्तः सुमन्त्रेण चिरं सह ।
रामे दक्षिणकूलस्थे जगाम स्वगृहं गुहः ॥ १ ॥

एवं रामवृत्तान्तमुक्त्वा विसृष्टसुमन्त्रव्यापारकथनम् । कथयित्वेत्यादि ॥ १ ॥

गो.—गोविन्दराजीयम्. ति.—तिलकम्. ती.— महेश्वरतीर्थीयम्.
रा.—रामायणशिरोमणिः.

भरद्वाजाभिगमनं प्रयागे च [1] सभाजनम् ।
आगिरेर्गमनं तेषां * तत्रस्थैरभिलक्षितम् ॥ २ ॥

[1] सभाजनमिति । भरद्वाजेनेति शेषः । आगिरेः—चित्रकूटगिरिमभिव्याप्य संपन्नं तेषां रामादीनां गमनम्, तत्रस्थैः—शृङ्गिबेरपुरस्थैः गुहसुमन्त्रादिभिः गुहचारमुखेन अभिलक्षितं—ज्ञातम । गङ्गोत्तरणदिवसनिशा भरद्वाजश्रमेऽभूत् । द्वितीयनिशा यमुनातीरे । तृतीया चित्रकूटे । तत्र स्वासिषतेत्यवगतवन्त इत्यर्थः ॥ २ ॥

† अनुज्ञातः सुमन्त्रोऽथ योजयित्वा हयोत्तमान् ।
अयोध्यामेव नगरीं प्रययौ गाढदुर्मनाः ॥ ३ ॥

अनुज्ञातः सुमन्त्र इति । गङ्गोत्तरणदिवसे रामेणेति शेषः ॥ ३ ॥

स वनानि सुगन्धीनि सरितश्च सरांसि च ।
[2] पश्यन् यत्तो ययौ शीघ्रं ग्रामाणि नगराणि च ॥ ४ ॥

यत्तः—सावधानः ॥ ४ ॥

---

* तत्रस्थैः-शृङ्गिबेरपुरस्थैः चारैरभिलक्षितं—निवेदितम् । सुमन्त्रेण सम्यग्विदितमित्यर्थः । गङ्गोत्तरणदिवसनिशा वनस्पतिमूले, द्वितीया भरद्वाजाश्रमे, तृतीया यमुनातीरे, चतुर्थेऽहनि चित्रकूटगमनं, पञ्चमे पुनरागम्य चारैर्निवेदनम—**गो.** । तीर्थेऽप्येवमेव ।

तिलके—गङ्गोत्तरणतृतीयदिवसे भरद्वाजाश्रमात् प्रतिनिवृत्तदूतमुखात् तावत्पर्यन्तं तद्वृत्तं ज्ञात्वा तद्दिन एव शृङ्गबेरपुरात्सुमन्त्रस्य प्रतिनिवृत्तिरिति बोध्यम् । अत एव 'रामस्य निर्गमदिनात् दिने षष्ठेऽर्धरात्रके । हा हा लक्ष्मण हा सीते हा रामेति मृतो नृपः॥' इति पाद्म संगच्छते—इत्युक्तम ।

अथवा—तत्रस्थैः— गुहसुमन्त्रादिभिः तत्सर्वमवगतम् । चित्रकूटे रामवासदिनपर्यन्तं तत्रैव स्थित्वा सर्वो वृत्तान्तः वन्यजनद्वाराऽवगतः तैः— इत्यर्थः ।

† अनुज्ञातः, गुहेनेति शेषः—**गो. ति.** अथ—रामस्य चित्रकूटे प्रतिष्ठां ज्ञात्वा ।

[1] सहासनम—**ङ. च. ट.** [2] पश्यन्नतिययौ—**ङ.**

*ततः सायाह्नसमये [1]द्वितीयेऽहनि सारथिः ।
अयोध्यां समनुप्राप्य निरानन्दां ददर्श ह ॥ ५ ॥

सायमह्नः—एकदेशिसमासोऽन्यत्रापि, ततः 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः एकदेशात्परत्वात् । द्वितीयेऽहनीति । गुहेन दिनत्रयं स्थित्वा प्रतिनिवृत्त्यनन्तरमिति शेषः । यथा आगमनसमये अतिवेगेन रथेन दिनद्वयादागतं आगङ्गं—तथा प्रतिनिवृत्तिसमयेऽपि शीघ्रं दिनद्वयेन ययावित्यर्थः ॥ ५ ॥

स शून्यामिव निश्शब्दां दृष्ट्वा परमदुर्मनाः ।
सुमन्त्रश्चिन्तयामास शोकवेगसमाहतः ॥ ६ ॥

स शून्यामिव—शून्यनगरीवन्निश्शब्दाम् ॥ ६ ॥

कच्चिन्न सगजा साश्वा सजना सजनाधिपा ।
रामसन्ताप[2]दुःखेन दग्धा शोकाग्निना पुरी ॥ ७ ॥
इति चिन्तापरः सूतः वाजिभिः शीघ्र[3]यायिभिः ।
नगरद्वारमासाद्य त्वरितः प्रविवेश ह ॥ ८ ॥
सुमन्त्रमभि[4]यान्तं तं शतशोऽथ सहस्रशः ।
क्व राम इति पृच्छन्तः सूतमभ्यद्रवन्नराः ॥ ९ ॥

सूतमभ्यद्रवन्—सूतसम्मुखमाजग्मुः ॥ ९ ॥

तेषां शशंस गङ्गायां अहमापृच्छ्य राघवम् ।
अनुज्ञातो निवृत्तोऽस्मि धार्मिकेण महात्मना ॥ १० ॥

---

* तृतीयेऽहनि—शृङ्गवेरपुरान्निर्गमापेक्षया तृतीयदिवसे । यद्वा अहनि तृतीये-सायाह्नसमये—गो. ती.

[1] तृतीये—ङ. [2] शोकेन—ङ. [3] पातिभिः—ङ. [4] धावन्तं, यान्तं तु—ङ.

गङ्गायां शृङ्गिबेरपुरे राघवेणानुज्ञातः तमापृच्छ्य निवृत्तोऽस्मि । * ततः परं वृत्तान्तो मया सम्यक् न ज्ञायते तत्र बहुदिवसमवस्थितेनापीति शशंसेत्यर्थः ॥ १० ॥

ते तीर्णा इति विज्ञाय बाष्पपूर्णमुखा जनाः ।
अहो धिगिति निश्वस्य हा रामेति विचुक्रुशुः ॥ ११ ॥

ते तीर्णा इति । गङ्गामुत्तीर्य गता इति, विज्ञाय ॥ ११ ॥

शुश्राव च वचस्तेषां बृन्दं बृन्दं च तिष्ठताम् ।
हताः स्म खलु ये नेह पश्याम इति राघवम् ॥ १२ ॥
† दानयज्ञविवाहेषु [1] समाजेषु महत्सु च ।
न द्रक्ष्यामः पुनर्जातु धार्मिकं राममन्तरा ॥ १३ ॥

समाजः—महाजनसमूहः । दानयज्ञादिसन्तोषव्यवहारेषु धार्मिकं राममन्तरा——तत्तद्दानयज्ञादिव्यवहारमध्ये तस्य तस्य तत्तत्साधकं जातु पुनर्द्रक्ष्यामो न किम् ? ॥ १३ ॥

‡ किं समर्थं जनस्यास्य किं प्रियं किं सुखावहम् ।
इति रामेण नगरं [2] पित्रेव परिपालितम् ॥ १४ ॥

---

* यद्यपि सुमन्त्रेण तदनन्तरवृत्तान्तः चित्रकूटप्राप्तिपर्यन्तः चारमुखादवगत इति अनुपदमेवोक्तं (२ श्लोके)——अथापि स वृत्तान्तश्चारमुखात्केवलमवगतः, न साक्षादिति भावेन सुमन्त्रस्तथोक्तवान्——इति व्याख्यात्रा 'सम्यक्' पदोपादानेन व्याख्यायि। वस्तुतस्तु मूले सुमन्त्रेण वृत्तान्तः संग्रहतः प्रतिपादितः, अन्यच्च न निषिद्ध इति न दोषः॥ अथ वा रामस्थानकथने पुनरपि पौराः तत्रापि गच्छेयुरिति एवं उक्तम् । † दानादिषु अन्तरा—मध्ये (स्वयं वात्सल्यादागत्य) नायकमणिवद्वर्तमानं रामं पुनः जातु कदाचिदपि न द्रक्ष्यामः किं? इति काकुः—गो. ‡ अयमपि नगरजनवचोऽनुवादो वा——अस्य जनस्य किं समर्थम्? किं प्रियम्? किं सुखावहम्? इति रामेण, पित्रेवेदं नगरं परिपालितं——इत्यादि गिरिदेवनं शुश्रावेत्यन्वयः॥

[1] समाधिषु—ङ. [2] पितृवद्—ङ.

अतः—परस्य जनस्य किं—कृत्यं समर्थमुचितं, किं प्रियं—प्रियकरं, सुखावहं—इहामुत्रहितावहं इति रामेण परिपालितं नगरं चिन्ताकुलं बभूवेति शेषः ॥ १४ ॥

वातायनगतानां च स्त्रीणामन्वन्तरापणम् ।
राम[1]शोकाभितप्तानां शुश्राव परिदेवनम् ॥ १५ ॥

अनु—अनन्तरं वातायनगतानां स्त्रीणां परिदेवनं चान्तरापणं—आपणमध्ये गच्छन् शुश्राव ॥ १५ ॥

स राजमार्गमध्येन सुमन्त्रः * पिहिताननः ।
यत्र राजा दशरथः तदेवोपययौ गृहम् ॥ १६ ॥

साऽवतीर्य रथाच्छीघ्रं राजवेश्म प्रविश्य च ।
कक्ष्याः सप्ताभिचक्राम महाजनसमाकुलाः ॥ १७ ॥

† हर्म्यैर्विमानैः प्रासादैः अवेक्ष्याथ समागतम् ।
हाहाकारकृता नार्यः रामादर्शनकर्शिताः ॥ १८ ॥

हाहाकारः कृतः—याभिस्ताः—तथा ॥ १८ ॥

आयतैर्विमलैर्नेत्रैः अश्रुवेगपरिप्लुतैः ।
अन्योन्यमभिवीक्षन्तेऽव्यक्तमार्ततराः स्त्रियः ॥ १९ ॥

अन्योन्यमभिवीक्षन्ते ‡ स्म—इतिकर्तव्यतामेव्यादिति शेषः ॥

---

* जनदर्शनाक्षमतया—गो. जनानां प्रत्युत्तरदानेन विलम्बः स्यादिति वा, रामविवासनरूपकार्ये स्वस्य सम्बन्धात् लज्जया वा—पिहिताननः । † हर्म्यादिः—धनिनां वासः, प्रासादः—देवभूभुजाम, विमानं—सप्तभूमिगृहम् । एतैरुपलक्षितामयोध्यां समागतम् । एतस्स्था नार्य इति वा । ‡ भूतार्थकक्रियापदघटितवाक्यमध्यस्थत्वात् 'स्म' इत्यध्याहार्यमित्याशयः ।

[1] मेवासि—च.

ततो दशरथस्त्रीणां * प्रासादेभ्यस्ततस्ततः ।
रामशोकाभितप्तानां मन्दं शुश्राव जल्पितम् ॥ २० ॥

प्रासादेभ्य इति। सुमन्त्रस्य राजवेश्मप्रविष्टत्वेन ततोऽवतीर्णानामिति शेषः। मन्दं जल्पितमिति। राजसान्निध्यात् मन्दत्वम् ॥ २० ॥

सह रामेण निर्यातो विना राममिहागतः ।
सूतः किन्नाम कौसल्यां [1] क्रोशन्तीं प्रतिवक्ष्यति ॥ २१ ॥

किन्नाम वक्ष्यतीति। अतिघोरत्वात् न किञ्चिदपि वक्तुं शक्यम् ॥

† यथा च मन्ये दुर्जीवं एवं न सुकरं ध्रुवम् ।
[2] आच्छिद्य पुत्रे निर्याते कौसल्या यत्र जीवति ॥२२॥

अथ प्रत्येकं राममातॄणां दुःखप्रलापः — यथेत्यादि। यथा—येन प्रकारेण च—यस्मात् एवं—स्वानुभवसिद्धप्रकारेण परमदुःखितं मदीयं दुर्जीवं कुत्सितप्राणं जीवन्तं मन्ये—अनुभवामि, मन ज्ञाने श्यन्; तस्मात् तथैव कौसल्याऽपि यत्र—यस्मिन् सकललोकप्रसिद्धानवधिककल्याणगुणे पुत्रे तं यथाप्राप्तमभिषेकं आच्छिद्य—परित्यज्य निर्याते सत्यपि जीवतीति यत्, तदपि तद्वदेव ध्रुवं सुकरं न हि; रामैकशरणायास्तस्याः मत्तः किञ्चिदभ्यधिकं दुःखम् ॥ २२ ॥

---

* प्रासादमारुह्य रुह्य शुश्राव— प्रतिप्रासादं शोकपरिदेवनं शुश्रावेत्यर्थो वा स्यात ॥

† यत्रेति....प्रथमार्थे....यथा—येन प्रकारेण अस्मज्जाविनं दुर्जीवं—दुःखेन जीवनार्हं मन्ये, एवमेव कौसल्या पुत्रे निर्याते सति आच्छिद्य-प्रसह्य जीवति यत्र—जीवतीति यत् तत् न सुकरम्—**गो.** कौसल्या पुत्रे निर्याते सति आच्छिद्य—प्रसह्य जीवति यत्र—जीवतीति यत् एतत् दुर्जीवं—दुष्करजीवनं ध्रुवं—निश्चितम्। एव—एवंविधजीवनं सुकरं न मन्ये—**ती.** यथा जीवं—जीवनं दुः—दुःखजनकं मन्ये, एवं ध्रुवं—निश्चयेन सुकरं—सुकरनाशं नेति मन्ये—**ति.** एतादृशावस्थायां जीवनं यावत् अशक्यमिति अहं जानामि एवं प्रकारमेव तत् न सुकरं, ध्रुवम्। किं तदित्यत्र उत्तरार्धम्। आच्छिद्य-सम्बन्धं त्यक्त्वा, न तु ग्रामान्तरगमनवत्; प्रव्रज्येति यावत् ॥

[1] शोचन्तीं—ङ [2] प्रसह्य—ङ

सत्यरूपं तु तद्वाक्यं राजस्त्रीणां निशामयन् ।
प्रदीप्त इव शोकेन विवेश सहसा गृहम् ॥ २३ ॥

एवं सत्यरूपं—परमार्थभूतं राजस्त्रीणां तद्वाक्यं निशामयन्—शृण्वन् शोकेन प्रदीप्त इव सन् सहसा राजगृहं विवेश । अत्र यद्वाभट्टारका बहुप्राचीना व्याक्रिया अनुवदन्ति । तन्न किञ्चिदपि सङ्गतं पश्यामः ॥ २३ ॥

स प्रविश्याष्टमीं कक्ष्यां राजानं दीनमातुरम् ।
पुत्रशोकपरिद्यूनं अपश्यत् *पाण्डुरे गृहे ॥ २४ ॥

परिद्यूनं—क्षीणम् । 'दिवोऽविजिगीषायाम्' इति निष्ठा त्वम् । 'च्छ्वोः शूठ्....' इत्यूठ् ॥ २४ ॥

अभिगम्य तमासीनं नरेन्द्रमभिवाद्य च ।
सुमन्त्रो रामवचनं यथोक्तं प्रत्यवेदयत् ॥ २५ ॥

यथोक्तं प्रत्यवेदयदिति । तस्य च विस्तरेण प्रतिपादनमागतं भविष्यति ॥ २५ ॥

स तूष्णीमेव तच्छ्रुत्वा राजा विभ्रान्तचेतनः ।
मूर्छितो न्यपतत् भूमौ रामशोकाभिपीडितः ॥ २६ ॥
ततोऽन्तःपुरमाविद्धं मूर्छिते पृथिवीपतौ ।
[1]उद्धृत्य बाहू चुक्रोश नृपतौ पतिते क्षितौ ॥ २७ ॥

आविद्धं—दुःखाभिहतम् ॥ २७ ॥

---

* पाण्डुर इति विशेषणात् राजलक्ष्मीर्नास्तीति उच्यते—गो.

[1] उत्क्षिप्य—ङ.

इमं तस्य, महाभाग! दूतं * दुष्करकारिणः।
वनवासादनुप्राप्तं कस्मान्न प्रतिभाषसे ॥ २९ ॥

अद्येममनयं कृत्वा ह्यपत्रपसि, राघव!
उत्तिष्ठ † सुकृतं तेऽस्तु शोके न स्यात् सहायता ॥ ३० ॥

अद्येति। एवमनयं—एवं दुःखसाधनमन्यायं प्रथमतः कृत्वा किमद्यापत्रपसि, न प्रतिभाषसे—लज्जसे। उत्तिष्ठ शोकं विधूय। ते सुकृतं—सत्यपरिपालनरूपं पुण्यमस्तु। तव शोके सहायता—साधकता यस्याः, सेह नास्ति। अत्रस्था वयं त्वदिष्टा एवेत्यर्थः ॥ ३० ॥

देव! यस्या भयाद्रामं नानुपृच्छसि सारथिम् ‡।
नेह तिष्ठति कैकेयी विस्रब्धं प्रतिभाष्यताम् ॥ ३१ ॥

अत्रानिष्टाऽपि तिष्ठति किम्? इति शङ्कां व्यावर्तयति—देवेत्यादि। विस्रब्धं—निश्शङ्कम् ॥ ३१ ॥

सा तथोक्त्वा महाराजं कौसल्या § शोकलालसा।
धरण्यां निपपाताशु बाष्पविप्लुतभाषिणी ॥ ३२ ॥

विप्लुतभाषिणी—गद्गदभाषिणी ॥ ३२ ॥

---

* रामस्येति शेषः। † सुकृत शोभनंम्। शोके विषये सहायता न स्यात्—शोकानुवर्तनं मा कृथा इत्यर्थः—गो. एवं शोके त्वया क्रियमाणे तव सहायता—सहायसमूहः परिजनः सर्वोऽपि न स्यात्। त्वच्छोकेन सर्वोऽपि नश्येदित्यर्थः—ति. पूर्वार्ध—उत्तरश्लोकशैलीपरिशीलने, सुकृतमिति नर्मोक्तिर्वा स्यात्। शोके न स्यात् सहायता—शोकेन को लाभ इति भावः। शोकेन सहायता स्यात्? इति काकुर्वा। ‡ सारथिं रामं नानुपृच्छसीति द्विकर्मकम्। § एवं नर्मोक्तिप्रयोगेणैव शोकलालसा।

विलपन्तीं तथा दृष्ट्वा कौसल्यां पतितां भुवि ।
पतिं चावेक्ष्य ताः सर्वाः समन्तात् रुरुदुः स्त्रियः ॥ ३३ ॥

ततस्तमन्तःपुरनादमुत्थितं
समीक्ष्य वृद्धास्तरुणाश्च मानवाः ।
स्त्रियश्च सर्वा रुरुदुः समन्ततः
पुरं तदाऽऽसीत् पुनरेव सङ्कुलम् ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे सप्तपञ्चाशः सर्गः

वर्ग(३४)मानः सर्गः ॥ ३४ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे सप्तपञ्चाशः सर्गः

अष्टपञ्चाशः सर्गः

[रामसन्देशनिवेदनम्]

प्रत्याश्वस्तो यदा राजा मोहात् *[1] प्रत्यागतः पुनः ।
अथाजुहाव तं सूतं रामवृत्तान्तकारणात् ॥ १ ॥

अथ दशरथेन रामवृत्तान्तप्रश्नः । प्रत्याश्वस्त इत्यादि । प्रत्यागत इति । प्रत्यागतसंज्ञ इति यावत् ॥ १ ॥

अथ सूतो महाराजं कृताञ्जलिरुपस्थितः ।
† राममेवानुशोचन्तं दुःखशोकसमन्वितम् ॥ २ ॥

---

* प्रत्यागतः—सूतस्याभिमुखागतः—गो.　† इदं सर्वं सूतमित्यस्य विशेषणम् ।

[1] प्रत्यागतस्मृतिः—च.

वृद्धं परमसन्तप्तं नवग्रहमिव द्विपम् ।
विनिश्वसन्तं ध्यायन्तं अस्वस्थमिव कुञ्जरम् ॥ ३ ॥

नवः—नूतनः ग्रहः—ग्रहणं यस्य स तथा ॥ ३ ॥

राजा तु * रजसा [1] सूतं ध्वस्ताङ्गं समुपस्थितम् ।
अश्रुपूर्णमुखं दीनं उवाच परमार्तवत् ॥ ४ ॥

रजसा ध्वस्ताङ्गमिति । मार्गरजसेत्यर्थः । ध्वस्तानि—व्याकुलानि अङ्गानि यस्य । समुपस्थितं सूतं—सुमन्त्रं । † परमार्तवत्—परमदीनः सन् ॥ ४ ॥

‡ क्व नु वत्स्यति धर्मात्मा वृक्षमूलमुपाश्रितः ।
सोऽत्यन्तसुखितः, सूत ! किमशिष्यति राघवः ॥ ५ ॥

क्व नु प्रदेशे अशिष्यति—अश्नातीति यावत् ॥ ५ ॥

दुःखस्यानुचितो [2] दुःखं ! सुखार्हशयनोचितः ।
भूमिपालात्मजो भूमौ शेते कथमनाथवत् ॥ ६ ॥
यं यान्तमनुयान्ति स्म पदातिरथकुञ्जराः ।
स वत्स्यति कथं रामः विजनं वनमाश्रितः ॥ ७ ॥
व्यालैर्मृगैराचरितं कृष्णसर्पनिषेवितम् ।
कथं कुमारौ वैदेह्याः सार्धं वन[3]मुपस्थितौ ॥ ८ ॥
सुकुमार्या तपस्विन्या, सुमन्त्र ! सह सीतया ।
राजपुत्रौ कथं पादैः अवरुह्य रथात् गतौ ॥ ९ ॥

---

* रजसा ध्वस्ताङ्गं—धूसरिताङ्गं धूतं—कम्पितं—गो. † परमार्तवत्—परमार्तार्हं वच उवाच—ति. ‡ पादद्वयं भिन्न वाक्यम् । द्वितीयं वाक्यं काकुगर्भम् । अथ वा ‘क्व नु’ इत्यादि देशप्रश्नः । यद्वा—सद्यः वृक्षमूलमुपाश्रितः भविष्यति काले क्व नु वत्स्यति ? वृक्षमूलमुपाश्रितः किमशिष्यतीति वा अन्वयः ।

[1] धूतं—ङ. [2] नित्यं सुमन्त्र शय—ङ. [3] मुपाश्रितौ—च.

सिद्धार्थः खलु, सूत! त्वं येन दृष्टौ ममात्मजौ।
वनान्तं प्रविशन्तौ तौ अश्विनाविव[1] मन्दरम् ॥ १० ॥

अश्विनाविव मन्दरमिति। * मन्दरस्य कार्ष्ण्यमात्रात् वनसादृश्यम् ॥ १० ॥

किमुवाच वचो रामः किमुवाच च लक्ष्मणः।
सुमन्त्र! वनमासाद्य किमुवाच च मैथिली ॥ ११ ॥
आसितं शयितं भुक्तं, सूत! रामस्य कीर्तय।
जीविष्याम्यहमेतेन ययातिरिव साधुषु ॥ १२ ॥

आसितादयो भावे निष्ठाः। एतेनेति। आसनादिव्यापारश्रवणेनेत्यर्थः। ययातिरिव साधुष्विति। स्वर्गात् पतन् ययातिः 'मां साधुषु पातय' इतीन्द्रं प्रार्थयित्वा यथा साधुषु पतितः, † एवं स्वर्गतुल्यराज्यात् प्रभ्रष्टस्य साधूनामाश्रमेषु पतितस्य रामस्यासनादीनि कीर्तयेति योजना ॥ १२ ॥

---

* यद्वा—मन्दरं–मन्दमित्यर्थः। क्रियाविशेषणं चेदम्। अश्विनाविव सुन्दरौ तौ पद्भ्यां गमने अपरिचितौ मन्दं यथा तथा वनान्तं प्रविशन्तौ येन त्वया दृष्टौ–इत्यन्वयः ॥ रथाद् अवरुह्य पादैः गतौ—इति पूर्वश्लोककथनात्, सुन्दरपुरुषयोः, गजगमनयोः, रामलक्ष्मणयोः गमनसौन्दर्यं मनसा पश्यन् दशरथो वदति। यद्वा—'मन्दरः सैरिभः शक्रसदनं क दिवं नभः' इति त्रिकाण्डशेषात् अश्विनौ मन्दरं–स्वर्गमिवेत्यर्थः ॥
† अथ वा—स्वर्गात् भ्रष्टः ययातिः यथा साधुसंगमात् कथञ्चित् निर्वृतिं प्राप तथाऽहमपि रामकथाश्रवणात् जीवेयमित्यर्थः। ययातिकथा महाभारते (म. भा. आ.-82) श्रूयते—स्वसत्कर्मणा स्वर्गं प्राप्तं ययातिं इन्द्रः परीक्षार्थं—'केनासि तुल्यस्तपसा ययाते' इत्यपृच्छत्। ययातिस्तु गर्वात्—'नाहं देवमनुष्येषु गन्धर्वेषु महर्षिषु। आत्मनस्तपसा तुल्यं कञ्चित्पश्यामि वासव ॥' इत्यवदत्। एवं सर्वभूतावमाननात् 'पतितोऽस्यद्य राजन्' इतीन्द्रेणाभिहितः सः 'इच्छाम्यहं सुरलोकाद् विहीनः सतां मध्ये पतितुं देवराज' इति प्रार्थयामासेन्द्रम्, तथैव साधुसहवासं प्राप च ॥

[1] सुन्दरौ–ङ.

इति सूतो नरेन्द्रेण चोदितः सज्जमानया ।
उवाच वाचा राजानं स बाष्पपरि[1]रब्धया ॥ १३ ॥

सज्जमानया—षञ्ज सङ्गे, स्खलन्त्येति यावत् । स बाष्पेत्यत्र स इति पदं, सूतो विशेष्यम् ॥ १३ ॥

अब्रवीन्मां, महाराज! धर्ममेवानुपालयन् ।
अञ्जलिं राघवः कृत्वा शिरसाऽभिप्रणम्य च ॥ १४ ॥
* सूत! मद्वचनात् तस्य तातस्य विदितात्मनः ।
शिरसा वन्दनीयस्य [2]वन्द्य पादौ [3]महात्मनः ॥१५॥
सर्वमन्तःपुरं वाच्यं, सूत! मद्वचनात् त्वया ।
आरोग्यमविशेषेण यथार्हं चाभिवादनम् ॥ १६ ॥

अब्रवीदित्यादि । हे महाराज! राघवः धर्ममेवानुपालयन् भूत्वा त्वां प्रति मया वक्तव्यं सन्देशं अब्रवीत् । किमिति—हे सूत! मे अञ्जलिं—मामकमञ्जलिं मत्प्रतिनिधित्वेन राज्ञे कृत्वा, तथैव शिरसाऽभिप्रणम्य उच्यमानधर्मकस्य राज्ञः पादौ च मद्वचनाद्वन्द्य—रामोऽभिवादयते इति मत्प्रातिनिधित्वेनाभिवाद्य, अनन्तरं सर्वमन्तःपुरं त्वया मद्वचनात—'रामो वः सर्वा अविशेषेणारोग्यं पृच्छति' इति यथार्हमभिवादनं च वाच्यम् ॥ १६ ॥

माता च मम कौसल्या कुशलं चाभिवादनम् ।
† अप्रमादं च वक्तव्या ब्रूयाच्चैनामिदं वचः ॥ १७ ॥

---

* एतद्व्याख्यानरीत्या श्लोकद्वयमेकं वाक्यम् । वन्द्यौ इति पाठे तु भिन्नं वाक्यम् ।

† अप्रमादं—धर्मे भर्तरि च । अथ वा क्रियाविशेषणमिदम् ।

[1] बद्धया-ङ. [2] वन्द्यौ—ङ. [3] पुनःपुनः-ङ.

माता च विशिष्य कौसल्या कुशलादिकमभिवक्तव्या। इदं च—वक्ष्यमाणं एनां विशिष्य प्रब्रूयाः ॥ १७ ॥

धर्मनित्या यथाकालं अग्न्यगारपरा भव।
देवि! देवस्य पादौ च देववत् परिपालय ॥ १८ ॥

किं तत्? इत्यतः—धर्मेत्यादि ॥ १८ ॥

अभिमानं च मानं च त्यक्त्वा वर्तस्व मातृषु।
*अनु राजानमार्यां च कैकेयीमम्ब! कारय ॥ १९ ॥

अभिमानं च मानं चेति। 'गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः'। राममातृत्वप्रधानमहिषीत्वादिप्रयुक्तोऽहङ्कारः—अभिमानः; तत्प्रयुक्तो मानः—इतरतिरस्कारकश्चित्तविकारः। राजानमनु—राज्ञः पश्चात् कैकेयीं चार्यामेवाभिवादय ॥ १९ ॥

कुमारे भरते वृत्तिः वर्तितव्या च राजवत्।
†[1] अर्थज्येष्ठा हि राजानः, राजधर्ममनुस्मर ॥ २० ॥

भरते च राजवत् वृत्तिः वर्तितव्या—सम्पादनीया। कथमुभयमित्यतः—अर्थेत्यादि। हि- यस्मात् अर्थज्येष्ठाः सन्तो राजानो भवन्ति, अतः स्वपुत्रायार्थसिद्धिविषये वरबलेन देव्याः कैकेय्याः प्रवृत्तत्वात् भरतस्य च राजदत्तार्थज्यैष्ठ्याच्च तद्विषयवैमुख्यनिवृत्तये राजधर्ममनुस्मर ॥ २० ॥

---

* अनुगता राजा यस्यास्तां कैकेयीं हे अम्ब! आर्यां श्लाघ्यां कारय—ति. अन्विति तुल्यार्थे। राजानं कैकेयीं च तुल्यमनुवर्तस्व—गो. यद्वा—राजानं आर्यां कैकेयीं च अनुकारय—अनुसरेति यावत्। † जीवत्यपि दशरथे कैकेयीवरात् भरत एव खलु राजा। अतः दशरथे पतित्वानुगुणवर्तनं, भरते राजत्वानुगुणवर्तनं चोच्यते ॥

[1] अध्यज्येष्ठा—ङ. ञ.

* [1] भरतः कुशलं वाच्यः वाच्यो मद्वचनेन च ।
कुमारराज्ये जीव त्वं तस्यैवा[2]ज्ञाप्रवर्तनात् ॥ २१ ॥

भरतो मद्वचनेन कुशलं वाच्यः, राजा च मद्वचनात् वाच्यः। किमिति ?--हे राजन् ! राज्यस्य भरताय दत्तत्वात् त्वया कुमारराज्ये-भरतराज्ये त्वं तस्यैवाज्ञाप्रवर्तनात्--तदनुग्रहाय तस्यैवाज्ञां प्रवर्तयन् तद्धेतोरेव जीव। एवं पाङ्क्तं पाठं पश्यामः। अत्र † श्लोकत्रयं प्रक्षिप्तं अपरो ‡ व्याकरोत् ॥ २१ ॥

अब्रवीच्चापि मां भूयः भृशमश्रूणि वर्तयन् ।
§ मातेव मम माता ते द्रष्टव्या पुत्र[3]कर्शिनी ॥ २२ ॥

अब्रवीदित्यादि। भूयः पुनश्च भृशमश्रूणि वर्तयन् अब्रवीत्, किमिति--ते द्रष्टव्येति। 'कृत्यानां कर्तरि वा' इति षष्ठी, हे राजन् ! त्वया पुत्रकर्शिनी मम माता मातेव--राज्ञो भरतस्य मातेव द्रष्टव्या राज्यहीनाऽपि। अत्र 'कुमारराज्ये जीव त्वं'

---

* भरतः कुशलं वाच्यः, त्वयेति शेषः। वाच्यो मद्वचनेन च, मयोक्तमित्यपि वाच्य इत्यर्थः। यद्वा भरतो मद्वचनेन कुशलं वाच्यः। सर्वास्वेव मातृषु यथान्यायं वर्तस्वेति च वाच्यः इति द्वितीयवाच्यपदान्वयः--गो. † अत्र श्लोकद्वयमिति स्यात्। तौ च श्लोकावधस्तात् दत्तौ। तत्र--महाबाहुः--भरतः ! त्वं यौवराज्यस्थः सन् राज्यस्थं पितरमनुपालय। वृद्धं एनं राजानं न हिंस्याः। कुमारराज्ये--यौवराज्य एव स्थित्वा दशरथस्य आज्ञामेव प्रवर्तयन् जीव--इत्यर्थः। यद्यपि कौसल्यायै भरते राजवद्वृत्तिरुपदिष्टा। परन्तु सैव वास्तवोक्तिः, इयं तु भरताय हितोपदेशः। अत एव 'वक्तव्यश्च' इति विच्छित्तिः कृता ॥ ‡ गोविन्दराजः, तीर्थो वा। § ते मातेव मम माता--इति वाऽन्वयः। सुमन्त्रं प्रतीयमुक्तिः। भरताय वा।

[1] एतदनन्तरं 'सर्वास्वेव यथान्यायं वृत्तिं वर्तस्व मातृषु। वक्तव्यश्च महाबाहुः इक्ष्वाकुकुलनन्दनः ॥ पितरं यौवराज्यस्थः राज्यस्थमनुपालय। अतिक्रान्तवया राजा मा स्मैनं व्यवरोरुधः ॥' इत्यधिकं--ङ. [2] ज्ञां प्रवर्तयन्--ङ. च. [3] गर्धिनी--ङ. च.

इति पूर्ववाक्ये राज्ञः प्रकृतत्वात् राजानं प्रति मातृरक्षणवचनमिदं, उचितं च। अथ पूर्ववाक्येऽपि भरतस्यैव प्रस्तुततया व्याख्याने–इदमपि तं प्रत्येव वचनम्। भरतप्रस्तावतया व्याख्या तु—हे कुमार! त्वं तस्यैव–त्वद्यौवराज्यप्रदस्य राज्ञ एव राज्ये आज्ञाप्रवर्तनात् जीव, यावत्पितृशरीरमिति। अत्र तु—ते मातेव मम माता द्रष्टव्येति योजना। अर्थद्वयमप्यविरुद्धम् ॥ २२ ॥

इत्येवं मां, महाराज! ब्रुवन्नेव महायशाः।
रामो राजीवताम्राक्षः भृशमश्रूण्यवर्तयत् ॥ २३ ॥

*लक्ष्मणस्तु सुसंक्रुद्धः निश्वसन् वाक्यमब्रवीत्।
केनायमपराधेन राजपुत्रो विवासितः ॥ २४ ॥

† राज्ञा तु खलु कैकेय्या [1] लघु त्वाश्रित्य शासनम्।
कृतं कार्यमकार्यं वा वयं येनाभिपीडिताः ॥ २५ ॥

लघु शासनमिति। सुनिरासमिति यावत्। तदाश्रित्य यत् कृतं, तत् कार्यं कर्तुं योग्यं अयोग्यं वा भवतु, वयं पीडिता इत्यत्र न सन्देहः किल। ततो वयं येन पीडिताः तस्मिन् पितृत्वं नोपलक्षये इत्यग्रेण सम्बन्धः ॥ २५ ॥

---

* पूर्वं सुमन्त्रप्रतिनिवर्तने एवं लक्ष्मणवाक्याभावेऽपि अनेनैव तद् ऊह्यम्।

† येन विवासनेन वयमभिपीडिताः, तद्विवासनं अकार्यं तु–अकार्यमेव। राज्ञा तु कैकेय्याः लघु शासनमाश्रित्य कार्यं वा–कार्यमिव कृतं खलु। यद्वा लघु–तुच्छं कैकेय्याश्शासनमाश्रित्य अकार्यमेव कार्यं कृतम्–गो.

[1] सत्वमाश्रित्य–ङ.

यदि प्रव्राजितो रामः * लोभकारण[1]कारितः।
[2]वरदाननिमित्तं वा सर्वथा दुष्कृतं कृतम् ॥ २६ ॥

ननु कथमकृत्यशङ्का! राजकृतकार्यस्य सत्यपरिपालनमूलकत्वादित्याशंक्याह—यदीत्यादि। लोभकारणत्वेन कारितः—अङ्गीकृतः। वरदाननिमित्तं प्रव्राजित इति यद्युच्येत; तथाऽपि सर्वथा दुष्कृतमेव कृतम्, इदमनुचितमेव, तद्व्यतिरिक्तमेव वरयेति सुवचत्वात्। पतित्वेन भार्याशिक्षणे समग्राधिकारात्। अस्य प्रसङ्गस्य राज्यविषयकत्वेन मन्त्रिपुरोहिताद्यनुरोधेन कर्तव्यत्वान्न मयैकेनायमर्थः शक्यानुष्ठान इति सुवचत्वाच्च। अत्राप्येकमर्धं प्रक्षिप्य व्याकरोत् † ॥ २६ ॥

रामस्य तु परित्यागे न हेतुमुपलक्षये ॥ २७ ॥
असमीक्ष्य समारब्धं केवलं बुद्धिलाघवात्।
जनयिष्यति ‡ सङ्क्रोशं राघवस्य विवासनम् ॥ २८ ॥

यदेवं, अतः—रामस्य परित्यागे उक्तहेतुं च हेतुत्वेन नोपलक्षये। हेत्वाभासमेव पश्यामि। तस्मात् केवलं बुद्धिलाघवात् असमीक्ष्य—

---

* रामः प्रव्राजित इति यत्, एतत् लोभकारणकारितं वरदाननिमित्तं वा—कैकेय्याः प्रतिश्रुतवरदाननिमित्तं वा, सर्वथा दुष्कृतं कृतं; वरदानसमये वरद्वयस्य भरताभिषेकरामनिष्कासनरूपेण विनियोगाभावात्। लोभकारणनिमित्तमिति क्रियाविशेषणम्—**गो.**

† **गोविन्दराजः।** अर्धं तु अधस्तादुक्तम्। तच्चैवं व्याख्यातम्—रामपरित्यागहेतुं नोपलक्षये, किन्तु ईश्वरस्य कृते—स्वतन्त्रव्यापारे स्थितेन राज्ञेति शेषः, इदं रामप्रव्राजनं यथाकामं तावत्—यथेच्छमेव कृतम्। यद्वा इदं रामविवासनं ईश्वरस्य कृते—ईश्वरप्रयोजनाय यथाकामं कृतं—केवलमीश्वरप्रेरणेन शास्त्रमनवेक्ष्य कृतम्। (ईश्वरस्य कृते—ईश्वरत्वाद्धेतोः इति वा)। ‡ संक्रोशः—आक्रोशो वा।

[1] कारितम्—**सर्वत्र.** [2] **एतदनन्तरं ‘इदं तावद्यथाकामं ईश्वरस्य कृते (कृतौ) कृतम्’ इत्यधिकम्—ङ. च.**

उचितानुचितमनवेक्ष्य सर्वलोकविरुद्धं समारब्धं राघवस्य विवासनम्। तच्च तस्य, अस्माकं च सर्वेषां सङ्क्लेशं-दुःखं जनयिष्यति ॥ २८ ॥

अहं तावन्महाराजे पितृत्वं नोपलक्षये।
भ्राता भर्ता च बन्धुश्च पिता च मम राघवः ॥२९॥

तस्मादहं तावन्महाराजे पितृत्वं नोपलक्षये । 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ॥' इति शास्त्रेणेति शेषः। 'ज्येष्ठो भ्राता पितृसमः' इति न्यायेन धार्मिके ज्येष्ठ एव पित्रादिबुद्धिरित्याह--भ्रातेत्यादि। भर्ता-स्वामी ॥ २९ ॥

सर्वलोकप्रियं त्यक्त्वा सर्वलोकहिते [1] रतम्।
* सर्वलोकोऽनुरज्येत [2] कथं त्वाऽनेन कर्मणा ॥ ३० ॥

अन्यदप्याह—सर्वलोकेत्यादि। त्यक्त्वाऽवस्थितं त्वामनेन क्रूरेण कर्मणा हेतुना सर्वलोकः कथमनुरज्येत ॥ ३० ॥

सर्वप्रजाभिरामं हि रामं प्रव्राज्य धार्मिकम्।
सर्वलोकं विरुध्येमं कथं राजा भविष्यति ॥ ३१ ॥

यदेवं सर्वलोको विरुध्येत, तत् कथं राजा भविष्यति पिता। इत्यब्रवील्लक्ष्मण इति शेषः ॥ ३१ ॥

जानकी तु, महाराज! निश्वसन्ती मनस्विनी।
भूतोपहतचित्तेव विष्ठिता †[3] विस्मिता स्थिता ॥ ३२ ॥

---

* अनेन कर्मणोपलक्षितं त्वा–गो. पूर्वं सर्वलोकहिते रते त्वयि इदानीं रामं त्यक्त्वा स्थिते सति–ति. † विस्मृता—विस्मृतसर्वप्रयोजना–ति.

[1] रते–ङ. च. [2] कथं चानेन–ङ. च. [3] विस्मृता–च.

अदृष्टपूर्वव्यसना राजपुत्री यशस्विनी ।
तेन दुःखेन रुदती नैव मां किञ्चिदब्रवीत् ॥ ३३ ॥
उद्वीक्षमाणा भर्तारं मुखेन परिशुष्यता ।
मुमोच सहसा बाष्पं मां प्रयान्तमुदीक्ष्य सा ॥ ३४ ॥

तथैव रामोऽश्रुमुखः कृताञ्जलिः
*[1] स्थितोऽभवल्लक्ष्मणबाहुपालितः ।
तथैव सीता रुदती तपस्विनी
निरीक्षते राजरथं तथैव माम् ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे अष्टपञ्चाशः सर्गः

राज्ञः तव रथं—राजरथम् । मृग(३५)मानः सर्गः ॥ ३५ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे अष्टपञ्चाशः सर्गः

एकोनषष्टितमः सर्गः

[दशरथाक्रन्दः]

†[2] मम त्वश्वा निवृत्तस्य न प्रावर्तन्त वर्त्मनि ।
उष्णमश्रु प्रमुञ्चन्तः रामे संप्रस्थिते वनम् ॥ १ ॥

---

* अब्रवीत्—उक्तमिति शेषः—ति. † मम वर्त्मनि—गो.

[1] स्थितोऽब्रवीत्—च. [2] एतत्पूर्वं 'इति ब्रुवन्तं तं सूतं सुमन्त्रं मन्त्रिसत्तमं । ब्रूहि शेषं पुनरिति राजा वचनमब्रवीत् ॥ तस्य तद्वचनं श्रुत्वा सुमन्त्रो बाष्पविक्लबः । कथयामास भूयोऽपि रामसन्देशविस्तरम् ॥ जटाः कृत्वा महाराज चीरवल्कलधारिणौ । गङ्गामुत्तीर्य तौ वीरौ प्रयागाभिमुखौ गतौ ॥ अग्रतो लक्ष्मणो यातः पालयन् रघुनन्दनम् । अनन्तरं च सीताऽथ राघवो रघुनन्दनः ॥ तांस्तथा गच्छतो दृष्ट्वा निवृत्तोऽस्म्यवशस्तदा ।' इत्यधिकं—ङ.

एवं रामवृत्तान्तमुक्त्वा प्रत्यागतेन अनुभूयमानस्वदेशपुरवृत्तान्तमाह सुमन्त्रः—मम त्वित्यादि। न प्रावर्तन्तेति। यथापूर्वं रथवहने न उन्मुखा अभूवन् इत्यर्थः॥ १॥

उभाभ्यां राजपुत्राभ्यां अथ कृत्वाऽहमञ्जलिम्।
प्रस्थितो रथमास्थाय तद्दुःखमपि धारयन्॥ २॥
गुहेन सार्धं तत्रैव स्थितोऽस्मि दिवसान् बहून् *।
आशया यदि मां रामः पुनः शब्दापयेदिति॥ ३॥

बहूनिति। दिनत्रयमिति यावत्। किमर्थं तत्र स्थितमित्यत्राह—आशयेत्यादि। शब्दापयेत्—तत्समीपसञ्चरद्गुहमनुष्यमुखेनाकारयेदपि वेत्याशयेत्यर्थः। शब्दशब्दाण्णौ तत्कृतापुगन्तोऽप्ययमस्ति। अतोऽज्ञापयतीत्यादिवत् सिद्धम्॥ ३॥

विषये ते, महाराज![1] रामव्यसनकर्शिताः।
अपि वृक्षाः परिम्लानाः सपुष्पाङ्कुरकोरकाः॥ ४॥

ते विषये—तव देशे। पुष्पं—विकसितकुसुमम्। अङ्कुरः—शाखाग्रवर्तिपल्लवोद्भेदः। कोरकः—स्तबकः॥ ४॥

उपतप्तोदका नद्यः पल्वलानि सरांसि च।
परिशुष्कपलाशानि वनान्युपवनानि च॥ ५॥

पलाशं—पर्णम्॥ ५॥

---

* वनस्पतिमूले एकदिनं, भरद्वाजाश्रमे द्वितीयं, यमुनातीरे तृतीयं, चतुर्थे चित्रकूटप्रवेशः, पञ्चमे गुहचारैस्तत्सर्वनिवेदनं, षष्ठे सूतनिर्गमः। यद्वा द्वितीयदिने भरद्वाजाश्रमे रामस्य चित्रकूटगमनव्यवसायात् तृतीयदिने चारैर्निवेदनं, चतुर्थे सूतनिर्गमः—**गो.**

[1] महाव्यसन-ङ. च.

न च सर्पन्ति [1] सत्त्वानि व्याला न प्रचरन्ति च।
रामशोकाभिभूतं तत् निष्कूजमभवद्वनम् ॥ ६ ॥

निष्क्रान्तः कूजः–शब्दः यस्मात् तत्तथा ॥ ६ ॥

लीनपुष्करपत्राश्च, [2] नरेन्द्र! कलुषोदकाः।
सन्तप्तपद्माः पद्मिन्यः लीनमीन* विहङ्गमाः ॥ ७ ॥

लीनं–सङ्कुचितं पुष्करपत्रं–नलिनीदलं यासां तास्तथा ॥ ७ ॥

जलजानि च पुष्पाणि † माल्यानि स्थलजानि च।
नाद्य भान्त्यल्पगन्धीनि फलानि च यथापुरम् ॥ ८ ॥

स्थलजानि माल्यानि–पुष्पाणि। अल्पगन्धीनि, मत्वर्थीय इनिः ॥ ८ ॥

‡ [3] अत्रोद्यानानि शून्यानि प्रलीनविहगानि च।
न चाभिरामानारामान् पश्यामि, मनुजर्षभ! ॥ ९ ॥
प्रविशन्तमयोध्यां मां न कश्चिदभिनन्दति।
नरा राममपश्यन्तः निश्वसन्ति मुहुर्मुहुः ॥ १० ॥
देव! राजरथं दृष्ट्वा विना राममिहागतम्।
[4] दुःखादश्रुमुखः सर्वः राजमार्गगतो जनः ॥ ११ ॥

देव इति सम्बुद्धिः ॥ ११ ॥

हर्म्यैर्विमानैः प्रासादैः अवेक्ष्य रथमागतम्।
हाहाकारकृता नार्यः रामादर्शनकर्शिताः ॥ १२ ॥

---

* विहङ्गमाः हंसादयः। † 'माल्यं पुष्पे पुष्पदाम्नि' वैजयन्ती। ‡ उद्यानं–आक्रीडः। आरामः–कृत्रिमवनं–गो. स्वस्य नगरप्रवेशानन्तरदृश्यवर्णनाय व्युच्छित्तिविशेषसूचनाय 'अत्र' इत्युक्तं स्यात्।

[1] भूतानि–ङ. [2] नवश्च–ङ. च. [3] पुरोद्यानानि–ङ. [4] दूरादश्रु–ङ. च.

आयतैर्विमलैर्नेत्रैः अश्रुवेगपरिप्लुतैः ।
अन्योन्यमभिवीक्षन्ते व्यक्तमार्ततराः स्त्रियः ॥ १३ ॥

*नामित्राणां न मित्राणां उदासीनजनस्य च ।
अहमार्ततया किञ्चित् [1]विशेषमुपलक्षये ॥ १४ ॥

नामित्राणामित्यादि । अस्मदाद्यपेक्षयेति शेषः । न तु अमित्रकथासम्भवो रामस्य । कैकेय्यपि रामाभिषेकश्रुतौ प्रथमं भूषणं किल ददौ । सा तु पश्चादिन्द्रादिदैवहता । आर्ततयेति । स्थिताविति शेषः* ॥ १४ ॥

अप्रहृष्टमनुष्या च दीननागतुरङ्गमा ।
आर्तस्वरपरिम्लाना †विनिश्वसितनिस्स्वना ॥ १५ ॥

निरानन्दा, महाराज! रामप्रव्राजनातुरा ।
कौसल्या पुत्रहीनेव अयोध्या प्रतिभाति मे ॥ १६ ॥

पुत्रहीना—पुत्रवियुक्ता कौसल्येव ॥ १६ ॥

सूतस्य वचनं श्रुत्वा वाचा परमदीनया ।
बाष्पोपहतया राजा तं सूतमिदमब्रवीत् ॥ १७ ॥

---

*अमित्राणां, तवेति शेषः—गो. परन्तु ते यदि रामे नामित्राणि तर्हि आर्तत्वं युक्तमेव। किञ्च सर्वेषां रामगुणाकृष्टत्वेन तस्य शत्रुरेव नास्ति चेत्, तर्हि उदासीनो वा कश्चित् कथम्? अतो यथाश्रुतार्थ एव युक्तः। सन्त्येव सर्वत्र सर्वदा सत्वविद्वेषिणः, त्रिगुणात्मकत्वात् जगतः। तत्र मित्राणि सात्विकाः, उदासीनानि राजसाः, अमित्राणि तामसाः। अमित्रादयोऽप्यवशादेव आर्ता बभूवुरिति भावः। †विनिश्वसितनिस्स्वना। विगतं निश्वसितं यस्यामवस्थायां—मूर्छावस्थेत्यर्थः, तद्वत् निस्स्वना। मूर्छितेव निस्स्वनेति यावत्।

[1] विशेषं नोपलक्षये—ङ. च.

कैकेय्या विनियुक्तेन *पापाभिजनभावया ।
मया न मन्त्रकुशलैः वृद्धैः [1]सह समर्थितम् ॥ १८ ॥

सूतवचः श्रुत्वा इदानीं स्वाज्ञानमूलोऽनर्थ इति शनैर्बुध्यते—कैकेय्येत्यादि । विशेषण †स्वर्णापाकरणे नियोजितस्तथा । पापात्—अन्याय्यादेव अभिजने—अभिजायत इत्यभिजनः पुत्रः, तदर्थसम्पादने भावः—अभिप्रायो यस्यास्सा तथा । न समर्थितं—न विचारितम ॥ १८ ॥

न सुहृद्भिर्न चामात्यैः मन्त्रयित्वा न नैगमैः ।
मयाऽयमर्थः सम्मोहात् स्त्रीहेतोः सहसा कृतः ॥ १९ ॥

सहसा—द्राक् ॥ १९ ॥

‡भवितव्यतया नूनं इदं वा व्यसनं महत् ।
कुलस्यास्य विनाशाय प्राप्तं, सूत! यदृच्छया ॥२०॥

भवितव्यतया—अवश्यप्रापकदुरदृष्टवशादित्यर्थः । यदृच्छया—परवशतया ॥ २० ॥

§सूत! यद्यस्ति ते किञ्चित् [2]मया तु सुकृतं कृतम् ।
त्वं प्रापयाशु मां रामं प्राणाः सन्त्वरयन्ति माम् ॥२१॥

---

* अभिजनः-अभिजात इति पर्यायः । अभिजनभावः-आभिजात्यं-तदनुगुणः भावः—अभिप्रायः यस्यास्सा । तेन च पूर्वं ३५ सर्गे य उक्तः कैकेयीमातृवृत्तान्तः सुमन्त्रेण, स स्मार्यते । †स्व-ऋण-अपाकरणे—इति पदविभागः विग्रहे । ‡भवितव्यता नाम विधिः, अप्रतीकारा सा । यदृच्छा-शक्यप्रतीकाराऽपि बुद्धिदोषमवकाशं प्राप्य आगच्छन्ती । एवञ्च वाकारोऽपि स्वरस । §हे सूत ते—तुभ्यं मया किञ्चिदपि सुकृत—शोभनं कर्म उपकारादिकं कृतं यद्यस्ति, यदि त्वं मत्तः किञ्चिदप्युपकारं प्राप्तवान्, तर्हि मां तत्प्रतिफलतया रामं नय इति वाऽर्थः ।

[1] सूत सुमन्त्रितम्—ङ. [2] मयापि—ङ.

किञ्चिदिति। प्रियमिति शेषः। प्राणाः सन्त्वरयन्तीति। निष्क्रमितुमिच्छन्तीति यावत् ॥ २१ ॥

*यदि वाऽद्य ममैवाज्ञा निवर्तयतु राघवम् ।
न शक्ष्यामि विना रामं मुहूर्तमपि जीवितुम् ॥२२॥

यदि वा--अथ वा अद्य ममाज्ञा-छान्दसष्टायः पूर्वसवर्णना, आज्ञया, भवानद्य राघवं निवर्तयतु। ॥२२॥

अथ वाऽपि महाबाहुः गतो दूरं भविष्यति।
मामेव रथमारोप्य शीघ्रं रामाय दर्शय ॥२३॥

अथ रामनिवर्तनपक्षस्याशक्यत्वात् स्वनयनमेवाह—अथ वेत्यादि ॥२३॥

वृत्तदंष्ट्रो महेष्वासः क्वासौ लक्ष्मणपूर्वजः ।
यदि जीवामि साध्वेनं पश्येयं सीतया सह[1] ॥२४॥

यदि जीवामीति। तत्समीपगमनपर्यन्तमपि मज्जीवनस्थितौ सन्देह इत्यर्थः ॥२४॥

अतो नु किं दुःखतरं† योऽहमिक्ष्वाकुनन्दनम् ।
इमामवस्थामापन्नः नेह पश्यामि राघवम् ॥२५॥

'अतो नु' इत्यत्र अतःशब्दार्थः—इमामित्यादि ॥ २५ ॥

---

* अथ वा ममाज्ञैव रामं निवर्तयतु, राजाज्ञाया अनुल्लंघनीयत्वादित्याशयः। राजाज्ञा एवं वदतीत्यादिवत् प्रयोगः। † इक्ष्वाकुनन्दनं राघवमित्यन्वयः।

[1] एतदनन्तरं 'लोहिताक्षं महाबाहुं आमुक्तमणिकुण्डलम्। रामं यदि न पश्येयं गमिष्यामि यमक्षयम्॥' इत्यधिकं—ङ.

हा राम ! रामानुज हा !! हा वैदेहि तपस्विनि !!!
न मां जानीत दुःखेन म्रियमाणमनाथवत् ॥ २६ ॥

स राजा तेन दुःखेन * भृशमर्पितचेतनः ।
अवगाढः सुदुष्पारं शोकसागरमब्रवीत् ॥ २७ ॥

स राजा तेन दुःखेन भृशमर्पितचेतनः, अत एव गाढमग्नः सन् दुष्पारं शोकसागरं अब्रवीत्——इति कविवाक्यम् ॥ २७ ॥

रामशोकमहा[1]ऽभोगः सीताविरहपारगः ।
श्वसितोर्मिमहाऽऽवर्तः [2]बाष्पफेनजलाविलः ॥ २८ ॥

बाहुविक्षेपमीनौघः विक्रन्दितमहास्वनः ।
प्रकीर्णकेशशैवालः कैकेयीवडवामुखः ॥ २९ ॥

ममाश्रुवेगप्रभवः कुब्जावाक्यमहाग्रहः ।
† वरवेलो नृशंसायाः ‡ रामप्रव्राजनायतः ॥ ३० ॥

[3]यस्मिन् बत निमग्नोऽहं, कौसल्ये ! राघवं विना ।
दुस्तरो जीवता, देवि ! मयाऽयं शोकसागरः ॥ ३१ ॥

अथ किमब्रवीदित्यतः——रामशोकेत्यादि । शोकरूपः महान् आभोगः–वैपुल्यं यस्य स तथा । सीताविरहरूपं पारं गच्छतीति

---

* अर्पितचेतनः–गतचेतनः–ति. दुःखेन भृशं अर्पिता, व्याप्ता चेतना यस्य सः इति वा । † नृशंसाया यो वरः स एव वेला–‘अब्ध्यम्बुविकृतौ वेला कालमर्यादयोरपि’। ‡ रामप्रव्राजनमेव आयतं–आयामः–दैर्घ्यं यस्य स तथा–गो.

[1] वेगः–च. [2] बाष्पवेग–च. [3] तस्मिन्–ङ.

तथा ! कुब्जावाक्यमहाग्रह इत्यनेन कुब्जावाक्यादेवं प्रवृत्तिः कैकेय्या इति राज्ञाऽवगतमिति गम्यते । वरः वेला यस्य स तथा । *प्रव्राजनेति 'ण्यासश्रन्थो युच्' इति युच् ॥ ३१ ॥

† अशोभनं योऽहमिहाद्य राघवं
दिदृक्षमाणो न लभे सलक्ष्मणम् ।
इतीव राजा विलपन् महायशाः
पपात तूर्णं शयने स मूर्छितः ॥ ३२ ॥

इति विलपति पार्थिवे प्रणष्टे
करुणतरं ‡ द्विगुणं च रामहेतोः ।
वचनमनुनिशम्य तस्य देवी
भयमगमत् पुनरेव राममाता ॥ ३३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकोनषष्टितमः सर्गः

द्विगुणं भयमिति । पूर्वं— रामस्य वने किं भविष्यतीति भयं स्थितं, इदानीं भर्तुश्च काऽवस्था भविष्यतीति भयान्तरं च प्राप्तेत्यर्थः । श्लो(३३)मानः सर्गः ॥ ३३ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे एकोनषष्टितमः सर्गः

---

* अत्र तिलके 'यतो रामप्रव्राजनसमुद्रात् कालकूटमिव जातेति कतकः' इत्यनूद्यते । परं स्विदं मातृकायां नोपलक्ष्यते । एतद्दृष्ट्या यतः रामप्रव्राजना—इति अन्वय । † सलक्ष्मणं राघवं दिदृक्षमाणोऽपि त न लभे इति यत् तदशोभनं । इतरेऽयेवार्थे ।
‡ पूर्वं २०तमसर्गे 'अत्यन्तं निगृहीताऽस्मि' (श्लो. ४२) इत्यादिना रामविवासे स्वस्या भयं प्रकटितं कौसल्यया । रामविवासे निर्णीते च दशरथमेवावलम्बनं मन्यमानायाः कौसल्यायाः तस्यापि पतनशंकया द्विगुणं भयमित्युक्तम् ।

षष्टितमः सर्गः

[कौसल्यासमाश्वासनम्]

ततो *भूतोपसृष्टेव वेपमाना पुनः पुनः ।
धरण्यां गतसत्त्वेव कौसल्या सूतमब्रवीत् ॥ १ ॥

अथ भर्तुर्दुर्दशापत्तिभीतायाः कौसल्यायाः सुमन्त्रेणाश्वासनम् । तत इत्यादि । गतसत्त्वेव—गतप्राणेव । 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' ॥ १ ॥

नय मां यत्र काकुत्स्थः सीता यत्र च लक्ष्मणः ।
तान् विना क्षणमप्यत्र जीवितुं नोत्सहे ह्यहम् ॥ २ ॥
निवर्तय रथं शीघ्रं दण्डकान् नय मामपि ।
अथ तान् नानुगच्छामि गमिष्यामि यमक्षयम् † ॥ ३ ॥
बाष्पवेगोपहतया स वाचा सज्जमानया ।
इदमाश्वासयन् देवीं सूतः प्राञ्जलिरब्रवीत् ॥ ४ ॥
त्यज शोकं च मोहं च संभ्रमं दुःखजं तथा ।
व्यवधूय च सन्तापं वने [1]वसति राघवः ॥ ५ ॥
लक्ष्मणश्चापि ‡रामस्य पादौ परिचरन् वने ।
आराधयति धर्मज्ञः परलोकं जितेन्द्रियः ॥ ६ ॥

रामस्य पादौ आराधयति । किमर्थम् ? परलोकमुद्दिश्य ॥ ६ ॥

---

* भूतोपसृष्टेव—भूतगृहीतेव धरण्यां पतिता कौसल्या इत्यन्वयः । † यमक्षयं गमिष्यामीति कौसल्या सूतमब्रवीत् इति पूर्वेण (श्लो. 2) अन्वयः । ‡ रामस्य पादौ परिचरन् परलोकं आराधयति-संपादयति—गो. ति.

[1] वत्स्यति—ङ.

विजनेऽपि वने सीता वासं प्राप्य गृहेष्विव ।
विस्रंभं लभतेऽभीता रामे सन्न्यस्तमानसा ॥ ७ ॥
नास्या दैन्यं कृतं किञ्चित् सुसूक्ष्ममपि [1]लक्षये ।
उचितेव प्रवासानां वैदेही प्रतिभाति [2]मे ॥ ८ ॥

कृतमिति । वनवासकृतमिति यावत् ॥ ८ ॥

नगरोपवनं गत्वा यथा स्म रमते पुरा ।
तथैव रमते सीता निर्जनेषु वनेष्वपि ॥ ९ ॥
बालेव रमते सीता *बालचन्द्रनिभानना ।
†रामा रामे [3]ह्यधीतात्मा [4]विजनेऽपि वने सती ॥ १० ॥

बालेवेति दुःखापरिज्ञाने दृष्टान्तः । न तस्या आधिजदुःखमस्ति, अप्ररूढदेहाभिमानत्वात् । राम एव आरामः–रामारामः, तस्मिन् ह्यधीतं—अधिपूर्वादिणो निष्ठा—प्रतिष्ठितः आत्मा–अन्तःकरणं यस्याः सा तथा, डाबुभाभ्यामिति डाप् । [4]विजनेऽपि वने रमत इत्यनुकर्षः ॥ १० ॥

तद्गतं हृदयं ह्यस्याः तदधीनं च जीवितम् ।
‡अयोध्याऽपि भवेत्तस्याः रामहीना तथा वनम् ॥ ११ ॥

तथा रमणे हेतुः—तद्गतमित्यादि ॥ ११ ॥

---

* ' अबालचन्द्रनिभानना ' इति च्छेदः–ति. गो. दर्शोत्तरदिनवर्तिनः कलामात्रावशिष्टस्य चन्द्रस्य मुखदृष्टान्तत्वानुपपत्तेः तथा व्याख्यातम् । वस्तुतस्तु बालचन्द्रशब्दः नात्र दर्शोत्तरदिनचन्द्रविषयः, किन्तु बालार्क इत्यादिवत् उदयकालिकचन्द्रविषयः । एवञ्च पौर्णम्यामेव आह्लादकरत्वातिशयवैपुल्यादिगुणविवक्षया बालचन्द्रनिभाननेत्युक्तम् । † रामा इति पृथक्पदं—रामे–अधीनात्मा–आसक्तचित्तेत्यर्थः–गो. ‡ रामहीना अयोऽध्यापि तस्याः सीताया वनं भवेदित्यन्वयः ।

[1] लक्ष्यते- च. [2] मा–ङ. [3] ह्यधीनात्मा–ङ. ह्यदीनात्मा–च. [4] निर्जने–ङ.

[1] पथि पृच्छति वैदेही ग्रामांश्च नगराणि च ।
गतिं दृष्ट्वा नदीनां च पादपान् विविधानपि ॥ १२ ॥
रामं वा लक्ष्मणं वाऽपि [2] दृष्ट्वा जानाति जानकी ।
* अयोध्याक्रोशमात्रे तु विहारमिव संश्रिता ॥ १३ ॥

अयोध्यायाः क्रोशमात्रं तथा, तस्मिन् । अतीते इति शेषः ॥

† इदमेव स्मराम्यस्याः सहसैवोपजल्पितम् ।
कैकेयीसंश्रितं वाक्यं नेदानीं प्रतिभाति मा ॥ १४ ॥

---

* अयोध्याया अतिसमीपे विद्यमानमुद्यानं संश्रितेव सीता निर्भया वर्तत इति भावः । † कैकेयीनिन्दारूपं सीतयोक्तं वचनं, कौसल्यायाः प्रियं स्यादिति मत्वा तदुक्तुमुपक्रम्य तस्यानर्थपर्यवसानं स्मरन् तस्मादुपरतोऽभूत्सुमंत्रः । ननु तादृशमत्यन्तगोपनीयं, कैकेयीनिन्दारूपमपि कौसल्यायाः दुःखकरं वाक्यं किं स्यादिति शङ्कायां—अत्र गोविन्दराजः—उत्तरत्र 'कच्चित् सकामा कैकेयी सुखिता सा भविष्यति । या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी' 'यदभिप्रेतमस्मासु प्रियं वरवृतं च यत् । कैकेय्यास्तत्सुसंवृत्तं क्षिप्रमद्यैव लक्ष्मण' इत्यादिरामवचनस्य, 'सकामा भव कैकेयि हतोऽयं कुलनन्दनः' इत्यादिसीतावचनस्य च पर्यालोचनेन अयमर्थः प्रतीयते । भरताभिषेकवरणमात्रेणैव स्वाभीष्टसिद्धेः कैकेयी किमर्थं रामप्रवासनमवृणीत ? तथा वरयन्त्याः कैकेय्या अयमाशयः स्यात्—'भरतराज्यप्राप्तिमात्रं नालं, यतः रामगुणपरवशो लोकः क्षुभितो भवेत् । अतो रामविवासनमावश्यकम् । कतिपयवर्षानन्तरं रामस्य वनात्प्रतिनिवर्तनेऽपि भरतस्य राज्यं नश्येत् । अतः रामविवासने, सीताऽपि तं नूनमनुगच्छेत् ; तथा चारण्ये नूनं रामो विपन्नो भवेत्, एवं रामस्य पुनरावृत्तिरसंभाविनी' इति । एवं छद्मनैव कैकेय्या रामविवासनं कृतमिति रामसीतादिभिरप्यवगतमेवेति पूर्वोक्तवचनैः ज्ञायते । एतदनुगुणैव सीतावचनमपि पूर्वं स्यात् । अत एव पूर्वं 'जानकी तु महाराज' (५८–३४) इत्यादि । एवं रामप्रतिनिवृत्तिः सन्दिग्धेति गङ्गायमुनावटवृक्षादिप्रार्थनयाऽपि ज्ञायते । एतादृशभावानुवादकसीतावाक्यस्य इदानीं कौसल्यासमीपे कथनं तस्या अपि भयजनकं स्यादिति मत्वा सुमन्त्रः निह्नुतवान् इति ज्ञायते—इत्याह । अधिकं गोविन्दराजीय एव द्रष्टव्यम् ।

[1] परि—च. [2] पृष्ट्वा—ङ.

अथ सीतायाः परमदुःखकारिणीं कैकेयीं प्रति सीता किं ब्रुवाणा तिष्ठति? कृष्णकंसादिवदतिवैरप्रसङ्गस्यावश्यकत्वादित्यपेक्षायामाह—इदमित्यादि। अस्याः सीतायाः सहसैव—द्रागेव यदुपजल्पितमभूत् कैकेयीविषयकं—इदं स्माराम्येव। अथापि कैकेयीसंश्रितं तद्विषयवाक्यं मां प्रति नेदानीं प्रतिभाति। पथि गच्छता पक्ष्यादिशब्दवदनादरतः निर्विकल्पकज्ञानमात्रस्यैव वृत्तत्वतः संस्कारदार्ढ्याभावात् तत्स्मृत्यभाव इत्यर्थः॥ १४॥

ध्वंसयित्वा तु तद्वाक्यं प्रमादात् पर्युपस्थितम्।
ह्लादनं वचनं सूतो देव्या मधुरमब्रवीत्॥ १५॥

एवञ्च 'न ब्रूयात् सत्यमप्रियम्' इति न्यायेन 'सकामा भव कैकेयि' इत्यादिकं सीतावचनं दुःखकालीनं दुःखहेतुत्वादेव नोदाजहारेत्याह कविः—ध्वंसयित्वेत्यादि। प्रमादात्-विस्मरणात् आगतं तद्वाक्यं ध्वंसयित्वा—प्रच्छाद्य देव्याः ह्लादनं मधुरं वचोऽब्रवीत्॥ १५॥

अध्वना वातवेगेन संभ्रमेणातपेन च।
न विगच्छति वैदेह्याः चन्द्रांशुसदृशी प्रभा॥ १६॥
सदृशं शतपत्रस्य पूर्णचन्द्रोपमप्रभम्।
वदनं तद्वदान्यायाः वैदेह्या न विकम्पते॥ १७॥

'शतपत्रं कुशेशयम्'—पद्मम्॥ १७॥

*अलक्तरसरक्ताभौ अलक्तरसवर्जितौ।
अद्यापि चरणौ तस्याः पद्मकोशसमप्रभौ॥ १८॥

अलक्तरसरक्ताभौ, पूर्वमिति शेषः॥ १८॥

---

* अलक्तरसवर्जितावपि अलक्तरसवत् रक्ताभौ इति वा अर्थः।

* नूपुरो[1]त्कृष्टहेलेव खेलं गच्छति भामिनी।
इदानीमपि वैदेही [2]तद्रागान्न्यस्तभूषणा ॥ १९ ॥

नूपुरेण—तद्ध्वनिना उत्कृष्टा—तिरस्कृता हेला—हंसादिलीलागमनं यया सा तथा। सखेलं—सविलासम्। तद्रागात्—भर्तृप्रीतिप्रयोजकभूषणानुरागात् अन्यस्तानि—अत्यक्तानि भूषणानि यया सा तथा ॥

गजं वा वीक्ष्य सिंहं वा व्याघ्रं वा वनमाश्रिता।
नाहारयति संत्रासं बाहू रामस्य संश्रिता ॥ २० ॥

आहारयति- संप्राप्नोति। एवं सर्वत्रात्र 'कोपमाहारयत्' इत्यादौ ॥ २० ॥

न शोच्यास्ते न † [3]चात्मा ते शोच्यो नापि जनाधिपः।
इदं हि चरितं लोके प्रतिष्ठास्यति शाश्वतम् ॥ २१ ॥

यदेवं, अतः ते—रामादयो न शोच्याः। अत एव आत्मा ते—तावकोऽपि न शोच्यः। तेषां सुखश्रवणेन जनाधिपोऽपि जीविष्यतीति सोऽपि न शोच्यस्त्वया। इतश्च न शोचनीयांश इत्याह—इदं हीत्यादि। प्राप्तमपि राज्यं महाबलोऽपि परित्यज्य पितृवचनमपालयदिति, तथा स्वार्थमुद्दिश्य भर्तारमपि परित्यज्यातिघोरं कृतवती कैकेयीति कीर्त्यपकीर्तिरूपं युष्माकं चरितं लोके प्रतिष्ठास्यति। अतो युष्माकं अतः परमभ्यधिकं श्रेयश्च। अतो न शोचनीयमित्यर्थः ॥ २१ ॥

---

* तद्रागात्--नूपुरविषयस्नेहात् न्यस्तभूषणा—चरणाद्यवयवेष्वर्पितभूषणा नूपुरोत्पन्नस्वनानुकारिलीलायुक्तेव, खेलं—सलीलं गच्छति। ...... यद्वा तद्रागात्—रामेण सहागमनकौतुकात् न्यस्तभूषणा—उत्सृष्टनूपुराऽपि नूपुरोत्कृष्टहेलेव—नूपुरसञ्जितविलासेव—**गो.** तद्रागेण—भर्तृप्रीतिप्रयोजकभूषणानुरागेण अन्यस्तानि—अत्यक्तानि भूषणानि यया—**ति.**

† आत्मानः—वयं—**गो.**

[1] द्रुष्ट—ङ. [2] तद्रागान्न्यस्त—ङ. [3] चात्मानः—ङ.

विधूय शोकं परिहृष्टमानसाः
 महर्षियाते पथि सुव्यवस्थिताः ।
[1]वने रता वन्यफलाशनाः पितुः
 शुभां प्रतिज्ञां [2]परिपालयन्ति ते ॥ २२ ॥

तथाऽपि सूतेन सुयुक्तवादिना
 निवार्यमाणा सुतशोककर्शिता ।
न चैव देवी विरराम कूजितात्
 प्रियेति पुत्रेति च राघवेति च ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे षष्टितमः सर्गः

तथापीति । अतः सूतोक्तं युक्तमिति गृहीतवत्यपीत्यर्थः । न विररामेति । प्रत्यक्षदुःखप्राबल्यादिति शेषः । गिरि(२३)मानः सर्गः ॥ २३ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे षष्टितमः सर्गः

एकषष्टितमः सर्गः

[दशरथोपालंभः]

वनं गते धर्मपरे रामे रमयतां वरे ।
कौसल्या रुदती [3]साऽऽर्ता भर्तारमिदमब्रवीत् ॥ १ ॥

अथ कौसल्या, स्वस्यां स्वपुत्रे च परमप्रेमवन्तं अथापि सत्यवशात् अचिन्तितोपस्थितत्यागं अत एव राजनि दोषाभावं च

---

[1] वनेचरा–ङ. [2] प्रतिपाल–ङ. च. [3] स्वार्ता–ङ.

अन्तर्ज्ञात्वाऽपि दुःखातिशयाल्लौकिकाश्रयेण राजानमुपालभते । वनं गत इत्यादि । सा—कौसल्या आर्ता—खिन्ना सती ॥ १ ॥

*यद्यपि त्रिषु लोकेषु प्रथितं ते महद्यशः ।
सानुक्रोशो वदान्यश्च प्रियवादी च राघवः ॥ २ ॥

इति ते महद्यशः प्रसिद्धमिति योजना ॥ २ ॥

कथं, नरवरश्रेष्ठ ! पुत्रौ तौ सह सीतया ।
दुःखितौ सुखसंवृद्धौ वने दुःखं सहिष्यतः ॥ ३ ॥

अथापि हे नरवरश्रेष्ठ ! राघवः—रघुकुलजः स त्वं सीतया सह तौ पुत्रौ कथं त्यक्तवानिति शेषः । कथं सहिष्यत इत्यनुकृष्य योजना ॥ ३ ॥

सा नूनं तरुणी श्यामा सुकुमारी सुखोचिता ।
कथमुष्णं च शीतं च मैथिली प्रसहिष्यते ॥ ४ ॥
भुक्त्वाऽशनं विशालाक्षी सूप†दंशान्वितं शुभम् ।
वन्यं नैवारमाहारं कथं सीतोप[1]भोक्ष्यते ॥ ५ ॥

सूपदंशान्वितं—शुभव्यञ्जनान्वितम् । नैवारं—नीवारसम्बन्धि ॥

---

* 'प्रथितं' इत्यनेन पूर्वतनत्वं, तेन एवं कीर्तिं संपाद्यापि कथमिदानीमिदमकार्यं कृतमिति च सूचितम् । अथ वा रामप्रव्राजनस्य वृत्तत्वात्, तेन स्वसत्यप्रतिज्ञत्वस्य प्रकटितत्वाच्च । 'भवद्यशः प्रथितं, परन्तु तौ क्लेशं कथं सहिष्यतः? भवद्यशसः कृते तौ त्वया नाशितौ किल' इत्यर्थः ॥ † दंशः—उपसेचनम् ।

[1] भोक्ष्यति—ङ.

गीतवादित्रनिर्घोषं श्रुत्वा शुभ[1]मनिन्दिता ।
कथं क्रव्यादसिह्मानां शब्दं श्रोष्यत्यशोभनम् ॥ ६ ॥
* महेन्द्रध्वजसङ्काशः क्व नु शेते [2] महाभुजः
भुजं परिघसङ्काशं उपधाय महाबलः ॥ ७ ॥

महेन्द्रध्वजो नाम इन्द्रधनुः, ध्वजाकारेण कदाचित् परमाभ्युदयनिमित्तत्वेन प्रतिभाति ॥ ७ ॥

पद्मवर्णं सुकेशान्तं पद्मनिश्वासमुत्तमम् ।
कदा द्रक्ष्यामि रामस्य वदनं पुष्करेक्षणम् ॥ ८ ॥

पद्मवर्णं—नलिनीदलश्यामवर्णम् ॥ ८ ॥

वज्र[3]सारमिदं नूनं हृदयं मे न संशयः ।
अपश्यन्त्या न तं यद्वै [4] फलतीदं सहस्रधा ॥ ९ ॥

वज्रसारं—वज्रवत् कठिनम् । न फलति—न विशीर्यते; ञिफला विशरणे ॥ ९ ॥

† यत् [5] त्वया करुणं कर्म व्यपोह्य मम बान्धवाः ।
निरस्ताः परिधावन्ति सुखार्हाः कृपणा वने ॥ १० ॥

त्वया व्यपोह्य—मन्त्रिवृद्धादिभिस्सहाविचार्य यत् करुणं—शोचनीयं कर्म—अनुचितवरदानरूपं कृतं; तेन हेतुना मम बान्धवाः कैकेय्या निरस्ताः वने परिधावन्ति ॥ १० ॥

---

* इन्द्रधनुर्वत् प्रियदर्शनः । † त्वया निरस्ता मम बान्धवाः रामादयः व्यपोह्य—नगरं त्यक्त्वा वने परिधावन्तीति यत् एतत् अकरुणं कर्म—करुणाराहित्येन कृतं कर्मेत्यर्थः—**गो.** यद्वा, करुणं कर्म व्यपोह्य—वर्जयित्वा—अकृत्वेति यावत्; मम बान्धवाः यत् निरस्ताः त्वया, सुखार्हास्ते कृपणाः वने परिधावन्तीत्यन्वयः ।

[1] समन्विता—**च.** [2] सहानुजः—**ङ.** [3] सारमयं—**ङ. च.** [4] दलतीदं—**ङ.**
[5] त्वयाऽकरुणं—**ङ.**

*यदि पञ्चदशे वर्षे राघवः पुनरेष्यति ।
जह्यात् राज्यं च कोशं च भरतेनो[1]पभोक्ष्यते ॥ ११ ॥

भवतु चतुर्दशवर्षपर्यन्तं वनवासः; पश्चाद्राज्यं भविष्यतीत्याशंक्य, पश्चादपि न तत्प्राप्तिप्रसङ्गो रामस्येत्याह—यदीत्यादिना । पञ्चदशे वर्षे मातृप्रत्याशया यद्यपि राघवः आगमिष्यतीति संभावितम्, अथापि भरतोऽपि भ्रातृस्नेहात् न्यायतो वा सलक्ष्मणात् रामात् भीत्या वा राज्यैकदेशं वा तथा कोशं च जह्याद्यदि—तत्संभावनायामपि, यतः तावत्पर्यन्तं भरतेनोपभोक्ष्यते, अतः कनीयसा भुक्तं कथं नावमंस्यते इति अग्रेण (१५ श्लो.) सम्बन्धः ॥ ११ ॥

भोजयन्ति किल श्राद्धे केचित् स्वानेव बान्धवान् ।
ततः पश्चात् [2]समीक्षन्ते कृतकार्या द्विजर्षभान् ॥ १२ ॥
तत्र ये गुणवन्तश्च विद्वांसश्च द्विजातयः ।
न पश्चात्तेऽभिमन्यन्ते सुधामपि सुरोपमाः ॥ १३ ॥

वयोगुणादिकनीयसा भुक्तशेषस्य वयोगुणादिश्रेष्ठास्वीकारे दृष्टान्तमाह—भोजयन्तीत्यादि । यथा किल केचित् द्विजातयः प्रथमं वयोगुणाधिकान् द्विजातीन् श्राद्धे निमन्त्र्य, पश्चात् स्वीयेषु वयोगुणहीनेष्वपि बान्धवेषु आगतेषु स्वानेव बान्धवान् श्राद्धे †बहुदक्षिणेन भोजयन्ति—भोजयन्तो दृश्यन्ते; ततः पश्चात् स्वीयैः श्राद्धकर्मनिर्वर्तनानन्तरं कृतकृत्याः सन्तः प्राङ्निमन्त्रितानिष्टपङ्क्तौ भोजनार्थं समीक्षन्ते—गवेषयन्ते यदा, तदा तत्र प्राङ्निमन्त्रितेषु ये गुणवन्तः-श्राद्धापेक्षित-

---

*यस्मात् इदानीं भरतेनोपभुज्यते, अतः जह्यात् । अथवा—जह्यात् राज्यं च कोशं चेत्येतत् भरते नोपलक्ष्यते—न संभाव्यते । रूढमूलः भरतः न जह्यादित्यर्थः ॥

† परेभ्यः एतादृशदक्षिणादानमनिच्छन्तः लोभात् स्वीयानेव भोजयन्तीत्यर्थः ।

[1] पभुज्यते, पलक्ष्यते—ङ.   [2] समीहन्ते—ङ.

गुणवन्तः धर्मशास्त्रज्ञविद्वांसः द्विजातयः पश्चात्पङ्क्तौ सुधामपि—तथा स्वाद्वन्नमपि सुरोपमास्ते ब्राह्मणा नानुमन्यन्ते ॥ १२–१३ ॥

ब्राह्मणेष्वपि [1] तृप्तेषु पश्चात् भोक्तुं द्विजर्षभाः ।
नाभ्युपैतुमलं प्राज्ञाः * शृङ्गच्छेदमिवर्षभाः ॥ १४ ॥

ननु कुतो नानुमन्यन्ते? ब्राह्मणशेषभोजने शूद्रशेषवत् दोषाभावात्, इत्यत्राह—ब्राह्मणेष्वित्यादि । † पूर्वतृप्तेषु ब्राह्मणेषु सत्स्वपि द्विजर्षभाः—वयोगुणाधिकाः द्विजश्रेष्ठाः पश्चात् भोक्तुमिच्छां अभ्युपैतुं नालं—न समर्थाः—नेच्छन्तीति यावत् । कुत इत्यतः—प्राज्ञा इत्यादि । ऋषभाः शृङ्गच्छेदमिव निजावमानं प्राज्ञाः—'प्रे दाज्ञः' इति कर्मण्यण्, अतो नानुमन्यन्ते ॥ १४ ॥

एवं कनीयसा भ्रात्रा भुक्तं राज्यं, विशांपते !
भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं [2] नावमंस्यते ॥ १५ ॥

अथ दार्ष्टान्तिके योज्यते—एवमित्यादि । विशांपते—प्रजानाथ ! ज्येष्ठो वयसा, अतिशयेन गुणैरुरुः—वरिष्ठः; 'प्रियस्थिर–' इत्यादिना उरोः वरादेशः । किमर्थं नावमंस्यते—सर्वथा अवमंस्यत एव । ततश्चागतोऽपि कृशश्रोत्रियद्विजवदेव मज्जीवनपर्यन्तमिहावस्थास्यते इत्युक्तं भवति ॥ १५ ॥

न परेणाहृतं भक्ष्यं व्याघ्रः खादितुमिच्छति ।
एवमेव नरव्याघ्रः ‡ [3] परालीढं न मंस्यते ॥ १६ ॥

---

* यद्वा—शृङ्गं–अग्रं, शृङ्गे छेदः यस्य तत् शृङ्गच्छेदं—छिन्नाग्रं तृणम् । यथा वृषभाः वृषभान्तरजग्धाग्रं तृणं भोक्तुं नालं तद्वदित्यर्थः । शृङ्गच्छेदमिति वृषभक्षिताग्रतृणनामेत्यप्याहुः–गो. † पूर्वं तृप्तानां ब्राह्मणत्वेऽपीत्यर्थः । ‡ परालीढं–इतरास्वादितम् ।

[1] भुक्तेषु–ङ, वृत्तेषु भुक्तशेषं–च. [2] नावमन्यते–च. [3] परलीढं–ङ.

पुनरपि दृष्टान्तविशेषैः उक्त एवार्थः स्थाप्यते—न परेणेत्यादि।
* आहृतमिति। क्रोष्ट्रादिस्वादितशेषमित्यर्थः ॥ १६ ॥

हविराज्यं पुरोडाशः † कुशा यूपाश्च खादिराः।
नैतानि यातयामानि कुर्वन्ति पुनरध्वरे[1] ॥ १७ ॥

नैतानीत्यादि। एतानि हविरादीनि एकस्मिन् अध्वरे विनियोगेन यातयामानि पुनरध्वरे—अध्वरान्तरे विनियुक्तानि यथा न कुर्वन्ति, तथा ह्यन्येनात्तमिदं राज्यं रामो नाभिमन्तुमलम्। यद्यपि 'मन्त्राः कृष्णाजिनं दर्भाः' इत्यादिस्मृत्या दर्भविशेषाणां कुशानामयातयामत्वं सामान्यतः प्राप्तम्; अथापि महाध्वरविनियुक्तानामध्वरान्तरे विनियोगो निषिद्ध एव। 'ब्रह्मयज्ञे तु ये दर्भा विनियुक्ता न तेऽन्यतः' इतिवन्निषेधोऽस्मादेव वचनात् सिद्धः कुशानामपि ॥ १७ ॥

नैवंविधमसत्कारं राघवो मर्षयिष्यति।
बलवानिव शार्दूलः ‡ वालधेरभिमर्शनम् ॥ १८ ॥

वालधिः—वालकाण्डः ॥ १८ ॥

नैतस्य सहिता लोकाः भयं कुर्युर्महामृधे।
अधर्मं त्विह धर्मात्मा लोकं[2] धर्मे तु योजयेत् ॥ १९ ॥

शार्दूलवत् बलवत्त्वमेव दर्शयति—नैतस्येत्यादि। सहिताः—देवासुरसहिता लोकाः—प्रतियोधाः। अपि च न केवलं देहबलमात्रं,

---

* अत्र मातृकायां 'इदमिति' इति प्रतीकं दृश्यते। परन्तु तादृशपाठस्य मूलेऽदर्शनात् औचित्याच्च एवं निवेशितम्। † 'मन्त्राः कृष्णाजिनं दर्भाः' इत्याद्ययातयामत्वबोधकवचनेषु दर्भादिशब्दाः कुशादिव्यतिरिक्तपराः—गो. ‡ केशविशिष्टो वालः वालधिरिति केचित्।

[1] एतदनन्तरं—'तथा ह्यात्तमिदं राज्यं हृतसारां सुरामिव। नाभिमन्तुमलं रामः नष्टसोममिवाध्वरम् ॥ न चेमां धर्षणां रामः संगच्छेदत्यमर्षणः। दारयेन्मन्दरमपि स हि क्रुद्धः शितैः शरैः ॥ त्वां तु नोत्सहते हन्तुं महात्मा पितृगौरवात्। ससोमार्कग्रहगणं नभस्तारविचित्रितम् ॥ पातयेद्यो दिवं क्रुद्धः स त्वां न व्यतिवर्तते। प्रक्षोभयेद्दारयेद्वा महीं शैलशताचिताम् ॥' इत्यधिकं—ङ. [2] धर्मेण—ङ.

धर्मबलमपीत्याह--अधर्ममित्यादि। अधर्मं–अधर्मप्रवृत्तं लोकमपि धर्मे तु योजयेत्; किमु तस्य धर्मनिष्ठतायाम् ॥ १९ ॥

नन्वसौ काञ्चनैर्बाणैः महावीर्यो महाभुजः।
युगान्त इव भूतानि सागरानपि निर्दहेत् ॥ २० ॥

महाबलत्वञ्चानुभवसिद्धमेवास्यापीत्याह–नन्वित्यादि। काञ्चनैः–काञ्चनरुषितपुङ्खैः। युगान्तः–तत्कालः ॥ २० ॥

स तादृशः सिंहबलः वृषभाक्षो नरर्षभः।
स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥ २१ ॥

तर्हि तादृशः कथं राज्यं न गृह्णाति स्वबलादेवेत्यत्राह—स तादृश इत्यादि। त्वया स्वयं स्वपुत्रो हतः–भ्रष्टराज्यः कृतः। तेन तु धर्मप्रधानत्वात् त्वद्वचनात् बलात्कारो न क्रियते। पुत्रः पित्रा हत इत्यत्र दृष्टान्तः—जलजेनेत्यादि। जलजः—मत्स्यः, स यथा आत्मजानेव भक्षयति तद्वदित्यर्थः ॥ २१ ॥

* द्विजातिचरितो धर्मः शास्त्रदृष्टः [1] सनातनः।
यदि ते धर्मनिरते त्वया पुत्रे विवासिते ॥ २२ ॥

---

* धर्मनिरते पुत्रे त्वया विवासिते सति द्विजातिचरितः–शिष्टत्रैवर्णिकाचरितः शास्त्रदृष्टः सनातनो धर्मः ते यदि–अस्ति किमित्यर्थेऽव्ययमिदम्–गो. यद्वा नकारोऽत्राध्याहर्तव्यः। नेधर्मनिरत इत्यत्र अधर्मनिरत इति च्छेदः। शास्त्रदृष्टः द्विजातिचरितः-राजर्षिभिराचरितः सनातनो धर्मः ते पुत्रे यदि न स्यात्, तर्ह्यधर्मनिरते तस्मिन् त्वया विवासिते तद्युक्तं भवेत्, न चैवमिति भावः–ती. अथ वा–'द्विजातिचरितो धर्मः' इति कथ्यमानः धर्मः–समनन्तरश्लोकोक्त एव विवक्षितः। एतादृशो धर्मः ते यदि, तर्हि भवतैव सोऽपि नाशित इत्यर्थः। अत्र तृतीयगतेः बन्धुजनस्य अभावः पूर्वमेव सिद्ध इत्यभिप्रायेण तदनुत्कीर्तनम्। कैकेयीबन्धुजनकेकयादिराजवत् कौसल्यापितॄणां दशरथस्य च व्यवहारसम्बन्धः तदा नासीदित्यवगम्यते। अत एव प्रथमसर्गे रामाभिषेकाय राज्ञामाह्वानप्रकरणे केकयजनकयोरेव प्रस्तावो दृश्यते (अयो. 1-48)। अथ वा कौसल्यायाः ज्येष्ठपत्नीत्वात् वृद्धात्वात् तज्जनकानां अतिक्रान्तत्वमप्यूहितुं शक्यते। एवं पत्या बन्धुभिश्च परित्यक्तायाः स्त्रियः पुत्र एव गतिरिति धर्मः अस्त्येव भवतोऽपि। भवताऽप्यङ्गीकृत इति भावः। स तु धर्मः भवतैव नाशित इति भावः॥

[1] पुरातनैः–ङ.

गतिरेका पतिर्नार्याः द्वितीया गतिरात्मजः ।
तृतीया ज्ञातयः, राजन् ! चतुर्थी नेह विद्यते ॥ २३ ॥
[1] तत्र त्वं चैव मे * नास्ति रामश्च वनमाश्रितः ।
न वनं गन्तुमिच्छामि सर्वथा निहता त्वया ॥ २४ ॥

एवञ्च अहमेव हतेत्याह—द्विजातीत्यादि । शास्त्रदृष्टः द्विजातिभिः-त्रैवर्णिकैः चरितः सनातनो धर्मो यदि तेऽस्ति, तदा तु त्वया धार्मिकः पुत्रः न विवासनीयः । एवं धर्ममुपेक्ष्य त्वया धर्मनिरते पुत्रे विवासिते सति 'गतिरेकः पतिः' इत्यादिशास्त्रोच्यमानाः याः गतयः सन्ति, तासु गतिषु प्रथमगतिभूतस्त्वं च मम नास्त्येव ; सपत्नीवशगत्वेन त्वच्छुश्रूषाया मे दुर्लभत्वात् । रामश्च द्वितीयगतिभूतः वनमाश्रितः ; न च तत्प्राप्तये वनं गन्तुमिच्छामि, सपतिकत्वात् । हि—यस्मादेवं, तस्मात् सर्वथा त्वया हता ॥ २२–२४ ॥

हतं त्वया राज्यमिदं सराष्ट्रं
[2] हतस्तथाऽऽत्मा सह मन्त्रिभिश्च ।
हता सपुत्राऽस्मि हताश्च पौराः
† सुतश्च भार्या च तव प्रहृष्टौ ॥ २५ ॥

सुतश्च भार्या चेति । केवलं कैकेयीभरतावेव प्रहृष्टावित्यर्थः ॥

‡ इमां गिरं दारुणशब्द[3]संश्रितां
निशम्य [4] राजाऽपि मुमोह दुःखितः ।

---

* नास्ति—नासि । अथ वा विधेयप्राधान्यात् 'त्वं गतिः नास्ति' इति निर्देशः ।
† कैकेयीभरतयोरेव तवाभिमानसत्त्वात् तव भरत एक एव सुतः, कैकेय्येकैव भार्या —इति शोकादुक्तिः । ‡ कौसल्यायाः परुषं वाक्यं श्रुत्वा मोहमाप । कथञ्चिल्लब्धसंज्ञः स्वदुष्कृतं स्मरन् पुनः शोकं प्रविवेश ॥

[1] तत्र त्वं मम नैवासि—ङ. [2] हताः स्म सर्वाः सह—ङ. [3] संहितां—च.
[4] रामेति—च.

ततः स शोकं प्रविवेश पार्थिवः
स्वदुष्कृतं चापि पुन[1]स्तदा स्मरन् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकषष्टितमः सर्गः

सः पार्थिवः शोकं प्रविवेश—गतवान् । स्वं दुष्कृतं—वक्ष्यमाणम् । तरु(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे एकषष्टितमः सर्गः

द्विषष्टितमः सर्गः

[कौसल्याप्रसादनम्]

*एवं तु क्रुद्धया राजा राममात्रा सशोकया ।
श्रावितः परुषं वाक्यं चिन्तयामास दुःखितः ॥ १ ॥

एवं कौसल्या स्वक्रूरवचोभीतस्य राज्ञः अञ्जलिपर्यन्तदैन्यं दृष्ट्वा, अहमपि द्वितीया कैकेयी जाताऽस्मीति भीता राजानमनुनयति । एवन्त्वित्यादि । चिन्तयामासेति । अनयोच्यमानं सत्यं, किमिह कर्तव्यमिति चिन्तितवानित्यर्थः ॥ १ ॥

चिन्तयित्वा स च नृपः मुमोह व्याकुलेन्द्रियः ।
अथ दीर्घेण कालेन संज्ञामाप परन्तपः ॥ २ ॥

स संज्ञामुपलभ्यैव दीर्घमुष्णं च निश्वसन् ।
कौसल्यां पार्श्वतो दृष्ट्वा पुनश्चिन्तामुपागमत् ॥ ३ ॥

---

* पूर्वसर्गान्तिमश्लोकोक्तार्थ एव पञ्चभिः श्लोकैः विव्रियते ॥

[1] स्तथाऽस्मरत्-च.

तस्य चिन्तयमानस्य प्रत्यभात् कर्म दुष्कृतम् ।
यदनेन कृतं पूर्वं अज्ञानात् शब्दवेधिना ॥ ४ ॥

तस्य चिन्तयमानस्येति। एवमतिघोरदुःखसाधनं इह जन्मनि किं वा दुष्कृतं कृतमभूत् इति चिन्तयमानस्येत्यर्थः। यत्-पापं कृतमिति—मुनिकुमारवधरूपमित्यर्थः। शब्दमेव लक्ष्यं प्राप्य विध्यतीति शब्दवेधी राजा, तत्साधनं बाणं च ॥ ४ ॥

अमनास्तेन शोकेन रामशोकेन च प्रभुः ।
द्वाभ्यामपि महाराजः शोकाभ्यामन्वतप्यत ॥ ५ ॥
दह्यमानः स शोकाभ्यां कौसल्यामाह भूमिपः ।
वेपमानोऽञ्जलिं कृत्वा प्रसादार्थमवाङ्मुखः ॥ ६ ॥

अवाङ्मुख इति। स्वकृततदप्रियस्मरणलज्जया, भीत्या च ॥

प्रसादये त्वां, कौसल्ये ! रचितोऽयं मयाऽञ्जलिः ।
वत्सला चानृशंसा च त्वं हि नित्यं परेष्वपि ॥ ७ ॥

परेष्विति। शत्रुष्वपीत्यर्थः ॥ ७ ॥

भर्ता तु खलु नारीणां गुणवान्निर्गुणोऽपि वा ।
धर्मं विमृशमानानां प्रत्यक्षं, देवि ! दैवतम् ॥ ८ ॥
सा त्वं धर्मपरा नित्यं दृष्टलोकपरावरा ।
नार्हसे विप्रियं वक्तुं * दुःखिताऽपि सुदुःखितम् ॥ ९ ॥

दृष्टः लोकः परोऽवरश्च यया सा तथा ॥ ९ ॥

---

* त्वदपेक्षया सुतरां दुःखितम्। भवत्यास्तु पुत्रवियोगमात्रशोकः, मम तु तेन सह 'अहमेव तस्य कारणमभवम्' इति शोकातिशयोऽपि ॥

तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम् ।
कौसल्या व्यसृजत् बाष्पं प्रणालीव * नवोदकम् ॥ १० ॥

प्रणाली–प्रासादादौ जलनिर्गमक्लृप्तदारुविशेषः–தக்கை ॥ १० ॥

सा मूर्ध्नि बध्वा रुदती राज्ञः पद्ममिवाञ्जलिम् ।
संभ्रमादब्रवीत् त्रस्ता त्वरमाणाक्षरं वचः ॥ ११ ॥

त्रस्ता–बत ! ममापि कैकेयीस्वभावः सर्वलोकनाशकः, पतिशोककारिवचनादिकं प्राप्तमिति भीतेत्यर्थः ॥ ११ ॥

प्रसीद शिरसा याचे भूमौ निपतिताऽस्मि ते ।
† याचिताऽस्मि हता, देव ! [1] हन्तव्याऽहं न हि त्वया ॥

भूमौ निपतिताऽस्मीति । साष्टाङ्गं प्रणमामीति यावत् । हे देव ! त्वया याचिता अहं हताऽस्मि । ईश्वरेणेशितव्यवैपरीत्यं परमान्याय्यं किल, अतोऽहं हताऽस्मि । अतः त्वया हन्तव्या न हि–प्रहर्तव्या न हि ? एतदपराधशान्तये मत्प्रहार एव भवता कर्तव्यः, दास्या इवेत्यर्थः ॥ १२ ॥

नैषा हि सा स्त्री भवति श्लाघनीयेन धीमता ।
‡ उभयोर्लोकयोः, वीर ! पत्या या संप्रसाद्यते ॥ १३ ॥

---

* नवोदकमिति बाष्पस्य कलुषितत्वं सूचयति । द्वित्रवारवर्षानन्तरं तु प्रासादस्य शुद्धत्वात् न तावत्कालुष्यं स्यादिति भावः । † प्रथममेव पुत्रशोकहता, पुनरपि अञ्जलिबन्धनादिना न हन्तव्या । अथ वा प्रसादनोक्त्या पूर्वं हता, वा । ‡ सा स्त्री उभयोर्लोकयोर्न भवति–गो.

[1] क्षन्तव्या–ङ.

पत्या याच्यमानत्वसंपादकं कर्म कुलस्त्रीणां परमनिन्द्येत्याह—नैषा हीत्यादि। सैषा हि न स्त्री भवति—कुलस्त्री न भवति। हे वीर! उभयोर्लोकयोः श्लाघनीयेन पत्या या संप्रसाद्यते ॥ १३ ॥

जानामि धर्मं, धर्मज्ञ! त्वां जाने सत्यवादिनम्।
पुत्रशोकार्तया तत्तु मया किमपि भाषितम् ॥ १४ ॥

किमपि भाषितम्। अनुचितमेव भाषितमित्यर्थः ॥ १४ ॥

शोको नाशयते धैर्यं शोको नाशयते श्रुतम्।
शोको नाशयते सर्वं नास्ति शोकसमो रिपुः ॥ १५ ॥

शोकस्त्वेवमद्यानुचितव्यवहारप्रवर्तनसमर्थ इत्याह—शोक इत्यादि ॥ १५ ॥

शक्य आपतितः सोढुं प्रहारो रिपुहस्ततः।
*सोढुमापतितः शोकः सुसूक्ष्मोऽपि न शक्यते[1] ॥ १६ ॥

सुसूक्ष्मोऽपि शोकः सोढुमशक्यः, किमु मे महानिति शेषः ॥

वनवासाय रामस्य पञ्चरात्रोऽद्य गण्यते।
यः शोकहतहर्षायाः पञ्चवर्षोपमो मम ॥ १७ ॥

स्वकं महाशोकमेव दर्शयति—वनवासायेत्यादि। वनवासं कर्तुं प्रस्थितस्य वने पञ्चरात्रः वासोऽत्र गण्यते। आगङ्गं देशत्वात् गङ्गोत्तरणानन्तरं प्रयागयमुनाचित्रकूटेषु रामवृत्तान्तपरिज्ञानाय गुहेन

---

* आपतितः—हठात् प्राप्तः— **गो.** पूर्वार्धे 'रिपुहस्ततः' इति कथनात् सुसूक्ष्मशोकस्य अप्रतीक्षितत्ववत्, स्वजनात् प्राप्तत्वं, अविमर्शात् प्राप्तत्वं चाभिमतम्।

[1] एतदनन्तरं 'धर्मज्ञाः श्रुतिमन्तोऽपि छिन्नधर्मार्थसंशयाः। यतयो वीर मुह्यन्ति शोकसम्मूढचेतसः ॥' इत्यधिकं—ङ.

गङ्गातीरे दिनत्रयं स्थित्वा पश्चाद्दिनद्वयेन राज्ञः समीपमागतं सूतेन। कौसल्या तु गङ्गोत्तरणात् परमेव यथाप्राप्तवनवासदुःखवद्वनवासं पर्यगणयत्। पुरान्निर्गमनप्रभृतिगणने तु * सप्तरात्रवृत्तान्तः ॥ १७॥

तं हि चिन्तयमानायाः शोकोऽयं हृदि वर्धते।
† नदीनामिव वेगेन समुद्रसलिलं महत् ॥ १८॥

नदीवेगेन समुद्रसलिलवृद्धिरिति, लोके तटाकादौ तथा दृष्टत्वात् उत्प्रेक्षामात्रम्। स तु पूर्णचन्द्रेन वर्धते, वर्षासु ह्रसति च॥

एवं हि कथयन्त्यास्तु कौसल्यायाः शुभं वचः।
मन्दरश्मिरभूत् सूर्यः रजनी चाभ्यवर्तत ॥ १९॥
‡ [1] तथा प्रसादितो वाक्यैः देव्या कौसल्यया नृपः।
शोकेन च समाक्रान्तः निद्राया वशमेयिवान् ॥ २०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे द्विषष्टितमः सर्गः

अरि(२०)मानः सर्गः ॥ २०॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे द्विषष्टितमः सर्गः

---

* प्रथमायां रात्रौ तमसातीरे, द्वितीयायां जाह्नवीतीरे, तृतीयायां गङ्गादक्षिणतीरस्थवृक्षमूले, चतुर्थ्यां प्रयागे, पञ्चम्यां यमुनातीरे, षष्ठे दिने चित्रकूटे च वासः। तत् ज्ञात्वा तस्मिन्नेव दिवसे सूतः प्रत्यावृत्तवान्। तेन च रामेण गङ्गातरणानन्तरं दिनत्रयं सुमन्त्रेण प्रतीक्षितम्। द्वितीयेऽहनि (आहत्य सप्तमदिने) अयोध्यां प्राप। गङ्गातरणानन्तरं तत्तीरवृक्षमूले (तृतीयरात्र्यां) रामः 'अद्येयं प्रथमा रात्रिः जाता जनपदात् बहिः' इति कथयति। तदारभ्यैव गणनायां 'पञ्चरात्रोऽद्य गण्यते' इत्युक्तिः कविदृष्ट्या युक्तैव॥ † नदीसमुद्रयोः संगमस्थले परस्परघट्टनया जलमुपरिवृद्धं भवत्येवेति अनुभवसिद्धमेव॥ ‡ मनसः संपूर्णकालुष्ये, संपूर्णप्रसादे वा न निद्रायाः प्रसक्तिः, आयासादिमध्यस्थदशायामेव। तदेव पूर्वोत्तरार्धाभ्यां प्रतिपाद्यते। कौसल्यावाक्यात् प्रसादः, पुत्रशोकाच्च विह्वलता, इति अवशनिद्राप्रसक्तिः।

[1] अथ प्रह्लादितो–च.

त्रिषष्टितमः सर्गः

[ऋषिकुमारवधाख्यानम्]

प्रतिबुद्धो मुहूर्तेन शोकोपहतचेतनः ।
अथ राजा दशरथः स चिन्तामभ्यपद्यत ॥ १ ॥

अथ आप्तायै कौसल्यायै एतादृशकारणं मुनिशापं वदति । प्रतिबुद्ध इत्यादि ॥ १ ॥

रामलक्ष्मणयोश्चैव विवासात् वासवोपमम् ।
आविवेशोपसर्गस्तं तमः सूर्यमिवासुरम् ॥ २ ॥

उपसर्गः—उपप्लवः—शोक इति यावत् । आसुरं तमः सूर्यमिवेति । असुरः—राहुः, तदीयं आसुरं तमः—आवरणशक्तिः, सा यथा सूर्यमावृणोति काले प्राप्ते, तद्वदित्यर्थः ॥ २ ॥

सभार्ये निर्गते रामे कौसल्यां कोसलेश्वरः ।
विवक्षु[1]रसितापाङ्गीं स्मृत्वा दुष्कृतमात्मनः ॥ ३ ॥
स राजा *रजनीं षष्ठीं रामे प्रव्राजिते वनम् ।
अर्धरात्रे दशरथः † [2] संस्मरन् दुष्कृतं कृतम् ॥ ४ ॥
स राजा पुत्रशोकार्तः स्मृत्वा दुष्कृतमात्मनः ।
कौसल्यां पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ५ ॥

---

* सप्तम्यर्थे द्वितीया, प्राप्येति शेषो वा—गो. अत्यन्तसंयोगे वा द्वितीया ।

† स्थित इति शेषः-गो. अथ वा पूर्वश्लोके, अत्र च 'कौसल्यां पुत्रशोकार्तां इदं वचनमब्रवीत्' इत्याकृष्यते । विन्यासभेदः वैय्याकुलीं सूचयति ।

[1] रसितापाङ्गां-ङ. [2] सोऽस्मरत्—ङ. च.

यदाचरति, कल्याणि! शुभं वा यदि वाऽशुभम् ।
तदेव लभते, भद्रे! कर्ता कर्मजमात्मनः ॥ ६ ॥

स्वकृतक्रूरकर्ममूलमेव ईदृशं दुःखं स्वस्येति वदिष्यन् लोकस्थितिं दर्शयति—यदित्यादि । तदेव लभते, तल्लभत एव च ॥

***गुरुलाघवमर्थानां आरंभे कर्मणां [1]फलम् ।**
दोषं वा यो न जानाति स बाल इति होच्यते ॥ ७ ॥

अर्थानां—ऐहिकप्रयोजनानां, कर्मणां—आमुष्मिकप्रयोजनानां च अनुष्ठीयमानानां फलं प्रति गुरुलाघवं—केनचिदल्पेन हत्यादिकर्मणा महदनिष्टफलं, क्वचित् महताऽपि यागादिना परिमितस्वर्गफलं इत्येवमादिरूपेण, तथा दोषं गुणं वा—इदं कर्म अल्पदोषं बहुगुणं इदं तु बहुदोषमल्पगुणमित्येवमादिकं यो न जानाति, स एव बाल इत्युच्यते, न स्तनन्धयः ॥ ७ ॥

†कश्चिदाम्रवणं छित्वा पलाशांश्च निषिञ्चति ।
पुष्पं दृष्ट्वा फले गृध्नुः स शोचति फलागमे ॥ ८ ॥

आम्रवणं छित्वेति । पलाशोपरोधनिवृत्त्यर्थमिति शेषः । पुष्पं दृष्ट्वेति । प्रस्फुटस्थूलपुष्पत्वात् महत् फलमतो भविष्यतीति बुध्वेत्यर्थः ॥

---

*कर्मणामारंभे—आरंभसमये अर्थानां—फलानां गुरुलाघवं—गुरुत्वं लघुत्वं च, फलं दोषं वा फलं फलहानिं वा, यद्वा सुखरूपतां दुःखरूपतां वा, यो न जानाति—**गो.** 'सुखं' इति पाठेतु कर्मणामारंभे अर्थानां गुरुलाघवं, सुखं दोषं—दुःखं वेति स्वरसः अर्थः । फलमिति पाठेऽपि फलपदं गुणपदवत् सत्फलपरम् । †लोके कश्चित्पुरुषः पुष्पं दृष्ट्वा फले गृध्नुः—साभिलाषः सन् अधिकवर्णमहापुष्पवत्वात् तदनुगुणमहाफलं भविष्यतीति साभिलाषः इत्यर्थः, आम्रवणं चूतवनं अल्पनिर्वर्णपुष्पकं छित्वा पलाशोपरोधपरिहारार्थं छित्वा, पलाशांश्च—किंशुकानेव निषिञ्चति—जलसेचनादिना पोषयति सः फलागमे—फलप्राप्तिकाले सति अनुपभोग्यफलदर्शनात् शोचति—**गो.**

[1] सुखम्—ङ.

अविज्ञाय फलं यो हि * कर्म त्वेवानुधावति ।
स शोचेत् फलवेलायां यथा किंशुकसेचकः ॥ ९ ॥

किंशुकदृष्टान्तं दार्ष्टान्तिके योजयति—अविज्ञायेत्यादि । फलमिति । क्रियमाणकर्मणो भाविफलमित्यर्थः ॥ ९ ॥

† सोऽहमाम्रवणं छित्वा पलाशांश्च न्यषेचयम् ।
रामं फलागमे त्यक्त्वा पश्चात् शोचामि दुर्मतिः ॥ १० ॥

कर्मणो वा प्रागुक्तस्य तथा प्रागुक्तलौकिकार्थस्य वाऽस्तु तत प्रकृते किमायातमित्यत्राह—सोऽहमित्यादि । फलागम इति । पारलौकिककालान्तरभाविफलप्राप्तावाम्रवत् वर्धितमिति शेषः ॥ १० ॥

लब्धशब्देन, कौसल्ये! कुमारेण धनुष्मता ।
कुमारः शब्दवेधीति मया पापमिदं कृतम् ॥ ११ ॥

अथ 'यदाचरति' (श्लो-६) इत्याद्युक्तलोकस्थितिफलमाह—लब्धशब्देनेत्यादि । हे कौसल्ये! कुमारेण धनुष्मता, कुमारः–अजकुमारः दशरथः शब्दवेधीति लोके लब्धशब्देन–लब्धकीर्तिना मया इदं वक्ष्यमाणरूपं पापं कृतम् ॥ ११ ॥

तदिदं मेऽनुसंप्राप्तं, देवि! दुःखं स्वयं कृतम् ।
[1] संमोहादिह बालेन यथा स्यात् भक्षितं विषम् ॥ १२ ॥

ननु बाल्ये, तत्राप्यज्ञानात् कृतस्य कर्मणः कथमेवं फलं प्राप्तमित्यत्र दृष्टान्तबलेन बोधयति—सम्मोहादित्यादि । संमोहादिह–

---

* स्वकर्मानुगुणमेव धावतीत्यर्थः । † आम्रवणं छित्वेत्यनेन अभिषेकविघातपूर्वकरामविवासनं लक्ष्यते। पलाशांश्च न्यषेचयमित्यनेन कैकेयीप्रियकरणं लक्ष्यते—**गो.** वस्तुतस्तु—वक्ष्यमाणशब्दवेधमूलकमुनिकुमारवधेऽयं दृष्टान्तः। स्पष्टमिदं १३ श्लोके।

[1] सस्नेहादिव बाल्येन–ङ.

संमोहादेव। बाल्येन हेतुना भक्षितं विषमिति। हन्त्येवेति शेषः। एवं स्वकृतदुष्कृतं दुःखं प्रापयत्येव॥ १२॥

यथाऽन्यः पुरुषः कश्चित् * पलाशैर्मोहितो भवेत्।
एवं ममाप्यविज्ञातं † शब्दवेध्य[1]मिदं कृतम्॥ १३॥

तथा स्वविचारदौर्बल्यमूलमपि जाड्यं स्वं प्राप्नोत्येवेत्याह—यथाऽन्य इत्यादि। कश्चित्—प्राकृत इति यावत्। पलाशैः—तत्पुष्पैः। मोहितो भवेत्; एवं कैकेयीमोहित इति शेषः। अथाज्ञानकृतस्यापि महापातकस्य फलं विषपानवदावश्यकमित्युक्तमर्थमुपसंहरति—एवमित्यादि। ‡ शब्दमात्रगम्यं वेध्यं—लक्ष्यं यस्य, येन वा स तथा। शब्दवेधी शब्दवेध्य इत्यनर्थान्तरम्। अत एवं शब्दवेध्यत्वरूपं सामर्थ्यं प्राप्य यत् कर्म अविज्ञातं सत्—अबुद्धिपूर्वकं कृतं, तस्य दुष्कर्मण इदं फलमित्यर्थः॥ १३॥

देव्यनूढा त्वमभवः युवराजो भवाम्यहम्।
ततः प्रावृडनुप्राप्ता मदकामविवर्धिनी॥ १४॥

अथ कदा कीदृशं तच्छब्दवेधित्वमूलप्राप्तं दुष्कर्मेत्यतः तत् प्रतिपादयति—देवीत्यादि। १४॥

§ [2]अपास्य हि रसान् भौमान् तप्त्वा च जगदंशुभिः।
परेताचरितां भीमां रवि[3]राविशते दिशम्॥ १५॥

---

* पलाशैर्मोहितः—पलाशकुसुमानि यथा सुन्दराणि तथा तत्फलमपि स्यादिति मोहविशिष्ट इत्यर्थः। प्रकृते—'कुमारः शब्दवेधी' इति ख्यात्या मोहितः। † शब्दवेध्यमयं—शब्दवेध्यविकारभूतं—तद्धेतुकमित्यर्थः—**गो.** ‡ शब्दवेध्यमिति शब्दवेधित्वमित्यर्थे आर्षम्—**ति.** § उपास्य—गृहीत्वा—**गो.**

[1] मयं—ङ. [2] उपास्य—ङ. [3] राचरते—ङ.

प्रावृडनुप्राप्तेत्युक्तं ; सैव वर्ण्यते — अपास्येत्यादि । अंशुभिः भौमान् रसान् जलादीन् अपास्य–निरस्य शोषयित्वेति यावत् । हि–तत एव हेतोः तप्त्वा—तापयित्वा, भूमिमिति शेषः । परेताचरितां भीमां दिशमिति । दक्षिणां दिशमित्यर्थः । आविशते–आविशति स्मेति यावत् ॥ १५ ॥

उष्णमन्तर्दधे सद्यः स्निग्धा ददृशिरे घनाः ।
ततो जहृषिरे सर्वे भेकसारङ्गबर्हिणः ॥ १६ ॥
*क्लिन्नपक्षोत्तराः स्नाताः कृच्छ्रादिव पतत्रिणः ।
वृष्टिवातावधूताग्रान् पादपानभिपेदिरे ॥ १७ ॥

कृच्छ्रात्–कृच्छ्रादिहेतोः । स्नाता इव क्लिन्नपक्षस्त्वधर्मेणोत्तराः–अधिकाः, वृष्ट्याधिक्यादिति शेषः । वृष्टियुक्तो वातः तथा ॥ १७ ॥

पतितेनाम्भसा च्छन्नः पतमानेन चासकृत् ।
आबभौ मत्तसारङ्गः †तोयराशिरिवाचलः ॥ १८ ॥

पतमानेनेति । पततेति यावत् । मत्ताः सारङ्गाः–हरिणाः यस्मिन् स तथा । 'चातके हरिणे पुंसि सारङ्गः शबले त्रिषु' ॥ १८ ॥

पाण्डुरारुणवर्णानि स्रोतांसि विमलान्यपि ।
सुस्रुवुर्गिरिधातुभ्यः ‡सभस्मानि भुजङ्गवत्[1] ॥ १९ ॥

---

* क्लिन्नपक्षोत्तराः–सिक्तपक्षोपरिभागाः, अत एव स्नाता इव स्थिताः, पतत्रिणः वृष्टिवातावधूताग्रान्–वृष्टिवाताभ्यां कम्पिताग्रानपि पादपान् कृच्छ्रात्—क्लिन्नपक्षत्वेन यत्नात अभिपेदिरे–आरूढाः–**गो.** † तोयराशिः–समुद्रः–**गो.** ‡ भस्मपदं तादृशसूक्ष्मजलकणवाचकं वा ।

[1] एतदनन्तरं 'आकुलारुणतोयानि स्रोतांसि विमलान्यपि । उन्मार्गजलवाहीनि बभुवुर्जलदागमे ॥' इत्यधिकम्–ङ.

गिरिधातुभ्यो हेतुभ्यः, विमलान्यपि स्रोतांसि क्वचित् पाण्डुरवर्णानि तथाविधधातुसम्बन्धात्, क्वचित् अरुणानि तथाविधधातुसम्बन्धात्, क्वचित् सभस्मानि दावभस्मसम्बन्धात्, भुजङ्गवत् कुटिलानि सुस्रुवुः ॥ १९ ॥

तस्मिन्नतिसुखे काले धनुष्मान् इषुमान् रथी ।
व्यायामकृतसङ्कल्पः सरयूमन्वगां नदीम् ॥ २० ॥

व्यायामः—मृगयाव्यायामः—उत्साहः, तत्र कृतसङ्कल्पः—कृतनिश्चयस्तथा ॥ २० ॥

निपाने महिषं रात्रौ गजं वाऽभ्यागतं [1]नदीम् ।
अन्यं वा श्वापदं कञ्चित् जिघांसु*रजितेन्द्रियः [2] ॥ २१ ॥

निपीयते अस्मिन्निति निपानम्, नद्यवतारस्थल इत्यर्थः । जिघांसुरिति । अस्थामिति शेषः ॥ २१ ॥

अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः ।
अचक्षुर्विषये घोषं वारणस्येव नर्दतः ॥ २२ ॥
ततोऽहं शरमुद्धृत्य दीप्तमाशीविषोपमम् ।
शब्दं प्रति गजप्रेप्सुः अभिलक्ष्य[3]मपातयम् ॥ २३ ॥

गजप्रेप्सुरिति । गजरूपं वेध्यं प्राप्तुमिच्छुस्तथा । शब्दं प्रति—शब्दावगतवेध्यं प्रति तज्जिघांसया शरमुद्धृत्य अभिलक्ष्यमपातयमिति योजना ॥ २३ ॥

---

* अनेन मृगयाचापल्यमुक्तम् । तेन तस्याः क्षत्रधर्मत्वेऽपि न विरोधः ।

[1] मृगम्—ङ. [2] एतदनन्तरं 'तस्मिंस्तत्राहमेकान्ते रात्रौ विवृतकार्मुकः । तत्राहं संवृतं वन्यं हतवान् तीरमागतम् ॥ अन्यं चापि मृगं हिंस्रं शब्दं श्रुत्वाऽभ्युपागतम् ।' इत्यधिकं—ङ. [3] त्वपातयम्—ङ.

अमुञ्चं निशितं बाणं अहमाशीविषोपमम् ॥ २४ ॥
तत्र वागुषसि व्यक्ता प्रादुरासीद्वनौकसः ।
हा हेति पततस्तोये बाणाभिहतमर्मणः ॥ २५ ॥

वनौकसः–आरण्यकमनुष्यस्येत्यर्थः । बाणाभिहतमर्मणः तोये पततः वनौकसः हा ! हा !! इति व्यक्ता वाक् उषसि प्रादुरासीत् ॥

तस्मिन्निपतिते [1]बाणे वागभूत् तत्र मानुषी ।
कथमस्मद्विधे शस्त्रं निपतेत्तु तपस्विनि ॥ २६ ॥

एवं तस्मिन् बाणे निपतिते सति, तत्र विशिष्य मानुषी वागभूत् । कथमित्यत्र—कथमित्यादि ॥ २६ ॥

प्रविविक्तां नदीं रात्रौ उदाहारोऽहमागतः ।
इषुणाऽभिहतः केन ? कस्य [2]वा किं कृतं मया ? ॥ २७ ॥

प्रविविक्तां–निर्जनाम् । उदकमाहरतीत्युदाहारः, 'मन्थौदन...' इत्यादिना उदकस्य उदादेशः । यद्यपि हारशब्दे परतः उदादेशो विहितः, तथापि एकदेशविकृतमनन्यवदिति भविष्यति । छान्दसो वा दीर्घः । उदहार इत्येव वा । किं कृतमिति । किं अनिष्टं कृतमित्यर्थः ॥ २७ ॥

ऋषेर्हि *न्यस्तदण्डस्य वने वन्येन जीवतः ।
कथं नु शस्त्रेण वधो मद्विधस्य विधीयते ॥ २८ ॥

न्यस्तदण्डस्येति । परित्यक्तप्राणिहिंसस्येत्यर्थः ॥ २८ ॥

---

* न्यस्तदण्डस्य—उपरतवाङ्मनःकायसम्बन्धिपरहिंसस्य । 'दण्डोऽस्त्री शासने राज्ञां हिंसायां दमसैन्ययोः' इति विश्वः–गो.

[1] भूमौ–ङ. [2] वाऽपकृतं–ङ.

जटाभारधरस्यैव वल्कलाजिनवाससः ।
को वधेन ममार्थी स्यात् किं वाऽस्यापकृतं मया ॥ २९ ॥

मम वधेन—जटादिना व्यक्तर्षित्वस्य मम वधेन कः पुमान् अर्थी—किञ्चित्प्रयोजनवान् स्यात् । मानुषमांसं कस्यापि मनुष्यस्याप्रयोजनमिति व्यर्थ एव मद्वध इत्यर्थः ॥ २९ ॥

एवं निष्फलमारब्धं केवलानर्थसंहितम् ।
न [1] क्वचित् साधु मन्येत यथैव * गुरुतल्पगम् ॥ ३० ॥

केवलानर्थेन—निष्प्रयोजनसंपन्नपापेन संहितम् । क्वचिदिति । इह लोके परत्र वेत्यर्थः ॥ ३० ॥

[2] नाहं तथाऽनुशोचामि जीवितक्षयमात्मनः ।
मातरं पितरं चोभौ अनुशोचामि मद्वधे ॥ ३१ ॥
तदेतन्मिथुनं वृद्धं चिरकालभृतं मया ।
मयि पञ्चत्वमापन्ने कां वृत्तिं वर्तयिष्यति ॥ ३२ ॥
वृद्धौ च मातापितरौ अहं चैकेषुणा हतः ।
केन स्म निहताः सर्वे सुबालेनाकृतात्मना † ॥ ३३ ॥

एकेषुणा मातापितरौ हतौ, अहं च हतः इति विपरिणामः । मद्वधेन तयोर्वधस्य सिद्धत्वादित्याशयः । अकृतात्मना—अजितेन्द्रियेण ॥

तां गिरं करुणां श्रुत्वा मम धर्मानुकाङ्क्षिणः ।
‡ कराभ्यां सशरं चापं व्यथितस्यापतत् भुवि ॥ ३४ ॥

---

* गुरुतल्पगं—गुरुदारगं 'तल्पं शय्याट्टदारेषु' इत्यमरः । † इति वागभूदिति पूर्वेण (श्लो. २५) अन्वयः । ‡ सशरं चापमित्यनेन शरे मुक्तेऽपि हस्तलाघवात् शरान्तरं धनुषि संहितवानित्यवगम्यते—गो.

[1] क्वचित—ङ.　　[2] नेमं—च.

धर्मानुकाङ्क्षिणः—धर्मप्रतीक्षाशीलस्य ॥ ३४ ॥

तस्याहं करुणं श्रुत्वा बहु लालपतो निशि ।
संभ्रान्तः शोकवेगेन भृशमासं विचेतनः ॥ ३५ ॥

लालपत इति । यङ्लुगन्तात् शतृप्रत्ययः ॥ ३५ ॥

तं देशमहमागम्य दीनसत्त्वः सुदुर्मनाः ।
अपश्यमिषुणा तीरे सरय्वास्तापसं हतम् ॥ ३६ ॥
अवकीर्णजटाभारं प्रविद्धकलशोदकम् ।
पांसुशोणितदिग्धाङ्गं शयानं शल्यपीडितम् ॥ ३७ ॥

प्रविद्धं—ध्वस्तम् ॥ ३७ ॥

स मामुद्वीक्ष्य नेत्राभ्यां त्रस्तमस्वस्थ[1]चेतसम् ।
[2]इत्युवाच [3]ततः क्रूरं दिधक्षन्निव तेजसा ॥ ३८ ॥

त्रस्तं मां नेत्राभ्यामुद्वीक्ष्य ॥ ३८ ॥

किं तवापकृतं, राजन्! वने निवसता मया ।
जिहीर्षुरम्भो गुर्वर्थं यदहं ताडितस्त्वया ॥ ३९ ॥
एकेन खलु बाणेन मर्मण्यभिहते मयि ।
द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे ॥ ४० ॥
तौ [4]कथं दुर्बलावन्धौ मत्प्रतीक्षौ पिपासितौ ।
* चिर[5]माशाकृतां तृष्णां [6]कष्टां सन्धारयिष्यतः ॥ ४१ ॥

---

* आशाकृतां-पुत्रो मे जलमाहरिष्यतीत्याशासहिताम्—गो.

[1] चेतनं—च. [2] प्रत्युवाच—ङ. [3] वचः—च. [4] नूनं—च. [5] माशां—च.
[6] कथं—ङ.

आशाकृतां—आशा—आशनं—प्राशनं, आशा—तद्विषयिण्याशा, तया कृतां ; तन्त्रावृत्त्यादेरन्यतम एषितव्यः ; बुभुक्षाकृतामिति यावत् ॥

नूनं न तपसो वाऽस्ति फलयोगः श्रुतस्य वा ।
पिता यन्मां न जानाति शयानं पतितं भुवि ॥ ४२ ॥

तपसः श्रुतस्य वेति । मामकस्येति शेषः, पित्र्यस्य चेत्यप्यविरोधः॥

जानन्नपि च किं कुर्यात् अशक्ति*रपरिक्रमः ।
भिद्यमानमिवाशक्तः त्रातुमन्यो †नगो नगम् ॥ ४३ ॥

अशक्तिरपरिक्रम इति । वृद्धान्धत्वादित्याशयः । वातादिना भिद्यमानं नगं—वृक्षमित्यर्थः ॥ ४३ ॥

पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व, राघव!
न त्वामनुदहेत् क्रुद्धः वनं वह्निरिवैधितः ॥ ४४ ॥

एधितः—वर्धितः ॥ ४४ ॥

इयमेकपदी, राजन्! यतो मे पितुराश्रमः ।
तं प्रसादय गत्वा त्वं न त्वां [1] संकुपितः शपेत् ॥ ४५ ॥

इयमित्यादि । यया एकपद्या मे पितुराश्रमः प्राप्यते, सेयमेकपदी—सूक्ष्ममार्गः, 'सरणिः पद्धतिः पद्या वर्तन्येकपदीति च' ; तया गत्वा तं प्रसादय, यथा चेत् त्वां न संकुपितः शपेत् ॥

विशल्यं कुरु मां, राजन्! मर्म मे निशितः शरः ।
रुणद्धि, मृदु सोत्सेधं तीरमम्बुरयो यथा ॥ ४६ ॥

---

* अपरिक्रमः—संचरणशक्तिरहित इत्यर्थः । 　† नगः—गजो वा.

[1] स कुपितः—च.

हे राजन्! मां विशल्यं कुरु। निशितस्ते शरः मर्मलग्नः सन् मे मर्म रुणाद्धि–पीडयतीति यावत्। किमिव? मृदु–सिकताप्रायं सोत्सेधं–उच्छ्रायवत् तीरं–नदीतीरं अम्बुरयः–नदीपूरवेग इवेत्यर्थः ॥ ४६ ॥

सशल्यः क्लिश्यते प्राणैः *विशल्यो विनशिष्यति।
इति मामाविशत् चिन्ता तस्य शल्यापकर्षणे ॥ ४७ ॥

हे कौसल्ये! एवं तेनोक्ते मां चिन्ता आविशत्। कीदृशीत्यतः—सशल्य इत्यादि। प्राणैः अस्वस्थैः निरुद्धगमनैश्चेति शेषः ॥ ४७ ॥

दुःखितस्य च दीनस्य मम शोकातुरस्य च।
लक्षयामास हृदये चिन्तां मुनिसुतस्तदा ॥ ४८ ॥

मुनिसुतो लक्षयामासेति। इदानीमस्मदुक्तचिन्तया, अयं मदीयं शल्यं नोद्धरतीति ज्ञातवानित्यर्थः ॥ ४८ ॥

ताम्यमानः स मां कृच्छ्रात् उवाच[1] परमार्तवत्।
सीदमानो विवृत्ताङ्गः वेष्टमानो गतः क्षयम् ॥ ४९ ॥

परमार्तवत्–परमार्तः सन्। क्षयं–शक्तिक्षयम् ॥ ४९ ॥

संस्तभ्य शोकं धैर्येण स्थिरचित्तो[2] भवानघ!
ब्रह्महत्याकृतं[3] पापं हृदयादपनीयताम् ॥ ५० ॥

किमुवाचेत्यतः—संस्तभ्येति। संस्तंभ्येति यावत्। शोकं–ब्रह्महत्याप्तिजम्। कथं मे स्थिरचित्तालाभ इत्यतः—ब्रह्महत्येत्यादि ॥

---

* तेन च साक्षादेव ब्रह्महत्या मे भवेदिति चिन्तेत्यर्थः।

[1] परमार्थवत्–ङ. [2] भवाम्यहम्–ङ. [3] तापं–ङ.

न द्विजातिरहं, राजन्! मा भूत् ते मनसो व्यथा।
*शूद्रायामस्मि वैश्येन जातः, जनपदाधिप! ॥५१॥

इतीव वदतः कृच्छ्रात् बाणाभिहतमर्मणः।
विघूर्णतो विचेष्टस्य वेपमानस्य भूतले ॥५२॥

तस्य †[1] त्वाताम्यमानस्य तं बाणमहमुद्धरम्।
स मामुद्वीक्ष्य संत्रस्तः जहौ प्राणान् तपोधनः ॥५३॥

आताम्यमानस्य। ताम्यत इति यावत्। मामुद्वीक्ष्य संत्रस्त इति—प्राणहरत्वादेव। तपोधन इति। तपोधनकुमार इति यावत् ‡॥

जलार्द्रगात्रं तु विलप्य[2] कृच्छ्रं
मर्मव्रणं सन्ततमुच्छ्वसन्तम्।
ततः सरय्वां तमहं शयानं
समीक्ष्य[3] भद्रे! सुभृशं विषण्णः ॥५४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे त्रिषष्टितमः सर्गः

अथ कौसल्यां प्रति मुनिकुमारासुक्षयान्तव्यापारजस्वशोकानुवादः—जलार्द्रेत्यादि। कृच्छ्रं मर्मव्रणं प्राप्य, विलप्य सन्ततमुच्छ्वसन्तं, ततः—तदनन्तरं सरय्वां—तत्तीरे मृत्वा शयानं तं वीक्ष्य, हे भद्रे! अहं सुभृशं विषण्णोऽभवम्। धर्म(५४)मानः सर्गः॥ ५४॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे त्रिषष्टितमः सर्गः

---

* 'शूद्राविशोस्तु करणः'। † आनम्यमानस्य—व्यथया सङ्कुचिताङ्गस्य—गो.
‡ स्वयं नायं तपोधन इत्यभिप्रायेण एवं व्याख्या। परन्तु अनन्तरसर्गाद्यश्लोके 'वधमप्रतिरूपं तु महर्षेः' इति वाक्यं चिन्तनीयमत्र।

[1] त्वानम्यमानस्य, नानद्यमानस्य—ङ. [2] कृच्छ्रात्—ङ. [3] भद्रेऽस्मि—ङ.

चतुष्षष्टितमः सर्गः

[दशरथदिष्टान्तः]

वधमप्रतिरूपं तु महर्षेस्तस्य राघवः।
विलपन्नेव धर्मात्मा कौसल्यां[1] पुनरब्रवीत् ॥ १ ॥

अथ तत्पितृदर्शनादिशेषवृत्तान्तकथनम्। वधमित्यादि। राघवः—दशरथः। विलपन्नेव—पुत्रं प्रति विलपन्नेव कौसल्यां प्रति तस्य महर्षेः अप्रतिरूपं—* अतितरामनुचितं वधं पुनः—पाश्चात्यवृत्तान्तं च अब्रवीत्। इदं कविवचनम् ॥ १ ॥

तदज्ञानात् महत् पापं कृत्वाऽहं सङ्कुलेन्द्रियः।
एकस्त्वचिन्तयं बुध्या कथं नु सुकृतं भवेत् ॥ २ ॥

तदेव प्रतिपाद्यते—तदित्यादि। सङ्कुलितेन्द्रियः—क्षुभितेन्द्रियः। एकः—एकाकी च अहं गत्वा 'तं प्रसादय' इत्याद्युक्तमुनिकुमारवचनानुष्ठानं कथं नु सुकृतं—सुष्ठु संपादितं भवेदिति बुध्या अचिन्तयम् ॥ २ ॥

ततस्तं घटमादाय पूर्णं परमवारिणा।
आश्रमं तमहं प्राप्य यथाऽऽख्यातपथं गतः ॥ ३ ॥

ततस्तमित्यादि। ततः एवं चिन्तयित्वा। यथाऽऽख्यातपथं—मुनिकुमारोपादिष्टमार्गम् ॥ ३ ॥

तत्राहं दुर्बलावन्धौ वृद्धावपरिणायकौ।
अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ ॥ ४ ॥

---

* असाधारणं वा।

[1] इदम—च.

अपरिणायकौ—अन्धयोस्तयोः सञ्चारयितृपुरुषान्तररहितौ ॥

तन्निमित्ताभिरासीनौ * कथाभि[1]रपरिश्रमौ ।
तामाशां मत्कृते हीनौ [2] उदासीनावनाथवत् ॥ ५ ॥

तन्निमित्ताभिः—पुत्रनिमित्ताभिः कथाभिः हेतुभिः अपरिश्रमावासीनौ—पुत्रो जलमानेष्यतीति प्रत्याशया श्रमं सोढ्वा आस्थिताविल्यर्थः। मत्कृते—मत्कृतदुष्कर्मनिमित्ततः तामाशां प्रत्यपि हीनौ, अत एव अनाथवत् उदासीनौ—अनाथावेव सन्तौ स्थितौ इत्यर्थः ॥ ५॥

शोकोपहतचित्तश्च भयसंत्रस्तचेतनः ।
तच्चाश्रमपदं गत्वा भूयः शोकमहं गतः ॥ ६ ॥

तौ दृष्ट्वा शोकोपहतचित्त इति योजना। भूयः—अभ्यधिकम् † ॥ ६ ॥

पदशब्दं तु मे श्रुत्वा मुनिर्वाक्यमभाषत।
किं चिरायसि, मे पुत्र! पानीयं क्षिप्रमानय ॥ ७॥

चिरायसि—'तत्करोति' इति णिच्, किं विलम्बं करोषि ॥ ७ ॥

यन्निमित्तमिदं, तात! सलिले क्रीडितं त्वया ।
उत्कण्ठिता ते मातेयं प्रविश क्षिप्रमाश्रमम् ॥ ८ ॥

हे तात! यन्निमित्तं—येन हेतुना एतावत्कालं सलिले त्वया इदं क्रीडितम्—भावे निष्ठा, क्रीडनमभूत्, तेनेयं ते माता उत्कण्ठिता—सशोकस्मरणवत्यभूत ॥ ८॥

---

* कथाभिः उपलक्षितौ—गो.　† तयोरसहायतादर्शनेन शोकस्याधिक्यम् ।

[1] रपरिक्रमौ—ङ.　[2] उपासीना—च.

यत् [1]व्यलीकं कृतं, पुत्र ! मात्रा ते यदि वा मया ।
न तन्मनसि कर्तव्यं त्वया, तात ! तपस्विना ॥ ९ ॥

व्यलीकं—अप्रियम् ॥ ९ ॥

त्वं गतिस्त्वगतीनां च चक्षुस्त्वं हीनचक्षुषाम् ।
समासक्ताः त्वयि प्राणाः किं त्वं नौ नाभिभाषसे ॥ १० ॥

नौ—आवां प्रति किञ्चिदपि नाभिभाषसे, तत् कस्मादिति शेषः ॥ १० ॥

मुनिमव्यक्तया वाचा तमहं *सज्जमानया ।
हीनव्यञ्जनया प्रेक्ष्य [2]भीतोऽभीत इवाब्रुवम् ॥ ११ ॥

तं—पदशब्दं श्रुत्वा पुत्रधिया वदन्तम् । सज्जमानया-गद्गदया, अत एव हीनव्यञ्जनया—व्यञ्जनाक्षरव्यक्तिरहितया । †भीतोऽपि सन् अभीत इवाब्रुवम् ॥ ११ ॥

‡मनसः कर्म चेष्टाभिः अभि संस्तभ्य वाग्बलम् ।
आचचक्षे त्वहं तस्मै पुत्रव्यसनजं भयम् ॥ १२ ॥

इदमेव प्रतिपाद्यते—मनस इत्यादि । मनसः कर्म—भीतिरूपम् । वाग्बलमवष्टभ्य साध्याभिः चेष्टाभिः—अभीतिसाध्यव्यवहारैः अभि–

---

* सज्जमानया—स्खलन्त्या, हीनव्यञ्जनया—अस्पष्टाक्षरया—गो. † भीतोऽपि सन् भीतः, अत्यन्तभीत इत्यर्थः—गो. ‡ मनसः कर्म—ऊहापोहात्मकं, चेष्टाः—इन्द्रियनियमनरूपव्यापाराः । ताभिः वाग्बलमभिसंस्तभ्य—स्खलितां वाचं बलाद् दृढीकृत्येत्यर्थः । ....यद्वा—लज्जाभीतिप्रभृतिभिः मन्दवचनो भूत्वेत्यर्थः—गो.

[1] अलीकं—ङ. [2] भीतचित्त इव—च.

अभितः संस्तभ्य-भीताकारतामाच्छाद्य अभीत इवाचचक्षे-आख्यातवानस्मि। अत्रापि भट्टारका बहु वदन्ति ; न तदस्मन्मनः श्रद्धत्ते ॥ १२ ॥

क्षत्रियोऽहं दशरथः नाहं पुत्रो महात्मनः।
सज्जनावमतं दुःखं इदं प्राप्तं स्वकर्मजम् ॥ १३ ॥

महात्मनस्तव पुत्रो नाहमिति योजना। सज्जनावमतं-साधुविगर्हितं मया दुःखं प्राप्तम् ॥ १३॥

भगवन्! चापहस्तोऽहं सरयूतीरमागतः।
जिघांसुः श्वापदं कश्चित् निपाने वाऽऽगतं गजम् ॥ १४॥

किं तत्? इत्यतः—भगवन्नित्यादि। घोरं श्वापदं शार्दूलादिकं, निपाने-अवतारे गजं वा जिघांसुः ॥ १४ ॥

तत्र श्रुतो मया शब्दः जले कुम्भस्य पूर्यतः।
*द्विपोऽयमिति मत्वाऽयं बाणेनाभिहतो मया ॥ १५ ॥

अयमिति। श्रुतशब्दहेतुपदार्थ इत्यर्थः ॥ १५ ॥

गत्वा नद्यास्ततस्तीरं अपश्यमिषुणा हृदि।
विनिर्भिन्नं गतप्राणं शयानं भुवि तापसम् ॥ १६ ॥

गतप्राणं-गतकल्पप्राणम् ॥ १६ ॥

भगवन्! शब्दमालक्ष्य मया गजजिघांसुना।
विसृष्टोऽम्भसि नाराचः ततस्ते निहतः सुतः ॥ १७ ॥

---

* अयं-शब्दहेतुः पदार्थः द्विप इति मत्वा अयं-तव सुतः मया अभिहतः-गो.

ततस्तस्यैव वचनात् उपेत्य परितप्यतः।
स मया सहसा बाणः उद्धृतो मर्मतस्तदा ॥ १८ ॥

तस्यैवेति। त्वत्पुत्रस्यैवेत्यर्थः। वचनात् उद्धृत इत्यन्वयः ॥१८॥

स चोद्धृतेन बाणेन [1] तत्रैव स्वर्गमास्थितः।
भवन्तौ पितरौ शोचन् [2] वृद्धाविति विलप्य च ॥ १९ ॥

बाणेन हेतुनेति शेषः। वृद्धाविति शोचन्निति। कः अतः परं रक्षिष्यति वृद्धौ—इति शोचन्नित्यर्थः ॥ १९ ॥

अज्ञानात् भवतः पुत्रः सहसाऽभिहतो मया।
* शेषमेवं गते यत् स्यात् तत् प्रसीदतु मे मुनिः ॥ २० ॥

त्वत्पुत्रे-त्वद्रक्षके एवं गते सति–मृते सति यत् शेषं स्यात्–शेषाय रक्षणं कर्तव्यं स्यात् तदुद्दिश्य मे–मह्यं भवान् प्रसीदतु। त्वद्रक्षणे ममैवाज्ञां दत्त्वा मामनुगृह्णात्वित्यर्थः ॥ २० ॥

स तत् श्रुत्वा वचः क्रूरं मयोक्तमघशंसिना।
† नाशकत् तीव्रमायासं [3] अकर्तुं भगवान् ऋषिः ॥ २१ ॥

एवमज्ञानकृतत्वबोधनात् शेषरक्षणमपि मयैव निर्वाह्यत इत्युक्तत्वाच्च तत्कालं मां न भस्मसादकरोदित्याह—स तत् श्रुत्वेत्यादिना। आयासं–दुःखम् ॥ २१ ॥

स बाष्पपूर्ण [4] वदनः निश्वसन् शोककर्शितः।
मामुवाच महातेजाः कृताञ्जलिमुपस्थितम् ॥ २२ ॥

---

* यत् शेषं कर्तव्यं स्यात शापानुग्रहादिकं तत्प्रति मे मयि प्रसीदतु, शापो वा अनुग्रहो वा यः कर्तव्यः तं करोत्वित्यर्थः-**गो.** † ऋषिस्सन्नपि तीव्रमायासं अकर्तुं नाशकत–अकरोदेवेत्यर्थः ॥

[1] सहसा–**च.** [2] अन्धाविति–**ङ**, **च.** [3] स धर्तुं–**ङ.** [4] नयनः–**च.**

यदेतदशुभं कर्म न त्वं मे कथयेः स्वयम् ।
फलेन्मूर्धा स्म ते, राजन्! सद्यः शतसहस्रधा ॥ २३ ॥

स्वयमेवागत्य मे न कथयेर्यदि स्म; वाक्यालङ्कारे स्मशब्दः। फलेत्—विशीर्येत्। मच्छापेनेति शेषः ॥ २३ ॥

*क्षत्रियेण वधः, राजन्! वानप्रस्थे विशेषतः ।
ज्ञानपूर्वं कृतः स्थानात् च्यावयेदपि वज्रिणम् ॥ २४ ॥

ज्ञानपूर्वत्वे तु सद्योऽनर्थप्राप्तिरेव तत्कर्मफलमित्याह—क्षत्रियेणेत्यादि। विशेषत इति। अन्धतोऽनाथे इति शेषः। ज्ञानपूर्वं कृतो यद्ययं वधः स्यात्, तदाऽयं मत्कोपेन वज्रिणमपि स्थानात् च्यावयेत्—पातयेत्, किमु त्वादृशमित्यर्थः ॥ २४ ॥

†सप्तधा तु फलेन्मूर्धा मुनौ तपसि तिष्ठति ।
ज्ञानात् विसृजतः शस्त्रं तादृशे [1]ब्रह्मचारिणि ॥ २५ ॥

एवं स्वकोपेन तत्कालनाशमुक्त्वा पुत्रकोपेनापि तत्कालनाशः अज्ञानमूलत्वादित्याह— सप्तधेत्यादि। स्वापेक्षया तपोन्यूनत्वात् सप्तधेति। ज्ञानात् विसृष्टमिति। यदीति शेषः ॥ २५ ॥

अज्ञानाद्धि कृतं यस्मात् इदं तेनैव जीवसि ।
अपि ह्यद्य कुलं न स्यात् राघवाणां, कुतो भवान्? ॥ २६ ॥

ते—तवेदं कृतं कर्म यस्मादज्ञानात्, तेन हि—तेनैव हेतुना जीवसे—जीवसीति यावत्। अपीति। यदि ज्ञानपूर्वमपीदं स्यात्, तदा राघवाणां कुलमेव न स्यात्, कुतो भवान् जीवेत् ॥ २६ ॥

---

* प्रजापालननिरतस्य क्षत्रियस्य अनपराधिसामान्यप्रजावध एव दोषावहः, वानप्रस्थे, तत्रापि बुद्धिपूर्वं कृतस्तु वधः—वज्रिणमपि स्थानात् च्यावयेत्। † सप्तधा—बहुधेत्यर्थः—गो।

[1] ब्रह्मवादिनि—ङ, च.

नय नौ, नृप! तं देशं इति मां चाभ्यभाषत ।
अद्य तं द्रष्टुमिच्छावः पुत्रं *पश्चिमदर्शनम् ॥ २७ ॥

द्रष्टुं–अनुभवितुं, स्पर्शनादिनेति शेषः । पश्चिमदर्शनं–सर्वान्तदर्शनमिति यावत् ॥ २७ ॥

रुधिरेणावसिक्ताङ्गं प्रकीर्णाजिनवाससम् ।
शयानं भुवि निस्संज्ञं धर्मराजवशं गतम् ॥ २८ ॥

†अथाहमेकस्तं देशं नीत्वा तौ भृशदुःखितौ ।
अस्पर्शयमहं पुत्रं तं मुनिं सह भार्यया ॥ २९ ॥

तौ पुत्रमात्मनः स्पृष्ट्वा तमासाद्य तपस्विनौ ।
निपेततुः शरीरेऽस्य पिता चास्येदमब्रवीत् ॥ ३० ॥

इदमब्रवीदिति । वक्ष्यमाणरूपं लौकिकं प्रलापमित्यर्थः ॥ ३० ॥

नाभिवादयसे माऽद्य न च मामभि भाषसे ।
किं नु [1]शेषे तु भूमौ त्वं, वत्स! [2]संकुपितो ह्यसि ॥ ३१ ॥

संकुपितः–संकोपं प्राप्तः ॥ ३१ ॥

‡न त्वहं [3]तेऽप्रियः, पुत्र! मातरं पश्य, [4]धार्मिक!
किं नु नालिङ्गसे, पुत्र! सुकुमार! वचो वद ॥ ३२ ॥

अप्रिय इति पदम् , अप्रियकारी नास्मीत्यर्थः ॥ ३२ ॥

कस्य वाऽपररात्रेऽहं श्रोष्यामि हृदयङ्गमम् ।
अधीयानस्य मधुरं शास्त्रं वाऽन्यत् विशेषतः ॥ ३३ ॥

---

* 'अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमम्' अन्तिमदर्शनं तं द्रष्टुमिच्छावः ।
† अहं तौ तं देशं नीत्वा तं पुत्रं अहमस्पर्शयमित्यन्वयः ॥ ‡ अहं ते प्रियः न तु चेत्–गो.

[1] शेषेऽथ–ङ. [2] किं कुपि–ङ. च. [3] ते प्रियः–ङ. [4] धार्मिकी–ङ.

शास्त्रं वाऽन्यद्वेति । पुराणं वेति शेषः । वैश्यात् शूद्रायां जातस्य करणजातित्वात् वेदप्रसङ्गो नोक्तः ॥ ३३ ॥

को मां सन्ध्यामुपास्यैव स्नात्वा * हुतहुताशनः ।
श्लाघयिष्यत्युपासीनः पुत्रशोकभयार्दितम् ॥ ३४ ॥

सन्ध्यामुपास्येत्यादि । आगममार्गत इति शेषः । करणस्य [1]वेदमार्गानधिकारात् । श्लाघयिष्यति- श्लाघनं–उद्वर्तनं, तत्पूर्वं कः स्नापयिष्यतीत्यर्थः । तथा प्रयोगः 'नाप्सु श्लाघमानः स्नायात्' इति ब्रह्मचारिप्रकरणे आपस्तम्बः ॥ ३४ ॥

कन्दमूलफलं हृत्वा को मां प्रियमिवातिथिम् ।
† [2]भोजयिष्यति कर्मण्यं अप्रग्रहमनायकम् ॥ ३५ ॥

कर्मसु साधुः कर्मण्यः, 'तत्र साधुः' इति यत् । अतिथि-विशेषणमिदम् । अप्रग्रहं–यष्टिं गृहीत्वा पुरोमार्गप्रदर्शकरहितम् ॥

इमामन्धां च वृद्धां च मातरं ते तपस्विनीम् ।
कथं, वत्स! भरिष्यामि कृपणां पुत्रगर्धिनीम् ॥ ३६ ॥

कथं वत्स भरिष्यामीति । स्वयमप्यन्ध इति शेषः ॥ ३६ ॥

‡ तिष्ठ [3]मा मा गमः, पुत्र! यमस्य सदनं प्रति ।
श्वो मया सह गन्ताऽसि जनन्या च समेधितः ॥ ३७ ॥

§ मामित्याबाधे द्विरुक्तिः । समेधितः—संगत इति यावत् ॥

---

* ननु वैश्यात शूद्रायां जातो हि करणः, तस्य कथं होमाधिकार इति—मैवम्— 'नमस्कारेण मन्त्रेण पञ्चयज्ञान् समापयेत' इति चतुर्थवर्णस्यापि पञ्चमहायज्ञाधिकारः स्मर्यते, ततोऽप्यधिकस्य करणस्य स्वोचितमन्त्रैर्होमाधिकारस्य कैमुत्यन्यायसिद्धत्वात् । श्लाघयिष्यति–उपचरिष्यतीत्यर्थः–गो. † अकर्मण्यं–कर्मानुष्ठानाक्षमम्–गो., ति. ‡ तिष्ठ मां-मां प्रति तिष्ठ, मा गमः–मा गच्छ–गो. § आबाधा–पीडा ।

[1] वैदिकमा–ग. [2] भोजयिष्यत्यकर्मण्यं–ङ., च. [3] मां मा–ङ.

उभावपि च शोकार्तौ अनाथौ कृपणौ वने ।
क्षिप्रमेव गमिष्यावः [1]त्वयाऽहीनौ यमक्षयम् ॥ ३८ ॥

यमक्षयं–यमगृहम् ॥ ३८ ॥

ततो वैवस्वतं दृष्ट्वा तं प्रवक्ष्यामि भारतीम् ।
*क्षमतां धर्मराजो मे बिभृयात् पितरावयम् ॥ ३९ ॥

ऋषिः सहगमनप्रयोजनमाह—तत इत्यादि । यमक्षयं प्रति सहगमनानन्तरमित्यर्थः । भारतीं–वाक्यं प्रवक्ष्यामि । कीदृशीमित्यतः—क्षमतामित्यादि । धर्मराजः भवान्, अयं मे पुत्रः पितरौ बिभृयादिति यत्, अतोऽयं क्षमतां–शस्त्रहतत्वतो दुर्मरणमूलपापं क्षमताम् ॥ ३९ ॥

दातुमर्हति धर्मात्मा लोकपालो महायशाः ।
ईदृशस्य ममाऽक्षय्यां एकामभयदक्षिणाम् † ॥ ४० ॥

एवं मया प्रार्थितो धर्मात्मा दुर्मरणजदुर्गतिं निवर्तयित्वा ईदृशस्य याचतः मम अक्षय्यामेकामभयदक्षिणां दातुमर्हति ॥ ४० ॥

‡अपापोऽसि यथा, पुत्र ! निहतः पापकर्मणा ।
तेन सत्येन गच्छाशु [2]ये लोकाः शस्त्रयोधिनाम् ॥ ४१ ॥

अथेदानीं त्रिशङ्कुं विश्वामित्र इव, स्वमहिम्ना स्वसुतं स्वर्गं प्रापयति—अपापोऽसीत्यादि । हे पुत्र ! पापेन कर्मणा–शस्त्रवधलक्षणेन

---

*क्षमतां मत्पुत्रस्य स्वपरिमरागमनविलम्बं सहताम्–गो. पुत्रवियोगजनकं मम पूर्वकृतापराधं क्षमताम्–ति. † पुत्रपुनरुज्जीवनं वात्र विवक्षितम् । तदसंभवशंकया च उत्तरश्लोकप्रवृत्तिः । ‡ नन्वस्य तपस्विनः ब्रह्मलोकप्राप्तिरेव वक्तव्या, शस्त्रहननमात्रेण शस्त्रयोधिनां लोकं प्रापयत्वेन वदति, एतत् कथमुपपद्यते—उच्यते—'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राट् योगयुक्तश्च रणे चाभिमुखो हतः ॥' इति शस्त्रयोधिनामुत्कृष्टलोकप्राप्तिश्रवणात् न दोषः–गो.

[1] त्वया सह–ङ., त्वया हीनौ–च. [2] ये लोकास्त्वत्र–ङ.

निहतस्त्वं यथा अपापोऽसि–निष्पापो जायसे, तेन मामकेन सत्येन–तपसा शस्त्रयोधिनां ये लोकाः पुण्याः सन्ति, तान् लोकान् आशु गच्छ ॥ ४१ ॥

[1]यान्ति शूरा गतिं यां च संग्रामेष्वनि[2]वर्तिनः ।
हतास्त्वभिमुखाः, पुत्र! गतिं तां परमां व्रज ॥४२॥

उक्तमेवार्थं विविच्य प्रतिपादयति—यान्तीत्यादि । स्वर्गगामिनां शूराणां प्रसिद्धानां गतिम् ॥ ४२ ॥

यां गतिं सगरः शैब्यः दिलीपो जनमेजयः ।
नहुषो धुन्धुमारश्च *प्राप्तास्तां गच्छ, पुत्रक! ॥४३॥
या गतिः [3]सर्वसाधूनां स्वाध्यायात् तपसश्च या ।
या भूमिदस्याहिताग्नेः एकपत्नीव्रतस्य च ॥४४॥

पुनर्विशिष्याह—यां गतिमित्यादि । एकपत्नीव्रताः–रामादयः ॥ ४३–४४ ॥

गोसहस्रप्रदातॄणां या, या गुरुभृतामपि ।
†देहन्यासकृतां या च तां गतिं गच्छ, पुत्रक! ॥४५॥

गुरून् बिभ्रतीति गुरुभृतः । देहन्यासभृतां–महाप्रस्थान-प्रयाणादिनेति शेषः ॥ ४५ ॥

न हि त्वस्मिन् कुले जातः गच्छत्यकुशलां गतिम् ।
स तु यास्यति येन त्वं निहतो मम बान्धवः ॥४६॥

---

* एते सर्वे यां गतिं प्राप्ता इत्यन्वयो वक्तव्यः । † परलोकप्राप्तिसंकल्पपूर्वकं गंगायमुनासंगमादौ जले अग्नौ वा तनुं त्यजतामित्यर्थः–गो.

[1] यां हि शूरा गतिं प्राप्ताः–ङ. [2] वर्तिनां–ङ. [3] सर्वभूतानां–ङ.

अस्मिन्—मदीये कुले—नित्यतपस्विकुले जातः न हि त्वकुशलां गतिं गच्छति। मम बान्धवस्त्वं येन हतः * स तु—तादृश एव तु अकुशलां गतिं यास्यति ॥ ४६ ॥

एवं स कृपणं तत्र पर्यदेवयतासकृत् ।
ततोऽस्मै कर्तुमुदकं प्रवृत्तः सह भार्यया ॥ ४७ ॥

ततो दिव्येन रूपेण मुनिपुत्रः स्वकर्मभिः ।
† स्वर्गमध्यारुहत् क्षिप्रं ‡ शक्रेण सह धर्मवित् ॥ ४८ ॥

स्वर्गमध्यारुहदिति। 'तेन सत्येन गच्छाशु' इति मुनिवचनानुक्षणमित्यर्थः ॥ ४८ ॥

आबभाषे च तौ वृद्धौ शक्रेण सह तापसः ।
आश्वास्य च मुहूर्तं तु पितरौ वाक्यमब्रवीत् ॥ ४९ ॥

आरुह्य शक्रेण सहागत्य आबभाष इति योजना ॥ ४९ ॥

[1] स्थानमस्मिन् महत् § प्राप्तः भवतोः परिचारणात् ।
भवन्तावपि च क्षिप्रं मम मूलमुपैष्यतः ॥ ५० ॥

अस्मिन् लोके स्वर्गे वा। मूलं—समीपम् ॥ ५० ॥

---

* ननु तर्हि कथं दशरथस्य स्वर्गप्राप्तिरुत्तरत्र वर्णिता। युद्धकाण्डे च 'एष राजा दशरथः .. इन्द्रलोकं गतः॥' (यु. 119–8) इति च कथं--इति चेत्—उच्यते—न ह्यत्र ऋषिणा दशरथाय तथा शापोऽत्र दत्तः, दशरथं प्रत्यवचनादस्य। दीयते चोत्तरत्रैव शापः 'त्वयापि च यदज्ञानात्' इत्यादिना। किन्तु वस्तुस्थितिकथनमेवेदमिति। ननु एतादृशवधकर्तुः सद्गतिर्वा कथमिति चेत्, ऋषिणा शापदानेन प्रायश्चित्तस्थानीयेन पुत्रवियोगशोकजमरणेनैव अबुद्धिपूर्वकैतद्वधजन्यपापस्य शान्त्या न कश्चिद्दोषः। † आरोहणक्रम एवोत्तरत्र वर्ण्यत इति न पौनरुक्त्यादिः। ‡ मुनिपुत्रमानेतुं आगतेन शक्रेण सहेत्यर्थः। § प्राप्तः, अहमिति शेषः।

[1] स्थानमस्मि महत्—ङ.

एवमुक्त्वा तु दिव्येन विमानेन वपुष्मता।
आरुरोह दिवं क्षिप्रं मुनिपुत्रो जितेन्द्रियः ॥ ५१ ॥

वपुष्मता, प्रशंसायां मतुप्, पुष्पकादिवत्–प्रशस्ताकारवता ॥

स कृत्वा तूदकं तूर्णं तापसः सह भार्यया।
मामुवाच महातेजाः कृताञ्जलिमुपस्थितम् ॥ ५२ ॥

अद्यैव जहि मां, राजन्! मरणे नास्ति मे व्यथा।
यच्छरेणैकपुत्रं मां त्वमकार्षीरपुत्रकम्[1] ॥ ५३ ॥

अद्येत्यादि। हे राजन्! मामप्यद्यैव जहि–मारय। मे मरणव्यथा नास्ति। इदन्तु दुःखाद्वचनम् ॥ ५३ ॥

त्वयाऽपि च यदज्ञानात् निहतो मे स बालकः।
*तेन त्वामपि शप्स्येऽहं सुदुःखमतिदारुणम् ॥ ५४ ॥

अज्ञानान्निहत इति यत्, तेन त्वामभिशप्स्याम्येव केवलं, न तु प्रत्यक्षतोऽद्य भस्मीकरोमि ॥ ५४ ॥

पुत्रव्यसनजं दुःखं यदेतन्मम सांप्रतम्।
एवं त्वं पुत्रशोकेन, राजन्! कालं गमिष्यसि ॥ ५५ ॥

सांप्रतं–वृत्तम्। त्वन्निमित्तमिति शेषः ॥ ५५ ॥

अज्ञानात्तु हतो यस्मात् क्षत्रियेण त्वया मुनिः।
तस्मात् त्वां नाविशत्याशु †ब्रह्महत्या, नराधिप! ॥ ५६ ॥

---

* अतिदारुणं त्वां सुदुःखं यथा तथा शप्स्ये इत्यन्वयः। सुदुःखमतिदारुणमित्युभयमपि क्रियाविशेषणं वा। †ब्रह्महत्या—बहुपातकमित्यर्थः। अन्यथा वैश्यात् शूद्रायां जातस्य करणाख्यसंकरजातित्वेन ब्रह्महत्याप्रसक्त्यभावात्–गो. ब्रह्महत्यासदृशकरणवधजनितपापं–रा. गौणब्रह्महत्या वा विवक्षिता।

[1] एतदनन्तरं 'कथं नेषां कुले जातः क्षत्रियाणां महात्मनाम्। सर्ववेदविदश्रेष्ठो धर्मे न कुरुते मनः। श्रोत्रियं न ते वेद ब्रह्मजं वाक्यजं न ते ॥' इत्यधिकं-ङ.

*त्वामप्येतादृशो भावः क्षिप्रमेवागमिष्यति।
जीवितान्तकरो घोरः दातारमिव दक्षिणा ॥५७॥

एवं शापं मयि न्यस्य विलप्य करुणं बहु।
चितामारोप्य देहं तत् मिथुनं स्वर्गमभ्ययात् ॥५८॥

देहमिति। देहाविति यावत् ॥ ५८ ॥

तदेतच्चिन्तयानेन स्मृतं पापं मया स्वयम्।
तदा बाल्यात् कृतं, देवि! शब्दवेध्यनुकर्षिणा ॥५९॥

शब्दवेधीति। प्रथमं शब्दमात्रवेधी, पश्चात् विद्धशल्यस्यानुकर्षणमपि कृतवांस्तथा, तेनेत्यर्थः ॥ ५९ ॥

तस्यायं कर्मणः, देवि! विपाकः समुपस्थितः।
† अपथ्यैः सह [1] संभुक्तो व्याधिमन्नरसो यथा ॥६०॥

व्याधिमिति। उपस्थापयतीति शेषः ॥ ६० ॥

तस्मान्मामागतं, भद्रे! तस्योदारस्य तद्वचः।
यदहं पुत्रशोकेन संत्यक्ष्याम्यद्य जीवितम् ॥६१॥

उदारस्य—श्रेष्ठस्येत्यर्थः। तद्वचः—तस्य शापवचःफलमित्यर्थः॥

चक्षुर्भ्यां त्वां न पश्यामि, कौसल्ये! साधु मा स्पृश।
[2] इत्युक्त्वा स रुदंस्त्रस्तः भार्यामाह तु भूमिपः ॥६२॥

त्रस्त इति। मरणभयादिति शेषः। अद्य जीवितं त्यक्ष्यामीति यत् अतो मुमूर्षुत्वात् न त्वां चक्षुषा पश्यामि ॥ ६२ ॥

---

* एतादृशः भावः—मनसोऽवस्थितः त्वामपि क्षिप्रमेवागमिष्यति। † अपथ्यैरन्नरसैः सह भुक्तोऽन्नरसे व्याधिर्यथोपतिष्ठते—ति.

[1] संभुक्ते व्याधिरन्नरसे—च. [2] एतदनन्तरश्लोकानां पौर्वापर्ये भेदः—ङ. पुस्तके दृश्यते।

यमक्षयमनुप्राप्ता द्रक्ष्यन्ति न हि मानवाः ॥ ६३ ॥

न हि द्रक्ष्यन्तीति। स्वेष्टबन्धूनिति शेषः ॥ ६३ ॥

यदि मां संस्पृशेत् रामः सकृदद्य लभेत वा।
[1]धनं वा यौवराज्यं वा जीवेयमिति मे मतिः ॥ ६४ ॥

अद्य सकृदपि मां रामः संस्पृशेद्यदि, तदा जीवेयमतः परमिति मे मतिः। यद्वा धनं यौवराज्यं वा लभेत, तदा वा जीवेयम्। न त्रयमपि संवृत्तमिति शेषः ॥ ६४ ॥

***[2]एतन्मे सदृशं, देवि! यन्मया राघवे कृतम्।**
सदृशं तत्तु तस्यैव यदनेन कृतं मयि ॥ ६५ ॥

अनेन—रामेण मयि—पितरि यत् कृतं—त्यक्त्वाऽपि राज्यं स्ववचनपरिपालनरूपं कर्म, तत्तु तस्यैव सदृशम् ॥ ६५ ॥

दुर्वृत्तमपि कः पुत्रं त्यजेत् भुवि विचक्षणः।
कश्च प्रव्राज्यमानो वा नासूयेत् पितरं सुतः ॥ ६६ ॥

स्वसदृशान्यायकृत् रामसदृशन्यायकृच्च लोके † नाभूत्, अस्ति, भविष्यतीत्याह—दुर्वृत्तमित्यादि ॥ ६६ ॥

चक्षुषा त्वां न पश्यामि स्मृतिर्मम विलुप्यते।
दूता वैवस्वतस्यैते, कौसल्ये! त्वरयन्ति माम् ॥ ६७ ॥

---

* पूर्वार्धे स्वश्लाघना, उत्तरार्धे रामश्लाघना च अकारि। राघवे यन्मया कृतं तत् न मे सदृशं–ति. वस्तुतः–रामविषये मया यत् कृतं तत् मे–मादृशस्य मूर्खस्यैव सदृशं-युक्तं; एतादृशेऽपि रामेण यत् कृतं तत् तस्यैव सदृशम्। अयमेवार्थः अनन्तर-श्लोके विव्रियते। † नञः उत्तरत्रापि सम्बन्धः।

[1] इदमर्धं कुत्रचिन्नास्ति–ङ. [2] न तन्मे–च.

अतस्तु किं दुःखतरं यदहं जीवितक्षये ।
न हि पश्यामि धर्मज्ञं रामं सत्यपराक्रमम् ॥ ६८ ॥
तस्यादर्शनजः शोकः सुतस्याप्रतिकर्मणः ।
उच्छोषयति मे प्राणान् वारि स्तोकमिवातपः ॥ ६९ ॥

स्तोकं वारि–अल्पोदकम् ॥ ६९ ॥

न ते मनुष्या देवास्ते ये चारुशुभकुण्डलम् ।
मुखं द्रक्ष्यन्ति रामस्य वर्षे पञ्चदशे पुनः ॥ ७० ॥

ये द्रक्ष्यन्ति ते न मनुष्याः, किन्तु देवा एव—देवांशा एव । अन्यादृशस्य तद्दर्शनासंभवात् ॥ ७० ॥

पद्मपत्रेक्षणं सुभ्रु सुदंष्ट्रं चारुनासिकम् ।
धन्या द्रक्ष्यन्ति रामस्य ताराधिपनिभं शुभम् ॥ ७१ ॥
सदृशं शारदस्येन्दोः फुल्लस्य कमलस्य च ।
सुगन्धि मम नाथस्य धन्या द्रक्ष्यन्ति तन्मुखम् ॥ ७२ ॥
निवृत्तवनवासं तं अयोध्यां पुनरागतम् ।
द्रक्ष्यन्ति सुखिनो रामं [1] शुकं मार्गगतं यथा ॥ ७३ ॥

सत्यमुक्तं दशरथेन–* शुकं मार्गगतं यथेति । हस्तात् पञ्जराद्वा ग्रहणाशक्यदेशं गतं पुनश्च मार्गं–यथावस्थानं गतं–प्राप्तं शुकं–क्रीडाशुकमिव सर्वाह्लादकं द्रक्ष्यन्तीत्यर्थः ॥ ७३ ॥

कौसल्ये! चित्तमोहेन हृदयं सीदतीव मे ।
वेदये न च [2] संयुक्तः शब्दस्पर्शरसानहम् ॥ ७४ ॥

---

* अयं भागः तिलकेऽनूदितः । शुकं मार्गगतं—इति सर्वत्र पाठो दृश्यते । मौढ्यादिकं विहाय स्वस्थानं प्राप्तं शुकमत्रेत्यर्थः ।

[1] शुकं—सर्वत्र । [2] संयुक्तान्—सर्वत्र ।

* संयुक्तः—इन्द्रियसंयुक्तस्सन् ॥ ७४ ॥

चित्तनाशाद्विपद्यन्ते सर्वाण्येवेन्द्रियाणि मे ।
क्षीणस्नेहस्य दीपस्य † संसक्ता रश्मयो यथा ॥ ७५ ॥

अयमात्मभवः शोकः मामनाथमचेतनम् ।
संसादयति वेगेन यथा कूलं नदीरयः ॥ ७६ ॥

हे राघव ! महाबाहो !! हा ममायासनाशन !!!
हा पितृप्रिय ! मे नाथ !! हाऽद्य क्वासि गतः सुत !!! ॥७७॥

हा कौसल्ये ! नशिष्यामि हा सुमित्रे ! तपस्विनि !
हा नृशंसे ममामित्रे कैकेयि ! कुलपांसनि ! ॥ ७८ ॥

इति रामस्य मातुश्च सुमित्रायाश्च सन्निधौ ।
राजा दशरथः शोचन् जीवितान्तमुपागमत् ॥ ७९ ॥

तथा तु दीनं कथयन् नराधिपः
प्रियस्य पुत्रस्य विवासनातुरः ।
गतेऽर्धरात्रे भृशदुःखपीडितः
तदा जहौ ‡ प्राणमुदारदर्शनः ॥ ८० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे चतुष्षष्टितमः सर्गः

नन्द(८०)मानः सर्गः ॥ ८० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे चतुष्षष्टितमः सर्गः

---

* संयुक्तान् इन्द्रियसंयुक्तान् न वेदये—न जाने–**गो.** † संसक्ताः—सम्बन्धिनः ॥ ‡ प्राणशब्दस्य एकवचनान्तत्वमार्षम् । अथ वा 'प्राणो हृन्मारुते', 'हृदि प्राणो गुदेऽपानः' इत्यादौ वायुविशेषरूपप्राणवाचिशब्दस्य एकवचनान्तत्वदर्शनात् तदेव पदं अत्रापि विवक्षितम् ।

पञ्चषष्टितमः सर्गः

[अन्तःपुराक्रन्दः]

अथ रात्र्यां व्यतीतायां प्रातरेवापरेऽहनि।
वन्दिनः पर्युपातिष्ठन् तत् पार्थिवनिवेशनम् ॥ १ ॥

एवमर्धरात्रे उत्सृष्टप्राणतः कौसल्याद्यैरविज्ञातनिर्याणतः यथापूर्वमुषसि राजोचितव्यवहारे प्रवृत्तेऽपि राज्ञो यथोचितव्यवहारादर्शनात् शनैः राजनिर्याणं ज्ञात्वा तदुचितव्यवहारे प्रवृत्तिः। अथेत्यादि। रात्र्यां–शेषरात्र्याम् ॥ १ ॥

सूताः * परमसंस्काराः [1] मंगलाश्चोत्तमश्रुताः।
[2] गायकाः [3] श्रुतिशीलाश्च [4] निगदन्तः † पृथक्पृथक् ॥

परमसंस्काराः–उत्तमव्याकरणसंस्कारोपेतशब्दवन्तः। मङ्गलाः–मागधाः–वंशावलिकीर्तकाः। ‡ उत्तमं श्रुतं–वंशपरंपराश्रवणं येषां ते तथा। गायकाः–वन्दिनः। श्रुतिशीलाः–तन्त्रीनादविभागशीलाः। पृथक्पृथक् निगदन्त इति। स्वस्वमार्गानुसारेणेति शेषः ॥ २ ॥

राजानं स्तुवतां तेषां [5] उदात्ताभिहिताशिषाम्।
प्रासादाभोगविस्तीर्णः स्तुतिशब्दो ह्यवर्तत ॥ ३ ॥

उदात्ताभिहिताशिषां–उदात्ततया–उच्चैष्ट्वेन अभिहिताः आशिषः तथा। प्रासादानामाभोगेषु विस्तीर्ण इति। प्रतिध्वनिनेति शेषः ॥ ३ ॥

---

* स्नानालंकारादिसंस्कारविशिष्टाश्च, अस्यार्थः। † 'सूतमागधवन्दिनः' इति तत्रतत्रोत्कीर्तनात् त्रयाणामेषां कृत्यस्य भिन्नत्वात् पृथक्पृथगित्युक्तम्। ‡ उत्तमं श्रुतं–गान्धर्वशास्त्रश्रवणं येषां ते–गो.

[1] मागधाः–ख. [2] गायना:–ङ. [3] स्तुतिशी–ङ. [4] निनदन्तः–ङ. [5] उत्तम, उदार–ङ.

ततस्तु स्तुवतां तेषां सूतानां पाणिवादकाः ।
अपदानान्युदाहृत्य पाणिवादानवादयन् ॥ ४ ॥

पाणिवादकाः–तालोपेतपाणिवादनशीलाः । अपदानं–वृत्तं कर्म राजीयं, तदुदाहृत्य तदनुगतं पाणिवादानवादयन् ॥ ४ ॥

तेन शब्देन विहगाः प्रतिबुद्धाश्च सस्वनुः ।
[1] शारिकाः पञ्जरस्थाश्च ये राजकुलगोचराः ॥ ५ ॥
व्याहृताः * पुण्यशब्दाश्च वीणानां चापि निस्वनाः ।
आशीर्गेयं च गाथानां पूरयामास वेश्म तत् ॥ ६ ॥

स्वनतेः फणादित्वात् एत्वाभ्यासलोपाभावपक्षे सस्वनुरिति । † राजकुलगोचरा ये शुकादिपक्षिणः सन्ति, तैः ‡ व्याहृताः पुण्यशब्दाः–काशीगङ्गाविश्वेश्वरादिपुण्यक्षेत्रतीर्थमहादेवतागोचरा इत्यर्थः । गाथानां–केवलगाथागायकानां आशीर्गेयं–आशीर्वादप्रधानं गानम् ॥

ततः शुचिसमाचाराः § पर्युपस्थानकोविदाः ।
स्त्रीवर्ष[2]वरभूयिष्ठाः उपतस्थुर्यथापुरम् ॥ ७ ॥

स्त्रीभिः वर्षवरैश्च भूयिष्ठास्तथा, 'षण्डो वर्षवरस्तुल्यौ' ॥ ७ ॥

हरिचन्दनसंसक्तं उदकं काञ्चनैर्घटैः ।
आनिन्युः ‖ स्नान[3]शिक्षाज्ञाः यथाकालं यथाविधि ॥८॥

स्नानशिक्षाज्ञाः—अरुणोदयात् पूर्वमेव गत्वा राज्ञः उषसि स्नानार्थमानेतव्यमिति शिक्षाज्ञाः तथा ॥ ८ ॥

---

* पुण्यशब्दाः–हरिनारायणादिपुण्यशब्दाः । यद्वा पुण्यश्लोकपुरुषाणां कीर्तनानि–ती. † राजकुलगोचराः –राजकुलवासयोग्याः–ति. ‡ व्याहृताः–ब्राह्मणैरुक्ताः–गो. § पर्युपस्थानं–परिचरणम् । ‖ स्नानशिक्षाज्ञान्–स्नानपद्धतिज्ञान् ।

[1] शाखास्थाः–ङ. [2] धर–ङ. [3] शिक्षाज्ञान्–ङ.

* मङ्गलालंभनीयानि प्राशनीयान्युपस्करान् ।
उपनिन्युस्तथाऽप्यन्याः कुमारीबहुलाः † स्त्रियः ॥ ९ ॥

मङ्गलार्थं आलंभनीयानि—स्पर्शनीयानि गवादीनि, 'आलंभः स्पर्शहिंसयोः'। प्राशनीयानि—गङ्गोदकतुलसीतीर्थादीनि । उपस्कराः—दर्पणवस्त्राभरणादयः । कुमारीबहुलाः स्त्रिय इति । वारयोषित इति यावत् ॥ ९ ॥

सर्वलक्षणसंपन्नं सर्वं विधिवदर्चितम् ।
सर्वं सुगुणलक्ष्मीवत् तत् बभूवाभिहारिकम् ॥ १० ॥

आभिहारिकं—राज्ञे प्रातर्यदभिहर्तव्यं—मङ्गलार्थमानेतव्यं तत्सर्वं सर्वलक्षणसंपन्नत्वादिधर्मकं बभूव । सुगुणं च तत् लक्ष्मीवच्च—तथा ॥

‡ तत्तु सूर्योदयं यावत् सर्वं परिसमुत्सुकम् ।
§ तस्थावनुपसंप्राप्तं किं स्विदित्युपशङ्कितम् ॥ ११ ॥

तत्तु—उक्ताभिहारिकं तु । परिसमुत्सुकमिति । राजदर्शनं प्रतीति शेषः । अनुपसंप्राप्तं—अप्राप्तराजदर्शनमित्यर्थः । अत एव, किं स्वित्—इत्यभिशङ्कितञ्च ॥ ११ ॥

अथ याः कौसलेन्द्रस्य शयनं प्रत्यनन्तराः ।
ताः स्त्रियस्तु समागम्य भर्तारं प्रत्यबोधयन् ॥ १२ ॥

अनन्तराः—आसन्ना इति यावत् ॥ १२ ॥

---

* मङ्गलरूपानुलेपनानि तैलोद्वर्तनादीनि, प्राशनीयानि—दन्तधावनानन्तरं गण्डूपत्वेन प्राशनीयानि, संपिष्टतिलनारिकेलजीरकादिद्रव्याणि ओषधिविशेषानिति वाऽर्थः—**गो.** † स्त्रिय इति द्वितीया—**गो.** ‡ तत्तु—परिजनजातं—**गो.** § अनुपसंप्राप्तं—अनागतं राजानं प्रति—**ती.** एवं परिवारगणः स्वस्वसेवायै सन्नद्धः राजानं प्रतीक्षन्नासीत् । राजा तु नाजगाम यथापूर्वम् । अतः शङ्का समजनि । राजानं स्पृष्ट्वा बोधयितुं तु नैषामर्हता । उत्तरश्लोके 'भर्तारं प्रत्यबोधयन्' इति कथनात् ।

तथाऽप्युचितवृत्तास्ताः विनयेन नयेन च ॥ १३ ॥
न ह्यस्य शयनं स्पृष्ट्वा * किञ्चिदप्युपलेभिरे ।
† ताः स्त्रियः स्वप्नशीलज्ञाः [1] चेष्टा‡सञ्चलनादिषु॥ १४ ॥

उचितवृत्ता इति । भार्यात्वादेव स्पर्शनादिव्यापारोचिताः । स्वप्नशीलज्ञाः—स्वप्नस्वभावज्ञाः ताः स्त्रियः, स्वप्नधर्मेषु चेष्टासञ्चलनाद्यङ्गपरिवर्तनप्रश्वासचलनादिषु अस्य शयनं स्पृष्ट्वापि न किञ्चिदुपलेभिरे ॥

[2] ते दीना वेपथुयुताः राज्ञः प्राणेषु शङ्किताः।
प्रतिस्रोतस्तृणाग्राणां सदृशं [3] संचकम्पिरे ॥ १५ ॥

ते दीना वेपथुयुता इत्यादि। प्रतिस्रोतस्तृणाग्राणां—स्रोतोमुखस्थितवेतसादितृणाग्राणामित्यर्थः ॥ १५ ॥

अथ [4] संवेपमानानां स्त्रीणां दृष्ट्वा च पार्थिवम्।
यत्तदाशङ्कितं पापं तस्य जज्ञे विनिश्चयः ॥ १६ ॥

यत्तदाऽशङ्कितं पापं—मरणं पूर्वदिवसे, राज्ञेति शेषः ॥ १६ ॥

कौसल्या च सुमित्रा च पुत्रशोकपराजिते ।
प्रसुप्ते न प्रबुध्येतेऽयथाकालसमन्विते ॥ १७ ॥

पराजिते—अभिभूते । अयथाकालसमन्विते इति पदम् । रात्रौ दुःखवशेन जागरणात् शिवरात्रिव्रतिनामिव प्रत्युषस्ययथाकाले

---

* किञ्चित्—उच्छ्वासादिकमित्यर्थः । † स्वप्नस्वरूपज्ञत्वात् नायं स्वप्न इति ज्ञात्वा चकंपिरे इत्यर्थः ॥ ‡ संचलनादिषु हृदयकरमूलनाडिषु चेष्टां नोपलेभिरे-ति.

[1] चेष्टां सचल-ङ., चेष्टां संचलनाडिषु—च. [2] ता वेपथुपरीताश्च—ङ. [3] संचकाशिरे—ङ. [4] सन्देहमा—च.

निद्रया समन्विते तथा । *कालसमन्विते मृते यथा न प्रतिबुध्येते इतीयं योजना अश्लीलत्वादुपेक्ष्या ॥ १७ ॥

†निष्प्रभा च विवर्णा च सन्ना शोकेन सन्नता ।
न व्यराजत कौसल्या तारेव तिमिरावृता ॥ १८ ॥

शोकेन सन्ना–उपहता । सन्नता–सुप्तिवशसङ्कुचितकरचरणा ॥

‡कौसल्याऽनन्तरं राज्ञः सुमित्रा तदनन्तरम् ।
§न स्म विभ्राजते देवी शोकाश्रुलुलितानना ॥ १९ ॥
ते च दृष्ट्वा तथा सुप्ते उभे देव्यौ च तं नृपम् ।
[1]सर्वमेवोद्धतप्राणमन्तःपुर[2]मदृश्यत ॥ २० ॥

ते चेत्यादि । ते उभे देव्यौ तथा सुप्ते–गाढसुप्ते प्रश्वासादिना दृष्ट्वा, तं नृपं सुप्तमेव सन्तं तदवस्थायामेवोद्धतप्राणं तल्लक्षणतो दृष्ट्वा सर्वमेव अन्तःपुरं उद्धतप्राणं–तत्कल्पमदृश्यत ॥ २० ॥

ततः प्रचुक्रुशुर्दीनाः सस्वरं ता वराङ्गनाः ।
करेणव इवारण्ये स्थानप्रच्युतयूथपाः ॥ २१ ॥

---

* गोविन्दराजेन तीर्थेन च एवं व्याख्यातम् । विधेयविशेषणं वा । यथाकाल-समन्वितत्वेन न प्रबुध्येते इत्यर्थः ॥ † निष्प्रभा–निःश्रीका, विवर्णा–पूर्ववर्णाद विपरीतवर्णा, शोकेन सन्ना–कृशा, सन्नता–कार्श्येन नम्रा, तिमिरावृता–उत्पातकालोत्थधूमः तिमिरं, तेन आवृता तारेव–तारकेव न व्यराजत–**गो.** ‡ राज्ञः अनन्तरं कौसल्या, तदनन्तरं सुमित्रेति तेषां क्लेशतारतम्यपरीक्षणं कविना कृतम् ॥ § मृताद्दशरथाद जीवन्त्योः कौसल्यासुमित्रयोः विशेषो नासीदित्यर्थः–**गो.** एवञ्च त्रीनपि मृतान् ज्ञात्वा सर्वमेवान्तःपुरमुद्धतप्राणमदृश्यत । अत एव तासां कौसल्याप्रबोधने न प्रवृत्तिः, किन्तु ‘प्रचुक्रुशुर्दीनाः’ इत्युच्यते । ‘ते च दृष्ट्वा तथा सुप्ते’ इति तु क्रमेद्रष्टव्या ।

[1] सुप्तमेवो–ङ. [2] मतप्यत–ङ.

तासामाक्रन्दशब्देन सहसोद्गतचेतने ।
कौसल्या च सुमित्रा च त्यक्तनिद्रे बभूवतुः ॥ २२ ॥

कौसल्या च सुमित्रा च दृष्ट्वा स्पृष्ट्वा च पार्थिवम् ।
हा नाथेति परिक्रुश्य पेततुर्धरणीतले ॥ २३ ॥

सा कोसलेन्द्रदुहिता वेष्टमाना महीतले ।
न बभ्राज रजोध्वस्ता तारेव गगनाद् च्युता ॥ २४ ॥

नृपे शान्तगुणे जाते कौसल्यां पतितां भुवि ।
अपश्यन् ताः स्त्रियः सर्वाः हतां नागवधूमिव ॥ २५ ॥

* शान्तगुणे—उपशान्तजीवनाभिवदनादिधर्मे—मृते सतीति यावत् ॥ २५ ॥

ततः सर्वा नरेन्द्रस्य † कैकेयीप्रमुखाः स्त्रियः ।
रुदन्त्यः शोकसन्तप्ताः निपेतुर्गतचेतनाः ॥ २६ ॥

ताभिः स बलवान् नादः क्रोशन्तीभिरनुद्रुतः ।
येन [1] स्फीतिं गतो भूयः तद्गृहं समनादयत् ॥ २७ ॥

ताभिरिति । क्रोशन्तीभिस्ताभिरुत्थापितो बलवान् नादः, येन—हेतुना अनुद्रुतः—प्रतिध्वनिना गृहमनुप्राप्तः, तत एव भूयः—अभ्यधिकं स्फीतिं, क्तिनि स्फीभावः छान्दसः, वृद्धिं गतो भूत्वा तद्गृहं समनादयत् ॥ २७ ॥

---

* शान्तगुणे—शान्तदेहोष्णस्पन्दनादिगुणे—गो. वस्तुतः 'गुणो मौर्व्यां.... शुक्लादावपि बुध्यां च' इति मेदिनीकोशात्—शान्तप्रज्ञ इत्यर्थः—तथा च मृत इत्यर्थः ॥
† यद्यपि कैकेयी पूर्वं नासीत्, अथापि अनन्तरमागतेति ज्ञायते ।

[1] स्थिरीकृतं, स्फीतीकृतं—ङ.

*[1] तत् परित्रस्तसंभ्रान्तं पर्युत्सुकजनाकुलम्।
सर्वतस्तुमुला[2]क्रन्दं परितापार्तबान्धवम् ॥ २८ ॥
सद्यो निपतितानन्दं दीनविक्लबदर्शनम्।
बभूव नरदेवस्य सद्म दिष्टान्तमीयुषः ॥ २९ ॥

† पर्युत्सुकेति। वृत्तान्तपरिज्ञानपर्युत्सुकेति यावत्। दिष्टान्तमीयुष इति। कालधर्मं प्राप्तस्येत्यर्थः ॥ २९ ॥

अतीत‡माज्ञाय तु पार्थिवर्षभं
यशस्विनं संपरिवार्य पत्नयः।
भृशं रुदन्त्यः करुणं सुदुःखिताः
प्रगृह्य बाहू व्यलपन् अनाथवत् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे पञ्चषष्टितमः सर्गः

नग(३०)मानः सर्गः ॥ ३० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे पञ्चषष्टितमः सर्गः

षट्षष्टितमः सर्गः

[तैलद्रोण्यधिशयनम्]

§ तमग्निमिव संशान्तं अम्बुहीनमिवार्णवम्।
हतप्रभमिवादित्यं स्वर्गस्थं प्रेक्ष्य पार्थिवम् ॥ १ ॥

---

* श्लोकद्वयमेकान्वयम्। † पूर्वं पर्युत्सुकजनाकुलं सद्म नरदेवस्य दिष्टान्तमीयुषः–नरदेवे मरणं प्राप्ते सति समुत्त्रस्तसंभ्रान्तं—इत्येवमादिविशेषणयुक्तं बभूव-गो.
‡ आज्ञाय -सम्यक् ज्ञात्वा। § श्लोकद्वयमेकान्वयम्।

[1] तत्समुत्त्रस्त–ङ. [2] क्रान्तं–ङ.

कौसल्या बाष्पपूर्णाक्षी [1] विधवाशोककर्शिता ।
उपगृह्य शिरो राज्ञः कैकेयीं प्रत्यभाषत ॥ २ ॥

अथ भर्तृशरीरमालिङ्ग्य अनुमरणोद्युक्तां कौसल्यामभिवार्य मन्त्रिणो राजशरीरं संस्काराय भरतागमनपर्यन्तं तैलद्रोण्यामस्थापयन् । तमग्निमित्यादि । विधवेति । विधवात्वप्राप्तः यः शोकः, तेन कर्शिता तथा । राज्ञः शिर उपगृह्येति । अङ्क इति शेषः ॥ २ ॥

सकामा भव, कैकेयि ! भुङ्क्ष्व राज्यमकण्टकम् ।
त्यक्त्वा राजान*मेकाग्रा, नृशंसे ! दुष्टचारिणि ! ॥ ३ ॥
विहाय मां गतो रामः भर्ता च स्वर्गतो मम ।
विपथे † सार्थहीनेव नाहं जीवितुमुत्सहे ॥ ४ ॥

अकण्टकत्वमेव कैकेय्याः प्रदर्शयति—विहाय मामित्यादि । विपथे–कान्तारदुर्मार्गे, 'ऋक्पूर....' इति समासान्तः । सार्थः–परिषत् ॥ ४ ॥

भर्तारं तं [2] परिष्वज्य का स्त्री दैवतमात्मनः ।
इच्छेत् जीवितुमन्यत्र कैकेय्यास्त्यक्तधर्मणः ॥ ५ ॥

भर्तारं परिष्वज्य–तेन सह भोगान् भुक्त्वेति यावत् ; तं कालान्तरे परित्यज्येति शेषः । त्यक्तः धर्मः–स्त्रीधर्मः यया सा तथा, 'धर्मादनिच् केवलात्' इत्यनिच्, 'मन--' इति ङीब्निषेधः ॥ ५ ॥

न लुब्धो बुध्यसे दोषान् किम्पाकमिव भक्षयन् ।
कुब्जानिमित्तं कैकेय्या राघवाणां कुलं हतम् ॥ ६ ॥

---

* एकाग्रा–पुत्रगमनमात्र दृढा । † दूरदेशं गच्छन्तः परस्परक्षणबुद्ध्या सङ्घीभूय गच्छन्ति । अयं सङ्घः सार्थ इत्युच्यते ।

[1] विविधं–सर्वत्र. [2] परित्यज्य–ङ. च.

* किम्पाकः—काकमर्दकः- विषभेदः। तं कोपादिना भक्षयन्, यथा आत्महत्यादोषं न बुध्यते तद्वदित्यर्थः ॥ ६ ॥

अनियोगे नियुक्तेन राज्ञा रामं विवासितम् ।
सभार्यं जनकः श्रुत्वा परितप्स्यत्यहं यथा ॥ ७ ॥

† अनियोगे—अन्याय्ये; अनुचितो नियोगस्तथा, तस्मिन् वरव्याजेन कैकेय्या नियुक्तस्तथा ॥ ७ ॥

स मामनाथां विधवां नाद्य जानाति धार्मिकः ।
रामः कमलपत्राक्षः [1]जीवनाशमितो गतः ॥ ८ ॥

‡ जीवनाशमित । राज्ञ इति शेषः ॥ ८ ॥

विदेहराजस्य सुता तथा [2]चारुतपस्विनी ।
दुःखस्यानुचिता दुःखं वने पर्युद्विजिष्यति ॥ ९ ॥

§ चारुतपस्विनी—सुष्टुतपोयुक्ता, भर्त्रनुयानादित्याशयः । दुःखं वन इति । वने दुःखं प्राप्य पर्युद्विजिष्यति—भेष्यतीति यावत् ॥ ९ ॥

---

* किंपाकः—निम्बः। कतकस्तु किंपाकः विषभेदः, तं कोपादिना भक्षयन् आत्महत्यादोषं न बुध्यते तद्वदित्यर्थः इत्याह। तत्र लुब्ध इति नात्यन्तसमञ्जसम्। धनलोभादिना परस्य विषभक्षणं कारयन् यथा हत्यादोषं न बुध्यते इति वक्तुमुचितम्—**ति.** लुब्धः- अर्थलिप्सुः, किंपाकं—विषमिश्रपाकं, यद्वा कुत्सितपाकं—अभक्ष्यमिति यावत्—**ती.** † अनियोगे—वरप्रदानसमये वरस्य विशेषनिर्देशाभावे सति—**गो.** ‡ राज्ञो जीवनाशो यथा भवति तथा गतः—**ति.** जीवन्नेव नाशं—अदर्शनं गतः—**ती.** वस्तुतस्तु—लोके कस्मिंश्चिज्जीवत्यपि, तद्दर्शनादीनां यावज्जीवं प्रसक्तेरप्यभावे निराशया 'जीवन्नपि स मृत इव' इति निर्देशवत् पत्या पुत्रेण च परित्यक्तायाः कौसल्यायाः परमशोकादेवमुक्तिः 'जीवन्नेव नशित्वा गतः' इति। § तपस्विनी—शोचनीया सीता। दुःखमिति क्रियाविशेषणम्- **गो.**

[1] जीवन् नाश—**च.** [2] सीता—**ङ.**

*नर्दतां भीमघोषाणां निशासु मृगपक्षिणाम् ।
[1]निशम्य नूनं संत्रस्ता †राघवं संश्रयिष्यति ॥ १० ॥
वृद्धश्चैवाल्पपुत्रश्च वैदेहीमनुचिन्तयन् ।
सोऽपि शोकसमाविष्टो [2]नूनं त्यक्ष्यति जीवितम् ॥ ११ ॥

‡अल्पपुत्रश्चेति । जनक इति शेषः ॥ ११ ॥

साऽहमद्यैव दिष्टान्तं गमिष्यामि पतिव्रता ।
इदं शरीरमालिङ्गय प्रवेक्ष्यामि हुताशनम् ॥ १२ ॥

दिष्टान्तं—प्रारब्धकर्मान्तं, मरणमिति यावत् । हुताशनं प्रवेक्ष्यामीत्यत्र हेतुः—पतिव्रतेति ॥ १२ ॥

§तां ततः संपरिष्वज्य विलपन्तीं तपस्विनीम् ।
[3]व्यपनीय सुदुःखार्तां कौसल्यां व्यावहारिकाः ॥ १३ ॥
तैलद्रोण्यामथामात्याः संवेश्य जगतीपतिम् ।
‖राज्ञः सर्वाण्यथादिष्टाः चक्रुः कर्माण्यनन्तरम् ॥ १४ ॥

व्यावहारिकाः—व्यवहारे-बाह्यान्तरसकलराजकृत्ये नियुक्ताः; 'तत्र नियुक्तः' इति ठक् । अमात्याः कौसल्यां भर्त्रालिङ्गनात व्यपनीय—विमोच्य, अन्यतोऽनीयेत्यर्थः । अथ, तैलपूरिता द्रोणी-कटाहः तथा, तस्यां जगतीपतिं निवेश्य, अथ राज्ञोऽनन्तरकर्तव्यानि सर्वाणि कर्माणि-दुःखपरिपालनादीनि चक्रुः ॥ १३-१४ ॥

---

*मृगपक्षिणां निशम्य-नादमिति शेषः-गो. ति. †पत्या गतत्वात् खलु तस्याः भये प्राप्ते आश्रयलाभः, अतोऽहमपि पतिमनुगच्छेयमित्युक्तेः पीठिकेयम् ॥ ‡अल्पपुत्रः-कन्यामात्रपुत्रः-गो. ति. §श्लोकद्वयमेकान्वयम् । ‖आदिष्टाः राजकृत्येष्वादिष्टाः अमात्याः राज्ञः कर्माणि सर्वाणि—प्रजाशासनादीनि चक्रुः-गो.

[1] निशम्य नादं-ङ. निशाम्यमाना-च. [2] ननु-ङ. [3] व्यपनिन्युः-च.

न तु [1] सङ्कालनं राज्ञो विना पुत्रेण मन्त्रिणः ।
सर्वज्ञाः कर्तुमीपुस्ते ततो रक्षन्ति भूमिपम् ॥ १५ ॥

न तु पुत्रेण विना सङ्कालनं–प्रेतनिर्हारं चक्रुः । सर्वज्ञाः–कालदेशोचितसर्वकार्यज्ञाः ते पुत्रेणैव संकालनं कर्तुमीषुः । तत एव हेतोः तैलद्रोण्यां भूमिपं रक्षन्ति स्म ॥ १५ ॥

तैलद्रोण्यां तु सचिवैः शायितं तं नराधिपम् ।
* हा मृतोऽयमिति ज्ञात्वा स्त्रियस्ताः [2] पर्यदेवयन् ॥ १६ ॥

शायितं ज्ञात्वा अनन्तरं च हा मृतोऽयं राजेति पर्यदेवयन्निति योजना ॥ १६ ॥

बाहूनुद्यम्य कृपणाः नेत्रप्रस्रवणैर्मुखैः ।
रुदन्त्यः शोकसन्तप्ताः [3] कृपणं पर्यदेवयन् ॥ १७ ॥

नेत्राणां प्रस्रवणं–अश्रुप्रवाहः येषु मुखेषु तानि तथा ॥ १७ ॥

हा महाराज! रामेण सततं प्रियवादिना ।
[4] विहीनाः सत्यसन्धेन किमर्थं विजहासि नः ॥ १८ ॥
† कैकेय्या दुष्ट[5]भावायाः राघवेण वियोजिताः ।
कथं [6] पतिघ्नया वत्स्यामः समीपे विधवा वयम् ॥ १९ ॥

पतिघ्नयेति । 'लक्षणे जायापत्योष्टक्' इति टक् ॥ १९ ॥

स हि नाथः [7] सदाऽस्माकं तव च प्रभुरात्मवान् ।
वनं रामो गतः श्रीमान् विहाय नृपतिश्रियम् ॥ २० ॥

---

* तैलनिवेशनकाले राजदर्शनाभावात्.... भूयोपि पर्यदेवयन्-गो. तावत्पर्यन्तं अपि पुनर्जीवेदयमिति प्रत्याशा लोकवदासीदिति भावो वा ॥ † कैकेय्याः हेतोरित्यर्थः । अस्य 'कैकेय्याः समीपे' इत्युत्तरार्धेनान्वयः ।

[1] संकलनं–ङ. [2] पर्यवारयन्–ङ. [3] करुणं–ङ. [4] विहीनः–ङ.
[5] भावेन–ङ. [6] सपत्न्या–ङ. [7] स चास्मा–ङ.

त्वया तेन च वीरेण विना व्यसनमोहिताः ।
कथं वयं निवत्स्यामः कैकेय्या च विदूषिताः ॥ २१ ॥

विदूषिता इति । राज्यगर्वात् तिरस्कृता इति यावत् ॥२१॥

यया तु राजा रामश्च लक्ष्मणश्च महाबलः ।
सीतया सह संत्यक्ताः सा कमन्यं न हास्यति ॥ २२ ॥

ता बाष्पेण च संवीताः शोकेन विपुलेन च ।
व्यवेष्टन्त निरानन्दाः राघवस्य वरस्त्रियः ॥ २३ ॥

निशा [1]चन्द्रविहीनेव स्त्रीव भर्तृविवर्जिता ।
पुरी नाराजतायोध्या हीना राज्ञा महात्मना ॥ २४ ॥

बाष्पपर्याकुलजना हाहाभूतकुलाङ्गना ।
शून्यचत्वरवेश्मान्ता न बभ्राज *यथापुरम् ॥ २५ ॥

शून्यचत्वरेति । सम्मार्जनालेपनबल्यादिशून्येति यावत् ॥

गते तु शोकात् त्रिदिवं नराधिपे
महीतलस्थासु नृपाङ्गनासु च ।
निवृत्तचारः सहसा †गतो रविः
‡प्रवृत्त[2]चारा रजनी ह्युपस्थिता ॥ २६ ॥

निवृत्तचारः—निवृत्तरश्मिप्रचार इति यावत् ॥ २६ ॥

§ऋते तु पुत्रात् दहनं महीपतेः
न रोचयन्ते सुहृदः समागताः ।

---

* यथापुरं—यथापूर्वम । † गतः—अस्तं गतः । ‡ प्रवृत्तचारा—प्रवृत्ततमः-प्रचारा—गो. § रात्रावदहने पर्युषितप्रायश्चित्तादीनां कर्तव्यतापातात् तदानीमेव दहनं कार्यमिति केश्चित्प्रयतितममितगनेन ज्ञायत इति गोविन्दराजः ॥

[1] नक्षत्रही—च. [2] तारा—ङ.

इतीव तस्मिन् शयने न्यवेशयन्
[1]विचिन्त्य राजानमचिन्त्यदर्शनम् ॥ २७ ॥

गतप्रभा द्यौरिव भास्करं विना
व्यपेतनक्षत्रगणेव शर्वरी ।
पुरी बभासे रहिता महात्मना
न *चास्रकण्ठाकुलमार्गचत्वरा ॥ २८ ॥

आस्रकण्ठेति । आकण्ठं धारारूपेण प्रवहद्भिः अस्रैः उपलक्षिताः कण्ठाः येषां ते तथा, तैराकुलानि मार्गाणि चत्वराणि यस्याः सा तथा ॥ २८ ॥

नराश्च नार्यश्च समेत्य सङ्घशः
विगर्हमाणा भरतस्य मातरम् ।
तदा नगर्यां नरदेवसंक्षये
बभूवुरार्ता न च शर्म लेभिरे ॥२९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे षट्षष्टितमः सर्गः

---

†अलं(३०)मानः (?) सर्गः ॥ २९ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे षट्षष्टितमः सर्गः

---

*आस्रकण्ठैः—कण्ठस्तम्भितबाष्पैः—गो. †व्याख्यात्रास्मिन् सर्गे श्लोकसंख्या ३० इति निर्दिष्टा। परन्तु सर्वत्र एकोनत्रिंशदेवोपलभ्यते। तिलकेऽपि—'एकः श्लोकः अत्र सर्गे कतकसंख्यया भ्रष्ट इति ज्ञायते' इत्युक्तम् ॥

[1] निरीक्ष्य राजानमतीतदर्शनम्—ङ.

सप्तषष्टितमः सर्गः

[अराजकदोषवर्णनम्]

[1]आक्रन्दितनिरानन्दा सास्रकण्ठजनाकुला ।
अयोध्यायामवतता सा व्यतीयाय शर्वरी ॥ १ ॥

अथ मन्त्रिपुरोहितादिभिः संमन्त्रणं राजाभिषेकाय ।
*आक्रन्दितेत्यादि । मत्वर्थीयाजन्तः, †आक्रन्दितवती ; अत एव निरानन्दा च तथा । अयोध्यायां अवतता—दीर्घा ॥ १ ॥

व्यतीतायां तु शर्वर्यां आदित्यस्योदये ततः ।
समेत्य राजकर्तारः ‡सभामीयुर्द्विजातयः ॥ २ ॥

§राजकर्तारः—राजा कर्ता—साक्षात् शिक्षणकर्ता येषां ते तथा ; राज्ञोऽशेषकार्यकर्तारश्च तथा, मन्त्रिपुरोहितादय इति यावत् ॥ २ ॥

मार्कण्डेयोऽथ मौद्गल्यः वामदेवश्च काश्यपः ।
कात्यायनो गौतमश्च जाबालिश्च महायशाः ॥ ३ ॥
एते द्विजाः सहामात्यैः पृथग्वाचमुदीरयन् ।
वसिष्ठमेवाभिमुखाः श्रेष्ठं राजपुरोहितम् ॥ ४ ॥

पृथग्वाचमिति । भिन्नभिन्नप्रस्थानतया राजकार्यविषये अब्रुवन् । एवञ्च कार्यसिद्ध्ययोगात् वसिष्ठमेव प्रमाणीकृत्य तमेवाभिमुखा बभूवुः ॥

अतीता शर्वरी ‖[2]दुःखं या नो वर्षशतोपमा ।
अस्मिन् पञ्चत्वमापन्ने पुत्रशोकेन पार्थिवे ॥ ५ ॥

---

*आक्रन्दितेन हेतुना निरानन्दा—गो. †आक्रन्दशब्दात् इतजिवक्षणे, मत्वर्थीयाजन्तत्वाश्रयणं व्यर्थमेव ॥ ‡सभा—वसिष्ठसभा । §राजकर्तारः—राजाभिषेककार्यकर्तारः—गो. वस्तुतस्तु राज्यनिर्वाहकाः अमात्यमन्त्रिप्रभृतय इत्यर्थः । ‖दुःखं इति क्रियाविशेषणम् ।

[1] आक्रन्दिता—च. [2] दुःखा—ङ.

पञ्चत्वं—मरणम् ॥ ५ ॥

स्वर्गतश्च महाराजः रामश्चारण्यमाश्रितः ।
लक्ष्मणश्चापि तेजस्वी रामेणैव गतः सह ॥ ६ ॥

उभौ भरतशत्रुघ्नौ केकयेषु परन्तपौ ।
पुरे राजगृहे रम्ये मातामहनिवेशने * ॥ ७ ॥

केकयेष्विति । अवान्तरभेदापेक्षया बहुवचनम् । राजगृहे—राजगृहाख्ये ॥ ७ ॥

इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् ।
† अराजकं हि नो राष्ट्रं न विनाशमवाप्नुयात् ॥ ८ ॥

इह—अद्य उपदिष्टानां इक्ष्वाकूणां चतुर्णां कुमाराणां मध्ये कश्चिन् राजा विधीयताम् । नः—अस्माकं राष्ट्रं अराजकं सत् यथा चेन्नाशं नाप्नुयात् तथा विधीयतामित्यन्वयः ॥ ८ ॥

नाराजके जनपदे विद्युन्माली महास्वनः ।
अभिवर्षति पर्जन्यः महीं दिव्येन वारिणा ॥ ९ ॥

विद्युन्माली—व्रीह्यादित्वादिनिः ॥ ९ ॥

नाराजके जनपदे बीजमुष्टिः प्रकीर्यते ।
नाराजके पितुः पुत्रः भार्या वा वर्तते वशे ॥ १० ॥

बीजमुष्टिः न प्रकीर्यत इति । क्षोभात् भयात्, फलप्राप्तौ लुण्टाकशङ्कया, प्रमाणाभावाच्चेत्याशयः । पितुर्वशे पुत्रो न वर्तते इत्यादिकं, अतिक्रमे दण्डयित्रभावात् ॥ १० ॥

---

* वर्तेते इति शेषः—गो. † अत्र तिलके तु-"राजकं सद्धि राष्ट्रं नो नाशं नावाप्नुयाद्यथा।' इति कतकसम्मतः पाठः। नः-अस्माकं राष्ट्रं राजक-राजयुतं सद् नाशं नाप्नुयाद्यथा तथा कश्चिद्राजा विधीयतामित्यन्वयः। हिर्वाक्यालङ्कारे" इत्यनूदितम्।

[1]नाराजके धनं [2]चास्ति नास्ति भार्याऽप्यराजके ।
इदमत्याहितं चान्यत् कुतः [3]सत्यमराजके ॥ ११ ॥

*धनाद्यभावश्च (स्व)परिपालकाभावादेव । इदं—उक्तरूपं अत्याहितं—महद्भयं अराजके प्रथमं प्राप्नोति । अन्यत् सत्यमिति । पितापुत्रपतिभार्यारूपप्रधानसत्यात् अन्यत सत्यं—क्रयविक्रयादिलक्षणं कुतः ? ॥ ११ ॥

†नाराजके जनपदे [4]केऽपि यन्ति सभां नराः ।
उद्यानानि च रम्याणि हृष्टाः ‡पुण्यगृहाणि च ॥ १२ ॥

यन्ति—प्रभुवन्ति ; न्यायविचारायेति शेषः । उद्यानादीनि च न यन्तीति—वस्त्राद्यपहारभयादेव ॥ १२ ॥

नाराजके जनपदे यज्ञशीला द्विजातयः ।
सत्राण्यन्वासते दान्ता ब्राह्मणाः संशितव्रताः ॥ १३ ॥

सत्रं—यत्र सर्वे दीक्षिताः, सर्वे च ऋत्विजः तदेव, तत् नान्वासते—नानुतिष्ठन्ति § ॥ १३ ॥

नाराजके जनपदे महायज्ञेषु ‖ यज्वनः ।
ब्राह्मणा वसु[5]संपूर्णाः विसृजन्त्याप्तदक्षिणाः ॥ १४ ॥

---

*धनं नास्ति चोरभयात् । भार्या नास्ति बन्धुनिग्रहादिति भावः—**गो.** त्रिटाद्युपद्रवादिति वा हेतुः । एवं धर्ममूलानां भार्यादीनामेवाभावे अन्यत् किं वा व्यवतिष्ठेतेत्याशयः ॥ †स्वमनीषितमेव न्याय्यं मन्येरन्निति भावः । कारयन्ति इति (**गो.**) पाठे—उद्यानादीनि न कारयन्ति । ‡पुण्यगृहं—देवतायतनम्—**गो.** मठादिर्वा—**ती.** §विघ्नभयादिति शेषः । ‖यज्वनः—यज्वानः वसुसंपन्ना अपि आप्तदक्षिणाः—भूरिदक्षिणाः न विसृजन्ति न दिशन्ति, आढ्यत्वप्रकाशनेन दण्डभयात्—**गो.** भूरदक्षिणाः यज्वनः—ऋत्विजः प्रति न विसृजन्ति—**ती.**

[1] अरा—**च.** [2] नास्ति—**च.** [3] सौख्य—**ङ.** [4] कारयन्ति—**ङ. च.** [5] संपन्नाः—**ङ.**

वसुभिः संपूर्णास्तथा। आप्तदक्षिणाः—यथाप्राप्तदक्षिणाः न विसृजन्ति ॥ १४ ॥

नाराजके जनपदे प्रभूतनटनर्तकाः।
उत्सवाश्च समाजाश्च वर्धन्ते [1] राष्ट्रवर्धनाः ॥ १५ ॥

नटनर्तकाः–सूत्रधारतत्प्रणर्त्यशैलूषाः। उत्सवाः देवानाम्। समाजः–तत्तद्राष्ट्रकार्यसिद्धिप्रयोजनः सेन समवायः, उभयं राष्ट्रवर्धनं भवति, दृष्टादृष्टदुरितशान्तिद्वारेण ॥ १५ ॥

नाराजके जनपदे सिद्धार्था व्यवहारिणः।
कथाभिरनुरज्यन्ते कथाशीलाः कथाप्रियैः ॥ १६ ॥

*व्यवहारिणः–वादिनः। कथा–पुराणादिकथा। नानुरज्यन्त इति। पौराणिकैरिति शेषः ॥ १६ ॥

नाराजके जनपदे उद्यानानि समागताः।
सायाह्ने क्रीडितुं यान्ति कुमार्यो हेमभूषिताः ॥ १७ ॥
नाराजके जनपदे वाहनैः शीघ्रगामिभिः।
नरा निर्यान्त्यरण्यानि † नारीभिस्सह कामिनः ॥ १८ ॥
नाराजके जनपदे धनवन्तः सुरक्षिताः।
‡ शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥ १९ ॥
नाराजके जनपदे बद्धघण्टा विषाणिनः।
अटन्ति राजमार्गेषु कुञ्जराः षष्टिहायनाः ॥ २० ॥

---

* व्यवहारिणः–कमप्यर्थमुद्दिश्य अन्योन्यं विवदमानाः सिद्धार्था न भवन्ति, निरूपणनयमकर्तुरभावात् उत्कोचप्रान्त्वाच्चेति भावः। ....कथाशीलाः वावदूका .... कथाभिः नानुरज्यन्ते–न तुष्यन्ति–तत्पारितोषिकादप्रदराजाभावात्–गो. † अरण्यानि–वनभोजनाद्यर्थम्। ‡ एतेन राजनि सति विवृतद्वारा एव शेरते स्मेति भाति ॥

[1] दुष्प्रवर्धनाः–ङ.

विषाणिनः—प्रशस्तदन्तवन्तः । षष्टिः हायनाः येषां ते—षष्टि-हायनाः ॥ २० ॥

नाराजके जनपदे * शरान् सततमस्यताम् ।
श्रूयते तलनिर्घोषः इष्वस्त्राणामुपासने ॥ २१ ॥
नाराजके जनपदे वणिजो दूरगामिनः ।
गच्छन्ति क्षेममध्वानं † बहुपण्यसमाचिताः ॥ २२ ॥
नाराजके जनपदे चरत्येकचरो वशी ।
भावयन्नात्मनाऽऽत्मानं ‡ यत्र सायंगृहो मुनिः ॥ २३ ॥

एकः असहाय एव चरतीत्येकचरः ॥ २३ ॥

नाराजके जनपदे [1] योगक्षेमं प्रवर्तते ।
न चाप्यराजके सेना शत्रून् विषहते युधि ॥ २४ ॥
नाराजके जनपदे हृष्टैः परमवाजिभिः ।
नराः संयान्ति सहसा रथैश्च प्रतिमण्डितैः ॥ २५ ॥

प्रतिमण्डितैः—अलंकृतैः रथैः ॥ २५ ॥

नाराजके जनपदे नराः शास्त्रविशारदाः ।
संवदन्तोऽवतिष्ठन्ते वनेषूपवनेषु च ॥ २६ ॥

---

* अस्यतां—क्षिपतां । उपासने—अभ्यासे 'स्यादुपासनमभ्यासः' इत्यमरः । तलनिर्घोषः—ज्याकरतलनिर्घोषः—गो. सन्तोषात् करतलघोषो वा । † बहुपण्यैः समाचिताः—समृद्धाः, यद्वा पण्यानां क्रय्यद्रव्याणां समाचिताः—दशभाराः 'आचितो दशभारः स्यात्' इत्यमरः, बहवः पण्यसमाचिताः येषां ते तथा—गो. ‡ यस्मिन् देशे सायंकालो भवति तदेव गृहं यस्य—तादृशो वशी—जितेन्द्रियो मुनिः असहायः न चरितुं प्रभवति ॥

[1] योगक्षेमः—ङ.

नाराजके जनपदे माल्यमोदकदक्षिणाः ।
देवताऽभ्यर्चनार्थाय कल्प्यन्ते नियतैर्जनैः ॥ २७ ॥

कल्प्यन्ते—प्रवर्त्यन्त इति यावत् ॥ २७ ॥

नाराजके जनपदे चन्दनागरुरूषिताः ।
राजपुत्रा विराजन्ते *वसन्त इव शाखिनः ॥ २८ ॥
यथा ह्यनुदका नद्यः यथा वाऽप्यतृणं वनम् ।
अगोपाला यथा गावः तथा राष्ट्रमराजकम् ॥ २९ ॥
ध्वजो रथस्य प्रज्ञानं धूमो ज्ञानं †विभावसोः ।
तेषां यो नो ध्वजो राजा स देवत्वमितो गतः ॥ ३० ॥

रथस्य प्रज्ञानं—तत्स्थितिज्ञापकं, तथा विभावसोश्च धूमो ज्ञानं—तत्स्थितिज्ञापकम् । तेषां राजकर्तॄणां नः—अस्माकं यो राजा ध्वजः—अस्मासु राज्यव्यवहारप्रतिष्ठापकः, सः इतो देवत्वं गतः ॥ ३० ॥

नाराजके जनपदे स्वकं भवति कस्यचित् ।
‡मत्स्या इव नरा नित्यं भक्षयन्ति परस्परम् ॥ ३१ ॥
§ये हि संभिन्नमर्यादा नास्तिकाः छिन्नसंशयाः ।
तेऽपि भावाय कल्पन्ते राजदण्डनिपीडिताः ॥ ३२ ॥

ये हि संभिन्नमर्यादाः—उल्लङ्घितस्वस्वजातिवर्णाश्रममर्यादाः, अत एव पूर्वं राजदण्डनिपीडिताः—नास्तिकाः सन्ति, तेऽपि च इदानीं छिन्नसंशयाः—राजदण्डाशङ्कारहितास्सन्तः भवाय—प्रभवाय कल्पन्ते—समस्त[1]दैष्टिकपीडासमर्था भवन्तीत्यर्थः ॥ ३२ ॥

* वसन्ते शाखिनः—वृक्षा इव । † विभावसुः—अग्निः । ‡ प्रबलैः दुर्बलनाश इत्यर्थः । § छिन्नसंशयाः—कृत्याकृत्यविचारशून्याः राजदण्डनिपीडिताः भावाय—साधुत्वाय कल्पन्ते—योग्या भवन्ति, नृपे सतीति शेषः—ती.

[1] दैविक—ग.

यथा * दृष्टिः शरीरस्य नित्यमेव प्रवर्तते ।
तथा नरेन्द्रो राष्ट्रस्य प्रभवः सत्यधर्मयोः ॥ ३३ ॥

शरीरस्य हिते दृष्टिः यथा नित्यमेव प्रवर्तते, एवं सत्यधर्मयोः † प्रभवः नरेन्द्रोऽपि राष्ट्रस्य हिते नित्यं प्रवर्तते ॥ ३३ ॥

राजा सत्यं च धर्मश्च ‡ राजा कुलवतां कुलम् ।
राजा माता पिता चैव राजा हितकरो नृणाम् ॥ ३४ ॥

कुलवतां—क्षेत्रबीजशुद्धिमतामिति यावत् ॥ ३४ ॥

यमो वैश्रवणः शक्रः वरुणश्च महाबलः ।
विशिष्यते नरेन्द्रेण वृत्तेन महता ततः ॥ ३५ ॥

[1] यम इत्यादि । यतो महता वृत्तेन—अशेषप्रजारक्षणरूपेण महता चरित्रेण नरेन्द्रो युक्तः, तत एव हेतोः § एकैकादिग्वर्तिप्रजारक्षणेभ्यो ‖ विशिष्यते—अतिशय्यते नरेन्द्रेण, यकि गुणश्छान्दसः ॥

अहो तम इवेदं स्यात् न प्रज्ञायेत किञ्चन ।
राजा चेन्न भवेल्लोके विभजन् साध्वसाधुनी ॥ ३६ ॥

अहो इत्यादि । साध्वसाधुनी लोके विभजन् राजा चेन्न स्यात्, इदं—अराजकत्वं अहो तम एव स्यात् ॥ ३६ ॥

---

* इह हस्तपादादीनामप्युपलक्षकम् । चक्षुस्तु प्रधानम् । चक्षुरादिकं खलु शरीररक्षणे सदा स्वयमेव जागरूकं वर्तत इत्यनुभवसिद्धम् । † प्रभवः—कारणम् । ‡ वर्णसांकर्यवारक इति वा । § यमस्य दण्डमात्रं, कुबेरस्य धनदत्वमेव, इन्द्रस्य पालनमेव, वरुणस्य सदाचारनियमनमेव । एतद्गुणचतुष्टययुक्तत्वान्नरेन्द्रेण यमादयो ऽप्यावर्त्यन्त इत्यर्थः—गो. ‖ यमादयस्तु तत्तद्दिङ्मात्ररक्षकाः, राजा तु सर्वदिक्ष्वपि रक्षक इत्यर्थः ।

[1] यत—ग.

जीवत्यपि महाराजे तवैव वचनं वयम् ।
नातिक्रमामहे सर्वे वेलां प्राप्येव [1] सागरः * ॥ ३७ ॥

स नः समीक्ष्य, द्विजवर्य ! वृत्तं
नृपं विना राज्यमरण्यभूतम् ।
कुमारमिक्ष्वाकुसुतं [2] वरेण्यं
त्वमेव राजानमिहाभिषिञ्च ॥ ३८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे सप्तषष्टितमः सर्गः

हे द्विजवर्य ! स त्वं नः—अस्माकं वृत्तं—अराजकप्रमुषितं सर्वं कृत्यं वीक्ष्य, नृपं विना राज्यमप्यरण्यभूतं स्यादिति समीक्ष्य इक्ष्वाकुसुतं—दशरथतनयं वरेण्यं—श्रेष्ठं कुमारं त्वमेव राजानं निश्चित्य अभिषिञ्च । जल(३८)मानः सर्गः ॥ ३८ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे सप्तषष्टितमः सर्गः

अष्टषष्टितमः सर्गः

[दूतप्रेषणम्]

तेषां तद्वचनं श्रुत्वा वसिष्ठः प्रत्युवाच ह ।
† मित्रामात्य[3]जनान् सर्वान् ब्राह्मणांस्तानिदं वचः ॥१॥

एवममात्यप्रार्थितवसिष्ठेन भरत एव राजेति निश्चित्य तदानयनाय दूतप्रेषणम् । तेषामित्यादि । मित्रामात्यजनाः सुमन्त्रादयः । ब्राह्मणाः मार्कण्डेयादयः प्रागुक्ताः ॥ १ ॥

---

† इदानीं तु किमु वक्तव्यमिति भावः । † मित्रभूता अमात्याः—सुमन्त्रादयोऽष्टौ, ब्राह्मणाः—मन्त्रिणः वामदेवादयः—बालकाण्डे चतुर्थसर्गे उक्ताः ॥

[1] सागराः—ङ. [2] वदान्यं—ङ, तथान्यं—च. [3] गणान्—ङ.

यदसौ मातुलकुले [1]दत्तराज्यः पुरे सुखी ।
भरतो वसति भ्राता शत्रुघ्नेन [2]समन्वितः ॥ २ ॥
तच्छीघ्रं जवना दूता गच्छन्तु त्वरितैर्हयैः ।
आनेतुं भ्रातरौ वीरौ किं समीक्षामहे वयम् ॥ ३ ॥

यत्—यस्मात् राज्ञा कैकेयीवरेण भरतो दत्तराज्यः, यतश्चेदानी-मसौ राजगृहाख्ये पुरे मातुलकुले वसति, तत्—तस्मात् तमानेतुं दूताः शीघ्रं गच्छन्तु । वयं किं समीक्षामहे—किं विचारयामः । राज्ञैव भरतराज्यस्य निश्चितत्वादिति शेषः ॥ २–३ ॥

गच्छन्त्विति ततः सर्वे वसिष्ठं वाक्यमब्रुवन् ।

वसिष्ठवाक्यमनुजानन्ति मन्त्रिणः—गच्छन्त्वित्यादि ॥

तेषां तद्वचनं श्रुत्वा वसिष्ठो वाक्यमब्रवीत् ॥ ४ ॥
*एहि, सिद्धार्थ! विजय! जयन्ताशोक[3]नन्दन!
श्रूयतामितिकर्तव्यं सर्वानेव ब्रवीमि वः ॥ ५ ॥

सिद्धार्थादयः चत्वारो दूताः। मन्त्रिव्यतिरिक्तोऽसौ सिद्धार्थः। इतिकर्तव्यमिति । गच्छद्भिर्युष्माभिरनुष्ठेयकृत्यजातमित्यर्थः ॥ ४-५ ॥

---

* मन्त्रिव्यतिरिक्तनन्दनसहपाठात् नेमे मन्त्रिणः । 'पुरोहितस्त्वां कुशलं प्राह सर्वे च मन्त्रिणः' इति वक्ष्यमाणत्वाच्च—गो. परन्तु प्रथमश्लोके अमात्यान् मंत्रिण-श्चोवाच इति कथनात् मन्त्रिणामेव सतां दूतत्वमपि संभाव्येत । नन्दनस्यैकस्य तदा नत्सहगामितया पृथक् प्रेषणोपपत्तेश्च । अशोकस्य नन्दनः—पुत्रः इति वाऽर्थः । मन्त्रि-पुत्रस्यापि प्राप्तवयस्कस्य मन्त्रित्वात् प्रेषणम् । साक्षात् राज्ञ एव आहूतव्यत्वात् मन्त्रिणामेव गौरवे प्रेषणम् ।

[1] पुरे राजगृहे—ङ. दत्तराज्यः परं—च. [2] मुदान्वितः—च. [3] नाशन—ङ.

पुरं राजगृहं गत्वा शीघ्रं शीघ्रजवैर्हयैः ।
त्यक्तशोकैरिदं वाच्यः शासनात् भरतो मम ॥ ६ ॥

मम शासनात् भरतो वाच्य इति ॥ ६ ॥

पुरोहितः त्वां कुशलं प्राह सर्वे च मन्त्रिणः ।
त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया ॥ ७ ॥

कथं वाच्य इत्यतः–पुरोहित इत्यादि । अत्ययः—कालातिपातः तं प्राप्तं आत्ययिकं–'विनयादिभ्यष्ठक्' इति टक्, तादृशं कृत्यमस्ति; अतः त्वरमाणो निर्याहीति वाच्यमित्यनुकर्षः ॥ ७ ॥

मा चास्मै प्रोषितं रामं मा चास्मै पितरं मृतम् ।
भवन्तः शंसिषुर्गत्वा राघवाणामिमं * क्षयम् ॥ ८ ॥

मा शंसिषुरित्यन्वयः । राघवाणां इमं क्षयं–तेजःक्षयं स्त्रीमूलतया सुपुत्रवनवासादिलक्षणम् ॥ ८ ॥

कौशेयानि च वस्त्राणि भूषणानि वराणि च ।
क्षिप्रमादाय राज्ञश्च भरतस्य च गच्छत ॥ ९ ॥
दत्तपथ्यशना दूताः जग्मुः स्वं स्वं निवेशनम् ।
† केकयांस्ते गमिष्यन्तः हयानारुह्य सम्मतान् ॥ १० ॥

दत्तं पथ्यशनं–तदपेक्षितद्रव्यं येषां ते तथा । स्वं निवेशनं जग्मुः । स्त्रीबालादेः प्रयाणकथनाद्यर्थमिति शेषः ॥ १० ॥

---

* क्षयं–विपदम् । † केकयान् गमिष्यन्तः स्वं स्वं निवेशनं जग्मुरित्यन्वयः ।

ततः प्रास्थानिकं कृत्वा कार्यशेषमनन्तरम् ।
*वसिष्ठेनाभ्यनुज्ञाताः दूताः सन्त्वरिता ययुः ॥ ११ ॥

प्रास्थानिकं—प्रस्थानप्रयोजनं कार्यशेषं विशिष्टपाथेयादिसंपादनलक्षणम् ॥ ११ ॥

न्यन्तेनापरतालस्य प्रलम्बस्योत्तरं प्रति ।
[1]निषेवमाणास्ते जग्मुः नदीं मध्येन †मालिनीम् ॥ १२ ॥

न्यन्तेनेति । अपरतालस्य—तदाख्यस्य गिरेः न्यन्तेन—पश्चिमभागेन गत्वा, अथ प्रलम्बस्य—तदाख्यस्य उत्तरं—उत्तरप्रदेशं प्रति गत्वा, अथ मालिनीं नदीं मध्येनातीत्य तामुत्तरभागतो निषेवमाणास्सन्तः जग्मुः ॥

‡ते [2]हस्तिनपुरे गङ्गां तीर्त्वा प्रत्यङ्मुखा ययुः ।
पाञ्चालदेशमासाद्य मध्येन कुरुजाङ्गलम् ॥ १३ ॥

ते हस्तिनपुरे गङ्गामित्यादि । प्रत्यक्—उदीचीं दिशं यान्तः ते पाञ्चालदेशमासाद्य तत्र हिमवत आग्नेयदिङ्मुखप्रवाहां गङ्गां हस्तिनपुरसमीपे तीर्त्वा प्रत्यङ्मुखाः सन्तः मध्येन §कुरुजाङ्गलं—जाङ्गलं—निर्जलप्रदेशाः—कुरुदेशैकदेशवर्तिजाङ्गलस्तथा—कुरुजाङ्गलस्य मध्यमार्गमाश्रित्येत्यर्थः ; 'एनपा द्वितीया' इति द्वितीया जाङ्गलशब्दात् ॥

सरांसि च सुपूर्णानि नदीश्च विमलोदकाः ।
निरीक्षमाणास्ते जग्मुः दूताः कार्यवशात् द्रुतम् ॥ १४ ॥

---

* पुनर्वसिष्ठेनाभ्यनुज्ञानं स्वावलम्बस्याभावत्वं द्योतयितुं—गो. † सरय्वाः उपनदीयं, यस्यास्तीरे कण्वाश्रमोऽवर्तत । ‡ श्लोकद्वयमेकान्वयम् । § कुरुजाङ्गलं — कुरुदेशस्य पश्चिमभागे विद्यमानः वनमयः प्रदेशः ।

[1] निरीक्षमाणाः—ङ. [2] हास्तिनपुरे—ङ.

ते प्रसन्नोदकां दिव्यां नानाविहगसेविताम् ।
[1] उपातिजग्मुर्वेगेन शरदण्डां जनाकुलाम् ॥ १५ ॥

शरदण्डां—तदाख्यां नदीम् । उपातिजग्मुरिति । उपगम्य अतिक्रान्ता इत्यर्थः ॥ १५ ॥

निकूलवृक्षमासाद्य दिव्यं सत्योपयाचनम् ।
[2] अभिगम्याभिवाद्यं तं * कुलिङ्गां प्राविशन् पुरीम् ॥ १६ ॥

निकूलेत्यादि । शरदण्डायाः निकूलवृक्षं—पश्चिमतीरवर्तिवृक्षं ; दिव्यं—विशिष्टदेवताधिष्ठितं ; सत्योपयाचनं—सत्योपयाचनाख्यं, सत्यं उपयाचनं यस्मात्, अन्वर्थनामकत्वादिष्टप्रदं ; अत एव अभिवद्यं—सर्वनमस्कार्यं तं वृक्षमभिगम्याभिवाद्य च कुलिङ्गाख्यां पुरीं प्राविशन् ॥ १६ ॥

अभिकालं ततः प्राप्य [3] ते बोधिभवनात् च्युताः ।
पितृपैतामहीं पुण्यां तेरुरिक्षुमतीं नदीम् ॥ १७ ॥

अभिकालं ग्रामं प्राप्य ततो † बोधिभवनं ग्रामं प्राप्य ततः च्युताः—निर्याताः इक्ष्वाकूणां पितृपैतामहीं पुण्यां इक्षुमतीं नदीं तेरुः । तथा च बालकाण्डे विश्वामित्रजनकयज्ञयात्रायामुक्तम् ॥ १७ ॥

अवेक्ष्याञ्जलिपानांश्च ब्राह्मणान् वेदपारगान् ।
ययुर्मध्येन बाह्लीकान् सुदामानं च पर्वतम् ॥ १८ ॥

---

* केकयदेशस्य दक्षिणतः कुरुक्षेत्रस्योत्तरतः सरस्वतीतीरे विद्यमानो देशः ।

† बोधिभवनात्—तदाख्यात् पर्वतात्—नदीमूलत्वोक्तेः—गो.

[1] अतीत्य जग्मुः—च. [2] अभिवाद्याभिवाद्यं—ङ. [3] तत्रोऽभिभवनात् च्युताम् ततो बोधिवनच्युताः—च.

* अञ्जलिपानान्–अल्पभक्षान्–इक्षुमतीतीरवर्तिन इति शेषः। मध्येनेत्यादि। प्राग्वत्॥ १८॥

विष्णोः पदं प्रेक्षमाणा [1] विपाशां चापि शाल्मलीम्।
नदीर्वापीस्तटाकानि पल्वलानि सरांसि च॥ १९॥

सुदामपर्वतवर्तिनं विष्णोः पदं–पादमुद्राम्। विपाशां–नदीम्। शाल्मली–शुनकशाल्मली सिद्धिप्रदा॥ १९॥

पश्यन्तो विविधांश्चापि सिंहव्याघ्रमृगद्विपान्।
ययुः पथाऽतिमहता शासनं भर्तुरीप्सवः॥ २०॥
ते श्रान्तवाहना दूताः विकृष्टेन पथा ततः।
गिरिव्रजं पुरवरं शीघ्रमासेदुरञ्जसा॥ २१॥

विकृष्टेन–विप्रकृष्टेन अतिदूरेण सता पथा, हेतुना श्रान्तवाहनाः। गिरिव्रजं–केकयपुरं राजगृहपर्यायम्॥ २१॥

भर्तुः प्रियार्थं कुलरक्षणार्थं
　भर्तुश्च वंशस्य परिग्रहार्थम्।
अहेडमानास्त्वरया स्म दूताः
　रात्र्यां तु ते तत्पुरमेव याताः॥ २२॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे अष्टषष्टितमः सर्गः

---

† भर्तुरिति। नियोक्तुर्वसिष्ठस्य शीघ्रगमनेन प्रीतिसंपादनार्थं; कुलस्य–मन्त्रिपुरोहितपौरप्रमुखराजोपजीविजनस्य रक्षणार्थं; भर्तुः–

---

* अञ्जलिपानान्–अञ्जलिप्रमाणजलमात्राहारान्–गो. इदं जलप्रमाणमात्रकथनं, अञ्जलिना पानस्य निषिद्धत्वात्। † भर्तुः दशरथस्य प्रियार्थं शीघ्रानीतभरतकृतौर्ध्वदैहिकादिना दशरथस्य परलोकप्राप्तिहेतुत्वात्–गो

[1] विशालां–ङ.

दशरथस्य वंशस्य–परंपरागतराज्यस्य परिग्रहार्थं–भरतेन द्राक् स्वीकारार्थं च; अहेडमानाः–हेडृ अनादरे–उपेक्षारहिताः–विलम्बरहिताः, अत एव त्वरया युक्ताः दूतास्तु रात्र्यामेव–अस्तमनानन्तरमपि कियत्कालं गत्वा रात्र्यामेव तत्पुरं याताः। * जय(१६)मानः सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे अष्टषष्टितमः सर्गः

एकोनसप्ततितमः सर्गः

[भरतदुस्स्वप्नदर्शनम्]

† यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम् ।
भरतेनापि तां रात्रिं स्वप्नो दृष्टोऽयमप्रियः ॥ १ ॥

एवं दूतप्रवेशदिने भरतस्य दुस्स्वप्नः। यामेवेत्यादि। यामेव रात्रिं प्राप्य दूताः पुरीं प्रविशन्ति स्मेति योजना। अयमिति। वक्ष्यमाणलक्षण इत्यर्थः ॥ १ ॥

व्युष्टामेव तु तां रात्रिं दृष्ट्वा तं स्वप्नमप्रियम् ।
पुत्रो राजाधिराजस्य सुभृशं पर्यतप्यत ॥ २ ॥

---

* अत्र श्लोकसंख्या विवदति। तिलकेऽपि ‘अत्र कतकोक्तसंख्यानुसारीस्था षट् श्लोकाः त्रुटिताः’ इत्युक्तम्। † यामेव—यस्यामेव। सप्तम्यर्थे द्वितीया छान्दसी। तां–तस्याम्–गो. अत्यन्तसंयोगे द्वितीया वा। नगरस्यातिविस्तीर्णत्वात् सर्वरात्र्यां प्रयाणमुचितम्। अत एव स्वप्नं दृष्ट्वा भरते तं ब्रुवति सति दूताः प्रविशन्ति स्म इत्युत्तरसर्गारंभे वक्ष्यमाणं युज्यते। एवञ्च दूतानां नगरप्रवेशारंभकालादारभ्य वृत्तो वृत्तान्तः कथ्यतेऽत्र। पुरीमिति देश-सामान्योपलक्षकं वा। पूर्वसर्गान्ते उक्तं गिरिव्रजं नाम पुरवरं केकयराजदेशसीमनि विद्यमानं नगरान्तरमेव। राज्यसीमानं प्राप्ता अपि त्वरया अहेडमानाः तत्पुरं–राज-गृहं प्रत्येव याता इत्युक्तिरपि गतसर्गान्ते अत एव संगच्छते। एवञ्च दूता यदा तद्राज्यं प्रविष्टाः तदा भरतदुस्स्वप्नारम्भः। दूताश्च रात्र्यां सर्वस्यामपि गच्छन्तः प्रभाते भरत-दुस्स्वप्नकथनावसरे भरतं प्रापुरिति गम्यते। तामित्यपि तथैवेति ॥

तप्यमानं समाज्ञाय वयस्याः प्रियवादिनः ।
आयासं हि विनेष्यन्तः सभायां चक्रिरे कथाः ॥ ३ ॥

आयासं—दुस्स्वप्नदर्शनदुःखम् । विनेष्यन्तः—अपनेष्यन्त इति यावत् ॥ ३ ॥

वादयन्ति तथा *शान्तिं [1]लोलयन्त्यपि चापरे ।
नाटकान्यपरे [2]स्माहुः हास्यानि विविधानि च ॥ ४ ॥

आयासापनयनाय वीणादिकं वादयन्ति स्म । तथा तस्य शान्तिं—तूष्णीमवस्थानं लोलयन्ति स्म—चालयन्ति स्म, श्लोकाद्यर्थ-प्रश्नव्याख्यानादिव्याजेन । अपरे हास्यानि—हास्यरसप्रधानानि विवि-धानि नाटकान्याहुः स्म ॥ ४ ॥

स तैर्महात्मा भरतः सखिभिः प्रिय[3]वादिभिः ।
गोष्ठीहास्यानि कुर्वद्भिः न प्राहृष्यत राघवः ॥ ५ ॥

गोष्ठ्युचितानि हास्यानि—नर्माणि—गोष्ठीहास्यानि ॥ ५ ॥

तमब्रवीत् †प्रियसखः भरतं सखिभिर्वृतम् ।
सुहृद्भिः पर्युपासीनः किं, सखे! नानुमोदसे ॥ ६ ॥

प्रियसखः—अतिशयेन प्रियश्चासौ सखा च प्रियसखः—'राजाहस्सखिभ्यः....' इति टच्, सखिमात्रस्य प्रियत्वाविवादात् भूयोगतिर्विज्ञायते ॥ ६ ॥

एवं ब्रुवाणं सुहृदं भरतः प्रत्युवाच ह ।
शृणु त्वं यन्निमित्तं मे दैन्यमेतदुपागतम् ॥ ७ ॥

---

* शान्ति—शान्तिमन्त्रादिकं वा । † प्रियसखः—अन्तरङ्गसुहृत्—गो.

[1] लासय—ङ. [2] प्राहुः—ङ. [3] बोधिभिः—ङ.

* स्वप्ने पितरमद्राक्षं मलिनं मुक्तमूर्धजम् ।
पतन्तमद्रिशिखरात् कलुषे गोमयह्रदे ॥ ८ ॥
प्लवमानश्च मे दृष्टः स तस्मिन् गोमयह्रदे ।
पिबन्नञ्जलिना तैलं [1]हसन्नपि मुहुर्मुहुः ॥ ९ ॥

प्लवमानः— भेकादिवत् ॥ ९ ॥

ततस्तिलौदनं भुक्त्वा पुनः पुनरधश्शिराः ।
तैलेनाभ्यक्तसर्वाङ्गः तैलमेवावगाहत ॥ १० ॥

तिलमिश्रं ओदनं —तिलोदनम् । पिबन्नञ्जलिनेत्यादि तैलमेवावगाहत इत्यन्तं एकः स्वप्नः ॥ १० ॥

स्वप्नेऽपि † सागरं शुष्कं चन्द्रं च पतितं भुवि ।
‡ उपरुद्धां च जगतीं तमसेव समावृताम् ॥ ११ ॥

स्वप्नदर्शनान्तरमथाग्रेऽपि । उपरुद्धां, असुररक्षोभिरिति शेषः ॥

औपवाह्यस्य नागस्य विषाणं शकलीकृतम् ।
सहसाऽपि च संशान्तं ज्वलितं जातवेदसम् ॥ १२ ॥

औपवाह्यः–राजवाहनार्हो दन्ती ॥ १२ ॥

§ अवतीर्णां च पृथिवीं शुष्कांश्च विविधान् द्रुमान् ।
अहं पश्यामि विध्वस्तान् सधूमांश्चापि पर्वतान् ॥ १३ ॥

---

* स्वप्ने पितरं इत्यारभ्य गोमयह्रदे इत्यन्तमेकः स्वप्नः । पिबन्नित्यारभ्य अवगाहत इत्यन्तमपरः स्वप्नः इति युक्तम् । गोमयह्रदे इत्युक्त्वा तैलमेवावगाहत इत्यस्वारस्यप्रसंगात् । स्वप्नस्यापर्यनुयोज्यत्वेन समाधौ तु न किञ्चिदपि वक्तुं शक्यमिति । † द्वितीयान्तानां सर्वेषां ‘ अहं पश्यामि ’ इत्यनेनान्वयः । ‡ तमसाऽऽवृतामिव उपरुद्धां—तिरोहिताम्–**गो.** § अवतीर्णां—अधः पतिताम्–**गो.**

[1] हसन्निव–**ङ.**

पीठे कार्ष्णायसे चैनं निषण्णं कृष्णवाससम् ।
प्रहसन्ति स्म राजानं प्रमदाः कृष्णपिङ्गलाः ॥ १४ ॥

कृष्णाश्च पिङ्गलाश्च तथा ॥ १४ ॥

त्वरमाणश्च धर्मात्मा रक्तमाल्यानुलेपनः ।
रथेन खरयुक्तेन प्रयातो दक्षिणामुखः ॥ १५ ॥
[1]प्रहसन्तीव राजानं प्रमदा रक्तवासिनी ।
प्रकर्षन्ती मया दृष्टा राक्षसी विकृतानना ॥ १६ ॥

प्रहसन्ती इव इति पदम् ॥ १६ ॥

एवमेतन्मया दृष्टं *इमां रात्रिं भयावहाम् ।
†अहं रामोऽथवा राजा लक्ष्मणो वा मरिष्यति ॥ १७ ॥

इमां रात्रिमिति । अस्यां रात्र्यामित्यर्थः । अहं मरिष्यामीति विपरिणामः कार्यः ॥ १७ ॥

नरो यानेन यः स्वप्ने खरयुक्तेन याति हि ।
अचिरात्तस्य धूमाग्रं चितायां संप्रदृश्यते ॥ १८ ॥

नरो यानेनेत्येतत् स्वप्नस्य प्रत्यक्षदर्शनात् । यथा—'स्वप्ने पुरुषं कृष्णं कृष्णदन्तं पश्यति' इत्युपक्रम्य—'खरैः वराहयुक्तैर्याति' इति श्रुतिसिद्धत्वात् एतद्बलेन प्रागुक्तपितृखरयानफलावश्यंभावं निश्चिनोति । धूमाग्रं—धूमशिखा ॥ १८ ॥

---

* इमां रात्रिमिति पूर्ववत् (१ श्लो.) बोध्यम् ॥ † यद्यपि 'स्वप्ने पितरमद्राक्ष' इत्येवोक्तम्, अथापि अनिष्टस्य इतरेषु चिन्तनापेक्षया स्वस्मिन् चिन्तनं तन्मनस औदार्यादिकं सूचयति ।

[1] प्रहरन्तीव—ङ.

*एतन्निमित्तं दीनोऽहं †[1] न वचः प्रति पिप्रिये ।
शुष्यतीव च मे कण्ठः न स्वस्थमिव मे मनः ॥ १९ ॥

एतन्निमित्तमिति। विशिष्यानन्तरोक्तमित्यर्थः। दृष्ट्वेति शेषः। दीनोऽहं युष्माकं वचः प्रति—उद्दिश्य न पिप्रिये—न भृशं प्रीतो भवामि, प्रीङो यङन्ताल्लट्, अभ्यासगुणाभावादिश्छान्दसः ॥ १९ ॥

न पश्यामि भयस्थानं भयं चैवोपधारये।
भ्रष्टश्च स्वरयोगो मे छाया चोपहता मम ॥ २० ॥
[2]जुगुप्स इव चात्मानं न च पश्यामि कारणम् ।

भयस्थानं—भयकारणं न पश्यामि, अथ च भयमुपधारये—अवशतो बिभेमि। छाया—शोभा। आत्मानं जुगुप्स इवेति। किंजन्माऽहमस्तीत्येवमात्मनि जुगुप्सा। कारणं—जुगुप्साकारणम् ॥ २० ॥

‡इमां च दुस्स्वप्नगतिं निशाम्य तां
अनेकरूपां अवितर्कितां पुरा।
भयं महत्तद्धृदयान्न याति मे
विचिन्त्य राजानमचिन्त्यदर्शनम् ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकोनसप्ततितमः सर्गः

---

* एतन्निमित्तं—उक्तस्वप्नदर्शनहेतुना—गो. अस्यां व्याख्यायां दृष्ट्वेति नाध्याहार्यम्। † वचः युष्माकं न प्रतिपूजये—ति. अत्र कतकव्याख्याप्यनूदिता तिलके। न वचः प्रतिपूजये—न किञ्चित् वक्तुं शक्नोमीति तात्पर्यः॥ न च वः— इति पाठे तु वः—युष्मान् न पूजये—मनोवैय्याकुल्यादित्यर्थः॥ ‡ स्वप्नश्च पूर्वचिन्तापुरस्कृतो न फलति, प्रत्यूषे च फलति सद्यः। यामविलम्बात् फलविलम्बः। फलं च द्रष्टुः दृष्टस्य तत्सम्बन्धिनो वा भविष्यति—गो.

[1] न च वः प्रतिपूजये—ङ. न वचः प्रतिपूजये—च. [2] जुगुप्सन्निव—ङ.

दुस्स्वप्नगतिं निशाम्येति । स्वदुस्स्वप्नानुभवमनुभूयेति यावत् । आकर(२१)मानः सर्गः ॥ २१ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे एकोनसप्ततितमः सर्गः

सप्ततितमः सर्गः

[भरतप्रस्थानम्]

भरते ब्रुवति स्वप्नं दूतास्ते क्लान्तवाहनाः ।
प्रविश्यासह्य[1]परिखं रम्यं राजगृहं पुरम् ॥ १ ॥

अथ सभायामेव भरतस्य दूतदर्शनसन्देशश्रवणादिपूर्वं स्वपुरप्रस्थानम् । भरत इत्यादि । * असह्या—दुस्सहा परिखा—तत्प्रदेशवर्तिप्राकारयन्त्रसन्नाहः यस्याः सा तथोक्ता ॥ १ ॥

समागम्य तु राज्ञा च राजपुत्रेण चार्चिताः ।
राज्ञः पादौ गृहीत्वा तु तमूचुर्भरतं वचः ॥ २ ॥

राज्ञा—केकयेन राजपुत्रेण—युधाजिता चार्चिताः स्वीयामात्यदत्तपदार्थोपस्थापनपुरस्सरतया समागम्य—सङ्गमपूर्वकयथोचितव्यवहारं कृत्वा राज्ञः—स्वीयस्य भरतस्य पादौ गृहीत्वा—नमस्कृत्य ॥ २ ॥

पुरोहितस्त्वां कुशलं प्राह सर्वे च मन्त्रिणः ।
त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया ॥ ३ ॥

† आत्ययिकं—कालात्ययं प्राप्तं आत्ययिकं कृत्यं त्वयैव कर्तव्यमस्तीति शेषः ॥ ३ ॥

---

* असह्यपरिघं—परैरप्रधृष्यपरिघं—गो. † आत्ययिकं—दुष्करं—अत्ययः कृच्छ्रं—गो.

[1] परिघं—ङ.

इमानि च महार्हाणि वस्त्राण्याभरणानि च ।
प्रतिगृह्य, विशालाक्ष! मातुलस्य च दापय ॥ ४ ॥

मातुलस्य—युधाजितः । दापयेति । तदर्थं प्रहितमिति शेषः ॥ ४ ॥

अत्र विंशतिकोट्यस्तु नृपतेर्मातुलस्य ते ।
दशकोट्यस्तु संपूर्णाः तथैव च, नृपात्मज! ॥ ५ ॥

तर्हि कियन्मया ग्राह्यं, कियन्मातुलस्य दापनीयमित्यत आह—अत्रेत्यादि । आहृतद्रव्य इत्यर्थः ॥ ५ ॥

प्रतिगृह्य तु तत्सर्वं स्वनुरक्तः सुहृज्जने ।
दूतानुवाच भरतः कामैस्संप्रतिपूज्य तान् ॥ ६ ॥

सुहृज्जने—मातुलादिरूपे । प्रहाप्येति शेषः ॥ ६ ॥

कच्चित् स कुशली राजा पिता दशरथो मम ।
[1]कच्चिच्चारोगता रामे लक्ष्मणे च महात्मनि ॥ ७ ॥

ज्येष्ठानुक्रमेण कुशलप्रश्नः—राजेत्यादि ॥ ७ ॥

आर्या च धर्मनिरता धर्मज्ञा [2]धर्मवादिनी ।
अरोगा चापि कौसल्या माता रामस्य धीमतः ॥ ८ ॥
कच्चित् सुमित्रा धर्मज्ञा जननी लक्ष्मणस्य या ।
शत्रुघ्नस्य च वीरस्य साऽरोगा चापि मध्यमा ॥ ९ ॥
आत्मकामा सदा चण्डी क्रोधना प्राज्ञमानिनी ।
अरोगा चापि मे माता कैकेयी किमुवाच ह ॥ १० ॥

---

[1] कच्चिच्चारोग्यता—ङ. [2] धर्मदर्शिनी—ङ.

स्वमातुः स्वभावानुवादपूर्वं तस्या आरोग्यं पृच्छति—* आत्मेत्यादि। आत्मप्रयोजनैकदृष्टिः—† आत्मकामा। प्राज्ञमात्मानं मन्यत इति—प्राज्ञमानिनी, 'मनः' इति णिनिः, 'क्यङ्मानिनोश्च' इति पुंवद्भावः ॥ १० ॥

एवमुक्तास्तु ते दूताः भरतेन महात्मना।
ऊचुः[1] संप्रश्रितं वाक्यं इदं तं भरतं तदा ॥ ११ ॥

संप्रश्रितमिति। सविनयं—‡ संक्षिप्तमिति यावत्। विस्तरस्तु मिथ्यात्वतोऽशक्यवादः ॥ ११ ॥

कुशलास्ते, नरव्याघ्र! येषां कुशलमिच्छसि।
श्रीश्च त्वां वृणुते पद्मा युज्यतां चापि ते रथः ॥ १२ ॥

हे नरव्याघ्र! येषां त्वं कुशलमिच्छसि, तेषां कुशलमेव। तर्हि मम त्वरयाऽऽह्वानं किन्निमित्तं इति शङ्का न कर्तव्या त्वयाऽपि। § त्वामपि श्रीश्च वृणुते, ‖ पद्मा—तल्लक्षणा, श्रीरेव त्वां वृणुते। अतस्तवाप्यागमनेन न किञ्चिदनिष्टम्। अतो निश्शङ्कतया यात्रार्थं रथो युज्यताम् ॥ १२ ॥

---

* दुस्स्वप्नदर्शनदूतागमनाभ्यां, स्वमातुस्स्वभावानुसरणेन च, कैकेय्या यत्किञ्चिदत्याचरितं भवेदिति भरतस्य शङ्का समजनीति सूचयति—आत्मकामेत्यादिना ॥ † आत्मन्येव कामः यस्याः सा तथा, स्वार्थैकपरेत्यर्थः ॥ ‡ सविनयमूचुरित्यनेनानधिकभाषणमुक्तं, विनीता हि न बहु वदेयुः, इत्यभिप्रायेणोक्तं संक्षिप्तमिति ॥ § लक्ष्मीवरणोक्तिः अमङ्गलव्यावृत्त्यर्था, न तु राज्यश्रीप्राप्तिपरा; राजमरणादिकं न वक्तव्यमिति वसिष्ठेनोक्तत्वात्-ती. परन्तु स्वेषामनृतवदनपरिहाराय एवं अर्थद्वयगर्भं वाक्यमुक्तं स्यादिति ॥ ‖ पद्महस्तेत्यर्थः। अर्श आद्यजन्तोऽयं शब्दः। श्रीरिति विशेष्यवाचकस्य प्रत्येकं सत्त्वादेवं व्याख्यातम् ॥

[1] सप्रश्रयं—ङ.

भरतश्चापि तान् दूतान् * एवमुक्तोऽभ्यभाषत ।
आपृच्छेऽहं महाराजं दूतास्सन्त्वरयन्ति माम् ॥ १३ ॥

दूता मां सन्त्वरयन्ति, अतो गच्छेयमिति महाराजं आपृच्छेऽहमिति दूतान् प्रत्यभाषत ॥ १३ ॥

एवमुक्त्वा तु तान् दूतान् भरतः पार्थिवात्मजः ।
दूतैस्सञ्चोदितो वाक्यं मातामहमुवाच ह ॥ १४ ॥

दूतैस्सञ्चोदित इति । 'तर्हि शीघ्रमापृच्छ' इत्येवमात्मना प्रेरित इत्यर्थः ॥ १४ ॥

राजन्! पितुर्गमिष्यामि सकाशं दूतचोदितः ।
पुनरप्यहमेष्यामि [1] यावन्मे त्वं स्मरिष्यसि ॥ १५ ॥

यावत्—यदा मे स्मरिष्यसि—मां स्मरिष्यसीति यावत्, 'अधीगर्थ' इति षष्ठी ॥ १५ ॥

भरतेनैवमुक्तस्तु नृपो मातामहस्तदा ।
तमुवाच शुभं वाक्यं शिरस्याघ्राय राघवम् ॥ १६ ॥
गच्छ तातानुजाने त्वां कैकेयीसुप्रजास्त्वया ।
मातरं कुशलं ब्रूयाः पितरं च, परन्तप! ॥ १७ ॥

† कैकेयीसुप्रजा इत्यादि कौसल्यासुप्रजा इत्यादिवत् ॥ १७ ॥

पुरोहितं च कुशलं ये चान्ये द्विजसत्तमाः ।
तौ च, तात! महेष्वासौ भ्रातरौ रामलक्ष्मणौ ‡ ॥ १८ ॥

---

* एवमुक्त इति । दूतैरिति शेषः ॥ † कैकेयीसुप्रजा इति समस्तं पदमित्यभिप्रेत्यैवं व्याख्यातम् । व्याख्यानान्तरेषु तु, एवं व्याख्याने 'त्वया' इत्यस्यानन्वयप्रसङ्गात्, त्वया कैकेयी सुप्रजा इति व्यासः कृतः । त्वयेतिस्थाने 'किल' इत्यादिपाठः स्यादाऽस्य व्याख्यातुः । ‡ एतदनन्तरं इतिकरणं द्रष्टव्यम् ।

[1] यदा मे—ङ. च.

तस्मै हस्त्युत्तमान् चित्रान् कम्बलानाजिनानि च ।
[1]अभिसत्कृत्य कैकेयो भरताय धनं ददौ ॥ १९ ॥

तस्मै भरतायेति योजना । चित्राजिनचित्रकम्बलानि तद्देशोत्तमवस्त्राणि ॥ १९ ॥

रुक्मनिष्कसहस्रे द्वे षोडशाश्वशतानि च ।
सत्कृत्य कैकयीपुत्रं केकयो धनमादिशत् ॥ २० ॥

रुक्मनिष्कसहस्रे द्वे इति । द्विपपूर्वा इति यावत् । निष्कं-फलं, 'उरोभूषणे पले, दीनारेऽपि' इति, निष्कः-धनमिति. चित्रा-जिनाद्युक्तरूपमित्यर्थः ॥ २० ॥

तथाऽमात्यानभिप्रेतान् विश्वास्यांश्च गुणान्वितान् ।
ददावश्वपतिः क्षिप्रं भरतायानु[2]यायिनः ॥ २१ ॥

*तथाऽमात्यानिति । स्वीयानिति शेषः । विश्वास्यान्-विश्वासनीयान्, ऋहलोर्ण्यत् । अश्वपतिः-केकयः, तेषां कुलनाम-धेयम्, गजपत्यादिवत् ॥ २१ ॥

ऐरावतानैन्द्रशिरान् नागान् वै प्रियदर्शनान् ।
खरान् शीघ्रान् सुसंयुक्तान् मातुलोऽस्मै धनं ददौ ॥ २२ ॥

इरावत्पर्वतभवाः †ऐरावताः, तथा इन्द्रशिरःपर्वतभवाः ऐन्द्र-शिराः नागाः । न नामनि विप्रतिपत्तिरिति इन्द्रशिरेत्यकारान्तं प्रातिपदिकम् ॥ २२ ॥

---

* अमा-सह प्राणान् त्यजन्तीत्यमात्याः, तान्-गो. अङ्गरक्षकविशेषानिति भावः। सह इत्यर्थकं 'अमा' इत्यव्ययम् ॥ † ऐरावतकुलोद्भवान् वा-ति.

[1] सत्कृत्य राजा-ङ. [2] जीविनः-ङ.

[1] अन्तःपुरेऽतिसंवृद्धान् व्याघ्रवीर्य[2]बलोपमान् ।
दंष्ट्रायुधान् महाकायान् शुनश्चोपायनं ददौ ॥ २३ ॥

अतिसंवृद्धाः—अत्यन्तं विवर्धिताः; यद्वीर्यबलविषये व्याघ्रवीर्यबले एवोपमा येषां ते तथा ॥ २३ ॥

[3] रथान् मण्डलचक्रांश्च योजयित्वा परश्शतम् ।
उष्ट्रगोऽश्वखरैर्भृत्याः भरतं यान्तमन्वयुः ॥ २४ ॥

मण्डलाकारतया रथप्रवर्तनसाधनं चक्रं मण्डलचक्रं, चतुर्दिक्चक्रमध्यस्थं—यथाऽस्माभिः काञ्च्यादावनुभूयते—तद्युक्तस्तथा; मत्वर्थीयाजन्तः । उष्ट्रादिभिर्युक्ता भृत्या इति । मातुलप्रेरिता इति शेषः ॥२४॥

स दत्तं केकयेन्द्रेण धनं तन्नाभ्यनन्दत ।
भरतः केकयीपुत्रो गमनत्वरया तदा ॥ २५ ॥

दत्तं धनं नाभ्यनन्दतेति किमल्पमत्या ? नेत्याह—गमनत्वरयेति । दत्तोपलालनावकाशाभावादेवेत्यर्थः ॥ २५ ॥

बभूव ह्यस्य हृदये चिन्ता सुमहती तदा ।
त्वरया चापि दूतानां स्वप्नस्यापि च दर्शनात् ॥ २६ ॥
स स्ववेश्म व्यतिक्रम्य नरनागाश्वसंवृतम् ।
* प्रपेदे सुमहच्छ्रीमान् आविवेशानिवारितः ॥ २७ ॥

---

* तथा च राज्ञा मातुलेन च स्वगृह एव सत्कृतः मातामह्यादिदर्शनार्थं अन्तःपुरं गतवानिति बोध्यम् । अथ वा भरतस्य दुःखप्रदर्शनदूतागमनवृत्तान्तश्रवणेन केकयमातुलौ स्वगृहमेवागताविति द्रष्टव्यम् । सुमहच्छ्रीमान्–सुमहाश्रीमान्–**गो.**

[1] अयं श्लोकः तिलकरीत्या 'तस्मै हस्त्युत्तमान्' इत्येतदनन्तरं योज्यः । [2] बलान्वितान्–ङ. [3] अयं श्लोकः 'स मातामहमापृच्छ्य' इत्युत्तरश्लोकानन्तरमेव सर्वत्र दृश्यते ।

स इति। एवं सभायां संप्राप्तनियोगजीवाजीवधनबलोपेतः स्ववेश्म व्यतिक्रम्येति। यात्रापरिकरसन्नाहाय स्ववेश्माभिगम्य कृतसन्नाहः स्ववेश्मनो निर्गत्य राजमार्गं प्रपेदे। 'सुमहच्छ्रीमान्' इत्येकं पदम्। पुंवद्भावानन्तरं मतुप्॥ २७॥

स मातामहमापृच्छय मातुलं च युधाजितम्।
रथमारुह्य भरतः शत्रुघ्नसहितो ययौ॥ २८॥

बलेन गुप्तो भरतो महात्मा
*सहार्यकस्यात्मसमैरमात्यैः।
आदाय शत्रुघ्नमपेतशत्रुः
गृहाद्ययौ सिद्ध इवेन्द्रलोकात्॥ ३०॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे सप्ततितमः सर्गः

बलेन—स्वीयेन मातुलीयेन च। भार्यया सहितः सभार्यकः काल(३१)मानः? सर्गः॥ ३०॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे सप्ततितमः सर्गः

एकसप्ततितमः सर्गः

[अयोध्याप्रवेशः]

स प्राङ्मुखो राजगृहात् अभिनिर्याय राघवः।
ततः सुदामां द्युतिमान् †संतीर्यावेक्ष्य तां नदीम्॥ १॥

---

* आर्यकस्य—मातामहस्य—गो.   † नदीमवेक्ष्य तां संतीर्य—गो.

अथ निर्यातस्य भरतस्य निश्शोभनिजपुरप्रवेशः । स इत्यादि । सुदामां नदीं तीर्त्वा । एवमादिजनपदग्रामभेदानामिहोपदेशात् दूतमार्गीयाणां अनुपदेशाच्चेदं मार्गान्तरं चतुरङ्गबलगमनोचितम् । नेह कुरुजाङ्गलादिकष्टस्थलमस्ति । दूतास्तु ऋजुमेव केवलं दुर्गममप्याश्रित्य कान्तारमार्गं गताः द्राक् गिरिव्रजप्रापस्य इति ज्ञेयम् ॥

ह्लादिनीं दूरपारां च प्रत्यक्स्रोतस्तरङ्गिणीम् ।
शतद्रूमतरच्छ्रीमान् नदीमिक्ष्वाकुनन्दनः ॥ २ ॥

दूरे पारं—अपरं तीरं यस्याः सा तथा, तां ह्लादिनीं नदीं प्रत्यक्स्रोतस्तरङ्गिणीं—पश्चिमप्रवाहनदीं शतद्र्वाख्याम् ॥ २ ॥

*[1]ऐलाधानीं नदीं तीर्त्वा प्राप्य चापर[2]पर्पटान् ।
शिलामाकुर्वतीं तीर्त्वा आग्नेयं शल्य[3]कर्तनम् ॥ ३ ॥
सत्यसन्धः शुचिः श्रीमान् प्रेक्षमाणः शिलावहाम् ।
अत्ययात् स महाशैलान् वनं चैत्ररथं प्रति ॥ ४ ॥

---

* एलधाने —एलधानग्रामे । अपरपर्पटान्—अपरपर्पटाख्यदेशविशेषान् । शिलामाकुर्वतीं—शिलामासमन्ताद् कुर्वतीं, शिलाकर्षणस्वभावामित्यर्थः, नदीम् । आग्नेयं शल्यकर्तनमिति ग्रामद्वयम् । शिलावहां संप्रेक्षमाणः चैत्ररथं नाम वनं लक्षीकृत्य महाशैलानत्ययात् –ती. एलानां–एलकानां आधानं—उत्पत्तिस्थानं, तद्वत्त्वादेलाधानाख्ये नगरे नदीं—पूर्वोक्तां शतद्रूं—तीर्त्वेत्यनुवादः । अपरपर्पटान्—पर्पटानामदूरभवो ग्रामः पर्पटः, पर्पटाः—ओषधिविशेषाः.......पूर्वपर्पटा अपरपर्पटाश्चेति ग्रामद्वयमस्ति; तत्रापरपर्पटान् विश्रान्त्यर्थं प्राप्य, शिलामाकुर्वतीं—शिलाकर्षणस्वभावां अत एव शिलावहामित्यन्वर्थसंज्ञां नदीं तीर्त्वा, तस्या आग्नेय्यां दिशि भवं आग्नेयं, शल्यकर्तनं नाम नगरं प्रेक्षमाणस्सन् अत्ययात्–गो.

[1] उपधाने–एलाधाने–ङ. ऐलधाने–ङ. च. [2] पर्वतान्–ङ. [3] कर्षणम्–ङ.

ऐलाधानीं—तदाख्याम् । अपरपर्पटान्—जनपदविशेषान् अन्वर्थनामकान् । शिलां-शिलानदीम् । आकुर्वतीं नदीं । आकुर्वत्या आग्नेयदिग्गतं शल्यकर्तनं—तदोषध्युपेतं देशम् । शिलावहा च नदी । महाशैलानतीत्य चैत्ररथाख्यं वनं प्रति अयादिति सम्बन्धः ॥ ४ ॥

सरस्वतीं च *गङ्गां च युग्मेन प्रत्यपद्यत।
† [1] उत्तरान् वीरमत्स्यांश्च भारुण्डं प्राविशद्वनम् ॥ ५ ॥

सरस्वतीं गङ्गां—'सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी । तिस्रस्त्वेता दिशं जग्मुः प्रतीचीं तु शुभोदकाः' इत्युक्तः पश्चिमगङ्गाप्रवाहात्मा सिन्धुरेव गङ्गेत्युच्यते, यत्र ते द्वे युग्मे मिलिते तत्र ते प्रतिपद्य ततो वीरमत्स्यान् देशानुत्तरान् देशान्, ततो भारुण्डाख्यं वनं प्राविशत् ॥ ५ ॥

‡ वेगिनीं च कुलिङ्गाख्यां ह्लादिनीं पर्वतावृताम् ।
यमुनां प्राप्य संतीर्णः बलमाश्वासयत्तदा ॥ ६ ॥

वेगिन्यादिविशेषणा कुलिङ्गाख्या या नदी, तां सन्तीर्णः, यमुनां प्राप्य बलमाश्वासयादिति योजना ॥ ६ ॥

---

*गङ्गां-सिन्धुं युग्मेन सङ्गमेन-**ती.** गङ्गाख्यां काञ्चिन्नदीं पश्चिमसमुद्रगामिनीं, गङ्गास्रोतोभेदं वा—युग्मेन—द्वन्द्वतया पार्श्वद्वये प्रवहन्तीमिति शेषः—**गो.** युग्मेन—दिनद्वयेनेति वा । † वीरमत्स्यानां—वीरमत्स्याख्यदेशानां उत्तरं भारुण्डं—**गो.** वीरमत्स्यानां उत्तरान्—उत्तरप्रदेशान्—**ती.** (प्राप्येति शेषः) । ‡ वेगिनी—वेगयुक्तां, ह्लादिनीं—सन्तोषकारिणीं, पर्वतैरावृतां कुलिङ्गाख्यां नदीं यमुनां प्राप्य सन्तीर्णः यमुनासमीपे सन्तीर्णः इत्यर्थः ; अन्यत्रातिवेगत्वात् अन्यत्र पर्वतावृतत्वाच्चेति भावः—**गो.**

[1] उत्तरान् वीरमत्स्यानां—**ङ. च.** उत्तरं वीरमत्स्यानां—**ङ.**

शीतीकृत्य तु गात्राणि [1] समाश्वास्य च वाजिनः।
तत्र स्नात्वा च पीत्वा च * प्रायादादाय चोदकम् ॥ ७॥

शीतीकृत्येति । स्नानपानादिनेति शेषः । समाश्वास्येति । छायायां घासदानेनेति शेषः । उदकमादायेति । तीर्थबुद्ध्येति शेषः ॥

राजपुत्रो महारण्यमनभीक्ष्णोपसेवितम् ।
भद्रो भद्रेण यानेन † [2] मेरुप्रख्यमथात्ययात् ॥ ८॥

अनभीक्ष्णोपसेवितं—मुहुरसंचरितम् । भद्रेण—प्रशस्तेन रथेनेति यावत् । मेरुप्रख्यं–देशम् ॥ ८ ॥

‡ भागीरथीं दुष्प्रतरां [3] अशुंधाने महानदीम् ।
[4] अपश्यद्राघवस्तूर्णं प्राग्वटे विश्रुते पुरे ॥ ९॥

अशुन्धाने ग्रामे महानदीं गङ्गामपश्यत् ॥ ९ ॥

[5] स ततः प्राग्वटे तीर्त्वा समायात् कुटिकोष्ठिकाम् ।
सबलस्तां स तीर्त्वाऽथ समायाद्धर्मवर्धनम् ॥ १० ॥

ततः प्राग्वटे पुरे गङ्गां तीर्त्वा । कुटिकोष्ठिकां नदीम् । धर्मवर्धनं ग्रामम् ॥ १० ॥

---

* उत्तरत्र गन्तव्यदेशस्य निर्जलदेशत्वात् तत्र पानार्थमुदकमादाय च प्रायात्–गो.—अत्र समाश्वास्येत्यादिना एकरात्रिवासः प्रतीयते । † 'मारुतः खमिवात्ययात्' इति पाठे, भद्रयानविशिष्टत्वेन नादृशदुर्गमारण्यमपि सुलभेनात्ययादित्यर्थे स दृष्टान्तः । ‡ अशुन्धाने नगरे दुष्प्रतरां भागीरथीं विश्रुते—तरणस्थलत्वेन प्रसिद्धे प्राग्वटे पुरे उपायात्–आगच्छत्–तत्तरणार्थमिति शेषः- गो. अंशुधाने–अंशुधानाख्यदेशे प्राग्वट-पुरे-ती.

[1] क्लान्तानाश्वास्य–ङ. [2] मारुतः खमिवात्ययात्–ङ. च. [3] अंशुधाने–ङ. च. [4] उपाया–ङ. च. [5] स गङ्गां–ङ.

तोरणं दक्षिणार्धेन जम्बूप्रस्थमुपागमत् ।
वरूथं च ययौ रम्यं ग्रामं दशरथात्मजः ॥ ११ ॥

तोरणं—तद्ग्रामस्य दक्षिणार्धेन—दक्षिणभागेन जम्बूप्रस्थं ग्राममुपागमत् । वरूथं–वरूथाख्यम् ॥ ११ ॥

[1]तत्र रम्ये वने *वासं कृत्वाऽसौ प्राङ्मुखो ययौ ।
उद्यानमुज्जिहीनायाः प्रियका यत्र पादपाः ॥ १२ ॥

उज्जिहीनाया नगर्याः । यत्र—उद्याने । प्रियकाः—असनाः ॥ १२ ॥

† [2]सालांस्तु प्रियकान् प्राप्य शीघ्रानास्थाय वाजिनः ।
‡ अनुज्ञाप्याथ भरतः वाहिनीं त्वरितो ययौ ॥ १३ ॥

प्रियकान् सालान्–प्रियकवृक्षान् , 'अनोकहः कुटः सालः' । शीघ्रान् वाजिनः रथे आस्थाय—संयोज्य । एवं व्याख्या तु 'रथे सारथिमब्रवीत्' इति वक्ष्यमाणत्वात् । अनुज्ञाप्य वाहिनी-मिति । उज्जिहानाया अर्वाक् स्वदेशत्वान्निर्भयतः शनैरागम्यतामिति अनुज्ञाप्य स्वयं त्वरितो ययौ ॥ १३ ॥

§ वासं कृत्वा सर्वतीर्थे तीर्त्वा [3]चोत्तानिकां नदीम् ।
अन्या नदीश्च विविधाः ‖ पार्वतीयैस्तुरङ्गमैः [4] ॥ १४ ॥

---

* अत्राप्येकरात्रिवासः विवक्षितः । गोविन्दराजीयेऽप्येवमेव । † सालान्—वृक्षान् , 'अनोकहः कुटः सालः' इत्यमरः, पूर्वोक्तवनस्थान् प्रियकवृक्षान् प्राप्य–गो. ‡ अनन्तरसर्गस्य ९ श्लोको द्रष्टव्यः । § अत्राप्येकरात्रिवासः विवक्षितः । ‖ पर्वत-देशोत्पन्नैः,–तीर्त्वेत्यनुषक्तः–गो. पर्वतोत्पन्नैः–ती.

[1] एतदारभ्य अर्धत्रयं नास्ति–झ. [2] स तांस्तु–ङ. च. [3] चोत्तरगां–ङ. च. [4] एतदनन्तरं–हस्तिपृष्ठकमासाद्य कुटिकामत्यवर्तत। ततार च नरव्याघ्रः लौहित्ये स कपीवतीम्–इत्यधिकं–ङ.

सर्वतीर्थे ग्रामे। अत्रैकं प्रक्षिप्तं श्लोकं * परो व्याकरोत् ॥ १४ ॥

एकसाले स्थाणुमतीं विनते गोमतीं नदीम्[1] ।
कालिङ्गनगरे चापि प्राप्य सालवनं तथा ॥ १५ ॥

[2] भरतः क्षिप्रमागच्छत् सुपरिश्रान्तवाहनः ।
† वनं च समतीत्याशु ‡ शर्वर्यामरुणोदये ॥ १६ ॥

अयोध्यां मनुना राज्ञा निर्मितां संददर्श ह ।
तां पुरीं पुरुषव्याघ्रः § सप्तरात्रोषितः पथि ॥ १७ ॥

अयोध्यामग्रतो दृष्ट्वा सारथिं वाक्यमब्रवीत् ।
एषा नाति‖प्रतीता मे पुण्योद्याना यशस्विनी ॥ १८ ॥
अयोध्या दृश्यते दूरात्, सारथे! पाण्डुमृत्तिका ।

नातिप्रतीता—नातिप्रकाशा, 'सुप्सुपा' इति समासः नञापि भवति। पाण्डुमृत्तिकेति। सुधाधवलेति यावत् ॥ १८ ॥

---

* महेश्वरतीर्थः, गोविन्दराजो वा। श्लोकश्चाधस्तात् पूर्वपुटे दत्तः। 'हस्तिपृष्ठवदुन्नतत्वात् हस्तिपृष्ठकाख्यं ग्राममासाद्य कुटिकां नदीमत्यवर्तत—हस्तिपृष्ठकसमीपे कुटिकामतरदित्यर्थः। लौहित्ये—लौहितमृत्त्वात् लौहित्यनाम्नि नगरे कपीवतीं—बहुकपिमत्त्वात्तन्नाम्नीं नदीम्'–**गो.** हस्तिपृष्ठकमासाद्य—गजपृष्ठमारुह्य कुटिकामत्यवर्तत–**ती.** इतः गजेन यानमेव तीर्थेन समर्थ्यते। परन्तु उत्तरत्र सारथिं प्रति भरतवचनदर्शनात् इदं चिन्तनीयम्। † वनं—सालवनम्। ‡ अनेन इतररात्रिवत् नोषितवान्, नगरस्य सन्निहितत्वात् अविश्रम्य रात्रावपि प्रयाणं कृतवानिति गम्यते। अत एव 'सुपरिश्रान्तवाहनः' इत्युक्तम्। § दूतैः विषयनिवेदनानन्तरं सपरिवारस्य भरतस्य प्रयाणसन्नाहेन तद्दिनार्धकालः क्षपितः स्यादेव। अतश्च 'युग्मेन' (५) इति पूर्णदिनद्वयं कथितम्। तेन च रात्रित्रयनिवृत्तिः कथिता। चतुर्थी रात्रिः ६–७ श्लोकयोः, पञ्चमी १२ श्लोके, षष्ठी १४ श्लोके, सप्तमी च रात्रिः १६ श्लोके च कथितेति भाति। ‖ प्रतीता—सन्तुष्टा–**गो.**

[1] एतदनन्तरं—व्यपायाद्राघवस्तूर्णं तीर्त्वा शोणां महानदीम्—इत्यधिकं–**ङ.**
[2] इदमर्धं नास्ति–**झ.**

यज्वभिर्गुणसंपन्नैः ब्राह्मणैर्वेदपारगैः ॥ १९ ॥
भूयिष्ठमृद्धैराकीर्णा राजर्षिपरिपालिता ।
अयोध्यायां पुरा शब्दः श्रूयते तुमुलो महान् ॥ २० ॥
समन्तान्नरनारीणां तमद्य न शृणोम्यहम् ।
उद्यानानि हि सायाह्ने क्रीडित्वोपरतैर्नरैः ॥ २१ ॥
समन्ताद्विप्रधावद्भिः प्रकाशन्ते [1] ममान्यदा ।
तान्यद्यानुरुदन्तीव परित्यक्तानि कामिभिः ॥ २२ ॥

सायाह्न इति । *गत्वेति शेषः । क्रीडित्वेति । रात्राविति शेषः । विप्रधावद्भिः—गच्छद्भिः, प्रातरिति शेषः ॥ २१-२२ ॥

अरण्यभूतेव पुरी, सारथे! प्रतिभाति मे ।
न ह्यत्र यानैर्दृश्यन्ते न गजैर्न च वाजिभिः ॥ २३ ॥
निर्यान्तो वाऽभियान्तो वा नरमुख्या यथापुरम् ।

यानैः—शिबिकादिभिः । निर्यान्तः—निर्गच्छन्तः । अभियान्तः—प्रविशन्तः ॥ २३ ॥

उद्यानानि पुरा भान्ति मत्तप्रमुदितानि च ॥ २४ ॥
जनानां रतिसंयोगेष्वत्यन्तगुणवन्ति च ।

मत्तप्रमुदितानीति । मत्तप्रमुदितभृङ्गकोकिलादिपक्षिमन्ति तथा, मिथुनवन्तीत्यप्यर्थः ॥ २४ ॥

तान्येतान्यद्य पश्यामि निरानन्दानि सर्वशः ॥ २५ ॥
† स्रस्तपर्णैरनुपथं विक्रोशद्भिरिव द्रुमैः ।

---

* भरतेन अरुणोदयकाल एव नगरप्रवेशात् (१६ श्लो.) एवं व्याख्यानम् ।

† द्रुमाणां जलसेचनाद्यभावात् नगरशोधनाद्यकरणात् स्रस्तपर्णत्वम् । अथ वा 'अपि वृक्षाः परिम्लानाः सपुष्पाङ्कुरकोरकाः' इति रामप्रवासे वृक्षाणामपि दुःखात् स्रस्तपर्णत्वम् । पर्णानां स्रंसनेन ते रुदन्तीव चासन् ॥

[1] ममान्यथा—ङ.

नाद्यापि श्रूयते शब्दः मत्तानां मृगपक्षिणाम् ॥ २६ ॥
संरक्तां मधुरां वाणीं कलं व्याहरतां [1] बहु ।
चन्दनागरु[2] संपृक्तः धूपसंमूर्छितोऽतुलः ॥ २७ ॥
प्रवाति पवनः श्रीमान् किन्नु नाद्य यथापुरम्!

संमूर्छितः—व्याप्तः ॥ २७ ॥

भेरीमृदङ्गवीणानां कोणसङ्घट्टितः पुनः ॥ २८ ॥
किमद्य शब्दो विरतः * सदा [3] दीनगतिः पुरा!

कोणसङ्घट्टितः—सङ्घटित इति यावत्। भेर्यादिवादनदण्डः—कोणः। विरतः—उपरतः। अत एव—सदा दीनगतिः। पुरा—पुरस्तात्, अनुभूयत इति शेषः ॥ २८ ॥

अनिष्टानि च † पापानि पश्यामि विविधानि च ॥ २९ ॥
निमित्तान्यमनोज्ञानि तेन सीदति मे मनः।

अनिष्टानि—अनिष्टसूचकानि। पापानि—अशुभसूचकानि। अमनोज्ञानि—दर्शनमात्रेण दुःखकराणि ॥ २९ ॥

सर्वथा कुशलं, ‡ सूत! दुर्लभं मम बन्धुषु ॥ ३० ॥
तथा ह्यसति सम्मोहे हृदयं सीदतीव मे।

असत्यपि सम्मोहे—तत्कारणे ॥ ३० ॥

---

* पुरा अदीनगतिः शब्दः अद्य पुनः किमर्थं विरतः—गो. † पापानि—क्रूराणि—गो. ‡ एवं भरते बहु व्याहरत्यपि सूतः कुतः प्रतिवचनं न ददातीत्याशङ्क्य—त्वरया गच्छता भरतेनोपर्युपरि नूतनदृश्यानामपि त्वरया कथयितव्यत्वात् मध्ये सूतप्रतिवचनस्य नावसरः—इति केचित् समादधते। परन्तु राजगृहात् मातुलीयरथेनैव भरतागमनात् सारथिरपि मातुलदेशीयः, अत एव अपरिचितविषयः स्यादित्यपि स्मरणीयमत्र। ३३ श्लोके 'सूतमश्वपतेः' इति स्पष्टमेवोच्यते। दूतास्तु भरताह्वानायागताः, अश्वेनैवागच्छन् न तु रथेन ॥

[1] मुहुः—ङ. [2] संपृक्तः—ङ. च. [3] ऽदीनगतिः—ङ.

विषण्णः श्रान्तहृदयः त्रस्तः [1]स लुलितेन्द्रियः ॥ ३१ ॥
भरतः प्रविवेशाशु पुरीमिक्ष्वाकुपालिताम् ।

विषण्णः—दीनः । श्रान्तहृदयः—खिन्नचित्तः । लुलितं—क्षुभितम् ॥ ३१ ॥

*द्वारेण वैजयन्तेन प्राविशच्छ्रान्तवाहनः ॥ ३२ ॥
†द्वास्स्थैरुत्थाय विजयं पृष्टस्तैः सहितो ययौ ।

वैजयन्तेन—इन्द्रप्रासादतुल्यप्रासादवता द्वारेणोपलक्षिताम् । विजयं पृष्टः—कृतविजयप्रश्नः ॥ ३२ ॥

‡स त्वनेकाग्रहृदयः द्वास्स्थं प्रत्यर्च्य तं जनम् ॥ ३३ ॥
सूतमश्वपतेः क्लान्तं अब्रवीत्तत्र राघवः ।

अनेकाग्रहृदयः—अस्वस्थचित्तः । द्वास्स्थं जनं—दौवारिकं । प्रत्यर्च्य—सोपचारं निवर्त्य । अश्वपतेः—केकयस्य । तत्र—तदा ॥ ३३ ॥

किमहं त्वरयाऽऽनीतः [2]कारणानि विनाऽनघ ! ॥ ३४ ॥
अशुभाशङ्कि हृदयं शीलं च पततीव मे ।

आनीत इति । वसिष्ठप्रेरितामात्यैरिति शेषः । कारणानि विनेति । आह्वानकारणोक्तिं विनेत्यर्थः । अत एव मे हृदयं—अशुभाशङ्कि । शीलं—धैर्यादिस्वभावः । पतति—गलति ॥ ३४ ॥

---

* वैजयन्तेन—वैजयन्ताख्येन नगरपश्चिमद्वारेण—गो. राजगृहद्वाराणां प्रत्येकं नामनिर्देशः संप्रदायागतः । भरतस्य पश्चिमदिग्देशादागतत्वेन पश्चिमद्वारेणेत्युक्तम् ॥

† बहुवर्षानन्तरमागतत्वात्, संकटकाले आगतत्वात्, युवराजत्वाच्च द्वास्स्थैः एवं करणम् ॥

‡ एतेन जनसम्मर्दासहिष्णुत्वमुच्यते ।

[1] संकुलिते—ङ. [2] कारणेन—ङ.

श्रुतो नो यादृशः पूर्वं नृपतीनां विनाशने ॥ ३५ ॥
आकारांस्तानहं सर्वान् इह पश्यामि, सारथे !

श्रुता इति । कथास्विति शेषः ॥ ३५ ॥

सम्मार्जनविहीनानि परुषाण्युपलक्षये ॥ ३६ ॥
असंयतकवाटानि श्रीविहीनानि सर्वशः ।
बलिकर्मविहीनानि धूपसम्मोदनेन च ॥ ३७ ॥
*[1]अनासीनकुटुम्बानि प्रभाहीनजनानि च ।
अलक्ष्मीकानि पश्यामि कुटुम्बिभवनान्यहम् ॥ ३८ ॥

सम्मार्जनविहीनानीत्यादिकं कुटुम्बिभवनविशेषणम् । असंयतकवाटानि, अनासीनकुटुम्बानीति वक्ष्यमाणत्वात् द्वारसंयन्तारो न सन्ति । धूपसम्मोदनेन—परिमलेन च विहीनानीत्यनुकर्षः । प्रभाहीनेति । शोभाहीनेति यावत् । अलक्ष्मीकानीति, विचित्रध्वजतोरणाद्यभावात् ॥

अपेतमाल्यशोभान्यप्यसम्मृष्टाजिराणि च ।
देवागाराणि शून्यानि न चाभान्ति यथापुरम् ॥ ३९ ॥

अजिरं—'अङ्गणं चत्वराजिरे' ॥ ३९ ॥

देवतार्चाः [2]प्रविद्धाश्च [3]यज्ञगोष्ठ्यस्तथाविधाः ।
माल्यापणेषु राजन्ते नाद्य पण्यानि वा तथा ॥ ४० ॥

---

* अनाशितकुटुम्बानि—अभोजितकुटुम्बानि—गो.

[1] अनाशित—ङ. [2] प्रतिष्ठाश्च—प्रसिद्धाश्च—प्रवृद्धाश्च—ङ. [3] यज्ञगोष्ठा—ङ.

देवतार्चाः—देवताप्रतिमाः, 'अर्चा पूजाप्रतिमयोः' इति वैजयन्ती, प्रविद्धाः—निरस्तपूजनाः। तथा यज्ञगोष्ठ्यः—देवालयवर्तितत्तद्देवतायागशालाः प्रविद्धाः। माल्यापणाः—माल्यविक्रयापणाः ॥ ४० ॥

दृश्यन्ते वणिजोऽप्यद्य न यथापूर्वमत्र वै।
*ध्यानसंविग्नहृदयाः नष्टव्यापारयन्त्रिताः[1] ॥ ४१ ॥

अत्र—आपणे। नष्टव्यापाराः, अत एव यन्त्रिताः—सङ्कुचितापणाः, यत्रि सङ्कोचे, तस्मान्निष्ठा ॥ ४१ ॥

मलिनं चाश्रुपूर्णाक्षं दीनं ध्यानतरं कृशम्।
सस्त्रीपुंसं च पश्यामि जनमुत्कण्ठितं पुरे[2] ॥ ४२ ॥

मलिनं—मलिनत्वादिगुणकं, स्त्रीपुंसविशेषणम्। स्त्रीपुंसं, अच्प्रत्ययान्तो निपातः ॥ ४२ ॥

तां शून्यशृङ्गाटकवेश्मरथ्यां
　†रजोरुणद्वारकपाटयन्त्राम्।
‡दृष्ट्वा पुरीमिन्द्रपुरप्रकाशां
　दुःखेन संपूर्णतरो बभूव ॥ ४३ ॥

शृङ्गाटकं—चतुष्पथम्। रजोऽरुणानि—रजोधूसराणि द्वारकवाटानि, द्वारयन्त्राणि च तथा ॥ ४३ ॥

---

*चिन्ताऽऽसक्तहृदयाः, अत एव नष्टव्यापारयन्त्रिताः। †जनानां सर्वप्रवृत्त्यौदासीन्यादेवम्। ‡पूर्वं इन्द्रपुरीवत् प्रकाशां दृष्ट्वा स्थितः, इदानीं शून्यशृङ्गाटकादिविशेषणवतीं पुरीं दृष्ट्वा दुःखेन संपूर्णतरो बभूव।

[1] एतदनन्तरं—देवायतनचैत्येषु दीनाः पक्षिगणास्तथा—इत्यधिकं—ङ. झ.
[2] एतदनन्तरं—इत्येवमुक्त्वा भरतः सूतं तं दीनमानसः। तान्यरिष्टान्ययोध्यायां प्रेक्ष्य राजगृहं ययौ—इत्यधिकं—ङ. झ.

बहूनि पश्यन् मनसोऽप्रियाणि
यान्यन्यदा नास्य पुरे बभूवुः ।
अवाक्छिरा दीनमना *नहृष्टः
पितुर्महात्मा प्रविवेश वेश्म ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकसप्ततितमः सर्गः

यान्यन्यदेति । राजसुखजीवन इत्यर्थः । अस्य पुर इति । राज्ञः पुर इत्यर्थः । भाव(४४)मानः सर्गः ॥ ४४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकसप्ततितमः सर्गः

द्विसप्ततितमः सर्गः

[कैकेयीदर्शनम्]

अपश्यंस्तु ततस्तत्र पितरं पितुरालये ।
जगाम भरतो द्रष्टुं मातरं मातुरालये ॥ १ ॥

अथ राजगृहप्रविष्टेन भरतेन मातृमुखात् सर्ववृत्तान्तश्रवणम् । अपश्यन्नित्यादि ॥ १ ॥

अनुप्राप्तं तु तं दृष्ट्वा कैकेयी प्रोषितं सुतम् ।
उत्पपात तदा हृष्टा त्यक्त्वा सौवर्णमासनम् ॥ २ ॥
स प्रविश्यैव धर्मात्मा स्वगृहं श्रीविवर्जितम् ।
भरतः प्रतिजग्राह जनन्याश्चरणौ शुभौ ॥ ३ ॥

स्वगृहमिति । †मातृगृहमिति यावत् ॥ ३ ॥

---

* नञ्समानार्थकमव्ययमिदम् ॥ † 'मातरं मातुरालये' इत्यनुपदमेवोक्तत्वात् । भरतस्य तत्रैव संवर्धितत्वात् स्वगृहमित्युक्तम् ।

सा तं मूर्धन्युपाघ्राय परिष्वज्य यशस्विनम् ।
अङ्के भरतमारोप्य प्रष्टुं समुपचक्रमे ॥ ४ ॥
अद्य ते कतिचिद्रात्र्यः च्युतस्यार्यकवेश्मनः ।
अपि नाध्वश्रमः शीघ्रं रथेनापततस्तव ॥ ५ ॥

आर्यकवेश्मनः—मातामहवेश्मनः प्राप्तस्वगृहस्य ते, याः कतिचित् रात्र्यस्तु च्युताः–गताः मार्गे, तामेव वक्तुमर्हसीत्यग्रेण सम्बन्धः । अथ रथेन शीघ्रमापततो योऽपि वाऽध्वश्रमः, तं मे ब्रूहि॥

आर्यकस्ते सुकुशली युधाजिन्मातुलस्तव ?
प्रवासाच्च सुखं, पुत्र ! सर्वं मे वक्तुमर्हसि ॥ ६ ॥

आर्यकः–मातामहः कुशली वा ? न वा ? तथा तव मातुलो युधाजिच्च कुशली ? न वा ? तथा इतः प्रवासादारभ्य मातुलगृहे सुखमस्ति ? न वा ? इत्येतत्सर्वं वक्तुमर्हसि ॥ ६ ॥

एवं पृष्टस्तु कैकेय्या प्रियं पार्थिवनन्दनः ।
[1]आचष्ट भरतस्सर्वं मात्रे राजीवलोचनः ॥ ७ ॥
*अद्य मे सप्तमी रात्रिः च्युतस्यार्यकवेश्मनः ।
अम्बायाः कुशली तातः युधाजिन्मातुलश्च मे ॥ ८ ॥
यन्मे धनं च रत्नं च ददौ राजा परंतपः ।
†परिश्रान्तं पथ्यभवत् ततोऽहं पूर्वमागतः ॥ ९ ॥

---

* अद्य रात्रिः–अस्मादह्नः पूर्वरात्रिः सप्तमी ; अतः ‘सप्तरात्रोषितः पथि’ इत्यनेन न विरोधः–गो. वस्तुतस्तु—लोकरीत्या—अद्य सप्तमी रात्रिः अतीतेत्येवार्थः । ‘अरुणोदये’ (७१-१६) इति प्रातरेव नगरप्रवेशस्योक्तत्वात् । † परिश्रान्तं–परिश्रान्तवाहनम्–गो.

[1] आचष्टे–ङ.

धनं—प्रागुक्ताश्वादिरूपम् । राजा—मातामहो मातुलश्च । तत्सर्वं पथि परिश्रान्तमभवत् । अतस्तत्सर्वं शनैरागमनाय नियुज्याहं पूर्वमागतः ॥ ९ ॥

राजवाक्यहरैर्दूतैः त्वर्यमाणोऽहमागतः ।
यदहं प्रष्टुमिच्छामि तदम्बा[1] वक्तुमर्हति ॥ १० ॥
शून्योऽयं शयनीयस्ते पर्यङ्को हेमभूषितः ।
न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मा ॥ ११ ॥

शून्य इति । पितृशून्य इति यावत् ॥ ११ ॥

*राजा भवति भूयिष्ठं इहाम्बाया निवेशने ।
तमहं नाद्य पश्यामि द्रष्टुमिच्छन्निहागतः ॥ १२ ॥

द्रष्टुमिच्छन्निहागत इति, प्रायेणेह तस्यावस्थानात् ॥ १२ ॥

पितुर्ग्रहीष्ये चरणौ तं ममाख्याहि पृच्छतः ।
आहो स्वित्, अम्ब! ज्येष्ठायाः कौसल्याया निवेशने ॥
तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम् ।
अजानन्तं प्रजानन्ती राज्यलोभेन मोहिता ॥ १४ ॥

अजानन्तमिति । राजवृत्तान्तमिति शेषः । प्रियवत्प्रजानन्तीति योजना । तत्र हेतुः—राज्यलोभेन मोहितेति ॥ १४ ॥

---

* दशरथस्य बहुपत्नीत्वात् 'शून्योऽयं शयनीयः' इति प्रश्नः कथमिति शङ्कायामाह—राजेति ।

[1] वक्तुमर्हसि—ङ.

* या गतिः सर्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः †[1]सतांगतिः ॥ १५ ॥
तच्छ्रुत्वा भरतो वाक्यं धर्माभिजनवान् शुचिः ।
पपात सहसा भूमौ पितृशोकबलार्दितः ॥ १६ ॥
हा हतोऽस्मीति [2]कृपणां दीनां वाचमुदीरयन् ।
निपपात महाबाहुः बाहू विक्षिप्य वीर्यवान् ॥ १७ ॥
ततः शोकेन [3]संवीतः पितुर्मरणदुःखितः ।
विललाप महातेजाः भ्रान्ताकुलितचेतनः ॥ १८ ॥

शोकेन संवीतः—आवृतचित्तः । भ्रान्ता—अनवस्थिता आकुलिता—खिन्ना चेतना यस्य स तथा ॥ १८ ॥

एतत्सुरुचिरं भाति पितुर्मे शयनं पुरा ।
शशिनेवामलं रात्रौ गगनं तोयदात्यये ॥ १९ ॥
तदिदं न विभात्यद्य विहीनं तेन धीमता ।
व्योमेव शशिना हीनं [4]अप्शुष्कमिव सागरम् ॥ २० ॥

विललापेत्युक्तं ; तदेव प्रदर्श्यते—एतदित्यादि । पुरा भाति स्म, तदिदमिति योजना । अप्शुष्कं—आपः शुष्का यस्मिन् कालेऽग्न्यादिना तत्तथा । सागरमिति । सागरस्वरूपमित्यर्थः ॥ २० ॥

---

* अतिबाला कैकेयी स्वस्य वैधव्यं सदा प्रतीक्षितवती यतः, यतश्च स्वपुत्रराज्याभिषेकवचनपूर्वकमेव दशरथं परिणीतवती, अतः दशरथमरणं तस्या न तावद्दुस्सहमासीत् । अतः तद्वृत्तान्तं साधारणदृष्ट्या वदति । † सतांगतिरिति बहुव्रीहिः ।

[1] सतां पतिः—ङ.　[2] कृपणं—ङ.　[3] संविग्नः—ङ.　[4] उच्छुष्क—ङ.

बाष्पमुत्सृज्य कण्ठेन *[2] स्वार्तः परमपीडितः ।
प्रच्छाद्य वदनं श्रीमद् वस्त्रेण जयतांवरः ॥ २१ ॥

बाष्पः—दुःखोष्मा । श्रीमत् वदनमाच्छाद्य—भूमौ पतित्वा विललापेति शेषः, अनुकर्षो वा ॥ २१ ॥

तमार्तं देवसङ्काशं समीक्ष्य पतितं भुवि ।
निकृत्तमिव सालस्य स्कन्धं परशुना वने ॥ २२ ॥

सालः—वृक्षः, तद्विशेषो वा ॥ २२ ॥

मत्तमातङ्गसङ्काशं चन्द्रार्कसदृशं सुतम् ।
उत्थापयित्वा शोकार्तं वचनं चेदमब्रवीत् ॥ २३ ॥
उत्तिष्ठोत्तिष्ठ किं शेषे, [3] राजन् ! † अत्र महायशः !
त्वद्विधा न हि शोचन्ति सन्तः सदसि सम्मताः ॥२४॥

सदसि सम्मताः—सभ्या इति यावत् ॥ २४ ॥

‡ दानयज्ञाधिकारा हि शीलश्रुति[4]मनोऽनुगा ।
बुद्धिस्ते, बुद्धिसंपन्न ! § प्रभेवार्कस्य [5] मन्दिरे ॥ २५ ॥

दानयज्ञाधिकारेत्यत्र हेतुः—शीलेत्यादि । शीलं—सद्वृत्तं, श्रुतिः—श्रुतं—विद्या, तदुभयपरिशीलनविषयकं यन्मनः, तदनुगा

---

* स्वार्तः—सुतरामार्तः, अभवदिति शेषः—गो. कण्ठेन—कण्ठस्वरेण बाष्पमुत्सृजन् मुखं प्रच्छाद्य मुक्तकण्ठं—विललापेत्याकर्षः । † अत्र—भूमौ । ‡ दानयज्ञादौ अधिक्रियतेऽनयेति दानयज्ञाधिकारा—गो. दानयज्ञार्थमेव भगवता दत्तेति यावत् । § सूर्यप्रभा यथा स्वस्थाने निश्चला भवति तथा ते बुद्धिः निश्चला भातीत्यर्थः । मन्दर इति पाठे (ती.)—अत्युन्नतमन्दरपर्वते अर्कप्रभायाः पर्वतान्तरापेक्षया चिरकालावस्थानात्—गो.

[1] भरतो बाष्पमुत्सृज्य—ङ. [2] स्वात्मना परिपीडितः—ङ. [3] राजपुत्र—ङ.
[4] वचोऽनुगा, तपोऽनुगा—ङ. च. [5] मन्दरे, मण्डले—ङ.

तथा । बुद्धिः—अध्यवसायात्मिका । अर्कस्य मन्दिरे—सूर्यलोकवर्तिसूर्यगृहे । एवमादौ विपरीतपाठं *परः कल्पयति—'मन्दरे' इत्यादिरूपम् । व्याख्याति चासङ्गतमेव च । किं कुर्मः ! ॥ २५ ॥

स रुदित्वा चिरं कालं भूमौ विपरिवृत्त्य च ।
जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः ॥ २६ ॥
अभिषेक्ष्यति रामं नु[1] राजा †यज्ञं नु यक्ष्यते ।
इत्यहं कृतसंकल्पः हृष्टो यात्रा[2]मयासिषम् ॥ २७ ॥
तदिदं ह्यन्यथाभूतं व्यवदीर्णं मनो मम ।
पितरं यो न पश्यामि नित्यं प्रियहिते रतम् ॥ २८ ॥

अन्यथाभूतमिति । चिन्तितं शुभं विपरीतमभूदित्यर्थः ॥

अम्ब ! केनात्यगाद्राजा व्याधिना ‡मय्यनागते ।
धन्या रामादयः सर्वे यैः पिता संस्कृतः स्वयम् ॥ २९ ॥

अथ रामेण राज्ञ और्ध्वदेहिकं कृतमिति मन्वान आह—धन्या इत्यादि ॥ २९ ॥

न नूनं मां महाराजः प्राप्तं जानाति कीर्तिमान् ।
उपजिघ्रेद्धि मां मूर्ध्नि तातः संनम्य सत्वरम् ॥ ३० ॥

प्राप्तमिति । देशान्तरात्, वृत्तत्वादिति च शेषः । संनम्येति । मूर्धानमिति शेषः § ॥ ३० ॥

---

* महेश्वरतीर्थः । व्याख्या च गोविन्दराजानूदितैव । † यज्ञं यक्ष्यते, यात्रामयासिषमित्यादि—कार्यं करोतीतिवत् व्यपदेशः । ‡ मदागमनाभ्यन्तर एव कीदृशेन तीव्रेण व्याधिनाऽत्यगात् । दशरथस्य व्याधिग्रस्तत्वादेव स्वयमाहूत इति भावयन् एवं पृच्छतीति भाति । § भरतापेक्षया पितुर्दशरथस्य औन्नत्यौचित्यात् स्वयं आनम्येति वाऽर्थः ।

[1] रामो यज्ञेन यक्ष्यते—ङ. [2] मयाचिषम्—ङ.

क्व स पाणिः सुखस्पर्शः तातस्याक्लिष्टकर्मणः ।
येन मां रजसा ध्वस्तं अभीक्ष्णं परिमार्जति ॥ ३१ ॥
यो मे [1]भ्राता पिता बन्धुः यस्य दासोऽस्मि धीमतः ।
तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्टकर्मणः ॥ ३२ ॥

मामाख्याहीति । आगतमिति शेषः ॥ ३२ ॥

पिता हि भवति [2]ज्येष्ठो * धर्ममार्यस्य जानतः ।
तस्य पादौ गृहीष्यामि स हीदानीं गतिर्मम ॥ ३३ ॥
धर्मविद्धर्मनित्यश्च सत्यसन्धो दृढव्रतः ।
[3]आर्ये! किमब्रवीद्राजा पिता मे सत्यविक्रमः[4] ॥ ३४ ॥

आर्ये इति सम्बुद्धिः ॥ ३४ ॥

पश्चिमं साधु सन्देशमिच्छामि श्रोतु†मात्मनः ।
इति पृष्टा यथातत्त्वं कैकेयी वाक्यमब्रवीत् ॥ ३५ ॥

पश्चिमं सन्देशमिति । चरमकालीनमिति यावत् ॥ ३५ ॥

‡ रामेति राजा विलपन्, हा सीते! लक्ष्मणेति च ।
स महात्मा परं लोकं गतो [5]गतिमतां वरः ॥ ३६ ॥

---

* आर्यस्य धर्मं जानतः, यद्वा, धर्मं जानतः आर्यस्य । † आत्मनः–मह्यमिति यावत् । ‡ एवं पृष्टवन्तं भरतं प्रति, 'त्वां राजा न स्मृतवान्, किं तु राममेव स्मरन् स्वर्गमगात्' इति पितृविषयस्नेहनिवर्तनाभिप्रायेणाह–रामेत्यादिना–गो. 'मह्यं राज्ञः सन्देशं श्रोतुमिच्छामि' इति खलु भरतः पप्रच्छ। अतश्च दशरथस्य त्वत्स्मरणमेव कुतः-इत्युपालंभगर्भेयमुक्तिरिति भावः। किञ्च पूर्वं 'शीघ्रमाख्याहि रामस्य' इति भरतोक्त्या–त्वद्दायादः स तु गत एवेति सूचनार्थं चेयमुक्तिः । अत एव 'प्रियशङ्कया' (४१) इति वक्ष्यते ।

[1] भ्राता–ङ. [2] श्रेष्ठः–ङ. [3] आर्यः–ङ. [4] एतदनन्तरं—गुरुरेकः प्रजानां तु पिता मे सत्यविक्रमः–इत्यधिकं–ङ. [5] मतिमतां–ङ.

इति विलपन् गत इति । न कं प्रति किञ्चिदपि साधुसन्देशमवोचदित्यर्थः ॥ ३६ ॥

*[1]इमां तु पश्चिमां वाचं व्याजहार पिता तव ।
कालधर्मपरिक्षिप्तः पाशैरिव महागजः ॥ ३७ ॥

इमां तु पश्चिमां वाचमिति । प्रागुक्तविलापरूपामित्यर्थः ॥३७॥

सिद्धार्थास्ते नरा रामं आगतं सीतया सह ।
लक्ष्मणं च महाबाहुं द्रक्ष्यन्ति पुनरागतम् ॥ ३८ ॥

अन्यदपि किञ्चित् विलापवचनं चरमकाले? इत्यत्राह—सिद्धार्था इत्यादि ॥ ३८ ॥

तच्छ्रुत्वा विषसादैव † द्वितीयाप्रियशंसनात् ।
विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम् ॥ ३९ ॥
क्व चेदानीं स धर्मात्मा कौसल्यानन्दवर्धनः ।
लक्ष्मणेन सह भ्रात्रा सीतया च [2]समं गतः ॥ ४० ॥

क्व चेदानीं गत इति योजना ॥ ४० ॥

तथा पृष्टा यथातत्त्वं आख्यातुमुपचक्रमे ।
माताऽस्य ‡ युगपद्वाक्यं विप्रियं प्रियशङ्कया ॥ ४१ ॥

---

* इमामित्यादिश्लोकद्वयमेकान्वयम्–गो. † यद्यप्यद्य भरतेन रामप्रव्राजनं नावगतम् । 'अत एव क्व गतः' इति प्रक्ष्यति । अथापि रामानुपस्थितिरूपं, तत्रापि 'द्रक्ष्यन्ति पुनरागतम्' इत्यादिवचनात् चिरप्रोषितत्वप्रतीत्या अप्रियत्वं विवक्षितम् । ‡ युगपत्–राजमरणकथनसमकालमेव–गो. ती. ति. वस्तुतः–वक्ष्यमाणस्य विषयस्याति दारुणत्वेन कथनकाले सङ्कोचादिना वाच एवाप्रवृत्त्या विलम्ब्य विलम्ब्योच्चारणीयाक्षरत्वस्य न्याय्यत्वे हठात् सर्वमेकदैव विनैव सङ्कोचं निरोधं च उक्तवतीत्यर्थः ॥

[1] इतीमां–ङ. [2] समागतः–च.

स हि राजसुतः, पुत्र! चीरवासा महावनम्।
दण्डकान् सह वैदेह्या लक्ष्मणानुचरो गतः ॥ ४२ ॥
तच्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशङ्कया।
*स्वस्य वंशस्य माहात्म्यात् प्रष्टुं समुपचक्रमे ॥ ४३ ॥

त्रस्त इति। रामस्य पितृविवासनसाधनं किमन्याय्यमभूदिति भीतवान् ॥ ४३ ॥

†कच्चिन्न ब्राह्मणधनं हृतं रामेण कस्यचित्।
कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥ ४४ ॥
कच्चिन्न परदारान् वा राजपुत्रोऽभिमन्यते।
कस्मात्स दण्डकारण्ये [1]भ्रूणहेव विवासितः ॥ ४५ ॥

तदेव कारणं पृच्छति—कच्चिदित्यादि। अपापः—निरपराधः ॥

अथास्य चपला माता तत्स्वकर्म यथातथम्।
‡तेनैव स्त्रीस्वभावेन व्याहर्तुमुपचक्रमे ॥ ४६ ॥

तेनैव स्त्रीस्वभावेनेति। धर्माधर्महिताहितोचितानुचितविवेकशून्यतालक्षणेनेत्यर्थः ॥ ४६ ॥

---

* अधर्मिष्ठपुत्रस्यापि त्यागः असमञ्जवृत्तान्तादाववगतः। अतः चीरवासा इत्यादिकथनात् त्रस्तोऽभूत्। अत एव प्रक्ष्यति 'कस्मात्' (४५) इत्यादि ॥ † रामे तादृशपापप्रसक्तेरप्यभावं जानता भरतेन प्रसक्तिपुरस्सरनिषेधगर्भमिदं वचनं कथं घटत इति चेत्—कच्चित्पदं यदि किंपदसमानार्थकं, तदाऽयं आक्षेपः। कच्चिदिति इष्टप्रश्नार्थकम्। अत एव रामे तादृशदोषाणामनिष्टत्वसूचनाय नञा सह प्रश्नः। पुनरपि 'कस्मात् भ्रूणहेव विवासितः' इति प्रश्नोऽप्यत एव। अत्र कस्यचित् ब्राह्मणस्य धनमित्यन्वयः। ‡ स्वकर्मेति पूर्वार्धे उक्तत्वात्, येन स्त्रीस्वभावेन तत् कर्म चक्रे, तेनैव व्याहर्तुमप्युपक्रमे इत्यर्थः।

[1] भ्राता रामो—क.

*एवमुक्ता तु कैकेयी भरतेन महात्मना ।
उवाच वचनं हृष्टा [1]मूढा पण्डितमानिनी ॥ ४७ ॥
न ब्राह्मणधनं किञ्चित् हृतं रामेण कस्यचित् ।
कश्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥ ४८ ॥
न रामः परदारांश्च चक्षुर्भ्यामपि पश्यति ।
मया तु, पुत्र! श्रुत्वैव रामस्येहाभिषेचनम् ॥ ४९ ॥
†याचितस्ते पिता राज्यं रामस्य च विवासनम् ॥५० ॥

इहेति । राज्य इत्यर्थः ॥ ५० ॥

स ‡स्ववृत्तिं समास्थाय पिता ते तत्तथाऽकरोत् ।
रामश्च सहसौमित्रिः [2]प्रेषितः सीतया सह ॥ ५१ ॥

स्ववृत्तिं—स्वसत्यस्थितिलक्षणां वृत्तिम् । तथाऽकरोदिति । तुभ्यं राज्यं दत्तवानित्यर्थः ॥ ५१ ॥

तमपश्यन् प्रियं पुत्रं महीपालो महायशाः ।
पुत्रशोकपरिद्यूनः पञ्चत्वमुपपेदिवान् ॥ ५२ ॥

परिद्यूनः—क्षीणः, बहुश उक्तप्रक्रियः ॥ ५२ ॥

त्वया त्विदानीं, धर्मज्ञ! राजत्वमवलम्ब्यताम् ।
त्वत्कृते हि मया सर्वं इदमेवंविधं कृतम् ॥ ५३ ॥
मा शोकं, मा च सन्तापं, धैर्यमाश्रय, पुत्रक!
त्वदधीना हि नगरी राज्यं चैतदनामयम् ॥ ५४ ॥

---

* अयं श्लोकः पूर्वानुवादार्थः—गो. † 'ते' इति—ते राज्यं, ते पिता याचित इत्युभयत्राप्यन्वेति । ‡ प्रतिज्ञोल्लङ्घनाशक्तिरूपां स्ववृत्तिम् ।

[1] वृथा—ङ. [2] प्रोषितः—ङ.

तत्, पुत्र ! शीघ्रं विधिना विधिज्ञैः
वसिष्ठमुख्यैः सहितो [1]द्विजेन्द्रैः ।
[2]संकाल्य राजानमदीनसत्त्वं
आत्मानमुर्व्यामभिषेचयस्व ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे द्विसप्ततितमः सर्गः

संकाल्येति । प्रेतनिर्हारं कृत्वेत्यर्थः । शम(५५)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे द्विसप्ततितमः सर्गः

त्रिसप्ततितमः सर्गः

[भरतसन्तापः]

[3]श्रुत्वा तु पितरं वृत्तं भ्रातरौ च विवासितौ ।
भरतो दुःखसन्तप्तः इदं वचनमब्रवीत् ॥ १ ॥

---

[1] मुनीन्द्रैः–ङ. [2] संस्कार्य, संकल्प्य–ङ. [3] एतत्पूर्वं—
"कैकेय्याप्येवमुक्तस्तु भरतो राघवानुजः । कर्णौ कराभ्यां प्रच्छाद्य पपात धरणीतले ॥
हा राम रामेति तदा विलप्य करुणं बहु । मुहूर्तमिव निस्संज्ञः संज्ञावानिदमब्रवीत ॥
हतोऽस्मि राजा निहतः हतो लोकश्च दुर्मते । किमिदं शिक्षितं केन कस्य कार्यं त्वया कृतम् ॥
राजानं प्रेतभावस्थं कृत्वा रामं च तापसम् । राज्यमत्र फलं भोक्तुं अनुतिष्ठसि दुर्मते ॥
रामप्रस्थापितायाश्च पतिघ्नयाश्च तवोदरे । दश मासा मया नीताः हा लोके निन्दितो ह्यहम ॥
कण्ठेऽवसज्य वा पाशं विषं पीत्वाऽथ वा शठे । त्यज प्राणांश्च दुर्मेधे जलमग्निं प्रविश्य वा ॥
त्वामद्य निहनिष्यामि नो चेद्रामस्य दुर्यशः । राघवस्यानुजो भ्राता भरतो मातृहा इति ॥
एवं परुषमुक्त्वा तु निर्दहन्निव चक्षुषा । निरीक्षमाणे भरते कैकेयी वाक्यमब्रवीत ॥
किं मयाऽपकृतं तेऽद्य गर्हसे मां मुहुर्मुहुः । प्रसूय वर्धयित्वा त्वां पदस्थं द्रष्टुमिच्छती ॥
पिता ते स्वर्गतो राजा भ्रातरौ च विवासितौ । बहुना किं प्रलापेन कुरु राज्यं यथासुखम् ॥"
एवमधिकं–झ.

एवं सर्वानर्थमपि कैकेयीमूलमिति तन्मुखादेव निस्संशयं श्रुत्वा तामनेकप्रकारत उपलभते। श्रुत्वेत्यादि। वृत्तं–अतीतम् ॥ १॥

किं नु! कार्यं *हतस्येह मम राज्येन शोचतः।
विहीनस्याथ पित्रा च भ्रात्रा पितृसमेन च ॥ २॥

हतस्येति। त्वयाऽपारदुःखनाशितस्येत्यर्थः ॥ २॥

दुःखे मे दुःखमकरोः व्रणे †क्षारमिवादधाः।
राजानं प्रेतभावस्थं कृत्वा रामं च तापसम् ॥ ३॥

मे दुःखे पुनर्दुःखमकरोः। तत्र दृष्टान्तः—व्रणे क्षारमिवेति। खरमूत्रसहितचूर्णं अदधा इव–दत्तवतीव ॥ ३॥

कुलस्य त्वमभावाय कालरात्रिरिवागता।
अङ्गारमुपगूह्य स्म पिता मे नावबुद्धवान् ॥ ४॥

रात्रिः–संहाररात्रिः। उपगूह्य–आलिङ्ग्य। नावबुद्धवानिति। सुखमिति भ्रान्तोऽभूदित्यर्थः ॥ ४॥

मृत्युमापादितो राजा त्वया ‡मे, पापदर्शिनि!
सुखं परिहृतं मोहात् कुलेऽस्मिन्, कुलपांसिनि! ॥ ५॥
त्वां प्राप्य हि पिता मेऽद्य सत्यसन्धो महायशाः।
तीव्रदुःखाभिसंतप्तः [1]वृत्तो दशरथो नृपः ॥ ६॥

---

* स्वदौर्भाग्यावेदनाय लोकोक्तिरियं 'हतस्य' इति। शोचतो ममेत्यन्वयः।
† क्षारं–लवणकट्वन्यतररसं जलादि। ‡ मे–मन्निमित्तम्।

[1] वृद्धो–ङ.

विनाशितो महाराजः पिता मे धर्मवत्सलः ।
***कस्मात् प्रव्राजितो रामः कस्मादेव वनं गतः ? ॥ ७ ॥**

कस्मादिति । निर्हेतुतः, निष्प्रयोजनत एव चेत्यर्थः ॥ ७ ॥

कौसल्या च सुमित्रा च पुत्रशोकाभिपीडिते ।
दुष्करं यदि जीवेतां †प्राप्य त्वां जननीं मम ॥ ८ ॥

न केवलं पितृभ्रातृपीडा, अपि तु मात्रोरपीत्याह—कौसल्येत्यादि । मम जननीं त्वां मृत्युहेतुं प्राप्य यदि जीवेतां, तदपि दुष्करं—दुर्लभमेव । एवं च तयोः मृतिः, मुमूर्षा वेति न जान इत्यर्थः ॥ ८ ॥

ननु त्वार्योऽपि धर्मात्मा त्वयि [1] वृत्तिमनुत्तमाम् ।
वर्तते गुरुवृत्तिज्ञः ‡यथा मातरि वर्तते ॥ ९ ॥

'कस्मात् प्रव्राजितः ?' इति प्रागुक्तं प्रव्राजनकारणमेव प्रतिपाद्यते—ननु त्वित्यादि । गुरुषु—मातापित्रादिषु वर्तनीयां वृत्तिं जानातीति तथा ॥ ९ ॥

[2] यथा ज्येष्ठा हि मे माता कौसल्या §दीर्घदर्शिनी ।
त्वयि धर्मं समास्थाय भगिन्यामिव वर्तते ॥ १० ॥

अथ राममात्राऽपि न कश्चिदपराधस्त्वयि कृत इत्याह—यथेत्यादि । यथा भगिन्यां तथा त्वयि वर्तते पतिचित्तानुवर्तनरूपं धर्मं समास्थाय ॥ १० ॥

---

* इयमपि लोकोक्तिः । सर्वं विफलमिति भावः । † इयमपि लोकोक्तिः ।
‡ यथा मातरि-कौसल्यायां वर्तते, तथैव त्वयि उत्तमां वृत्तिं वर्तते—अनुतिष्ठति ।
§ पतिवाल्लभ्यात् भवत्या अनर्थो भविष्यतीति तर्कयन्ती ।

[1] वृत्तमनुत्तमम्—ङ. [2] तथा—ङ.

तस्याः पुत्रं [1] कृतात्मानं चीरवल्कलवाससम् ।
प्रस्थाप्य वनवासाय कथं, पापे! न शोचसि ? ॥ ११ ॥

चीरपर्यायं वल्कलं—वासः यस्य स तथा ॥ ११ ॥

अपाप[2]दर्शनं शूरं [3]कृतात्मानं यशस्विनम् ।
* प्रव्राज्य चीरवसनं किन्नु पश्यसि कारणम् ? ॥ १२ ॥

प्रव्राज्येति । किन्नु कारणं दृष्ट्वा चीरवसनं रामं प्रव्राज्य, ततश्च किं फलं पश्यसि ? ॥ १२ ॥

† लुब्धाया विदितो मन्ये न तेऽहं राघवं [4] प्रति ।
तथा ह्यनर्थो राज्यार्थं त्वयाऽऽनीतो महानयम् ॥ १३ ॥

लुब्धायास्ते—लुब्धया त्वया अहं राघवं—रामं प्रति किंभाव इति न विदित इति मन्ये । तथा हि—तस्मादेव हि मम राज्यार्थं महानयमनर्थः—पितृनाशराज्यार्हज्येष्ठविवासनादिरूपः आनीतः—संपादितः ॥

अहं हि पुरुषव्याघ्रौ अपश्यन् रामलक्ष्मणौ ।
केन शक्तिप्रभावेन राज्यं रक्षितुमुत्सहे ॥ १४ ॥

उक्तानर्थमात्रमेव त्वद्दुश्चेष्टाफलम्, न तु त्वन्मनीषितकरणमित्याह—अहं हीत्यादि । भ्रातृसंपत्तिरेव मे शक्तिः । ततश्च तदभावे कथमहं राज्यं रक्षितुमुत्सहे ? न कथमपीत्यर्थः ॥ १४ ॥

---

* तदानीमविमर्शात् कृतमिति चेत्, तत्प्रव्राजनानन्तरं वा प्रव्राजनकारणं कीदृशमिति किं विमृशसि—इति वा । † अहं राघवं प्रति यथा-यादृशप्रकारयुक्तः तथा लुब्धायास्ते न विदितः—गो. ती. ति.

[1] महात्मानं—ङ. [2] दर्शिनं—ङ. [3] महात्मानं—ङ. [4] यथा—ङ.

*तं हि नित्यं महाराजः बलवन्तं [1] महाबलः ।
[2] अपाश्रितोऽभूद्धर्मात्मा † मेरुर्मेरुवनं यथा ॥ १५ ॥

न केवलं ममैव रामशक्त्यपेक्षा, अपि तु पितुरपीत्याह—तं हीत्यादि । राजाऽपि महाबलः, रामोऽपि महाबलः, अथापि—मेरुवनं, कर्तृ, मेरुमिव पुरुषमहं रामं इहामुत्रार्थमपाश्रित इत्यर्थः ॥ १५ ॥

सोऽहं कथमिमं भारं महाधुर्य[3] समुद्यतम् ।
‡ दम्यो धुरमिवासाद्य [4] वहेयं केन [5] तेजसा ? ॥ १६ ॥

सोऽहमिति । ज्येष्ठरामैकबल इत्यर्थः । भारं-राज्यभारं अहमासाद्य महाधुर्यः-महाबलीवर्दः, धुरं वहतीति, 'धुरो यड्ढकौ' इति यत्, तेन समुद्यतं-धृतं राज्यभारं अहमासाद्य दम्यः-दमनीयः, 'पोरुपधात्' इति यत्, तरुणवत्सः धुरं-महाबलीवर्दात् धृतभारमिव केन तेजसा-बलेन वहेयम् ? न केनापि ॥ १६ ॥

अथ वा मे भवेच्छक्तिः § योगैर्बुद्धिबलेन वा ।
सकामां न करिष्यामि त्वामहं ‖ पुत्रगर्धिनीम् ॥ १७ ॥

तर्हि त्वं न राजपुत्रः षण्डकल्प इत्याशङ्कायामाह—अथ वेत्यादि । शक्तिः-राज्यभरणसामर्थ्यम् । 'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु', उक्तसर्वार्थकैङ्कर्ययोगैरुत्पन्नेन बुद्धिबलेन—बुद्धियुक्तमहाप्राणत्वलक्षणबलेन शक्तिर्यद्यपि भवेत्—संभावितैव ; अथापि

---

* अयोध्याकाण्डीयप्रथमद्वितीयसर्गयोरयमंशः सूचितः । † दुर्गेण वनेनावृतत्वादेव मेरोः दुर्गत्वं इति भावः । ‡ 'दम्यवत्सतरौ समौ' इति अमरः । § योगैः—साम-दानाद्युपायैः, बुद्धिबलेन—ग्रहणधारणाद्यष्टाङ्गयुक्तबुद्धिबलेन वा—गो. ती. ‖ धर्माधर्मादिकर्माविमृश्य केवलपुत्राभिमानवतीमिति भावः ।

[1] महौजसम्—ङ. [2] उपाश्रितो—ङ. [3] समुद्धृतम्—ङ. [4] सहेयं—ङ. [5] वौजसा—ङ.

पुत्रगर्विनीं—पुत्रप्रयोजनाभिलाषवतीं त्वां सकामां—संप्राप्तकामां न करिष्यामि—राज्याभिषेकं न करिष्यामि, कुलदूषणपरमकश्मलत्वादित्याशयः ॥ १७ ॥

न मे विकाङ्क्षा जायेत त्यक्तुं त्वां पापनिश्चयाम् ।
यदि रामस्य *नावेक्षा त्वयि स्यान्मातृवत्सदा ॥ १८ ॥

अपि च 'त्यजेदेकं कुलस्यार्थे' इतिन्यायेन ते सांप्रतं विवासनमेव कार्यम्, तदपि—त्वय्यपि रामस्य भगवतो मातृप्रतिपत्त्यपरिक्षयात् मया न शक्यते, रामचित्तस्य दूरं भविष्यामीति शङ्कयेत्याह—न म इति । रामस्य त्वयि मातृवत्—कौसल्यावत् त्वयि सदाऽवेक्षा—प्रतीक्षा—प्रतिपत्तिः यदि न स्यात्, तदा पापनिश्चयां त्वां परित्यक्तुं मे विकाङ्क्षा—इच्छाभावो नैव जायेतेति योजनार्थः ॥ १८ ॥

उत्पन्ना तु कथं बुद्धिः तवेयं, पापदर्शिनि !
साधुचारित्रविभ्रष्टे! पूर्वेषां नो विगर्हिता ॥ १९ ॥

इयं बुद्धिरिति । †कनिष्ठस्य मेऽभिषेकबुद्धिरित्यर्थः ॥ १९ ॥

अस्मिन् कुले हि [1]पूर्वेषां ज्येष्ठो राज्येऽभिषिच्यते ।
अपरे भ्रातरस्तस्मिन् ‡प्रवर्तन्ते समाहिताः ॥ २० ॥

विगर्हितत्वमेव दर्शयति—अस्मिन्नित्यादि । अस्मिन्—अस्मदीये कुले ज्येष्ठोऽभिषिच्यते, अपरे भ्रातरस्तस्मिन्—तत्कार्ये समाहिताः

---

* अवेक्षा—भक्तिपूर्वकेक्षणं—गो. ती. † ज्येष्ठविवासनपूर्वकमिति शेषः ।
‡ समाहिताः प्रवर्तन्ते—पितरीव तच्चित्तानुवर्तने सावधाना जीवन्तीत्यर्थः—गो. ज्येष्ठाधीना वर्तन्त इत्यर्थः—ती.

[1] सर्वेषां—ङ.

प्रवर्तन्त इति ह्येवं किल नः पूर्वेषामाचारः इति शेषः । स्मरति च मनुस्तथाऽऽचारं–'ज्येष्ठ एव तु गृह्णीयात् सकलं पैतृकं धनम् । अन्ये तमनुजीवेयुः यथैव पितरं तथा' इति ॥ २० ॥

*न हि मन्ये, नृशंसे! त्वं राजधर्ममवेक्षसे ।
गतिं वा न विजानासि राजवृत्तस्य शाश्वतीम् ॥ २१ ॥

न हीत्यादि । राजधर्मं—राजधर्मस्वरूपं नावेक्षसे–न जानीषे । तथा राजवृत्तस्य–राजधर्मस्य शाश्वतीं–अव्यभिचरितां गतिं–फलमपि न हि जानासीत्येव मन्ये ॥ २१ ॥

सततं [1]राजवृत्ते हि ज्येष्ठो राज्येऽभिषिच्यते ।
†राज्ञां [2]सर्वं समं तत्स्यात् ‡इक्ष्वाकूणां विशेषतः ॥

राज्ञां सर्वमिति । छान्दसी षष्ठ्यर्थे द्वितीया, सर्वेषामित्यर्थः । तत्–ज्येष्ठाभिषेचनम् ॥ २२ ॥

तेषां धर्मैकरक्षाणां कुलचारित्र[3]शोभिनाम् ।
[4]अत्र §चारित्र[5]शौण्डीर्यं त्वां प्राप्य विनिवर्तितम् ॥ २३ ॥

---

* राजधर्मं जानासीति न हि मन्ये । हीति निश्चये । इदं तु सिद्धमेव धर्मस्यातिसूक्ष्मत्वात् । अथापि वंशपरंपरयाऽनुष्ठीयमानां राजकुलाचाररीतिमपि वा न जानासि ? धर्मस्य दुर्ज्ञेयत्वेऽपि बाह्यः आचारोऽपि नावेक्षितः—इति वाऽर्थः ॥ † एतत् राज्ञां सर्वेषां समम् । इक्ष्वाकूणां तु तत्–ज्येष्ठाभिषेचनं विशेषतः स्यात्–गो. ‡ अस्खलिताचारत्वादिति भावः–गो. § चारित्रप्रयुक्तं शौण्डीर्यं-चित्तोन्नतिः । त्वां प्राप्य–त्वत्सम्बन्धादिति भावः–लोकोक्तिरियम् ।

[1] राजपुत्रेषु–ङ. [2] एतत्–ङ. [3] योगिनाम्–क. [4] अद्य–ङ. [5] शौटीर्य–च.

धर्मेणैकेनैव रक्षा—रक्षणं येषां ते तथा। कुलक्रमागतं चारित्रं तथा। चारित्रविषयकं शौण्डीर्यं—श्लाघ्यत्वं तथा ॥ २३ ॥

*** तवापि, [1] सुमहाभागे ! [2] जनेन्द्रकुलपूर्वके !**
बुद्धेर्मोहः कथमयं संभूतस्त्वयि गर्हितः ॥ २४ ॥

त्वयि चैवंविधं दुर्बुद्धिकारणं महावंशप्रसूतायां न पश्यामीत्याह—तवापीत्यादि। हे सुमहाभागे !, तदुपपादकं विशेषणं–जनेत्यादि। जनेन्द्रः—केकयकुलकूटस्थः—तत्कुलजः पूर्वकः—कारणं—पिता यस्याः सा तथा, तस्याः सम्बुद्धिः। अतो महाकुलप्रसूतायास्तवानुचितोऽपि विगर्हितोऽयं बुद्धिमोहः त्वयि कथं संभूतः ? ॥

न तु कामं करिष्यामि तवाहं, पापनिश्चये !
त्वया व्यसनमारब्धं जीवितान्तकरं मम ॥ २५ ॥

अस्तु यतः कुतश्चित्। त्वत्पापनिश्चयमहं नानुवर्तयामीत्याह—न तु काममित्यादि ॥ २५ ॥

एष त्विदानीमेवाहं अप्रियार्थे † तवानघम्।
निवर्तयिष्यामि वनात् भ्रातरं स्वजनप्रियम् ॥ २६ ॥

न केवलमिष्टाकरणम्, अनिष्टमपि तवानुष्ठास्यामीत्याह—एष त्विदानीमित्यादि। अप्रियार्थे—तत्संपादनार्थम् ॥ २६ ॥

---

* स्वकुलचरित्रक्रममभिधाय मातृकुलाचारक्रममप्याह—तवेति। जनेन्द्राः—राजानः कुलपूर्वगाः—कुलपूर्वाः—कुलज्येष्ठाः, तान् गच्छन्तीति कुलपूर्वगाः, ज्येष्ठाभिषेचनशीला इत्यर्थः—गो. ती.　　† तव अप्रियार्थमित्यन्वयः।

[1] सुमहाभागाः—ङ.　　[2] जनेन्द्राः कुलपूर्वगाः—ङ.

*निवर्तयित्वा रामं च तस्याहं दीप्ततेजसः ।
दासभूतो भविष्यामि सुस्थितेनान्तरात्मना ॥ २७ ॥

दासभूत इति । दासत्वं प्राप्त इत्यर्थः । मम राज्यस्वामित्वमीहितवत्यास्ते अनिष्टसंपादनार्थमेवेति शेषः । न केवलं त्वत्कोपमात्रादेवमाचरणम्, अपि तु परमार्थत एवेत्याह—सुस्थितेनेति । अभिषिक्तज्येष्ठानुवर्तनमेव परमं हितमिति सुप्रतिष्ठितेन चित्तेनेत्यर्थः ॥

इत्येवमुक्त्वा भरतो महात्मा
प्रियेतरैर्वाक्यगणैस्तुदंस्ताम् ।
शोकातुरश्चापि ननाद भूयः
†सिंहो यथा [1]पर्वतकन्दरस्थः ॥ २८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे त्रिसप्ततितमः सर्गः

हठ(२८)मानः सर्गः ॥ २८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे त्रिसप्ततितमः सर्गः

चतुस्सप्ततितमः सर्गः

[कैकेयीविगर्हणम्]

तां तथा गर्हयित्वा तु मातरं भरतस्तदा ।
रोषेण महताऽऽविष्टः पुनरेवाब्रवीद्वचः ॥ १ ॥

---

*न केवलनिवर्तनमात्रं, अपि तु भवदिष्टविपरीतमेव वर्तयिष्यामि चेत्याह—निवर्तयित्वेति । इदं च दास्यं हार्दमित्याह—सुस्थितेनेत्यादि । †गुहास्थत्वे सन्तोषातिशयाद सिंहस्य नादातिशय इत्यभिप्रायेणेद विशेषणम्—गो. अथ वा—निरावृतप्रदेशकृतगर्जनापेक्षया गुहायां गर्जनस्य दुस्सहत्वादितः—एवं विशेषणम् ।

[1] मन्दरकन्दर—ङ.

एवं सामान्यत उपालंभं कृत्वा इदानीं महापापोद्घाटनपूर्वं महता क्रोधेनाग्निप्रवेशादिकमेव कर्तव्यम्, नेह त्वया वस्तव्यमिति ब्रूते। तां तथेत्यादि ॥ १ ॥

राज्यात् भ्रंशस्व, कैकेयि! नृशंसे! दुष्टचारिणि!
परित्यक्ता च धर्मेण [1] मा मृतं रुदती भव ॥ २ ॥

राज्यात् भ्रंशस्वेति। 'वा भ्राश' इति पक्षे श्यन्, त्वं भ्रष्टा भव, *त्वन्मातृवत् त्वमपि वनं प्रविशेत्यर्थः। भर्तारं मृतमुद्दिश्य रुदती च मा भव। रोदनादि स्त्रीकृत्यं माऽनुतिष्ठ। पतिभार्याभावस्य नष्टत्वात् त्वं तदुचिता न भवसीत्यर्थः। †परः 'मां मृतं रुदती' इति मिथ्यापाठं प्रकल्प्य मिथ्यार्थमसङ्गतमवोचत् ॥ २ ॥

किन्नु ‡तेऽदूषयद्राजा रामो वा भृशधार्मिकः।
ययोर्मृत्युर्विवासश्च त्वत्कृते तुल्यमागतौ ॥ ३ ॥

तुल्यमिति। युगपदित्यर्थः ॥ ३ ॥

§[2] ब्रह्महत्यामसि प्राप्ता कुलस्यास्य विनाशनात्।
कैकेयि! नरकं गच्छ मा च भर्तुः सलोकताम् ॥ ४ ॥

---

* अयोध्याकाण्डे 35 सर्गे 25 श्लोके गतोऽयं वृत्तान्तः। † तीर्थः, गोविन्दराजो वा ॥ 'प्राणहानिकरकार्यकरणात् मा मृतं मत्वा रोदनं कुर्वित्यर्थः'—**गो.** 'त्वद्विषये मां मृतं मत्वा रुदती भव'—**ती.** भर्तारमुद्दिश्य कैकेय्या रोदनाऽकरणात् तद्विषेधो न घटत इति तयोर्भावः। गोविन्दराजेन तु कतकरीत्याऽपि व्याख्यातम्। तदा तु पतिभार्याभावविच्छेदमात्रोपलक्षकमिदं वाक्यम् ॥ ‡ ते—तव सम्बन्धि गुणचारित्रादिकं—**ती. गो.** अथ वा—ते अदूषयत—तव कीदृशमनिष्टमाचरितवन्तौ—लोकोक्तिरियमपि। § भ्रूणहत्यां— भ्रूणहत्यातुल्यपापम्—**गो.**

[1] मां—**ङ.**　　[2] भ्रूणहत्या—**ङ.**

आगतौ यतः, अतोऽवश्यं—ब्रह्महत्यामित्यादि । नरकं गच्छेति प्राप्तकाले लोट्, नरक एव ते न्यायप्राप्त इत्यर्थः ॥ ४ ॥

यत्त्वया हीदृशं पापं कृतं घोरेण कर्मणा ।
***सर्वलोकप्रियं हित्वा ममाप्यापादितं भयम् ॥ ५ ॥**

सर्वलोकप्रियं, राममिति शेषः । हित्वा–विवास्येति यावत् । ममापि भयमापादितमिति । त्वद्दोषात् मां रामः परित्यक्ष्यतीति भयमित्यर्थः ॥ ५ ॥

त्वत्कृते मे पिता वृत्तो रामश्चारण्यमाश्रितः ।
†अयशो जीवलोके च त्वयाऽहं ‡प्रतिपादितः ॥ ६ ॥

अयशो जीवलोके चेति । पतिघ्न्याः पापायाः पुत्रो भरतः कश्मलः–इत्याद्यात्मकमयशः ॥ ६ ॥

मातृरूपे! ममामित्रे! नृशंसे! राज्यकामुके!
न तेऽहमभिभाष्योऽस्मि, दुर्वृत्ते! पतिघातिनि! ॥ ७ ॥

राज्यकामुकेति । अमैथुनेच्छातो न ङीप् । न तेऽहमभिभाष्य इति । 'कृत्यानां कर्तरि वा' इति षष्ठी; मत्संभाषणं त्वया न कर्तव्यमित्यर्थः ॥ ७ ॥

कौसल्या च सुमित्रा च याश्चान्या मम मातरः ।
दुःखेन महताऽऽविष्टाः त्वां प्राप्य कुलदूषिणीम् ॥ ८ ॥

---

* सर्वलोकप्रियं रामं हित्वा स्थितस्य ममापि भयमापादितं—त्वत्कृतं पापं ममापि भयमजनयत्, न तु राज्यमिति भावः–**गो.** ममापीत्यपिशब्दाव सर्वजनस्यापीत्यर्थः–**ती.** † मातृमुखेन ज्येष्ठं विवास्य राजानं नाशितवानित्येवंविधं–**गो.** 'अहमप्यवनिं प्राप्ते रामे सत्यपराक्रमे । कृतकृत्यो भविष्यामि विप्रवासितकल्मषः' (१४) इति वचनानुसारादेवं व्याख्या । ‡ प्रतिपादितः–प्रापितः ।

*न त्वमश्वपतेः कन्या धर्मराजस्य धीमतः।
राक्षसी तत्र जाताऽसि कुलप्रध्वंसिनी पितुः ॥ ९ ॥

अश्वपतेः कन्येति। तत्कुलोचितकन्या न भवसीति यावत्। पितुरिति। केकयस्येति यावत् ॥ ९ ॥

†यत्त्वया धार्मिको रामः नित्यं सत्यपरायणः।
वनं प्रस्थापितः, दुःखात् पिता च त्रिदिवं गतः ॥ १० ॥
[1]यत्प्रधानाऽसि तत्पापं मयि ‡पित्रा विनाकृते।
भ्रातृभ्यां च परित्यक्ते सर्वलोकस्य चाप्रिये! ॥ ११ ॥

यत्प्रधाना—यत्पापप्रधाना असि, तत्पापं पित्रादिवियुक्ते सर्वलोकाप्रियत्वं तावकं मय्यपि संक्रान्तम्—धिक् पापायाः पुत्रमिति। अप्रिये इति सम्बुद्धिः ॥ ११ ॥

कौसल्यां धर्मसंयुक्तां वियुक्तां, पापनिश्चये!
कृत्वा कं प्राप्स्यसे त्वद्य लोकं, निरयगामिनि! ॥ १२ ॥

वियुक्तां—पतिपुत्रवियुक्तां कृत्वेति योजना ॥ १२ ॥

§किं नावबुध्यसे, क्रूरे! नियतं [2]बन्धुसंश्रयम्।
ज्येष्ठं पितृसमं रामं [3]कौसल्या आत्मसंभवम् ॥ १३ ॥

बन्धूनां संश्रयः—आश्रयभूतः तथा। एवमाद्युच्यमानविशेषणकं रामं कौसल्या आत्मसंभवं—याटो लोपः, सन्ध्यभावश्च छान्दसः; औरसपुत्रं नावबुध्यसे किम्? ॥ १३ ॥

---

* लोकोक्तिरियम्। † राक्षसीत्यत्र हेतुमाह—यदित्यादिश्लोकेन। ‡ संक्रान्तं कार्यं विशेषणद्वयेन दर्शितम्—गो. भवत्या कृतस्य पापस्य फलमेवेदं मम पितृवियोगः, भ्रातृविरहश्चेत्यर्थः। § कौसल्यासुतम्। रामं पितृवदेव बन्धूनामाश्रयभूतं किं नावबुध्यसे? तस्मिन् पक्षपातस्याप्रसक्त्या भवद्विप्रियमसंभव्येव खलु—इति वाऽर्थः।

[1] यत्प्रधारयसे तोषं—ङ. [2] बुद्धिसंश्रयम्—ङ. [3] कौसल्यायात्मसंभवम्—ङ.

*अङ्गप्रत्यङ्गजः पुत्रः हृदयाच्चापि जायते ।
तस्मात् †[1]प्रियतरो मातुः प्रियत्वान्न तु[2]बान्धवाः ॥

भवत्वौरसः, किं ततः? इत्यत्र, औरसत्वादेव हेतोः परमप्रेमास्पदत्वात् तद्वियोगो दुस्सह इत्याशयेनाह—अङ्गेत्यादि । अङ्गानि—मुखकण्ठवक्षःकुक्षिवस्तिहस्तपादलक्षणानि । प्रत्यङ्गानि—नेत्रनासाङ्गुल्यादीनि । तत्तत्तेजोंऽशजस्तथा । अत्र 'अङ्गादङ्गात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदश्शतम्' इति मन्त्रे अङ्गादङ्गादिति वीप्सया अङ्गप्रत्यङ्गरूपसर्वाङ्गग्रह इति सूचितम्—अङ्गप्रत्यङ्ग इत्यनेन । सर्वाङ्गतेजःसंभूतत्वं च 'यदेतद्रेतः तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजस्संभूतम्' इति श्रुतेः । स्त्रियास्तु रक्तमेव रेतः । हृदयं—हृदयपुण्डरीकं प्रत्यगात्माधिष्ठानभूतम् । यदेवं जायते—तस्मात् पुत्रः मातुः प्रियतरो भवति—अतिशयेन प्रियो भवति, 'आत्मावै पुत्रनामासि' इति श्रुतेः पुत्रस्याप्यात्मत्वात् । 'आत्मनस्तु कामाय सर्वं प्रियं भवति' इति श्रुतेः, अनुभवाच्च । निरुपधिप्रेमास्पदत्वस्य चात्मनः प्रसिद्धत्वाच्चेत्यर्थः । बान्धवाः—पितृमात्रादयः केवलं प्रिया एव, न तु प्रियतराः । एवमतिशयितप्रियत्वात् पुत्रस्य, तद्वियोगजदुःखं दुस्सहमित्यर्थः ॥ १४ ॥

[3]अन्यदा किल ‡धर्मज्ञाः सुरभिः सुरसम्मता ।
[4]वहमानौ ददर्शोर्व्यां §पुत्रौ ‖विगत[5]चेतसौ ॥ १५ ॥

---

* औरसपुत्रविश्लेषो मातुरसह्य इति दर्शयितुं पीठिकेयम् । † बान्धवः—भ्रात्रादिः न प्रियतमः, किन्तु प्रिय एव—**गो.** ‡ धर्मज्ञा—कर्षणकालधर्मज्ञा—**गो.** § पुत्रौ—साक्षात्पुत्रौ, किञ्चिन्निमित्तवशात् भूमिं गतौ । यद्वा स्ववंश्यत्वेन पुत्रव्यपदेश्यौ—**गो.** ‖ विगतचेतसौ—अतिश्रमेण शून्यमनस्कौ ।

[1] प्रियतमो—**ङ.** [2] बान्धवः—**ङ.** [3] एकदा—**ङ.** [4] लभमानौ—**ङ.** [5] चेतनौ—**ङ.**

पुत्रशोको मातुः दुस्सह इत्यत्र इतिहासमाह—अन्यदेत्यादि। धर्मज्ञाः—पुराविदो वृद्धाः अन्यदा—अन्यस्मिन् कस्मिंश्चित्पूर्वकाले, किलेत्यैतिह्ये; तथा वदन्ति किलेत्यर्थः। कथं वदन्ति? इत्यतः—वहमानौ—हलं शकटं वा ॥ १५ ॥

तावर्धदिवसे श्रान्तौ दृष्ट्वा पुत्रौ महीतले।
रुरोद पुत्रशोकेन बाष्पपर्याकुलेक्षणा ॥ १६ ॥

अर्धं दिवसस्य—अर्धदिवसे, एकदेशीसमासः, मध्याह्न इति यावत्। पुत्रौ—साक्षात्पुत्रौ, किञ्चिन्निमित्ततो भुवं गतौ, तथाऽग्रे वदति 'मम कायात् प्रसूतौ' इति ॥ १६ ॥

अधस्तात् व्रजतस्तस्याः सुरराज्ञो महात्मनः।
बिन्दवः पतिता गात्रे सूक्ष्माः सुरभिगन्धिनः ॥ १७ ॥

सुरराज्ञः—सुरराजस्येति यावत् ॥ १७ ॥

निरीक्षमाणस्तां शक्रः ददर्श सुरभिं स्थिताम्।
[1]आकाशे *विष्ठितां दीनां रुदतीं भृशदुःखिताम् ॥ १८ ॥
तां दृष्ट्वा शोक[2]सन्तप्तां वज्रपाणिर्यशस्विनीम्।
इन्द्रः प्राञ्जलिरुद्विग्नः सुरराजोऽब्रवीद्वचः ॥ १९ ॥
†भयं कच्चिन्न चास्मासु कुतश्चिद्विद्यते महत्।
कुतोनिमित्तः शोकस्ते ब्रूहि, [3]सर्वहितैषिणि! ॥ २० ॥

---

* विष्ठितां—निश्चलं स्थिताम्। † प्रायशस्त्वदश्रुमोचनस्य भयसूचकत्वादिति भावः—**गो.** अत्र तीर्थ-गोविन्दराजदृष्ट्या भयं देवसम्बन्ध्यभिमतम्। कतकदृष्ट्या तु उत्तरश्लोकव्याख्यानुसारेण देवानामन्यतमात् सुरभेरेव भयं अभिमतम्।

[1] आकाशेऽधिष्ठितां—ङ. [2] सन्तप्तः ङ. [3] सर्व—ङ.

अस्मासु—अस्मदीयामरेष्वित्यर्थः । कुतोनिमित्त इति । आद्यादित्वात् प्रथमान्तविहितस्य तसन्तस्य कुतश्शब्दस्य निमित्तशब्देन समानाधिकरणबहुव्रीहिः, किंनिमित्तक इत्यर्थः ॥ २० ॥

एवमुक्ता तु [1]सुरभिः सुरराजेन धीमता ।
प्रत्युवाच ततो धीरा वाक्यं वाक्यविशारदा ॥ २१ ॥
*शान्तं पापं, न वः किञ्चित् कुतश्चिदमराधिप !
अहं तु †[2]मग्नौ शोचामि स्वपुत्रौ विषमे स्थितौ ॥ २२ ॥

हे अमराधिप ! वः—युष्माकममराणां सम्बन्धी मे किञ्चित् पापं—दुःखमिति यत्, तत् शान्तम्, प्रसङ्गो न कर्तव्यः । 'शान्तं पापम्', 'प्रतिहतममङ्गलम्' इत्यादिकमनुचितप्रसङ्गश्रवणदोषनिवर्तकवचनविशेषः । तत् कुतश्चिदप्यमरान्मे पापं न । किन्त्वहं मग्नौ—दुःखमग्नौ एवमुच्यमानविशेषणवन्तौ पुत्रौ दृष्ट्वा, तत एव हेतोः शोचामीत्यन्वयः ॥ २२ ॥

एतौ दृष्ट्वा कृशौ दीनौ सूर्यरश्मिप्रतापितौ ।
[3]वध्यमानौ बलीवर्दौ कर्षकेण [4]दुरात्मना ॥ २३ ॥
मम कायात् ‡प्रसूतौ हि दुःखितौ भारपीडितौ ।
यौ दृष्ट्वा परितप्येऽहं नास्ति पुत्रसमः प्रियः ॥ २४ ॥

'यौ दृष्ट्वा परितप्येऽहं नास्ति पुत्रसमः प्रियः' इति कामधेनुवचनोपसंहारः ॥ २४ ॥

---

* 'नाश्लीलं कीर्तयेत्' इति निषिद्धाचरणजं पापं शान्तम् । अथ वा अश्लीलश्रवणजं पापं शान्तम् । अथ वा उत्कीर्तितानिष्टप्रापकं पापं यदि स्यात्, तत् शान्तम् । † विषमे मग्नौ स्थितौ इति वाऽन्वयः । ‡ प्रसूतत्वं परंपरया—गो. ती.

[1] सा देवी—ङ. [2] किल—ङ. [3] अर्द्यमानौ—ङ. [4] सुराधिप—ङ.

यस्याः पुत्रसहस्रैस्तु कृत्स्नं व्याप्तमिदं जगत् ।
तां दृष्ट्वा रुदतीं शक्रो न सुतान्मन्यते परम् ॥ २५ ॥

अथेन्द्रव्यापारं कविराह—यस्या इत्यादि । पुत्रसहस्रैरिति । साक्षात्पुत्रधर्माधर्मबलीवर्दसन्तानपतितैरित्यर्थः । तां रुदतीं दृष्ट्वा शक्रोऽपि न सुतात् परं प्रियमस्तीति मन्यते स्म ॥ २५ ॥

[1]इन्द्रो ह्यश्रुनिपातं तं स्वगात्रे पुण्यगन्धिनम् ।
सुरभिं मन्यते दृष्ट्वा भूयसीं तामिहेश्वरः ॥ २६ ॥

इन्द्रः स्वगात्रे तं पुण्यगन्धिनं अश्रुनिपातं दृष्ट्वा तां सुरभिं भूयसीं मन्यते—बहुमन्यते स्म * ॥ २६ ॥

[2]समाप्रतिमवृत्ताया: लोकधारणकाम्यया ।
† श्रीमत्या [3]गुणमुख्यायाः स्वभाव[4]परिचेष्टया ॥ २७ ॥
यस्याः पुत्रसहस्राणि साऽपि शोचति कामधुक् ।
किं पुनर्या विना रामं कौसल्या [5]वर्तयिष्यति ॥ २८ ॥

अतःपरं भरतवाक्यं प्रकृतयोजनशेषतया—समाप्रतिमेत्यादि । समं—सर्वप्राणिसमानुग्राहकं अतुलं सर्वोत्तमं वृत्तं—चरित्रं यस्याः सा तथा । श्रीमत्याः—इष्टदोहनैश्वर्यशक्तिमत्याः गुणमुख्यायाः—गुणः मुख्यः सत्वात्मा यस्याः सा तथा । एवंभूतायाः तस्याः लोकधारण-काम्यया—लोकानुग्रहेच्छया प्रवृत्तायाः स्वभावपरिचेष्टया—'आहारनिद्रा-भयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्' इति सामान्यप्राप्तमिथुनी-

---

* तदीयवात्सल्यं दृष्ट्वेति भावः । † गुणनित्यायाः—नित्यगुणायाः यस्याः सुरभेः स्वभावपरिवेषया--स्वभावेन स्त्रीपुंस्वभावेन मैथुनेन परिवेषः—आवृत्तिः यस्याः—गो. अत्र 'लोकधारणकाम्यया श्रीमत्याः' इति यथाश्रुतमेव वाऽन्वयः ।

[1] अयं श्लोकः ङ. पुस्तके नास्ति. [2] सदा—ङ. [3] गुणनित्यायाः—ङ. [4] परिवेषया—ङ. [5] विनशिष्यति—ङ.

भावलक्षणया सन्तानपरंपराद्वारेण यस्याः पुत्रसहस्राणि–अपरिमितपुत्राः सन्ति साऽपि शोचति, औरसपुत्रपीडायां, कथं पुनर्मानुषी कौसल्या एकपुत्रा विना रामं शोकेन वर्तयिष्यति ॥ २८ ॥

एकपुत्रा च साध्वी च विवत्सेयं त्वया कृता ।
तस्मात् त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥ २९ ॥

सेयं विवत्सेव त्वया कृता । यदेवं—तस्मादित्यादि ॥ २९ ॥

*अहं त्वपचितिं भ्रातुः पितुश्च सकलामिमाम् ।
[1]वर्धनं यशसश्चापि करिष्यामि न संशयः ॥ ३० ॥

अपचितिः–पूजा । इमामिति । प्रस्तुतौर्ध्वदैहिकक्रियामित्यर्थः ॥

[2]आनाय्य च महाबाहुं कोसलेन्द्रं महाबलम् ।
स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितम् ॥ ३१ ॥

आनाय्य—आनाययित्वा यशसश्च वर्धनं करिष्यामीत्यन्वयः । प्रवेक्ष्यामीति । आनयनार्थमिति शेषः ॥ ३१ ॥

न ह्यहं, पापसङ्कल्पे! पापे! पापं त्वया कृतम् ।
शक्तो धारयितुं † पौरैः अश्रुकण्ठैर्निरीक्षितः ॥ ३२ ॥

पापं—रामविवासनरूपम् ॥ ३२ ॥

सा त्वमग्निं प्रविश वा स्वयं वा विश दण्डकान् ।
रज्जुं [3]बध्वाऽथ वा कण्ठे न हि तेऽन्यत् परायणम् ॥ ३३ ॥

कण्ठ इति । म्रियस्वेति शेषः ॥ ३३ ॥

---

* भ्रातुः अपचितिं–राज्याभिषेकरूपां, पितुश्च सकलामिमां–उत्तरक्रियां–स्पष्टं वक्तुमनिच्छया वा एवं कथनम् । † अश्रुकण्ठेषु पौरेषु निरीक्षत्सु–इति यावत् ।

[1] वर्धिनीं–ङ. [2] आनाययित्वा तनयं कौसल्याया महाद्युतिम्–ङ. [3] बधान वा–ङ.

*अहमप्यवनीं प्राप्ते रामे सत्यपराक्रमे ।
कृतकृत्यो भविष्यामि विप्रवासितकल्मषः ॥ ३४ ॥

†इति नाग इवारण्ये तोमराङ्कुशतोदितः ।
पपात भुवि संक्रुद्धः निःश्वसन्निव पन्नगः ॥ ३५ ॥

संरक्तनेत्रः शिथिलाम्बरस्तथा
विधूतसर्वाभरणः परंतपः ।
बभूव भूमौ पतितो नृपात्मजः
शचीपतेः ‡केतुरिवोत्सवक्षये ॥ ३६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे चतुस्सप्ततितमः सर्गः

शचीपतेः केतुः—इन्द्रध्वजः । तालु(३६)मानः सर्गः ॥३६॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे चतुस्सप्ततितमः सर्गः

पञ्चसप्ततितमः सर्गः

[भरतशपथः]

दीर्घकालात् समुत्थाय संज्ञां लब्ध्वा स वीर्यवान् ।
नेत्राभ्यामश्रुपूर्णाभ्यां दीनामुद्वीक्ष्य मातरम् ॥ १ ॥

एवं क्रुद्धो भरतः परुषवचनैर्मातरं मर्मसु निकृत्य तत्कृतं कार्यं न निजानुमतमिति कौसल्यायै शपथैः प्रत्याययति । दीर्घेत्यादि । दीनां—स्वमनीषितभङ्गतः ॥ १ ॥

---

* वनात् राज्यं प्राप्ते इति भावः । † पीडितस्त्वे गजः, क्रोधनिःश्वासे पन्नगश्च दृष्टान्तः । ‡ उत्सवसमाप्त्यनन्तरमवरोप्य भूमौ स्थापितः उत्सवार्थेन्द्रध्वज इव ।

* सोऽमात्यमध्ये भरतः जननीमभ्यकुत्सयत् ।
राज्यं न कामये जातु † मन्त्रये नापि मातरम् ॥ २ ॥

अमात्याः सुमन्त्रादयः ज्ञात्वा भरतागमनं प्राप्ताः । जननीमभ्यकुत्सयदिति लोकस्येव स्वस्यापि परमानिष्टताख्यापनाय । अथ 'प्रयोजयिता, मन्ता, कर्ता' इतिस्मृतं त्रिप्रकारमपि कर्तृत्वं प्रकृतपापविषये नास्तीति राजकर्तॄन् प्रत्याययति भरतः—राज्यमित्यादि । मन्त्रय इति । राज्यार्थमिति शेषः ॥ २ ॥

‡ अभिषेकं न जानामि योऽभूद्राज्ञा समीक्षितः ।
विप्रकृष्टे ह्यहं देशे शत्रुघ्नसहितोऽभवम् ॥ ३ ॥

समीक्षितः—चिन्तितः । न जानामीत्यत्र हेतुमाह—विप्रकृष्ट इत्यादि । अतिदूरस्थ इत्यर्थः ॥ ३ ॥

वनवासं न जानामि रामस्याहं महात्मनः ।
विवासनं च सौमित्रेः सीतायाश्च यथाऽभवत् ॥ ४ ॥
तथैव क्रोशतस्तस्य भरतस्य § महात्मनः ।
कौसल्या शब्दमाज्ञाय सुमित्रां चेदमब्रवीत् ॥ ५ ॥
आगतः क्रूरकार्यायाः कैकेय्या भरतः सुतः ।
तमहं द्रष्टुमिच्छामि भरतं ‖ दीर्घदर्शिनम् ॥ ६ ॥

---

* एतावता मातृसकाश एव विवादात्, अमात्यादीनामिदानीमेवागतत्वेन तेषां स्वाशयावेदनाय प्रतिजानाति । † मात्रालोचनां नानुमोदामीति वाऽर्थः । ‡ मत्सम्मतिमन्तरा निर्णीतत्वात् नाहमभिषेक्ष्यामीति चार्थः । § अहो! भरतस्य भावः कौसल्यया न ज्ञातः— इति सूचयति कविः – महात्मन इति । ‖ दीर्घदर्शिनमित्यनेन रामनिर्गमनं भरतो न संमन्यत इति कौसल्याहृदयं इति सूचितम्—गो. वस्तुतस्तु—'इदं ते राज्यकामस्य' (११) इत्यादिपरिशीलने 'भरतः मात्रा सह मन्त्रयित्वैव सर्वमेवं कृतवान्' इति कौसल्या मन्यते स्म इति भाति । अतः तदनुगुणमेव 'दीर्घदर्शिनं' इति नर्मोक्त्या उपलभते इति स्वरसम् ॥

दीर्घदर्शिनमिति। एवं कृते एवं भविष्यतीति ऐहिकामुष्मिककर्मणः कालान्तरीयफलदर्शनक्षमसुमतिमानित्यर्थः। इदं तद्दर्शनप्रवृत्तिप्रयोजकम् ॥ ६ ॥

एवमुक्त्वा सुमित्रां तां [1]विवर्णवदना कृशा।
प्रतस्थे भरतो यत्र वेपमाना विचेतना ॥ ७ ॥
स तु [2]राजात्मजश्चापि शत्रुघ्नसहितस्तदा।
प्रतस्थे भरतो [3]येन कौसल्याया निवेशनम् ॥ ८ ॥

येन—मार्गेणेत्यर्थः। निवेशनमिति। प्राप्यत इति शेषः ॥ ८ ॥

*ततः शत्रुघ्नभरतौ कौसल्यां प्रेक्ष्य दुःखितौ।
पर्यष्वजेतां दुःखार्तां पतितां नष्टचेतनाम् ॥ ९ ॥

कौसल्यां—स्वगृहात् प्रस्थातुमुद्यताम् ॥ ९ ॥

रुदन्तौ †[4]रुदती दुःखात् [5]समेत्यार्या मनस्विनी।
भरतं प्रत्युवाचेदं कौसल्या भृशदुःखिता ॥ १० ॥
इदं ते राज्यकामस्य राज्यं प्राप्तमकण्टकम्।
संप्राप्तं, बत! कैकेय्याः ‡शीघ्रं क्रूरेण कर्मणा ॥ ११ ॥
प्रस्थाप्य चीरवसनं पुत्रं मे वनवासिनम्।
कैकेयी कं गुणं तत्र पश्यति [6]क्रूरदर्शिनी ॥ १२ ॥

---

* एवमुभयोः प्रयत्नेऽपि कौसल्याया वृद्धात्वात् सप्ताष्टदिनैः बहुधा परिभूतत्वाच्च तस्याः प्रस्थानात्—अथ वा किञ्चिद्दूरप्राप्तेः पूर्वमेव भरतशत्रुघ्नौ कौसल्यागृहं प्राप्ताविति गम्यते। † 'रुदतीं' इत्यादिद्वितीयान्तपाठे तु अस्यार्धस्य पूर्वेणान्वयः। ‡ राज्ञः अकालमरणादिना भवन्निर्गीक्षितकालादपि शीघ्रं प्राप्तं राज्यं इति वाऽर्थः। अत एव पूर्वं 'दीर्घदर्शिनं, इति, अत्र 'कैकेय्याः क्रूरकर्मणा' इति च स्वरसतः संगच्छते।

[1] विवर्णा मलिना-ङ. [2] रामानुज-ङ. [3] यत्र-ङ. [4] रुदती-ङ. [5] समेत्यार्या यशस्विनीम्-ङ. [6] क्रूरदर्शना-ङ.

राज्यं प्राप्तम्, तत् भुङ्क्ष्व; त्वमपि मे पुत्र इति न तत्र काचन चिन्ता। अपि तु रामं त्वदागमनादपि पूर्वं शीघ्रं प्रस्थाप्य कं गुणं कैकेयी पश्यतीति न जाने। स्थिते तु स एव पितृवाक्यात् त्वामपि भीष्मादिवत् अभिषिच्य रक्षेत्। अतो व्यर्थोऽयं रामविवासनप्रयासः कैकेय्या इत्यर्थः ॥ ११–१२ ॥

क्षिप्रं मामपि कैकेयी प्रस्थापयितुमर्हति।
***हिरण्यनाभो यत्रास्ते सुतो मे सुमहायशाः ॥ १३ ॥**

मामपि प्रस्थापयितुमर्हतीति। ममापि तस्या निष्कारणदुःखहेतुत्वाविशेषादित्याशयः। हिरण्यनाभ इति। हिरण्मयं नाभिमण्डलं अनाद्यसाधारणस्वभावलक्षणं यस्य स तथा। भगवतो हिरण्यगर्भावतारत्वादेवं लक्षणं रामस्यासाधारणम् ॥ १३ ॥

अथ वा स्वयमेवाहं सुमित्रानुचरा सुखम्।
†अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये येन राघवः ॥ १४ ॥

अग्निहोत्रं पुरस्कृत्येति। 'कैकेयीवर्त्म गच्छेत् भरतः। तेन मे प्रेतकार्यं न कार्यम्' इति राज्ञा उक्तत्वात्, त्वया च तदनुवर्तने पित्रा त्वकर्तृकसंस्कारनिषेधात् अग्निहोत्रं पुरस्कृत्य रामसमीपं भर्तुः संस्कारार्थं गमिष्यामीत्यर्थः ॥ १४ ॥

कामं वा स्वयमेवाद्य तत्र मां नेतुमर्हसि।
यत्रासौ पुरुषव्याघ्रः [1] तप्स्यते मे सुतस्ततः ॥ १५ ॥

---

* हिरण्यवत् स्पृहणीयनाभियुक्तः; नाभिग्रहणं शरीरस्योपलक्षणम्–**गो. ती.**

† अग्निहोत्रस्य ज्येष्ठभार्याधीनत्वात्, दशरथेन भरतसंस्कारप्रतिषेधाच्चेति भावः। एतेन राजशरीरप्रापणमप्यर्थसिद्धम्–**गो.**

[1] पुत्रो मे तप्यते तपः–**क.**

अथवाऽद्य त्वं वा स्वयमेव कामं संस्कारादिकं अतत्पक्षश्चेत् कृत्वा पश्चादपि वा मां तत्र नेतुमर्हसि ॥ १५ ॥

इदं हि तव विस्तीर्णं धनधान्य*समाचितम् ।
हस्त्यश्वरथसंपूर्णं राज्यं निर्यातितं तया ॥ १६ ॥

समाचीयते अस्मिन्निति समाचितं—कोशः । निर्यातितं—दापितम् ; 'निर्यातनं वैरशुद्धौ दाने न्यासार्पणे मतम्' इति विश्वः ॥ १६ ॥

इत्यादिबहुभिर्वाक्यैः क्रूरैः संभर्त्सितोऽनघः ।
विव्यथे भरतः तीव्रव्रणे तुद्येव सूचिना ॥ १७ ॥

संभर्त्सित इति । परपक्षधियाऽभिभाषित इत्यर्थः । व्रणे प्राचीने सूचिना तुद्येव—व्यथयित्वैव । भर्तृपितृवियोगखिन्नेन आश्वासार्थं आगतस्थलेऽपि पुनः खेदहेतुवचनश्रवणात् तथात्वम् ॥ १७ ॥

पपात † चरणौ तस्याः तदा संभ्रान्तचेतनः ।
विलप्य बहुधाऽसंज्ञः लब्धसंज्ञस्तदाऽभवत् ॥१८।
एवं विलपमानां तां प्राञ्जलिर्भरतस्तदा ।
कौसल्यां प्रत्युवाचेदं शोकैर्बहुभिरावृताम् ॥ १९ ॥

एवं विलपमानामिति । 'इदं ते राज्यं' इत्युक्तरीत्या परपक्षधिया भाषमाणामित्यर्थः ॥ १९ ॥

---

* समाचितं—व्याप्तमिति वा । कतकदृष्ट्या 'विस्तीर्णधनधान्यसमाचितम्' इति एकं पदं स्यादिति भाति । † चरणौ प्रतीति शेषः-गो.

आर्ये! कस्मादजानन्तं गर्हसे मामकल्मषम् ।
विपुलां च मम प्रीतिं [1]स्थिरां जानासि राघवे ॥ २० ॥

अजानन्तमिति । अत्रत्यप्रसङ्गमिति शेषः । राघवे मम विपुलां प्रीतिं जानास्येव ॥ २० ॥

*[2]कृता शास्त्रानुगा बुद्धिः मा भूत्तस्य कदाचन ।
सत्यसन्धः सतां श्रेष्ठः †यस्यार्योऽनुमते गतः ॥ २१ ॥

सत्यं ; जानामि पूर्वम् . कथमिदानीम् ? इत्यत्र इदानीमपि ततोऽधिकतरैव ; पितुरप्यभावात् पितृबुद्धेरपि रामे उपसंहारात्—इतीममर्थं परबुद्धेरप्रत्यक्षत्वात् शपथैः प्रत्याययति—कृतेत्यादि । सत्यसन्धत्वादिगुणकः स आर्यः—रामः यस्य—मेऽनुमते मदनुगतिमदनुज्ञापूर्वककृत्यनिमित्ततः गतश्चेत् तस्य मे कदाचनापि शास्त्रानुगा कृता—श्रुतिस्मृत्यनुगता सुचिरसुस्थिरपरिचिता बुद्धिः सर्वार्थहेतुभूता मा भूत्—तिरोभूयात् । इतोऽधिकोऽनर्थो नास्त्येव पुंसः । अतोऽयं परमः शपथः । अतः परं प्रपञ्चः ॥ २१ ॥

[3]प्रैष्यं पापीयसां यातु, सूर्यं च प्रति मेहतु ।
हन्तु पादेन गां सुप्तां यस्यार्योऽनुमते गतः ॥ २२ ॥

---

* अत्र शपथव्याजेन धर्मविशेषाश्च शिक्ष्यन्ते मुनिनेति बोध्यम्—गो.
† रामविवासनं यस्य सम्मतं स्यात् स एतादृशानि पापानि प्राप्नुयात्—इति शपथस्य सामान्यमुखत्वस्वारस्यादुक्तम् । यदि रामविवासनं मम सम्मतं स्यात्, तदा मम एतानि पापानि भवन्तु—इति प्रकृतपर्यवसानम्—गो.

[1] स्थितां—ङ. च. [2] कृत—ङ. च. [3] प्रेष्यं—ङ.

प्रैष्यं—स्वार्थे ष्यञ्, प्रेष्यत्वमित्यर्थः। यात्विति। यस्य मेऽनुमते गतश्चेत् तस्य मे आत्मा यात्विति योजना। तथा मे आत्मा सूर्यं च प्रति मेहतु—तत्पापं प्राप्नोतु। हन्तु—हननपापं प्राप्नोतु॥ २२॥

कारयित्वा महत् कर्म भर्ता भृत्यमनर्थकम्।
अधर्मो यस्य सोऽस्यास्तु यस्यार्योऽनुमते गतः॥ २३॥

यस्य कर्मणः भर्ता—कर्मप्रेरकः महत् दुष्करं कर्म भृत्यं कारयित्वा, 'हृक्रोरन्यतरस्याम्' इति द्विकर्मकत्वम्, तत् अनर्थकं—अर्थभूत भृतिशून्यं करोति, अस्य योऽधर्मः स मे आत्मनः अस्तु॥ २३॥

*परिपालयमानस्य राज्ञो भूतानि पुत्रवत्।
[1]ततस्तु द्रुह्यतां पापं यस्यार्योऽनुमते गतः॥ २४॥

ततस्त्विति। आद्यादित्वात् चतुर्थ्यर्थे तसिः, तस्मै इत्यर्थः। तस्य आत्मनोऽस्त्विति सर्वत्रान्वयः॥ २४॥

बलिषड्भागमुद्धृत्य† नृपस्या[2]रक्षितुः प्रजाः।
अधर्मो योऽस्य सोऽस्यास्तु यस्यार्योऽनुमते गतः॥ २५॥

बलिः—करः, तद्रूपः षड्भागस्तथा। यस्य नृपस्याधर्मः सः, अस्य मे आत्मनोऽस्तु॥ २५॥

संश्रुत्य च तपस्विभ्यः सत्रे वै यज्ञदक्षिणाम्।
तां [3]विप्रलपतां पापं यस्यार्योऽनुमते गतः॥ २६॥

सत्रे—यागे। तां विप्रलपतां—अपलपताम्॥ २६॥

---

* राजि परिपालयति सति तं प्रति द्रुह्यतां—गो. † उद्धृत्य—स्वीकृत्येति यावत्।

[1] ततस्तं—क. [2] रक्षतः—ङ. [3] व्यपलपतां—क. ख.

हस्त्यश्वरथसम्बाधे युद्धे शस्त्रसमाकुले ।
मा स्म कार्षीत् *सतां धर्मं यस्यार्योऽनुमते गतः ॥ २७ ॥

सतां धर्ममिति । अपराङ्मुखतया युद्धमित्यर्थः ॥ २७ ॥

उपदिष्टं सुसूक्ष्मार्थं शास्त्रं यत्नेन धीमता ।
स †नाशयतु दुष्टात्मा यस्यार्योऽनुमते गतः ॥ २८ ॥

धीमता आचार्येणेति शेषः । यस्तु दुष्टात्मा नाशयति; तथा तस्य मे आत्मा नाशयतु-ब्रह्मोज्झसं पापं प्राप्नोत्वित्यर्थः ॥ २८ ॥

‡मा च तं व्यूढबाह्वंसं चन्द्रभास्करतेजसम् ।
द्राक्षीत् राज्यस्थमासीनं यस्यार्योऽनुमते गतः ॥ २९ ॥

व्यूढौ-विशालौ बाहू अंसौ च यस्य स तथा । राज्यस्थं-राज्यपदप्रतिष्ठितं, अत एव आसीनं-सिंहासनासीनं तं ज्येष्ठं रामं ममात्मा मा द्राक्षीत्-तज्ज्येष्ठानुवर्तनमुक्तं मा प्राप्नोतु ॥ २९ ॥

पायसं कृसरं छागं वृथा सोऽश्नातु निर्घृणः ।
गुरूंश्चाप्यवजानातु यस्यार्योऽनुमते गतः ॥ ३० ॥

कृसरं-तिलौदनम् । वृथा-श्राद्धादिनिमित्तं विना सः-मे आत्मा अश्नातु-तत्पापं प्राप्नोतु ॥ ३० ॥

---

* तादृशक्रूरयुद्धे- शरणागतरक्षणं, इत्यादियुद्धधर्मं वा । † प्राप्ताऽपि तादृशी महाविद्या विफला भवत्वित्यर्थः । ‡ तादृशरामदर्शनभाग्यरहितो भवत्वित्यर्थः-गो. ती. अथ वा-रामं विवास्य स्वाभिषेकं यः साधयितुमिच्छति, सः अप्रत्यक्षविकलः, राजार्हतेजोभ्रष्टः अन्ततः स्वाभिमतादपि भ्रष्टः भवेदित्यर्थे - यस्यानुमतो आर्यो गतः, तं व्यूढबाह्वंसत्वादिविशेषणकं लोकः मा द्राक्षीदित्यन्वयः ॥

*गवां स्पृशतु पादेन, गुरून् परिवदेत च ।
मित्रैर्द्रुह्येत सोऽत्यर्थं यस्यार्योऽनुमते गतः ॥ ३१ ॥

गवामिति । अङ्गमिति शेषः । परिवदेत—अपवदेत् । मित्रैर्द्रुह्येतेति । चतुर्थ्यर्थे तृतीया, मित्रद्रोहं कुर्यादिति यावत् ॥ ३१ ॥

विश्वासात् कथितं किञ्चित् परिवादं मिथः क्वचित् ।
†विवृणोतु स दुष्टात्मा यस्यार्योऽनुमते गतः ॥ ३२ ॥

परिवादं—कस्यचित्सुरापानादिदोषम् । मिथः—रहस्ये, 'मिथोऽन्योऽन्यरहस्ययोः' इति वैजयन्ती ॥ ३२ ॥

‡अकर्ता चाकृतज्ञश्च §[1]त्यक्तश्च निरपत्रपः ।
लोके भवतु विद्विष्टो यस्यार्योऽनुमते गतः ॥ ३३ ॥

अकर्ता—प्रत्युपकाराकर्ता, अत एवाकृतज्ञः, अत एव त्यक्तः—सज्जनापरिगृहीतः, अत एव लोके विद्विष्टश्च भवतु ॥ ३३ ॥

[2]पुत्रैर्दारैश्च भृत्यैश्च स्वगृहे परिवारितः ।
स एको मृष्टमश्नातु यस्यार्योऽनुमते गतः ॥ ३४ ॥

एको मृष्टमश्नात्विति । इतरेष्वपोषितेष्विति शेषः ॥ ३४ ॥

---

* 'हन्तु पादेन' (२२) इत्यत्र हननमुक्तं, इह तु पादस्पर्शोऽपि पापहेतुरित्युच्यते—गो. † बहुजनमध्ये प्रकटं—इति शेषः । ‡ अकर्ता—प्रत्युपकारस्याकर्ता, अथापि अकृतज्ञः ; आभ्यामेकं पापमुक्तम् । त्यक्तात्मा—सद्भिः परिहृतः, अथापि निरपत्रपः—निर्लज्जः, अकृतप्रायश्चित्त इति यावत् ; इदमेकं पापम्—गो. § त्यक्तात्मा—उद्बन्धनादिना त्यक्तदेहः—ती.

[1] त्यक्तात्मा—ङ्. [2] पुत्रैर्दासैश्च—ङ्.

अप्राप्य सदृशान् दारान् अनपत्यः प्रमीयताम् ।
अनवाप्य [1]क्रिया धर्म्याः यस्यार्योऽनुमते गतः ॥ ३५ ॥

प्रमीयतां–म्रियताम् । धर्म्याः–अग्निहोत्रादिकाः ॥ ३५ ॥

* माऽऽत्मनः सन्ततिं द्राक्षीत् स्वेषु दारेषु [2]दुःखितः ।
आयुस्समग्रमप्राप्य यस्यार्योऽनुमते गतः ॥ ३६ ॥

अप्राप्येति । म्रियतामिति शेषः † ॥ ३६ ॥

राजस्त्रीबालवृद्धानां वधे यत्पापमुच्यते ।
भृत्यत्यागे च यत्पापं तत्पापं प्रतिपद्यताम् ॥ ३७ ॥

राजस्त्रीत्यादौ 'यस्यार्यः' इत्यनुषङ्गो द्रष्टव्यः ॥ ३७ ॥

‡ लाक्षया मधुमांसेन लोहेन च विषेण च ।
सदैव बिभृयात् भृत्यान् यस्यार्योऽनुमते गतः ॥ ३८ ॥

लाक्षया–लाक्षादिविक्रयेणेत्यर्थः । 'लाक्षालवणमांसानि वर्जनीयानि विक्रये' इति वचनात् निषिद्धस्तद्विक्रयः । विषं वत्सनाभादि । भृत्याः–भरणीयस्त्रीपुत्रादयः । ३८ ॥

[3]सङ्ग्रामे § समुपोढे च [4]शत्रुपक्षभयङ्करे ।
पलायमानो वध्येत यस्यार्योऽनुमते गतः ॥ ३९ ॥

---

* अनेन ऋणापाकरणं विना ब्रह्मचर्यादेव संन्यासः प्रतिषिध्यते । अविरक्तविषयमिदमिति चेन्न 'ब्रह्मचर्यादेव प्रव्रजेत्' इत्यादेः दारालाभविषयत्वात्––गो.
† अथ वा अल्पायुर्भूत्वा पुत्रसन्ततिमप्यप्राप्य म्रियतामित्येकमेव वाक्यम् । पूर्वार्धगतक्रियापदं परित्यज्य अध्याहारादिक्लेशात् । अत्र भिन्नवाक्यत्वे पूर्वश्लोकेऽपि तथा सुवचम् ।
‡ 'अप्यकार्यशतं कृत्वा' इत्यस्यापवादोऽयम्–गो. § समुपोढे––निकटे, 'उपोढे निकटोढयोः' इति वैजयन्ती–गो.

[1] क्रियां धर्म्यां, क्रियाधर्म–ङ. [2] नित्यशः–ङ. [3] एतदादि श्लोकद्वयं नास्ति–ग्र. [4] शतपक्ष–ङ.

कपालपाणिः पृथिवीं अटतां चीरसंवृतः ।
भिक्षमाणो यथोन्मत्तः यस्यार्योऽनुमते गतः ॥ ४० ॥

चीरं—मलिनं जीर्णवस्त्रम् ॥ ४० ॥

मद्यप्रसक्तो भवतु स्त्रीष्वक्षेषु च नित्यशः ।
कामक्रोधाभिभूतश्च यस्यार्योऽनुमते गतः ॥ ४१ ॥

मा स्म धर्मे मनो भूयात् अधर्मं स निषेवताम् ।
अपात्रवर्षी भवतु यस्यार्योऽनुमते गतः ॥ ४२ ॥

संचितान्यस्य वित्तानि विविधानि सहस्रशः ।
दस्युभिर्विप्रलुप्यन्तां यस्यार्योऽनुमते गतः ॥ ४३ ॥

उभे सन्ध्ये शयानस्य यत्पापं परिकल्प्यते ।
तच्च पापं भवेत्तस्य यस्यार्योऽनुमते गतः ॥ ४४ ॥

उभे सन्ध्य इति । अत्यन्तसंयोगे द्वितीया, उभयोः सन्धयोरित्यर्थः ॥ ४४ ॥

*यदग्नि[1]दायके पापं यत्पापं गुरुतल्पगे ।
मित्रद्रोहे च यत् पापं तत्पापं प्रतिपद्यताम् ॥ ४५ ॥

†देवतानां पितॄणां च मातापित्रोस्तथैव च ।
मा स्म कार्षीत् स शुश्रूषां यस्यार्योऽनुमते गतः ॥ ४६ ॥

---

* अग्निदायके—गृहादिषु अग्निनिक्षेपके—गृहादिदाहक इति यावत् । † देवतानां शुश्रूषा—अग्निहोत्रादिकर्मसंभृतैः आज्यचरुपुरोडाशादिभिः प्रीणनम् । पितॄणां तु उपरागादिषु मातापितृमरणतिथ्यादिषु च पूर्वोक्तैरन्नैस्तिलादिमिश्रैराराधनम् । पितृशुश्रूषयैव मातापितृशुश्रूषाग्रहणसंभवात मातापित्रोरित्यत्र जीवतोरिति विवक्षितम्—गो.

[1] दाहके—ङ.

देवतानामित्यादि । देवतादिशुश्रूषाकरणहीनस्य यत् पापं तत् प्रतिपद्यतामित्यर्थः ॥ ४६ ॥

सतां लोकात् सतां[1] कीर्त्याः * संजुष्टात् कर्मणस्तथा ।
भ्रश्यतु क्षिप्रमद्यैव यस्यार्योऽनुमते गतः ॥ ४७ ॥

सतां कीर्त्याः–सद्भिः क्रियमाणश्लाघनात् । भ्रश्यतु, तस्य स आत्मेत्यनुषज्यः ॥ ४७ ॥

अपास्य † मातृशुश्रूषां अनर्थे सोऽवतिष्ठताम् ।
दीर्घबाहुर्महावक्षाः यस्यार्योऽनुमते गतः ॥ ४८ ॥

अनर्थे–परस्त्रीवशगत्वाद्यधर्मे ॥ ४८ ॥

[2] बहुपुत्रो दरिद्रश्च ज्वररोगसमन्वितः ।
[3] स भूयात् सततं क्लेशी यस्यार्योऽनुमते गतः ॥ ४९ ॥
आशामाशंसमानानां दीनानामूर्ध्वचक्षुषाम् ।
अर्थिनां वितथां कुर्यात् यस्यार्योऽनुमते गतः ॥ ५० ॥

अर्थिनामाशामिति योजना । आशंसमानानां—स्तुवताम् । ऊर्ध्वचक्षुषां–दातृमुखनिरीक्षकाणाम् ॥ ५० ॥

---

* संजुष्टात्–क्रियमाणादित्यर्थः–ती. सत्सेवितात्- गो. 'जुषी प्रीतिसेवनयोः', सतां सञ्जुष्टात्–प्रीतिविषयात्, तैः सेवितात् कर्मण इति वा । † पुनर्मातृशुश्रूषाग्रहणं तत्त्यागे प्रत्यवायभूयस्तया, तन्नित्यतया च । मातृशुश्रूषा हि नित्या, यतस्तस्यां पतितायामपि शुश्रूषां विदधति स्मृतयः–गो. परन्तु 'दीर्घबाहुर्महावक्षाः' इत्यादि-परिशीलने प्रथमो हेतुरेव युक्त इति प्रतिभाति ।

[1] कीर्त्यात्–ङ. [2] बहुभृत्यो–ङ. [3] समयात्–ङ.

मायया रमतां नित्यं परुषः पिशुनोऽशुचिः ।
राज्ञो भीतस्त्वधर्मात्मा यस्यार्योऽनुमते गतः ॥ ५१ ॥

परुषत्वादिधर्मकः नित्यं मायया रमताम्—तथा रममाणपापं प्रतिपद्यताम् । परुषत्वादिधर्मकत्वादेव राजदण्डात् भीतत्वम् ॥ ५१ ॥

ऋतुस्नातां सतीं भार्यां ऋतुकालानुरोधिनीम् ।
[1] अतिवर्तेत दुष्टात्मा यस्यार्योऽनुमते गतः ॥ ५२ ॥

ऋतुकालानुरोधिनीं—ऋतुस्नानदिवसे स्वसन्निहिताम् ॥ ५२ ॥

*धर्मदारान् परित्यज्य परदारान् निषेवताम् ।
[2] त्यक्तधर्मरतिर्मूढः यस्यार्योऽनुमते गतः ॥ ५३ ॥

निषेवतां यत् पापं तत् प्रतिपद्यताम् । मूढः, भूयादिति शेषः ॥ ५३ ॥

† विप्रलुप्तप्रजातस्य दुष्कृतं ब्राह्मणस्य यत् ।
[3] तदेव प्रतिपद्येत यस्यार्योऽनुमते गतः ॥ ५४ ॥

विप्रलुप्ता—अरक्षिता प्रजाता—प्रसूतिका दृष्टादृष्टशक्त्यव लम्बनेन बलात् येन स तथा । अपप्रसवदोषात् स्त्रियं यो न रक्षतीत्यपि यत् पापद्वयं तदेक एव लभताम् ॥ ५४ ॥

पानीयदूषके पापं तथैव विषदायके ।
यत्तदेकः स लभतां यस्यार्योऽनुमते गतः ॥ ५५ ॥

---

* कृत्याकरणाकृत्यकरणयोः संग्रहार्थमुभयोरप्युक्तिः । † अन्नपानाद्यप्रदानेन प्रणष्टसन्तानस्येत्यर्थः, विच्छिन्नसन्तानस्येति वा । यद्वा विप्रलुप्ता—विवर्जिता प्रजाता—प्रसूता—जातापत्या जाया येन तस्य—**ती.** नष्टापत्यस्य—सन्ततिहीनस्येत्यर्थः—**गो.**

[1] अतिवर्तेदधर्मात्मा—ङ. [2] परित्यक्तस्वधर्मोऽसौ—ङ. [3] तदेतत्—ङ.

ब्राह्मणायोद्यतां पूजां विहन्तु कलुषेन्द्रियः ।
बालवत्सां च गां दोग्धु यस्यार्योऽनुमते गतः ॥ ५६ ॥

विहन्तु—विघ्नयतु । बालवत्सा—* अनिर्दशा ॥ ५६ ॥

तृष्णार्थं सति पानीये विप्रलंभेन योजयन् ।
लभेत तस्य यत् पापं यस्यार्योऽनुमते गतः ॥ ५७ ॥

विप्रलम्भेन—वञ्चनया योजयन्—अप्रयच्छन्निति यावत् ॥ ५७ ॥

† भक्त्या विवदमानेषु मार्गमाश्रित्य पश्यतः ।
तस्य पापेन युज्येत यस्यार्योऽनुमते गतः ॥ ५८ ॥

भक्त्या—शिवविष्णवादिदेवताभक्त्या तं तं स्वमार्गं-तदुपोद्बलकशैवादिशास्त्रं आश्रित्य विवदमानेषु सत्सु, 'त्वमपि त्वन्मार्गे प्रबलः, अन्योऽप्यन्यस्मिन् मार्गे । सर्वस्य च मार्गस्य तत्तदधिकार्यनुग्रहार्थमीश्वरप्रणीतत्वाविशेषात, दृष्टादृष्टफलसंवादाविशेषात् । अतो न वृथा कलहः कर्तव्यः' इति कलहशमनं कृत्वा, सत्यपि सामर्थ्ये केवलं पश्यतः कलहप्रियस्य यत् पापं, तेन पापेन युज्येत मे आत्मेत्यर्थः ॥५८॥

विहीनां पतिपुत्राभ्यां कौसल्यां पार्थिवात्मजः ।
एवमाश्वासयन्नेव दुःखार्तो निपपात ह ॥ ५९ ॥

---

* प्रसूत्यनन्तरं अनतिक्रान्तदशदिनेति यावत् । † विवदमानेषु—वादिप्रतिवादिषु विवादं कुर्वत्सु सत्सु भक्त्या—एकस्मिन् स्नेहेन मार्गे—जयोपायमाश्रित्य पश्यतः—तूष्णीं भवतः—जयोपायं ज्ञात्वाऽपि पक्षपातेन तूष्णीं भवत इत्यर्थः, तस्य पापेन युज्येतेति सम्बन्धः—ती. वादप्रतिवादिषु विवादं कुर्वत्सु भक्त्या—एकस्मिन् स्नेहेन जयोपायमाश्रित्य पश्यतः—भुवतः—गो. वस्तुतस्तु—कतकोक्तं युक्तम् । अथ वा—परमात्मनि भक्त्या, न तु विजिगीषया, विवदमानेषु परमात्मप्राप्तिसाधनज्ञानाभावात 'अयं वा मार्गः, अयं वा' इति विवादं कुर्वत्सु मुमुक्षुजनेषु, तन्मार्गं आश्रित्यापि तूष्णीं पश्यतः—समीचीनमार्गमनुपदिशतः, इत्यर्थः 'आश्रित्य' इत्यनेन स्वानुभवसिद्धत्वं मार्गस्योक्तम् ।

[1]तथा तु शपथैः कष्टैः शपमानमचेतनम् ।
भरतं शोक[2]सन्तप्तं कौसल्या वाक्यमब्रवीत् ॥ ६० ॥
मम दुःखमिदं, पुत्र! भूयः समुपजायते ।
शपथैः शपमानो हि *प्राणानुपरुणत्सि मे ॥ ६१ ॥

भूयः—अभ्यधिकम् । शपथैरिति । हे मातः! नाहं परपक्ष्यः, तत् कार्येणावधारयेत्येतावतैव सिद्धे बहुशपथैः कीर्तनमात्रतोऽपि पापावहैः शपमानोऽसि हि—यस्मात्, अतो मे प्राणानुपरुणत्सि—प्राणपीडासमं दुःखं जायते, तन्मा कुर्विति शेषः ॥ ६१ ॥

दिष्ट्या न चलितो धर्मात् आत्मा ते, †[3]शुभलक्षण!
वत्स! सत्यप्रतिज्ञो [4]मे सतां [5]लोकमवाप्स्यसि ॥ ६२ ॥

अथ स्वीयतया सम्यक् परिगृह्यानुगृह्णाति—दिष्ट्येत्यादितः । आत्मेति । तवान्तःकरणमिति यावत् । यत् सः सत्यप्रतिज्ञः त्वमपि मे रामवदेव पुत्रोऽसि, अतो रामवदेव सतां लोकमवाप्स्यसि ॥ ६२ ॥

इत्युक्त्वा चाङ्कमानीय भरतं भ्रातृवत्सलम् ।
परिष्वज्य [6]महाबाहुं रुरोद भृशदुःखिता ॥ ६३ ॥

एवमनुगृह्य पुत्रोचितकृत्येन तमाश्वासयति—इत्युक्त्वेत्यादि ॥

एवं विलपमानस्य दुःखार्तस्य महात्मनः ।
मोहाच्च शोक[7]संरोधात् बभूव लुलितं मनः ॥ ६४ ॥

---

* उपरुणत्सि—पीडयसीत्यर्थः । यद्वा प्राणानुपरुणत्सि—रामवियोगेन मे निर्गच्छतः प्राणान् स्थापयसि—गो. † सहलक्षणः—शुभलक्षणः ते आत्मा—स्वभावः—ती. ति. सहलक्ष्मण: सत्यप्रतिज्ञोऽसि—लक्ष्मणवत् सत्यप्रतिज्ञोऽसीत्यर्थः—गो. रामप्रतिकूलत्वेन ज्ञातो भवान् लक्ष्मणवदेव रामानुकूलो ज्ञात इति यावत् ।

[1] तदा तं—ङ. च. [2] सन्तप्ता—ङ. [3] सहलक्षणः—ङ. च., सहलक्ष्मणः—ङ. [4] ऽसि, हि—ङ. [5] लोकान—ङ. [6] महात्मानं—ङ. [7] संरंभात्—ङ.

शोकसंरोधात्—शोकस्मरणजान्मोहात्—मूर्छया मनः लुलितं—क्षुभितं बभूव ॥ ६४ ॥

*तमेवं शोकसन्तप्तं भरतं कैकयीसुतम् ।
उवाच वदतां श्रेष्ठः वसिष्ठः श्रेष्ठवागृषिः ॥ ६५ ॥

वसिष्ठ उवाचेति । भरतागमनं श्रुत्वा तद्दुःखापनोदनार्थं आगत इति शेषः ॥ ६५ ॥

अलं शोकेन, भद्रं ते, राजपुत्र! महायशः!
प्राप्तकालं नरपतेः कुरु †संयानमुत्तमम् ॥ ६६ ॥

संयानं—प्रेतहरणम् ॥ ६६ ॥

‡लालप्यमानस्य विचेतनस्य
प्रणष्टबुद्धेः पतितस्य भूमौ ।
मुहुर्मुहुर्निश्वसतश्च घर्मं
सा तस्य दुःखेन जगाम रात्रिः ॥ ६७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे पञ्चसप्ततितमः सर्गः

———

घर्मं—उष्णं यथा तथा निश्वसतः। अतर्ष (६६ १।२)(!) मानः सर्गः ॥ ६७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे पञ्चसप्ततितमः सर्गः

———

* तीर्थगोविन्दराजतिलकादिरीत्या—'तमेवं' इत्यादिश्लोकद्वयं अनन्तरसर्गारम्भे पठनीयम्, कतकदृष्ट्या तु 'लालप्यमानस्य' इत्यादिश्लोकात्पूर्वमस्मिन्नेव सर्गे—इति अनन्तरसर्गोपक्रमव्याख्यानादवगम्यते । † संयानं—सम्यग्यानं—स्वर्गप्रापकक्रियाजातमित्यर्थः-गो. ती. ‡ यद्यपि कौसल्यया समाश्वासितो भरतः; अथापि कौसल्यामुखात् तादृशमहत्तरापवादश्रवणजदुःखस्यानुवृत्त्या दशरथमरणरामविवासनशोकेन च संकटानुभवो भरतस्य ।

षट्सप्ततितमः सर्गः

[दशरथौर्ध्वदैहिकम्]

वसिष्ठस्य वचः श्रुत्वा भरतो *[1] धरणीं गतः ।
प्रेतकार्याणि सर्वाणि कारयामास धर्मवित् ॥ १ ॥

वसिष्ठवचनात् पितुः प्रेतकार्ये भरतस्य प्रवृत्तिः। वसिष्ठस्येत्यादि। धरणीं गत इति। वसिष्ठं साष्टाङ्गं नमस्कृत्येत्यर्थः। गुरुनमस्कारश्च सर्वतः कर्मप्रवृत्त्यङ्गम्। धारणं गतः, धारणां गत इति वा पाठमचीक्लृपत्, यं कञ्चनार्थमवदच्च। अपि च 'तमेवं शोक' इति सर्गादिरिति ब्रूते। 'दुःखेन जगाम रात्रिः' इत्येव सर्गविच्छेदोचितदेशः। तथैव सर्वत्रानुभवात् † ॥ १ ॥

[2] उद्धृत ‡ तैलसंरोधात् स तु § भूमौ निवेशितम् ।
आपीतवर्णवदनं प्रसुप्तमिव भूपतिम् ॥ २ ॥
संवेश्य शयने चाग्र्ये नानारत्नपरिष्कृते ।
ततो दशरथं पुत्रो विललाप सुदुःखितः ॥ ३ ॥

धर्मवित् स इत्यन्वयः। आपीतमिति। बहुदिवसतैलावस्थानोपाधिना आपीतवर्णकं वदनं यस्य स तथा। दशरथमिति। उद्दिश्येति शेषः ॥ २–३ ॥

---

* धारणां गतः—धैर्यं प्राप्तः–गो. स्थितिं प्राप्तः–ती. † उपलभ्यमानकोशेषु सर्वेषु–'जगाम रात्रिः' इत्यत्रैव सर्गविच्छेदो दृश्यते। पूर्वसर्गस्य ६५ श्लोकटिप्पणी द्रष्टव्या। ‡ तैलसंरोधात्—तैलद्रोण्याः–गो. § प्रथमं भूमौ निवेशितं, ततः तैलमार्जनादिकं कृत्वा शयने संवेश्य।

[1] धारणां–ङ. [2] उद्धृत्य तैलसंसेकात्–ङ.

किं ते व्यवसितं? राजन्! प्रोषिते मय्यनागते ।
विवास्य रामं धर्मज्ञं लक्ष्मणं च महाबलम् ॥ ४ ॥

किं व्यवसितं—किं मनीषितम् ॥ ४ ॥

क्व यास्यसि? महाराज! हित्वेमं दुःखितं जनम् ।
हीनं पुरुषसिंहेन रामेणाक्लिष्टकर्मणा ॥५॥
योगक्षेमं तु ते, राजन्! कोऽस्मिन् कल्पयिता पुरे?
त्वयि प्रयाते स्वः, तात! रामे च वनमाश्रिते ॥६॥

ते पुरे—अयोध्यायाम् ॥ ६ ॥

विधवा पृथिवी, राजन्! त्वया हीना न राजते ।
हीनचन्द्रेव रजनी नगरी प्रतिभाति मा ॥७॥
एवं विलपमानं तं भरतं दीनमानसम् ।
अब्रवीद्वचनं भूयः वसिष्ठस्तु महामुनिः ॥ ८ ॥
प्रेतकार्याणि यान्यस्य कर्तव्यानि [1] विशांपतेः ।
तान्यव्यग्रं, महाबाहो! क्रियन्तामविचारितम् ॥९॥

अव्यग्रं—परित्यक्तदुःखपारवश्यं यथा तथा । अविचारितं—दुःखहेतुतः प्राचीनपितृवैभवादिस्मरणरहितं यथा तथा ॥ ९ ॥

तथेति भरतो वाक्यं वसिष्ठस्याभिपूज्य तत् ।
*ऋत्विक्पुरोहिताचार्यान् त्वरयामास सर्वशः ॥ १० ॥

---

* ऋत्विजः—यज्ञकर्मणि वृताः, पुरोहिताः—पुरोहितपरत्वेन शान्तिकपौष्टिकादि-क्रियाप्रवर्तकाः, आचार्याः—वसिष्ठवामदेवादयः–गो.

[1] विशांपते–ङ.

ऋत्विजः—यज्ञकर्मणि वृताः। पुरोहितः–सर्वहितप्रवर्तकः, तथा ह्याहुः—'त्रय्यां च धर्मकृत्ये च शान्तिकर्मणि पौष्टिके। अध्वरे यश्च कुशलः स स्यात् राजपुरोहितः' इति। उपनीय वेदाध्यापका आचार्याः, 'उपनीय ददद्वेदमाचार्यः स उदाहृतः' ॥ १० ॥

ये त्वग्नयो नरेन्द्रस्य चाग्न्यगारात् बहिष्कृताः।
ऋत्विग्भिर्याजकैश्चैव[1] ते ह्रियन्त यथाविधि ॥ ११ ॥

अग्न्यगारात् बहिष्कृता इति। अन्तश्शावत्वात् बहिःप्रदेशे प्रतिष्ठापिताः सन्तः ये, याजकैः–उपदेष्टृभिः ऋत्विग्भिश्च यथाविधि ह्रियन्ते स्म ॥ ११ ॥

शिबिकायामथारोप्य राजानं गतचेतनम्।
बाष्पकण्ठा विमनसः तमूहुः परिचारकाः ॥ १२ ॥
हिरण्यं च सुवर्णं च वासांसि विविधानि च।
प्रकिरन्तो जना मार्गं नृपतेरग्रतो ययुः ॥ १३ ॥

हिरण्यं–रजतं, तत्कृतपुष्पमिति यावत्। तथा सुवर्णमित्यपि ॥

चन्दनागरुनिर्यासान्* सरलं पद्मकं तथा।
देवदारूणि चाहृत्य †[2] क्षेपयन्ति तथा परं ॥ १४ ॥

निर्यासः- गुग्गुल्वादि, तज्जधूम इति यावत्। धूमः–देवदारुभेदः, चन्दनादिवत् धूपाङ्गः। पद्मकमपि धूपाङ्गं काष्ठविशेषः। देवदारुः—प्रसिद्धः। क्षेपयन्तीति। धूपार्थमग्नाविति शेषः ॥ १४ ॥

---

* सरलं--धूपसरलं–गो. अत्र व्याख्यादृष्ट्या 'धूमं पद्मकमेव च' इत्येवंरीत्या पाठः स्यादिति भाति। † चन्दनादीनि गन्धान्नानि चिताकाष्ठद्रव्याणीत्येव तु युक्तम्, तदा क्षेपयन्ति-दहनार्थं चितामकुर्वन्नित्यर्थः-गो.

[1] तेऽहूयन्त–ङ. झ. [2] चितां चक्रुस्तथा परे–ङ. झ.

*गन्धानुच्चावचांश्चान्यान्, †तत्र गत्वाऽथ भूमिपम् ।
ततः संवेशयामासुः चितामध्ये तमृत्विजः ॥ १५ ॥
तथा ‡हुताशनं [2]दत्त्वा जेपुस्तस्य § [3]तदृत्विजः ।
जगुश्च ते यथाशास्त्रं तत्र सामानि सामगाः ॥ १६ ॥

जेपुरिति। पैतृमेधिकमन्त्रविशेषानिति शेषः। तस्येति। परमगत्यर्थमिति शेषः। तदृत्विज इति। तद्यज्ञप्रवर्तका इत्यर्थः ॥ १६ ॥

शिबिकाभिश्च यानैश्च यथार्हं तस्य योषितः ।
नगरान्निर्ययुस्तत्र वृद्धैः परिवृतास्तदा ॥ १७ ॥

यानैः—आन्दोलिकाद्यैः ॥ १७ ॥

प्रसव्यं चापि तं चक्रुः ऋत्विजो¶ऽग्निचितं नृपम् ।
स्त्रियश्च शोकसन्तप्ताः कौसल्याप्रमुखास्तदा ॥ १८ ॥

प्रसव्यं—प्रदक्षिणम्। अग्निचितं—अग्निं चितवन्तम्। 'अग्नौ चेः' इति भूते क्विप्, अश्वमेधान्तमहायज्ञकर्तारमिति यावत् ॥ १८ ॥

क्रौञ्चीनामिव नारीणां निनादस्तत्र शुश्रुवे ।
आर्तानां करुणं काले क्रोशन्तीनां सहस्रशः ॥ १९ ॥
ततो रुदन्त्यो विवशाः विलप्य च पुनः पुनः ।
‖यानेभ्यः सरयूतीरं अवतेरु[4]र्वराङ्गनाः ॥ २० ॥

---

* गन्धानुच्चावचांश्चान्यान् क्षेपयन्तीत्यन्वयः। † तत्र गत्वा—चितास्थलं गत्वा। ‡ हुताशनं दत्त्वा—भरतेन दापयित्वा-गो. § तमिति हुताशनविशेषणम्-गो. ¶ अग्निचितं—अग्निना व्याप्तमिति वा। ‖ पितृवनात् यानमारुह्य सरयूतीरमागताः यानेभ्यः अवतेरुः ॥

[1] दत्त्वा—ङ. [2] हुत्वा—ङ. [3] तमृत्विजः—ङ. [4] र्नृपाङ्गनाः—ङ.

कृत्वोदकं ते भरतेन सार्धं
नृपाङ्गना मन्त्रिपुरोहिताश्च ।
पुरं प्रविश्याश्रुपरीतनेत्राः
भूमौ *दशाहं [1]व्यनयन्त दुःखम् ।। २१ ।।

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे षट्सप्ततितमः सर्गः

भूमौ–भूशयनाद्युपलक्षितब्रह्मचर्येण । 'दशाहं' इत्यत्यन्तसंयोगे द्वितीया, तावत्कालक्षपणीयमाशौचमित्यर्थः । ननु 'द्वादशाहेन भूपालः क्षत्रियः षोडशेऽहनि' इति स्मृतेः कथं दशाहेनाशौचात्ययः?—सत्यम्–'क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः' इति पराशरस्मृत्युक्तविशेषस्य स्वकर्मनिरतत्वस्य सत्वात् राजर्षेस्तस्य दशाहमात्रतो निवृत्तिराशौचस्य । कर(२१)मानः सर्गः ॥ २१ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे षट्सप्ततितमः सर्गः

सप्तसप्ततितमः सर्गः

[भरतशत्रुघ्नविलापः]

ततो दशाहेऽतीते तु कृतशौचो नृपात्मजः ।
द्वादशेऽहनि संप्राप्ते श्राद्धकर्माण्यकारयत् ।। १ ।।

अथाशौचानन्तरं श्राद्धादिप्रवृत्तिः तस्य । तत इत्यादि । दशाह इति । दाहदिनमारभ्येति शेषः । दशाहेऽतीते तु–एकादशेऽहि ।

---

* अत्र स्त्रीणां प्रेतप्रदक्षिणं उदकदानं च सूत्रान्तरोक्तं ज्ञेयम्–गो.

[1] व्यचरन्त–ङ.

कृतशौच इति। अनुष्ठितप्रेतत्वविमुक्तिरैकाहश्राद्ध इति यावत्। श्राद्धकर्माणीति। *द्वितीयमासिकादिसपिण्डीकरणान्तश्राद्धानीत्यर्थः॥ १॥

[1]ब्राह्मणेभ्यो ददौ रत्नं धनमन्नं च पुष्कलम्।
[2]बास्तिकं † बहु शुक्लं च गाश्चापि [3]बहुशस्तदा ॥ २ ॥
दासीर्दासांश्च यानानि वेश्मानि सुमहान्ति च।
ब्राह्मणेभ्यो ददौ पुत्रः राज्ञस्तस्यौर्ध्वदैहिकम् ॥ ३ ॥

बास्तिकं—बस्तसमूहं, छान्दसष्ठक्, 'अजः प्रोक्तः ततो बस्तः छागश्छागलगच्छगाः'। शुक्लं रजतं, 'शुक्लो योगान्तरे श्वेते शुक्लं च रजते मतम्' इति विश्वः। ऊर्ध्वं देहात् ऊर्ध्वदेहः, तत्र भवं और्ध्वदैहिकं, 'ऊर्ध्वदेहाच्चेति वक्तव्यम्' इति ठक् ॥ २–३ ॥

ततः प्रभातसमये दिवसे च त्रयोदशे।
विललाप महाबाहुः भरतः शोक[4]मूर्छितः ॥ ४ ॥
शब्दापिहितकण्ठश्च शोधनार्थमुपागतः।
चितामूले पितुर्वाक्यं इदमाह सुदुःखितः ॥ ५ ॥

विललापेति। उच्यमानविशेषणको भरतः शोधनार्थमुपागतः सन् यथाकालं दशाहाभ्यन्तरे अस्थिसञ्चयनं कृत्वा श्राद्धाद्यनन्तरं त्रयोदशदिवसे चिताभस्मोद्धारपूर्वकं स्थलशुद्धिश्च कर्तव्य इति क्षत्रियकुलाचारः। एवं वाल्मीकिवचनमत्र प्रमाणम् ‡।

---

* षोडशमासिकानि सपिण्डीकरणान्तानि अकारयत्—अकरोदित्यर्थः–**गो.** † बहु शुक्लमिति छागविशेषणम्–**गो.** शुक्लं-शुद्धं, दानार्हमित्यर्थः–**ती.** ‡ 'सावशेषास्थिनिचये' इति वक्ष्यमाणत्वात् त्रयोदशेऽप्यस्थिसञ्चयनं सूत्रान्तरे दृश्यते–**गो.**

[1] एतदनन्तरं—वासांसि च महार्हाणि रत्नानि विविधानि च—इत्यधिकं–ङ. **झ.** [2] हास्तिकं–ङ. [3] शतश–ङ. [4] कर्शितः–ङ.

उपागतस्सन् तत्र पितुः चितामूले विललाप। शब्देन—रोदनशब्देन अपिहितः—छन्नः व्याप्तः कण्ठः यस्य स तथा। अथ तत्रैव चितामूले इदं विलापवाक्यं चाह ॥ ४-५ ॥

तात! *यस्मिन्निसृष्टोऽहं त्वया भ्रातरि राघवे।
तस्मिन् वनं प्रव्रजिते शून्ये त्यक्तोऽस्म्यहं त्वया ॥ ६ ॥

किमाहेत्यतः—तातेत्यादि। निसृष्टः—दत्तः। तस्मिन् प्रव्राजिते सति, छान्दसो ह्रस्वः. त्वयाऽहं शून्ये त्यक्तः—निरवलम्बतया निरस्त इत्यर्थः ॥ ६ ॥

यस्या गतिरनाथायाः [1]पुत्रः प्रव्राजितो वनम्।
तामम्बां, तात! कौसल्यां त्यक्त्वा त्वं क्व गतः, नृप! ॥
दृष्ट्वा भस्मारुणं तच्च दग्धास्थिस्थानमण्डलम्।
पितुः †शरीरनिर्वाणं निष्टनन् विषसाद सः ॥ ८ ॥

अतिदाहाद्युपाधिना अरुणं तद्भस्म—चिताभस्म दृष्ट्वा तच्च दग्धास्थीनां सञ्चितानां स्थानमण्डलं—स्थानोपेतं भस्ममण्डलं तथा। एवं निर्वाणं—शान्तं—नष्टं पितुश्शरीरं दृष्ट्वा निष्टनन्—नितरां रोदनशब्दं कुर्वन् विषसाद। सः—भरतः ॥ ८ ॥

स तु दृष्ट्वा रुदन् दीनः पपात धरणीतले।
‡उत्थाप्यमानः शक्रस्य यन्त्रध्वज [2]इव च्युतः ॥ ९ ॥

---

* यस्मिन् भ्रातरीत्यन्वयः। † शरीरं निर्वाप्यते—विनाश्यते अस्मिन्निति शरीरनिर्वाणं, अधिकरणे ल्युट्—गो. ‡ उत्थाप्यमानः—रज्जुभिरुत्थाप्यमानः च्युतः—स्रस्तः शक्रस्य यन्त्रबद्धो ध्वजः—यन्त्रध्वजः, रज्जुयुक्तो ध्वज इव पपात। यथा यन्त्रपतनात् ध्वजपतनं तथा राजपतनात् भरतपतनमिति भावः—गो. ‘शचीपतेः केतुरिवोत्सवक्षये’ (74-36) इत्यत्र उत्सवक्षयशब्देन, उत्सवार्थमारोप्यमाणो ध्वजः—शक्रध्वजः। ध्वजस्यारोहणं च चक्रविशिष्टस्तंभाग्रवर्तियन्त्रसंलग्नरज्जुद्वारेति प्रसिद्धमेव ॥

[1] पुत्रे प्रव्राजिते—ङ.   [2] इवोच्छ्रितः—ङ.

*स तु पपातेति द्वितीयतच्छब्दस्य सम्बन्धः। शक्रस्य यन्त्रध्वज इवेति। आकाशस्थशक्रध्वजस्य भूमौ पातायोगात् यन्त्रेत्यलङ्कारार्थं, ध्वजयन्त्ररूपेण निर्मितः शक्रयन्त्रध्वजः ॥ ९ ॥

अभिपेतुस्तत[1]स्सर्वे तस्यामात्याः शुचिव्रतम्।
†अन्तकाले निपतितं ययातिमृषयो यथा ॥ १० ॥

‡शत्रुघ्नश्चापि भरतं दृष्ट्वा शोकपरिप्लुतम्।
[2]विसंज्ञो न्यपतत् भूमौ भूमिपालमनुस्मरन् ॥ ११ ॥

उन्मत्त इव निश्चित्तः विललाप सुदुःखितः।
स्मृत्वा पितु§र्गुणाङ्गानि तानि तानि [3]तदा तदा ॥ १२ ॥

तदा तदा—तस्मिन् तस्मिन् उपलालनकालभेदे गुणाङ्गानि—उपलालनस्याङ्गभूतानि कर्माणि—विचित्रवस्त्राभरणादिदानाङ्कारोपणालिङ्गनादि कर्माणि स्मृत्वा विललाप ॥ १२ ॥

मन्थराप्रभवस्तीव्रः कैकेयी[4]ग्राहसंकुलः।
वरदानमयोऽक्षोभ्यः अमज्जयच्छोकसागरः ॥ १३ ॥

वरदानमयत्वादक्षोभ्यः। अमज्जयदिति। अस्मानिति शेषः ॥

सुकुमारं च बालं च सततं लालितं त्वया।
क्व, तात! भरतं हित्वा विलपन्तं गतो भवान् ॥ १४ ॥

---

* पूर्वश्लोकान्तर्गत 'स' शब्दस्यास्य चाव्यवधानात् द्वितीयतच्छब्द इत्युक्तिः।
† अन्तकाले—पुण्यक्षयकाले निपतितं ययातिं ऋषयः—दौहित्रभूता इव—गो.
‡ भरतपतनावधि शत्रुघ्नस्य धैर्यं स्थितं, तत्पतनानन्तरं सोऽपि गलितधैर्योऽभूदिति भावः।
§ गुणाङ्गानि—गुणान् अङ्गानि च—गो.

[1] स्सचिवः—ङ. [2] निश्चित्तो—ङ, [3] तथा तथा—ङ. [4] ग्रह—ङ.

ननु! भोज्येषु पानेषु वस्त्रेष्वाभरणेषु च ।
*[1] प्रवारयति सर्वान्नः तन्नः कोऽद्य करिष्यति ॥ १५ ॥

प्रवारयतीति । बहून्याभरणादीनि दिव्यवस्तून्युपस्थाप्य 'अङ्ग बाल! इह किं तेऽपेक्षितं तद्गृहाण' इति प्रकर्षेणास्मदस्मदिष्टवरणं कारयति भवान्, तदतःपरमन्यः कः करिष्यति? ॥ १५ ॥

†अवदारणकाले तु पृथिवी नावदीर्यते ।
[2] विहीना या त्वया राज्ञा [3] धर्मज्ञेन महात्मना ॥ १६ ॥

त्वया विहीना या अवदारणकाल इति योजना ॥ १६ ॥

पितरि स्वर्गमापन्ने रामे चारण्यमाश्रिते ।
किं मे जीवितसामर्थ्यं प्रवेक्ष्यामि हुताशनम् ॥ १७ ॥
हीनो भ्रात्रा च पित्रा च शून्यामिक्ष्वाकुपालिताम् ।
अयोध्यां न प्रवेक्ष्यामि प्रवेक्ष्यामि तपोवनम् ॥ १८ ॥
तयोर्विलपितं श्रुत्वा व्यसनं चाप्यवेक्ष्य तत् ।
‡भृशमार्त[4]तरा भूयः सर्व एवानुगामिनः ॥ १९ ॥

अनुगामिनः—अनुचराः ॥ १९ ॥

---

* प्रवारयसि — प्रकर्षेण स्वयं ग्राहयसि—ती. गो. † या पृथिवी धर्मज्ञेन त्वया विहीना नावदीर्यते—न भिद्यते, स्वयमिति शेषः, सा अवदारणकाले तु—प्रलयकालेऽपि नावदीर्यते— नावदीर्यतेत्यर्थः—ती. गो. अथ वा धर्मज्ञेन त्वया विहीनत्वादेव प्राप्तेऽप्यवदारणकाले पृथ्वी नावदीर्यते—किमिदमाश्चर्यमन्याय्यं वेत्यर्थः । ‡ भृशमार्ततराः, बभूवुरिति शेषः ।

[1] प्रवारयसि, प्रचारयति—ङ. [2] या विहीना—ङ. [3] रामेण च—ङ.
[4] स्वरा—ङ.

ततो विषण्णौ श्रान्तौ च शत्रुघ्नभरतावुभौ ।
धरायां स्म व्यवेष्टेतां भग्नशृङ्गाविवर्षभौ ॥ २० ॥

व्यवेष्टेतां—व्यलुठेतामिति यावत् ॥ २० ॥

ततः प्रकृतिमान् वैद्यः पितुरेषां पुरोहितः ।
वसिष्ठो भरतं वाक्यं उत्थाप्य तमुवाच ह ॥ २१ ॥

प्रकृतिमान्—शुद्धसत्त्वप्रकृतिमान्, अत एव वैद्यः—विद्याशब्दात् 'प्रज्ञादिभ्यश्च' इत्यण्—सर्वज्ञ इति यावत्, 'सर्वज्ञभिषजौ वैद्यौ' ॥ २१ ॥

त्रयोदशोऽयं दिवसः पितुर्वृत्तस्य ते, विभो !
*सावशेषास्थिनिचये किमिह त्वं विलम्बसे ? ॥ २२ ॥

वृत्तस्य—अतीतस्य । सावशेषास्थिनिचये—चिताभस्मोद्धारभूशुद्धिलक्षणावशेषसहितः अस्थिनिचयः—अस्थिसञ्चयनाख्यं कर्म, तस्मिन् कर्तव्य इति शेषः ॥ २२ ॥

†त्रीणि द्वन्द्वानि भूतेषु प्रवृत्तान्यविशेषतः ।
तेषु चापरिहार्येषु नैवं भवितुमर्हसि ॥ २३ ॥

त्रीणि द्वन्द्वानीति । अस्ति जायते, वर्धते विपरिणमते, अपक्षीयते विनश्यति इत्येतानि भूतानां—प्राणिमात्रस्याविशेषतः प्रवृत्तानि भवन्ति । तेषु चापरिहार्येषु—अवर्जयप्राप्येषु सत्सु त्वं नैवं भवितुं—अत्यज्ञवदतिशोकाक्रान्ततया भवितुं नार्हसि ॥ २३ ॥

---

* दशाहमध्ये शास्त्रविहितं प्रधानावयवास्थिसञ्चयनं कृतम् । त्रयोदशदिवसे तद्देशीयशिष्टाचारप्राप्तस्थलशोधनमात्रं कृतमिति न स्मृतिविरोध इत्यप्याहुः—गो.

† अशनायापिपासे शोकमोहौ जरामृत्यू इत्युक्तानि त्रीणि द्वन्द्वानि—गो. त्रीणिद्वन्द्वानि जन्ममरणे सुखदुःखे लाभालाभे—ती.

सुमन्त्रश्चापि शत्रुघ्नं उत्थाप्याभिप्रसाद्य च ।
श्रावयामास तत्त्वज्ञः *सर्वभूत[1]भवाभवम् ॥ २४ ॥

सर्वभूतभवाभवमिति । वसिष्ठोपदिष्टरूपमिति शेषः ॥ २४ ॥

उत्थितौ च नरव्याघ्रौ प्रकाशेते यशस्विनौ ।
वर्षातपपरिक्लिन्नौ पृथगिन्द्रध्वजाविव ॥ २५ ॥
अश्रूणि परिमृद्नन्तौ रक्ताक्षौ दीनभाषिणौ ।
अमात्यास्त्वरयन्ति स्म तनयौ चापराः क्रियाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे सप्तसप्ततितमः सर्गः

परिमृद्नन्तौ—मार्जयन्ताविति यावत् । तनयौ—राजपुत्रौ । अपराः क्रिया इति । भस्मोद्धारभूसम्मार्जनक्षीरसेचनादिक्रियाः, उद्दिश्येति शेषः । तरु(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे सप्तसप्ततितमः सर्गः

अष्टसप्ततितमः सर्गः

[कुब्जापरिभवः]

†अथ यात्रां समीहन्तं शत्रुघ्नो लक्ष्मणानुजः ।
भरतं शोकसंतप्तं इदं वचनमब्रवीत् ॥ १ ॥

अथ कुब्जानिमित्तं रामविवासनमनुशोचता शत्रुघ्नेन दैवात्तत्रागतकुब्जाप्राणान्तपरिभवः । अथेत्यादि । यात्रां—रामसमीपयात्राम् । समीहन्तं—समीहमानमिति यावत् ॥ १ ॥

---

* सर्वभूतभवाभवं—सर्वप्राणिनामुत्पत्तिविनाशादियाथार्थ्यम् । † अथ—दशरथौर्ध्वदैहिकपरिसमाप्त्यनन्तरम् ।

[1] भवाभवौ—ङ.

गतिर्यः सर्वभूतानां* दुःखे, किं पुनरात्मनः।
स रामः सत्त्वसंपन्नः स्त्रिया प्रव्राजितो वनम् ॥ २ ॥

गतिः—दुःखापनोदनकता। किं पुनरात्मन इति। आवयो-रित्यर्थः। स राम इति। सर्वप्राणिदुःखापहर्ता ॥ २ ॥

†बलवान् वीर्यसंपन्नः लक्ष्मणो ‡नाम योऽप्यसौ।
किं न मोचयते रामं [1]कृत्वा स पितृनिग्रहम् ॥ ३ ॥

लक्ष्मणो नाम योऽप्यस्माकं भ्राताऽस्ति, रामं स वा पितृनिग्रहं—पितृशिक्षणं कृत्वाऽपि किं न मोचयते स्म वनवासात् ॥ ३ ॥

पूर्वमेव तु निग्राह्यः समवेक्ष्य नयानयौ।
उत्पथं यः समारूढः राजा नार्या वशं गतः ॥ ४ ॥

कथं पितृनिग्रहः शक्य इत्यत्राह—पूर्वमित्यादि। यो नो राजा नार्या वशं गतस्सन् उत्पथं समारूढो यतः, अतो लक्ष्मणेन स्वयं नयानयौ—अभिषेकविषयकनयानयौ समीक्ष्य—विचार्य, 'गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम्' इति शास्त्रं चानुसन्धाय रामप्रव्राजनात् पूर्वं तत्प्रसङ्गकाल एव निग्राह्यः—'नेदमुचितम्, तूष्णीमास्स्व' इति बलादेव च निवर्तनीय इत्यर्थः ॥ ४ ॥

---

*सर्वभूतानां—प्राणिमात्रस्य दुःखे सति यो गतिः, स आत्मनो दुःखे गतिरिति किं पुनः—किं वक्तव्यम्! एवं दुःखनिस्तारक्षमो रामः सत्त्वसंपन्नोऽपि—बलसंपन्नोऽपि स्त्रिया—अत्यन्ताबलया वनं प्रव्राजितः; इदमत्यन्तचित्रमिति भावः—गो.

†सत्त्वसंपन्नो रामोऽपि तूष्णीं अभूच्चेत वीर्यसंपन्नो लक्ष्मणोऽपि कुतस्तूष्णीमभूदिति भावः।

‡नामेति कुत्सने, 'नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने' इति वैजयन्ती—गो.

[1] कृत्वाऽपि—ङ.

इति संभाषमाणे तु शत्रुघ्ने लक्ष्मणानुजे ।
* प्राग्द्वारेऽभूत् तदा कुब्जा सर्वाभरणभूषिता ॥ ५ ॥

प्राग्द्वारेऽभूत् — शत्रुघ्नाधिष्ठितप्राग्द्वारे दैवादागताऽभूत् ॥ ५ ॥

लिप्ता † चन्दनसारेण राजवस्त्राणि बिभ्रती ।
विविधं विविधैस्तैस्तैः भूषणैश्च विभूषिता ॥ ६ ॥

राजवस्त्राणि — राजार्हाणि वस्त्राणि तथा ॥ ६ ॥

मेखलादामभिः चित्रैः अन्यैश्च शुभभूषणैः ।
बभासे बहुभिर्बद्धा रज्जुबद्धेव वानरी ॥ ७ ॥

वानरीति कुरूपत्वात् ॥ ७ ॥

तां समीक्ष्य तदा [1] द्वास्स्थां सुभृशं पापकारिणीम् ।
गृहीत्वा[2]ऽकरुणं कुब्जां शत्रुघ्नाय [3] न्यवेदयन् ‡ ॥ ८ ॥

अकरुणं — निर्दयं, बलादित्यर्थः ॥ ८ ॥

यस्याः कृते वने रामः न्यस्तदेहश्च वः पिता ।
सेयं पापा नृशंसा च तस्याः कुरु यथामति ॥ ९ ॥

यथामतीति । निग्रहमिति शेषः ॥ ९ ॥

शत्रुघ्नश्च तदाज्ञाय वचनं भृशदुःखितः ।
अन्तःपुरचरान् सर्वान् इत्युवाच [4] धृतं वचः ॥ १० ॥

धृतं–अवधृतं—निश्चितम् ॥ १० ॥

---

* राजगृहस्य सर्वस्यापि कैकेय्यधीनत्वात्, स्वस्य कैकेय्याश्रयधैर्याच्च निभृतं संचरन्ती कुब्जा तत्रागच्छदिति ॥ † चन्दनसारेण—चन्दनपङ्केन—गो. उत्तमचन्दनेनेति वा । ‡ तत्रस्था द्वारपालादय इति शेषः ।

[1] द्वास्स्थाः–ङ. [2] ऽकरुणां–ङ. [3] न्यवेदयत्–ङ. च. [4] द्रुतं–ङ.

तीव्रमुत्पादितं दुःखं भ्रातॄणां मे तथा पितुः ।
यया सेयं नृशंसस्य कर्मणः फलमश्नुताम् ॥ ११ ॥

अश्नुतां—तथा कर्तव्यं मयेति शेषः ॥ ११ ॥

एवमुक्त्वा तु तेनाशु सखीजनसमावृता ।
गृहीता बलवत् कुब्जा सा तद्गृहमनादयत् ॥ १२ ॥
ततः सुभृश[1]सन्त्रस्तः तस्याः सर्वः सखीजनः ।
क्रुद्धमाज्ञाय शत्रुघ्नं विपलायत सर्वशः ॥ १३ ॥
*[2] आमन्त्रयत कृत्स्नश्च तस्याः सर्वः सखीजनः ।
यथाऽयं समुपक्रान्तः निश्शेषान्नः करिष्यति ॥ १४ ॥

समुपक्रान्तः—संप्राप्तः ॥ १४ ॥

सानुक्रोशां † वदान्यां च धर्मज्ञां च यशस्विनीम् ।
कौसल्यां शरणं याम सा हि [3] नोऽस्तु ध्रुवा गतिः ॥ १५ ॥

सा हि नः—अस्माकं ध्रुवा गतिरिति तां शरणं जग्मुरिति शेषः ॥ १५ ॥

स च रोषेण ताम्राक्षः शत्रुघ्नः शत्रु[4]तापनः ।
विचकर्ष तदा कुब्जां क्रोशन्तीं पृथिवीतले ॥ १६ ॥

पृथिवीतले, पातयित्वेति शेषः ॥ १६ ॥

---

* आमन्त्रयत—अन्योन्यमाह्वयत—गो. † वदान्यां—वल्गुवाचं, 'वदान्यो वल्गुवागपि' इति वैजयन्ती—गो. उदारामिति वा ।

[1] सन्नद्धः—ङ. [2] अमन्त्रयत—ङ. [3] नोऽस्ति—ङ. [4] शासनः—ङ.

तस्या ह्याकृष्यमाणाया मन्थरायास्ततस्ततः ।
चित्रं बहुविधं भाण्डं पृथिव्यां तद्व्यशीर्यत ॥ १७ ॥

'भाण्डं भूषणमात्रेऽपि' इति विश्वः ॥ १७ ॥

तेन भाण्डेन [1]संस्तीर्णं श्रीमद्राजनिवेशनम् ।
अशोभत तदा भूयः शारदं गगनं यथा ॥ १८ ॥
स बली बलवत्क्रोधात् गृहीत्वा पुरुषर्षभः ।
कैकेयीमभिनिर्भर्त्स्य बभाषे *परुषं वचः ॥ १९ ॥

कैकेयीमभिनिर्भर्त्स्येति । कुब्जाया मोचनार्थमागतामिति शेषः ॥

तैर्वाक्यैः परुषैर्दुःखैः कैकेयी भृशदुःखिता ।
शत्रुघ्नभय[2]वित्रस्ता पुत्रं शरणमागता ॥ २० ॥

परुषैः—मर्मग्राहिभिः, अत एव दुःखैः । भयवित्रस्तेति । कुब्जारक्षणार्थमागतेति कोपात् कैकेयीं च प्रहर्तुमुद्यतवान् शत्रुघ्न इति स्पष्टम् ॥ २० ॥

[3]तां प्रेक्ष्य भरतः क्रुद्धं शत्रुघ्नमिदमब्रवीत् ।
अवध्याः सर्वभूतानां प्रमदाः क्षम्यतामिति ॥ २१ ॥
हन्यामहमिमां पापां कैकेयीं दुष्टचारिणीम् ।
यदि मां धार्मिको रामः †नासूयेन्मातृघातकम् ॥ २२ ॥

---

* वाक्यानामननुवादः अत्यन्तपारुष्यादनुवादानर्हत्वतः, अशक्त्या वा स्यात् ।
† नासूयेत्—न गर्हेत—गो.

[1] संकीर्णं—ङ. [2] संत्रस्ता—ङ. [3] तं—ङ.

हन्यामहमिति । हे शत्रुघ्न ! अहमेवेमां हन्याम्, यदि मातृघातकं मां प्रति नासूयेत्—न कुप्येदिति यावत् ॥ २२ ॥

इमामपि हतां कुब्जां यदि जानाति राघवः ।
त्वां च मां च हि धर्मात्मा नाभिभाषिष्यते ध्रुवम् * ॥

कुब्जामपि हतां यदि जानाति, तदा स्त्रीघातिनाविति त्वां च मां चैव नाभिभाषिष्यते ॥ २३ ॥

भरतस्य वचः श्रुत्वा शत्रुघ्नो लक्ष्मणानुजः ।
न्यवर्तत ततो † रोषात् तां मुमोच च मन्थराम् ॥ २४ ॥

सा पादमूले कैकेय्या मन्थरा निपपात ह ।
निश्वसन्ती सुदुःखार्ता कृपणं विललाप च ॥ २५ ॥

शत्रुघ्न‡विक्षेपविमूढसंज्ञां
समीक्ष्य कुब्जां भरतस्य माता ।
शनैः समाश्वासयदार्तरूपां
क्रौञ्चीं §[1]विलग्नामिव वीक्षमाणाम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे अष्टसप्ततितमः सर्गः

तार(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे अष्टसप्ततितमः सर्गः

---

* इति शत्रुघ्नमब्रवीदित्याकर्षः । † रोषादेव, न तु शमेनेति भावः । ‡ विक्षेपः—भ्रामणं—गो. § विलग्नां—वागुरालग्नामिति भावः, विविग्नामिति पाठे कम्पवतीमित्यर्थः—गो.

[1] विविग्नामिव—ङ.

एकोनाशीतितमः सर्गः

[रामानयनोद्यमः]

ततः प्रभातसमये दिवसे च चतुर्दशे ।
समेत्य [1]राजकर्तारः भरतं वाक्यमब्रुवन् ॥ १ ॥

अथ राजकर्तृभिरभिषेकप्रार्थितभरतेनानौचित्यतोऽभिषेकनिवर्तनपूर्वकं रामानयनायोद्युज्यते । तत इत्यादि ॥ १ ॥

गतो दशरथः स्वर्गं यो नो [2]गुरुतरो गुरुः ।
रामं प्रव्राज्य वै ज्येष्ठं लक्ष्मणं च महाबलम् ॥ २ ॥

अतिशयेन गुरुः गुरुतरः, ' राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम् ' इत्यादेर्मातापित्रादेरपि स्वात्मरक्षासाक्षात्साधनत्वात् राजा गुरुः । ज्येष्ठः—राज्यार्हः ॥ २ ॥

त्वमद्य भव नो राजा, राजपुत्र ! महायशः !
***सङ्गत्या नाप्नोति राज्यमेतदनायकम् ॥ ३ ॥**

---

* संगत्या—सामन्तामात्यादीनामैकमत्येन अनायकमप्येतद्राज्यं नापराध्नोति—राज्यस्थजनजातं अन्योन्यं न द्रुह्यतीत्यर्थः । यद्वा—एव राज्यमनायकमपि संगत्या इदं तु राज्यं दैवयोगेन न नश्यति । अतस्त्वं नो राजा भवेति सम्बन्धः—ती. दैवगत्या नापराध्नोति—न विनश्यति । सर्वमपि राज्यं नायकरहितं नश्यति, ' राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम् ' इति मातापित्रादेरपि राज्ञ एवान्तरङ्गरक्षकत्वोपदेशात् अनायकमपि एतद्राज्यं संगत्या—दैवयोगेन नापराध्नोति—राज्यस्य जनजातमन्योन्यं न द्रुह्यतीत्यर्थः—गो. वस्तुतस्तु—संगतिः—सङ्घटना—सन्निवेशः । इदं राज्यं त्वनायकं वर्तते । भवत्प्रार्थनामन्तरैवागतं च वर्तते । एतादृशसन्निवेशविशेषे एतद्राज्यस्वीकारे भवान् नापराध्नोति—भवतः अपराधप्रसक्तिरेव नास्ति, अतः स्वीक्रियतामित्यर्थः स्वरसः प्रतिभाति ।

[1] राज्य—ङ.　[2] राजा गुरुस्तव, गुरुतरो महान्—ङ.

अपि तु तस्य वनवासं प्रति सम्मत्या–पितुराज्ञासंगमात्, तव च राज्यं प्रति पित्राज्ञासंगमात्, पित्राज्ञाया उभाभ्यामपि कर्तव्यत्वात्, अतः पितुराज्ञामूलतो राजतायां भवान् नापराध्नोति—धर्मविरोधं ज्येष्ठविरोधं लोकविरोधं च न प्राप्नोति। अतः न्यायत एव त्वयि राजनि सति एतद्राज्यं चाराजकं सत् नापराध्नोति—न नश्यति। बहुवदति सम्मत्येत्यत्रान्यः*, न तत् किमपि सम्मतं पश्यामः ॥ ३ ॥

आभिषेचनिकं सर्वमिदमादाय, राघव !
प्रतीक्षते त्वां स्वजनः श्रेणयश्च, नृपात्मज ! ॥ ४ ॥

आभिषेचनिकं—अभिषेकप्रयोजनं पदार्थजातं, रामाभिषेकविषयकं, 'तत्प्रयोजनम्' इति ठक्। स्वजन इति—स्वकीयमन्त्रिपुरोहितादयः। श्रेणयः—पौराः ॥ ४ ॥

राज्यं गृहाण, भरत ! पितृपैतामहं ध्रुवम् ।
अभिषेचय चात्मानं पाहि चास्मान्, नरर्षभ ![1] ॥ ५ ॥
†आभिषेचनिकं भाण्डं कृत्वा सर्वं प्रदक्षिणम् ।
[2]भरतस्तं जनं सर्वं प्रत्युवाच [3]धृतव्रतः ॥ ६ ॥

भाण्डं—उपकरणम् ॥ ६ ॥

---

* महेश्वरतीर्थः, गोविन्दराजो वा। † 'सर्वमिदमादाय' इत्यनुपदमुक्त्या तैस्तत्रैवानीतं सर्वमिति गम्यते।

[1] एतदनन्तरं- 'एवमुक्तः शुभं वाक्यं द्युतिमान् सत्यवाक् शुचिः' इत्यधिकं–ङ.
[2] एतदर्धस्थाने 'भरतः स्वं जनं सर्वं सरोषमभिवीक्ष्य च। क्षणं विधाय कर्णौ सः प्रत्युवाच धृतव्रतः' इत्यर्धद्वयं दृश्यते–क. [3] दृढव्रतः–क.

ज्येष्ठस्य राजता नित्यं उचिता हि कुलस्य नः ।
नैवं भवन्तो मां वक्तुं अर्हन्ति * कुशला जनाः ॥ ७ ॥
रामः पूर्वो हि [1] नो भ्राता भविष्यति महीपतिः ।
अहं त्वरण्ये वत्स्यामि वर्षाणि नव पञ्च च ॥ ८ ॥

अहं त्वरण्ये वत्स्यामीति । 'पितृवचनं मया परिपालनीयम्' इति रामो वदति चेत् तत्प्रतिनिधित्वेनेति शेषः ॥ ८ ॥

युज्यतां महती सेना चतुरङ्गमहाबला ।
आनयिष्याम्यहं ज्येष्ठं भ्रातरं राघवं वनात् ॥ ९ ॥
आभिषेचनिकं चैव सर्वमेतत् † उपस्कृतम् ।
पुरस्कृत्य गमिष्यामि रामहेतोर्वनं प्रति ॥ १० ॥

रामहेतोरिति । रामाभिषेकार्थमित्यर्थः ॥ १० ॥

तत्रैव तं नरव्याघ्रं अभिषिच्य ‡ पुरस्कृतम् ।
[2] आनयिष्याम्यहं रामं हव्यवाहमिवाध्वरात् ॥ ११ ॥

हव्यवाहमिवाध्वरादिति । अध्वरात्---महायज्ञशालायाः स्वाग्निहोत्रगृहमिवेत्यर्थः ॥ ११ ॥

न सकामां करिष्यामि [3] स्वामिमां § पुत्रगन्धिनीम् ।
वने वत्स्याम्यहं दुर्गे रामो राजा भविष्यति ॥ १२ ॥

पुत्रगन्धिनीमिति पाङ्क्तः पाठः ॥ १२ ॥

---

* कुशलाः—स्वाधीनमतयः, न्यायपरा वा भवादृशा इत्यर्थः । † उपस्कृतं—संनद्धं, अत्रानीतं वा । ‡ पुरस्कृतं—पूजितं, 'पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते' इति वैजयन्ती । यद्वा-पुरस्कृतं-स्वजनदर्शनेनाभिमुखीकृतम्-गो. § मातृगन्धिनीं —केवलमातृव्यपदेशां, लेशमात्रमातृभावामिति वा, 'गन्धो लेशे महीगुणे' इति वैजयन्ती-गो.

[1] मे-ङ. [2] अनेष्यामि तु वै-ङ. [3] मातरं पुत्रगर्धिनीम्, स्वामिमां मातृगन्धिनीम्-ङ.

क्रियतां शिल्पिभिः पन्थाः समानि विषमाणि च ।
रक्षिणश्चानुसंयान्तु पथि दुर्ग[1]विशारदाः ॥ १३ ॥

रामो राजा भविष्यति, अतो रामसमीपं राजोचितपरिकरोपेततया गन्तव्यम्, अतः पथि शोधः क्रियतामिति नियोजयति—क्रियतामित्यादि । शिल्पिनः—खनकादयः । विषमाणि च—निम्नोन्नतान्यपि स्थलानि समानि क्रियन्ताम् । रथशकटीसुखगमनार्थमित्यर्थः । पथि वर्तमानस्य दुर्गस्य—मलिम्लुचादिना गन्तुमशक्यप्रदेशस्य रक्षणे विशारदाः ॥ १३ ॥

एवं संभाषमाणं तं *रामहेतोर्नृपात्मजम् ।
प्रत्युवाच जनः सर्वः श्रीमद्वाक्यमनुत्तमम् ॥ १४ ॥

एवं संभाषमाणं तं प्रति सर्वो जनः श्रीमत्—शुभं अनुत्तमं वाक्यमुवाच ॥ १४ ॥

एवं ते भाषमाणस्य †पद्मा श्रीरुप[2]तिष्ठताम् ।
यस्त्वं ज्येष्ठे ‡नृपसुते पृथिवीं दातुमिच्छसि ॥ १५ ॥

किमुवाचेत्यतः—एवमित्यादि । एवं रामराज्यं भाषमाणस्य ते पद्माख्या पद्मचिह्ना च श्रीः त्वामुपतिष्ठतां रामानुग्रहादिति जनस्यायमाशीर्वादः भरतं प्रति । एवमाशीर्वादार्हधार्मिकस्त्वं जनो

---

* रामहेतोः संभाषमाणमित्यन्वयः । † पद्मा—पद्महस्ता–ती. पद्मालया–गो.
‡ नृपसुते—चतुर्थ्यर्थे सप्तमी–ती.

[1] विचारकाः–ङ. [2] तिष्ठताव–ङ.

दर्शयति—यस्त्वमित्यादि। दातुमिच्छसीति यत् अतः श्रीः—इहामुत्र च त्वामुपतिष्ठतामित्यन्वयः ॥ १५ ॥

अनुत्तमं तद्वचनं [1]नृपात्मजः
प्रभाषितं *संश्रवणे निशम्य च।
प्रहर्षजास्तं प्रति बाष्पबिन्दवः
†निपेतु[2]रार्याननेत्रसंभवाः ॥ १६ ॥

नृपात्मजः जनैः प्रभाषितमनुत्तमं तद्वचनं संश्रवणे—सम्यक् श्रवणविषये प्राप्तं निशम्य—श्रुत्वा तं प्रति तेनैव हेतुना लक्षणेन, प्रतिर्लक्षणे, कर्मप्रवचनीयत्वात् तमिति द्वितीया, आर्यस्य—पूज्यस्य— भरतस्य यदार्याननं—पूज्यं मुखं, जनाशीर्वादसन्तोषोपलक्षितत्वात् पूज्यत्वं मुखस्य प्राक् दुःखदुर्दर्शनस्य, तादृशाननवर्तिनेत्रसंभवाः—आनन्दजा इति यावत्। तदेव स्पष्टीकृतं—प्रहर्षजा इति। बाष्पबिन्दवः पेतुरिति। अत्रान्यः—श्लोकोऽयं व्यर्थः। स्थितस्य गतिश्चिन्तनीयेति किञ्चित् व्याख्यातमित्यवोचत। एवं चेत् विनाऽपि सर्वमपि रामायणं संक्षेपमात्रतः सर्वार्थस्य सिद्धत्वात् सर्वोऽपि व्यर्थः तस्य। अतस्तस्य स्थितगतिचिन्तनाऽसौ यथाकथञ्चित्। नापि च व्यर्थः; भरतसौमुख्यस्यानुक्तस्य प्रवृत्तये अवश्यवक्तव्यत्वात् ॥ १६ ॥

---

* संश्रवणे—रामानयनप्रतिज्ञाविषये -**ती. गो.** निशम्य स्थितानामिति शेषः।
† आर्येत्यविभक्तिकनिर्देशः, आर्याणामिति यावत्-**गो.** तं प्रति—भरतमधिकृत्येत्यर्थः।

[1] नृपात्मजप्रभाषितं -**ङ.** [2] रन्यां जननेत्रसंभवाः-**ङ.**

ऊचुस्ते वचनमिदं निशम्य हृष्टाः
सामात्याः [1] सपरिषदो वियातशोकाः ।
पन्थानं, नरवर ! * भक्तिमान् जनश्च,
व्यादिष्टास्तव वचनाच्च शिल्पिवर्गः ॥ १७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकोनाशीतितमः सर्गः

इदं वचनं—रामानयनवचनम् । विशेषेण यातः—अपगतः शोकः येषां ते तथा—वियातशोकाः, राजकर्तार इति शेषः । हे नरवर! तव वचनादेव रामे त्वयि च भक्तिमान् शिल्पिवर्गः दुर्गे पथि रक्षी जनश्च पन्थानं करोत्वित्यूचुः । सेक(१७)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकोनाशीतितमः सर्गः

अशीतितमः सर्गः

[मार्गसंस्कारः]

अथ भूमिप्रदेशज्ञाः सूत्रकर्मविशारदाः ।
स्वकर्माभिरताः शूराः खनका यन्त्रकास्तथा ॥ १ ॥

अथ भरतनियुक्तशिल्प्यादिभिः मार्गशोधनम् । अथेत्यादि । भूमिप्रदेशं निम्नोन्नतादिप्रदेशं जानन्तीति भूमिप्रदेशज्ञाः † । सूत्रकर्मणि — निर्जलस्थलेष्वगाधवापीकूपादिजलोद्धारसूत्रकर्माणि — यन्त्र-

---

* भक्तिमान् जनः, शिल्पिवर्गश्च व्यादिष्टाः—प्रचोदिताः, तत्तत्कृत्येष्वित्यर्थः । रामानयनोत्साहवशात् 'क्रियतां शिल्पिभिः पन्थाः' इति भरतकथनमात्रेण अमात्याः दक्षाः तत्क्षण एव पार्श्वस्थसन्देशवाहकादिद्वारा मार्गसमीकरणार्थं आज्ञां प्रेषयित्वा 'व्यादिष्टाः' इत्यवदन् । कार्यनिष्पत्तिदार्ढ्याय च 'भक्तिमान्' इति पदम् ।

† यद्वा—नानादेशविदः—गो.

[1] सपरिषदोऽपि—ङ.

निर्माणे समर्थास्तथा —सूत्रकर्मविशारदाः । स्वकर्माभिरताः — अध्वपालनरूपस्वकर्माभिरताः । यन्त्रकाः — महाप्रवाहमहाकुल्यातरणाय काष्ठादिना उपरि यन्त्रप्रवर्तकाः, பாலம் ॥ १ ॥

कर्मान्तिकाः स्थपतयः पुरुषाः [1] पथिकोविदाः ।
तथा वर्धकयश्चैव मार्गिणो वृक्षतक्षकाः ॥ २ ॥

कर्मान्तिकाः—भृतिजीवकर्मकाः । *स्थपतयः —रथादिप्रवृत्तिसन्नाहकाः । पथिप्रदर्शनकोविदाः —पथिकोविदाः । वर्धकिनः— तक्षकाः । † मार्गिणः — तत्तद्वनमार्गविशेषरक्षानियुक्ताः— அப்பர் । वृक्षतक्षकाः—वृक्षच्छेदकाः— ஆசாவர் ॥ २ ॥

[2] कूपकाराः सुधाकाराः वंशकर्मकृतस्तथा ।
समर्था ये च [3] द्रष्टारः पुरतस्ते प्रतस्थिरे ॥ ३ ॥

सुधाकाराः—वज्रलेपकाः । वंशकर्मकृतः—वंशदलैः कटशूर्पपिटकादिकृतः— மெடக்காரர் । चर्मकृतः—पल्ययनादिकृतः— முச்சியர் । समर्थाः — ऋजुमार्गदर्शनसमर्थाः ‡ । द्रष्टारः— पूर्वानुभूतमार्गाः ॥ ३ ॥

स तु हर्षात् § तमुद्देशं जनौघो विपुलः प्रयान् ।
अशोभत महावेगः समुद्र इव पर्वणि ॥ ४ ॥

स त्विति । एवं मार्गसन्नाहप्रवृत्तः जनो य इत्यर्थः । प्रयान्—गच्छन् । पर्वणि सागरस्येव महावेगः—महावेगवान् ॥

---

* स्थपतयः—कारवः— गो. † मार्गिणः—मार्गसमीकरणसमर्थाः—गो.
‡ कार्यान्तरेषु समर्थाः—गो. अथ वा—समर्थाः—दक्षाः द्रष्टारः—पर्यवेक्षकाः ।
§ तमुद्देशं रामानयनोद्देशं प्रति प्रयान्—गच्छन्—प्रवर्तमान इति यावत् ।

[1] यन्त्रकोविदाः—ङ. [2] सूपकराः—ङ. [3] कर्तारः—ङ.

त *स्ववारं समास्थाय वर्त्मकर्मणि कोविदाः ।
करणैर्विविधोपेतैः पुरस्तात् संप्रतस्थिरे ॥ ५ ॥

ते—मार्गशोधकाः स्ववारं समास्थाय—स्वशोध्यमार्गदेश-शोधने अन्योन्यपर्यायकरणं प्राप्य करणैः—साधनैः विविधोपेतैः—नानाप्रकारोपेतैः—खनित्रकुद्दालदात्रादिनानावान्तरभेदयुक्तैरित्यर्थः ॥

लतावल्लीश्च गुल्मांश्च स्थाणूनश्मन एव च ।
†[1]जवनं चक्रिरे मार्गं छिन्दन्तो विविधान् द्रुमान् ॥ ६ ॥

लताः–शाखालताः–வளார் । स्थाणून्—'स्थाणुरस्त्री ध्रुवः शङ्कुः'—கட்டை । जवनम्—जवगमनार्हं ॥ ६ ॥

‡अवृक्षेषु च देशेषु केचिद्वृक्षानरोपयन् ।
केचित् कुठारैष्टङ्कैश्च दात्रैश्छिन्दन् क्वचित् क्वचित् ॥ ७ ॥

'टङ्कः' पाषाणभेदनः—கல்லுளி । छिन्दन्—अच्छिन्दन्निति यावत ॥ ७ ॥

§अपरे वीरणस्तम्बान् बलिनो बलवत्तराः ।
विधमन्ति स्म दुर्गाणि स्थलानि च ततस्ततः ॥ ८ ॥

---

* स्ववारं–स्वस्वसमूहं–'वारसंघातसञ्चयाः' इत्यमरः–तीं. स्वस्ववाटिकां वा । † वेगवाचि जवनशब्दस्यापि सत्वात् त्वरितं यथा तथा चक्रिरे इति क्रियाविशेषणं वा । ‡ छायार्थमिति भावः । § बलिनः–रूढमूलान् छेत्तुमशक्यान् वीरणस्तम्बान्–वीरणतृणकाण्डान् विधमन्ति स्म–अदहन् । दुर्गाणि–गन्तुमशक्यानि निम्नोन्नतस्थलानि स्थलानि–समानि चक्रुरिति शेषः–गो. यद्वा–वीरणस्तम्बान् अच्छिन्दन्–इति पूर्वेणान्वयः । दुर्गाणि स्थलानि विधमन्ति स्म–सुगमानि चक्रुरिति यावत् ।

[1] जनास्ते चक्रिरे, वनपाश्चक्रिरे–ङ.

'स्याद्वीरणं वीरतरुः'—விழல் । दुर्गाणि स्थलानीति । उन्नतप्रदेशानीति यावत् ॥ ८ ॥

अपरेऽपूरयन् कूपान् पांसुभिः *[1]श्वभ्रमायतम् ।
निम्नभागांस्ततः केचित् समान् चक्रुः समन्ततः ॥ ९ ॥
†बबन्धुर्बन्धनीयांश्च क्षोद्यान् सञ्चुक्षुदुस्तदा ।
बिभिदुर्भेदनीयांश्च तांस्तान् देशान्नरास्तदा ॥ १० ॥

बन्धनीयान्—सन्तरणाय बन्धनीयप्रदेशान् । क्षोद्यान्—शर्कराभूयिष्ठप्रदेशान् । जलनिर्गमार्थं भेदनीयप्रदेशाः—भेदनीयाः ॥

अचिरेणैव कालेन परिवाहान् बहूदकान् ।
चक्रुर्बहुविधाकारान् सागरप्रतिमान् बहून् ॥ ११ ॥

परिवाहाः—कुल्याः ॥ ११ ॥

निर्जलेषु च देशेषु खानयामासुरुत्तमान् ।
उदपानान् बहुविधान् वेदिकापरिमण्डितान् ॥ १२ ॥

खानयामासुरिति । अखनन्निति यावत् । उदपानान्—अधिकरणे ल्युट्, 'पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा' । बहुविधानिति । वापीकूपादिनानाप्रकारान् । वेदिकाभिः परितो मण्डिताः—अलङ्कृताः; उदपानविशेषणमिदम् ॥ १२ ॥

‡ससुधाकुट्टिमतलः प्रपुष्पितमहीरुहः ।
मत्तोद्घुष्टद्विजगणः पताकाभिरलङ्कृतः ॥ १३ ॥

---

* आयतं—विपुलमपि श्वभ्रं-गर्तं च अपूरयन् । † मार्गसञ्चलद्दलर्यादीनां यासां नाशः नातीवापेक्षितः तादृश्यः मार्गानिरोधाय बबन्धुरिति वा । भेदनीयाः—मार्गमध्यस्थबृहच्छिलादयो वा । ‡ श्लोकद्वयमेकान्वयम् ।

[1] धूलिशर्करैः—ङ.

चन्दनोदकसंसिक्तः * नानाकुसुमभूषितः ।
बह्वशोभत सेनायाः पन्थाः [1] सुरपथोपमः ॥ १४ ॥

ससुधाकुट्टिमतलः —— तत्तन्निवासस्थलविशेषेषु ससुधातलः, सकुट्टिमतलश्च, 'कुट्टिमोऽस्त्री निबद्धा भूः' களவரிசைப்படுத்தின இடம் ॥ १३-१४ ॥

† आज्ञाप्याथ ‡ यथाऽऽज्ञप्तियुक्तास्तेऽधिकृता नराः ।
रमणीयेषु देशेषु बहुस्वादुफलेषु च ॥ १५ ॥
यो निवेशस्त्वभिप्रेतः भरतस्य महात्मनः ।
भूयस्तं [2] भूषयामासुः भूषाभि§ [3] र्भूषणोपमम् ॥ १६ ॥

यथाज्ञप्तियुक्ताः——यथाऽऽज्ञप्तं संपादितमार्गशोधनकृत्याः ते अधिकृता नराः निर्वृत्तमार्गशोधनमाज्ञाप्य भरतस्य मार्गवर्तिनं निवेशनं भूयो भूषयामासुः, 'निवेशः शिबिरं षण्डे'। भूषणोपमं——मार्गालङ्कारसदृशं, निवेशविशेषणमिदम् ॥ १५-१६ ॥

नक्षत्रेषु प्रशस्तेषु मुहूर्तेषु च ‖ तद्विदः ।
निवेशान् स्थापयामासुः भरतस्य महात्मनः ॥ १७ ॥
¶ बहुपांसुचयाश्चापि परिखापरिवारिताः ।
तत्रेन्द्र [4] नीलप्रतिमाः प्रतोलीवरशोभिताः ॥ १८ ॥

---

* पूर्वं पुष्पितवृक्षाः उक्ताः, अत्र तु प्रकीर्णकुसुमानि विवक्षितानि । † श्लोकद्वयमेकान्वयम् । ‡ यथाज्ञप्ति—यथामति आज्ञाप्य—कर्तुं नियम्य । § भूषणोपमं – भूषणभूतं, स्वतोऽलङ्कृतमिति यावत्—**गो.** ‖ तद्विदः—वास्तुशास्त्रज्ञाः—**गो.** ¶ श्लोकत्रयं एकं वाक्यम् । पांसुशब्देनात्र सूक्ष्मसिकता उच्यन्ते । इन्द्रकीलप्रतिमाः – इन्द्रकीलपर्वतसदृशाः—**गो.**

[1] स्वर्गपथो—ङ. [2] शोभयामासुः—ङ. [3] स्त्रिदिवोपमम्—ङ. [4] कील—ङ.

परिखा इति। भित्त्यग्रे खाताः पर्यन्तप्रदेशा इत्यर्थः। इन्द्रनीलनिर्मिताः प्रतिमाः–चित्रप्रतिमाः येषु निवेशेषु ते तथा। 'रथ्या प्रतोली'—अमरः ॥ १८ ॥

प्रासादमालासंसक्ताः *सौधप्राकारसंवृताः।
पताकाशोभिताः सर्वे सुनिर्मितमहापथाः ॥ १९ ॥

संसक्ताः—संयुक्ताः। 'सौधोऽस्त्री राजसदनम्' तदपेक्षित-प्राकारेण संवृताः ॥ १९ ॥

[1]वितर्दिभिरिवाकाशे विटङ्काग्रविमानकैः।
समुच्छ्रितैर्निवेशास्ते बभुः शक्रपुरोपमाः ॥ २० ॥

आकाशे वितर्दिभिरिव–धिष्ण्यैरिव स्थितैः। विटङ्काग्राणि–'कपोतपालिकायां तु विटङ्कं पुंनपुंसकम्'–परितः अग्रदेशे विटङ्कवन्ति विमानानि–सप्तभूमिकाः प्रासादास्तथा। उपलक्षिता इति शेषः ॥ २० ॥

[2]क्वचिद्धर्षनिवेशार्थं मठा वेदविभूषिताः।
क्वचिदापणपण्यानि पथि कृत्वाऽर्थराशयः।
दर्शयांचक्रुरत्यर्थं जनाः केचित् पुरे तथा ॥ २१ ॥
†जाह्नवीं तु समासाद्य विविधद्रुमकाननाम्।
शीतलामलपानीयां [3]महामीनसमाकुलाम् ॥ २२ ॥

---

* सौधाः—सुधाधवलिताः–गो. † समासाद्य—अवधीकृत्य, तत्पर्यन्तामित्यर्थः—निवेशा बभूवुरिति पूर्वेणान्वयः, उत्तरेण वा। गङ्गाविशेषणैः ततः परं निवेशकरणाशक्यत्वं द्योत्यते–गो.

[1] विलग्नाग्र–ङ. [2] एतदादि श्लोकत्रयं कुत्रचिन्नास्ति–ङ. [3] महानन–ङ.

स चन्द्रतारागणमण्डितं यथा
नभः क्षपायाममलं विराजते ।
नरेन्द्रमार्गः स तथा व्यराजत
क्रमेण रम्यः शुभशिल्पिनिर्मितः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे अशीतितमः सर्गः

उच्यमानलक्षणां जाह्नवीमभिव्याप्य प्रवर्तितो नरेन्द्रमार्ग इति योजना । गोत्र(२३)मानः सर्गः ॥ २३ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे अशीतितमः सर्गः

एकाशीतितमः सर्गः

[सेनासन्नाहः]

ततो *नान्दीमुखीं[1] रात्रिं भरतं सूतमागधाः ।
तुष्टुवु[2]स्सविशेषज्ञाः स्तवैर्मङ्गलसंहितैः ॥ १ ॥

अथ मन्त्रिपुरोहितैः स्वराजशासनानुरूपव्यवहारप्रवृत्तिः । तत इत्यादि । भरताभिषेकाय वसिष्ठेन कृतनान्दीमुखाद्यभ्युदयवतीं रात्रिं—रात्र्यवसानमयस्वसेवाकालं प्राप्य सूतादयस्तुष्टुवुः । अत्र नान्दीमुखशब्देन स्वमुखमितस्ततः †परोऽताडयत् । न किमपि

---

* नान्दीमुखीं—रामानयनाभ्युदयप्रारम्भयुक्तां, यद्वा भरताभिषेकाय वसिष्ठेन कृतनान्दीमुखाभ्युदययुक्तां, यद्वा शोकापगमाय कृताभ्युदयामित्यर्थः । रात्रिं—रात्रौ, अपररात्र इत्यर्थः—गो. अथ वा 'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रवर्तते । देवद्विजनृपादीनां तस्मान्नान्दीति कीर्त्यते' इति भरतवचनात् राजस्तुत्युपक्रमार्हः कालः 'नान्दीमुखीं रात्रिं' इत्यनेनोच्यते । †प्रायः गोविन्दराजः ।

[1] शर्वरी—ज. [2] र्वाग्विशेषज्ञाः—ङ.

तत्सङ्गतम् । सविशेषं—राजनि राजपुत्रे वा अपेक्षितविशेषसहितं स्तवं जानन्तीति—सविशेषज्ञाः ॥ १ ॥

सुवर्ण*कोणाभिहतः प्राणदद्यामदुन्दुभिः ।
दध्मुः शङ्खांश्च शतशः †[1]वाद्यांश्चोच्चावचस्वरान् ॥ २ ॥

यामावसानसूचको दुन्दुभिः—यामदुन्दुभिः । उच्चावचस्वरान् वाद्यान्—वाद्यविशेषान् दध्मुरिति शेषः ॥ २ ॥

स तूर्यघोषः सुमहान् दिवमापूरयन्निव ।
भरतं शोकसन्तप्तं भूयः शोकै‡[2]ररन्धयत् ॥ ३ ॥

शोकैः—शोकोत्पादनेन हेतुना अरन्धयत्—'रध पाकहिंसयोः', 'रधिजभोः—' इति नुम्; हिनस्ति स्मेति यावत् ॥ ३ ॥

ततः प्रबुद्धो भरतः तं घोषं सन्निवर्त्य च ।
नाहं राजेति चाप्युक्त्वा शत्रुघ्नमिदमब्रवीत् ॥ ४ ॥
पश्य, शत्रुघ्न! कैकेय्या §लोकस्यापकृतं महत् ।
विसृज्य मयि दुःखानि राजा दशरथो गतः ॥ ५ ॥

---

* वादनदण्डः—कोणः । † नादान्-नाद्यन्ते एभिरिति नादाः, काहल्यादयः, तान्-गो. यद्यपि प्रपूर्वसर्ग एव भरतेन स्वाभिषेकः प्रतिषिद्धः; अथापि तत्र 'समेत्य राजकर्तारः' इत्येव दर्शनात्, तत्र सामान्यैः राज्यनिर्वाहकैरेव भरतः प्रार्थित इति गम्यते, न तु वसिष्ठेनापि । उत्तरत्रापि तत्सर्गे 'प्रत्युवाच जनः सर्वः' इत्येव दृश्यते । एवञ्च सर्वं जानन्नपि वसिष्ठः स्वकर्तव्यत्वेन भरताभिषेकं स्वयं निश्चित्य भरतमाहूयादिदेशेति अत्र कथ्यत इति न विरोधः । इदमेवाभिप्रेत्यास्मिन् सर्गे 'वसिष्ठो राजधर्मवित्' इत्युक्तमिति भाति ॥ ‡ अरन्धयत्—व्यदारयत्-गो. § लोकस्य-सूतमागधादेः, यद्वा जनस्य-गो.

[1] नादांश्चो-ङ. [2] ररन्धयत्, रवर्धयत्, रजृंभयत्-ङ.

कैकेय्या हेतुभूतया जायमानं लोकस्य—सूतादेः अपकृतं—अनुचितं कर्म पश्य ॥ ५ ॥

तस्यैषा धर्मराजस्य धर्ममूला महात्मनः ।
परिभ्रमति राजश्रीः नौरि*[1]वाकर्णका जले ॥ ६ ॥

किं तत्? इत्यतः—तस्येत्यादि । यो गतस्तस्येति योजना । न विद्यते कर्णकः–नाविकः यस्याः सा अकर्णका नौः, बहुपरिव्राजकवत् सुपः परत्वादित्वं न ॥ ६ ॥

यो हि नः सुमहान्नाथः सोऽपि प्रव्राजितो वनम् ।
अनया धर्ममुत्सृज्य मात्रा मे राघवः †स्वयम् ॥ ७ ॥
इत्येवं भरतं प्रेक्ष्य विलपन्तं [2]विचेतनम् ।
[3]कृपणं रुरुदुः सर्वाः [4]सस्वरं योषितस्तदा ॥ ८ ॥
‡तथा तस्मिन् विलपति वसिष्ठो राजधर्मवित् ।
सभामिक्ष्वाकुनाथस्य प्रविवेश महायशाः ॥ ९ ॥

राज्ञः पुरोहितेन कर्तव्यः धर्मः—राजधर्मः, तं वेत्तीति राजधर्मवित् । अत एव स्वकृत्यं स्वयं संपादयतीत्याह—सभामित्यादि ॥ ९ ॥

---

* अकर्णिका–कर्णः–अरित्रं, 'कर्णः श्रोत्रमरित्रं च' इति भुवनः, सोऽस्यास्तीति कर्णी । स एव कर्णिकः–कर्णधारक इति यावत्, तद्रहिता–गो. † स्वयमित्यनेन कैकेयीकार्ये स्वासम्बन्धः प्रतिपाद्यते । ‡ एवं स्वगृहे भरते विलपति, राजसभां वसिष्ठः प्रविवेश इत्यर्थः । समानकालिकत्ववत् समानदेशत्वमपि न विवक्षितम् ; 'एवमत्र स्थितौ तत्रैवमासीत्' इति व्यवहारवत् । शिष्टं प्रथमश्लोकव्याख्याटिप्पण्यां ज्ञेयम् ।

[1] वाकर्णिका. वाकण्टका–ङ. [2] अनेकधा–ङ. [3] कृपणाः–ङ. [4] सुस्वरं–ङ.

शातकुम्भमयीं रम्यां मणिरत्नसमाकुलाम् ।
सुधर्मामिव धर्मात्मा * सगणः प्रत्यपद्यत ॥ १० ॥

सभाविशेषणं—शातकुम्भमयीमित्यादि ॥ १० ॥

स काञ्चनमयं पीठं सुखास्तरणसंवृतम् ।
अध्यास्त सर्ववेदज्ञः दूताननुशशास ह ॥ ११ ॥

पीठमध्यास्त, अनन्तरं दूताननुशशास ह ॥ ११ ॥

ब्राह्मणान् क्षत्रियान् वैश्यान् अमात्यान् गणवल्लभान् ।
क्षिप्रमानयताव्यग्राः कृत्य † मात्ययिकं हि नः ॥ १२ ॥

हि—यस्मात् नः कृत्यं आत्ययिकं—अतीतकालिकं जायते ‡, अतः ब्राह्मणादीन् क्षिप्रमानयत ॥ १२ ॥

§ सराज[1]भृत्यं शत्रुघ्नं भरतं च यशस्विनम् ।
युधाजितं सुमन्त्रं च ये च तत्र हिता जनाः ॥ १३ ॥

---

* सगणः—सशिष्यगणः- **गो.** सपार्षदो वा । † आत्ययिकं, अत्ययः—कृच्छ्रं, तत्र भवं—आत्ययिकं, यत्नसाध्यमित्यर्थः–**गो. ती.** ‡ माकिं दशरथमरणानन्तरं विंशतिदिनानामतीतत्वात्, राज्यं सुदीर्घं अराजकं वर्तते, अतः क्षिप्रं कश्चन राजाऽभिषेचनीयः । विलम्बस्य नायं कालः —इति भावः । § सराजभृत्यं—राजान्तरङ्गभृत्यसहितम् । युधाजिदिति विजयाख्यमन्त्रिणो नामान्तरं, सुमन्त्रशब्दसाहचर्यात् । ये च तत्र - भरते हिताः हितपराः जनाः तानप्यानयतेति पूर्वेणान्वयः–**गो.** राजपुत्रैः इतरैः सहितं शत्रुघ्नं—**ति.** गोविन्दराजीयदृष्ट्या—शत्रुघ्नभरतौ न सामान्यरीत्या आनेयौ, किन्तु अङ्गरक्षकाद्यन्तरङ्गपरिवारविशिष्टराजानाविवानेयौ इत्यर्थे विशेषणद्वयं उभयोरप्यन्वेति । अथ वा शत्रुघ्नः राजान्तरङ्गपरिवारनायकः स्यात्, अतस्तत्परिवारविशिष्टं शत्रुघ्नं यशस्विनं भरतं चेत्यर्थः । सराजपुत्रमिति पाठे तु—दशरथस्य सार्धत्रिशतपत्नीकत्वेन तेषु जातान् पुत्रानादाय शत्रुघ्नः आगच्छतु इत्यभिप्रायेण सराजपुत्रमिति स्यात् ।

[1] पुत्रं–ङ. च.

ततो हलहलाशब्दः सुमहान् समपद्यत ।
रथैरश्वैर्गजैश्चापि जनानामुपगच्छताम् ॥ १४ ॥

हलहलेति शब्दानुकारः, जनानां हलहलाशब्द इत्यन्वयः ॥

ततो भरतमायान्तं शतक्रतुमिवामराः ।
प्रत्यनन्दन् प्रकृतयः यथा दशरथं तथा ॥ १५ ॥

*ह्रद इव तिमिनागसंवृतः
स्तिमितजलो मणिशङ्खशर्करः ।
दशरथसुतशोभिता सभा
सदशरथेव बभौ यथा पुरा ॥ १६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकाशीतितमः सर्गः

ह्रद इति। महाह्रदः समुद्र इत्यर्थः। तथा प्रयोगः 'सरसामस्मि सागरः' इति। तथा 'किंस्वित् सूर्यसमं ज्योतिः किं समुद्रसमं सरः?' इत्यादि। तिमिः––अनेकयोजनायामविस्तारवान् मत्स्यविशेषः। नागाः––जलगजाः, सर्पाश्च। मणयः––मुक्तादयः, शङ्खाः, शर्कराः–सुवर्णखनिमृत्तिकाश्च यस्मिंस्तथा। चन्द्र इव मुखमितिवत् ह्रद इव सभेति भिन्नलिङ्गत्वेऽपि उपमानोपमेयभावः। सभायाः स्तिमितजलस्थाने वसिष्ठः, तिमिनागस्थाने भरतशत्रुघ्नौ, मण्यादिस्थाने अमात्यपौरजानपदाः। पुरा यथा सा सभा सदशरथा बभौ, तथैवेदानीं दशरथसुतशोभिता सती सदशरथेव बभाविति योजना। तर्क(१६)मानः सर्गः ॥१६॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकाशीतितमः सर्गः

---

* शर्कराशब्देनात्र स्थूलवालुका उच्यन्ते। ह्रदश्च समुद्रसमीपस्थः, तिमिशङ्खादिसाहचर्यात्-गो.

द्व्यशीतितमः सर्गः

[सेनाप्रस्थानम्]

तामार्य[1]गणसंपूर्णां भरतः *प्रग्रहां सभाम् ।
ददर्श बुद्धिसंपन्नः [2]पूर्णचन्द्रो निशामिव ॥ १ ॥

अथ राजकर्तृभिः सभायां प्रार्थिताभिषेकः प्रत्याख्याय तं रामानुगमनाय सेनामुत्थापयति । तामित्यादि । प्रग्रहां—प्रकृष्टैर्वसिष्ठादिमहात्मभिः ग्रहः—परिग्रहः—अधिष्ठानं यस्यास्सा तथा ॥ १ ॥

†आसनानि यथान्यायं आर्याणां विशतां तदा ।
वस्त्राङ्गरागप्रभया द्योतिता सा सभोत्तमा ॥ २ ॥

आर्याणां—त्रैवर्णिकाणाम् ॥ २ ॥

सा विद्वज्जनसंपूर्णा सभा सुरुचिरा तदा ।
अदृश्यत घनापाये पूर्णचन्द्रेव शर्वरी ॥ ३ ॥
राज्ञस्तु प्रकृतीः सर्वाः ‡समग्राः प्रेक्ष्य धर्मवित् ।
इदं पुरोहितो वाक्यं भरतं मृदु चाब्रवीत् ॥ ४ ॥
तात! राजा दशरथः स्वर्गतो धर्ममाचरन् ।
धनधान्यवतीं स्फीतां प्रदाय पृथिवीं तव ॥ ५ ॥

धर्ममाचरन्—सत्यमनुपालयन् ॥ ५ ॥

---

* प्रग्रहां—नियमवतीं, यद्वा शुक्रबृहस्पत्यादिप्रकृष्टग्रहयुक्तां ; तदा निशाविशेषणमिदं—गो. अथ वा 'प्रग्रहस्तु तुलासूत्रे वल्गां नियमने भुजे । इत्यादिरश्मौ रश्मौ च' इति कोशात् प्रग्रहशब्दः रश्मिवाची, ततः अर्शाद्यजन्तत्वे—प्रकाशमानामित्यर्थः ।
† आसनानि विशतां—उपविशतां आर्याणां इत्यन्वयः । ‡ समग्राः प्रकृतीः प्रेक्ष्य—इङ्गितैस्तेषामभिप्रायं ज्ञात्वेति यावत्; भरतं अब्रवीदित्यन्वयः ।

[1] गुण—ङ. [2] पूर्णचन्द्रां—ङ.

रामस्तथा सत्य[1]धृतिः सतां धर्ममनुस्मरन् ।
*नाजहात् पितुरादेशं शशी ज्योत्स्नामिवोदितः ॥ ६ ॥

सतां धर्ममिति । 'जीवतोर्वाक्यकरणात् प्रत्यब्दं भूरिभोजनात् । गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता' इति न्यायमनुस्मरन्—पितृवाक्यकरणरूपं धर्ममनुस्मरान्नित्यर्थः ॥ ६ ॥

पित्रा भ्रात्रा च ते दत्तं राज्यं निहतकण्टकम् ।
तद्भुङ्क्ष्व †मुदितामात्यः क्षिप्रमेवाभिषेचय ॥ ७ ॥

मुदिताः अमात्याः यस्य स तथा ॥ ७ ॥

उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च ‡केवलाः ।
§[2]कोटयोऽपरान्ताः सामुद्राः रत्नान्यभिहरन्तु ते ॥ ८ ॥

उदीच्यादयस्तु 'साम्राज्यं भौज्यं स्वाराज्यं वैराज्यम्' इति राज्याभिषेकब्राह्मणोक्तपट्टाभिषेकवन्तः राजानः, चकारात् प्राच्यानां समुच्चयः । केवलाः—पट्टाभिषेकरहिताः केवलप्रभवः । अपरान्ताः—द्वैप्ययवनाश्रयद्वीपभेदाः, अपरान्तवर्तिनः अपरान्ताः । सामुद्राः—पोतवणिजः । कोटयो रत्नानीति 'शतं ब्राह्मणाः' इतिवन्नियतलिङ्गत्वात् ॥ ८ ॥

तच्छ्रुत्वा भरतो वाक्यं शोकेनाभिपरिप्लुतः ।
जगाम मनसा रामं धर्मज्ञो धर्मकाङ्क्षया ॥ ९ ॥

---

* न अजहात्—अत्यजत् । † 'अहं हि पुरुषव्याघ्रौ अपश्यन् रामलक्ष्मणौ । केन शक्तिप्रभावेण राज्यं रक्षितुमुत्सहे' इत्येवंरूपं भरताशयं जानन्नाह वसिष्ठः—मुदितामात्य इति । भवद्विषयेऽमात्यानां वैराभावात् राज्यरक्षणं सुकरं भविष्यतीति भावः । ‡ केवलाः—सिंहासनादिरहिताः—इति अपरान्तादिविशेषणम्—गो. § कोटया—कोटिसंख्यया उपलक्षितानि रत्नानि—गो.

[1] वृत्तिः—ङ. [2] कोट्या—ङ.

स बाष्पकलया वाचा कलहंसस्वरो युवा ।
विललाप सभामध्ये *जगर्हे च पुरोहितम् ॥ १० ॥

जगर्ह इति । सर्वज्ञेनापि भवता इदमनुचितमज्ञानादेवोक्तमित्युक्तवानित्यर्थः ॥ १० ॥

चरितब्रह्मचर्यस्य विद्यास्नातस्य धीमतः ।
धर्मे प्रयतमानस्य को राज्यं मद्विधो हरेत् ॥ ११ ॥

प्रयतमानस्येति । ज्येष्ठस्य रामस्येति शेषः । मद्विध इति । चरितब्रह्मचर्यस्येत्याद्युक्तलक्षण इत्यर्थः ॥ ११ ॥

कथं दशरथात् जातः भवेद्राज्यापहारकः ।
†राज्यं चाहं च रामस्य, धर्मं वक्तुमिहार्हसि ॥ १२ ॥

रामस्येति । स्वमिति शेषः । अत एवं विज्ञाय धर्ममेव भगवन् वक्तुमिह सभायामर्हसि, न मुखेच्छयैव, नान्याय्यमित्यर्थः ॥

ज्येष्ठः श्रेष्ठश्च धर्मात्मा दिलीपनहुषोपमः ।
लब्धुमर्हति काकुत्स्थः राज्यं दशरथो यथा ॥ १३ ॥
अनार्यजुष्टमस्वर्ग्यं कुर्यां पापमहं यदि ।
‡इक्ष्वाकूणामहं लोके भवेयं कुलपांसनः ॥ १४ ॥

---

* सम्यक् त्वयाऽस्य कुलस्य भावि हितमवेक्षितमिति निनिन्द—**गो.** † 'गुणानां च परार्थत्वादसम्बन्धः समत्वात् स्यात्' इतिन्यायेन, यदाऽहं राज्यं च रामशेषभूतं, तदा कथमहं राज्यपालको भवेयम् ? राजपुरुषेषु उत्तममध्यमादिभेदभिन्नेषु परस्परं नियाम्यनियामकभावदर्शनेऽपि, स अधिकारः राज्ञैव दत्तः, अतः स एव परमशेषी । तद्वदेव रामवचनात् मया राज्यपरिपालनेऽपि नाहं राजा स्याम । तादृशराज्यपरिपालनस्य निरन्तरत्वमपि न भवितुमर्हत्येव । 'निरन्तरं भवानेव राज्यं शास्तु' इति रामादेशे किं कुर्यास्त्वमिति चेत्, इदं च मद्राजत्वे—मच्छेषित्व एव विश्रान्तमिति कथमहमङ्गीकुर्याम् ? शेषभूतस्य शेषित्वं युज्यते वेति अस्मिन् विषये त्वमेव धर्मं वक्तुमर्हसीति भावः ॥ ‡ इक्ष्वाकूणां लोके—तत्सम्बन्धिनि जने—**गो.**

*[1] यद्धि मात्रा कृतं पापं नाहं तदपि रोचये ।
इहस्थो वनदुर्गस्थं नमस्यामि कृताञ्जलिः ॥ १५ ॥

ननु महता प्रयासेन राज्यं संपादितमित्यस्मदादिभिः राजा भवेत्युच्यत इत्याशङ्कां निरस्यति—यद्धीत्यादि । वनरूपं दुर्गं वनदुर्गम् ॥ १५ ॥

राममेवा[2]नुगच्छामि राजा स द्विपदां वरः ।
त्रयाणामपि लोकानां राज्यमर्हति राघवः ॥ १६ ॥

द्विपदामिति । द्वौ पादौ येषां ते तथा, ततः 'सङ्ख्यासुपूर्वस्य' इति लोपः समासान्तः द्विपादिति, ततः 'पादः पत' इति भस्थले पदादेशः, पुरुषाणामिति यावत् ॥ १६ ॥

† तद्वाक्यं धर्मसंयुक्तं श्रुत्वा सर्वे सभासदः ।
हर्षान्मुमुचुरश्रूणि [3]रामे निहितचेतसः ॥ १७ ॥
यदि त्वार्यं न शक्ष्यामि विनिवर्तयितुं वनात् ।
वने तत्रैव वत्स्यामि यथाऽऽर्यो ‡ लक्ष्मणस्तथा ॥ १८ ॥

सर्वथैव स्वराज्यचिन्ता नास्तीति स्पष्टयति—यदि त्वित्यादि ॥

§ [4] सर्वोपायं तु वर्तिष्ये विनिवर्तयितुं [5]वनात् ।
समक्षमार्यमिश्राणां साधूनां गुणवर्तिनाम् ॥ १९ ॥

---

* अनेन अप्राप्तभाषणश्रवणपापस्य प्रायश्चित्तमनुष्ठितम्—गो. † मध्येऽयमेकः श्लोकः कविवाक्यम् । ‡ कनिष्ठे लक्ष्मणे आर्यशब्दप्रयोगः ज्येष्ठानुवर्तनरूपधर्मनिरतत्वात्—गो. § सर्वोपायमिति क्रियाविशेषणम्, सर्वोपायं यत्नैः करिष्ये इत्यर्थः । आर्यमिश्राणां—सदस्यानाम्, 'आर्यमिश्राः पारिषदाः सदस्याः सामवायिकाः' इति सज्जनाः । भवद्भिरप्यागन्तव्यमित्यर्थादुक्तं भवति—गो.

[1] यदि—ङ. [2] भिगच्छामि—ङ. [3] तदा विस्मितमानसाः—ङ. [4] सर्वोपायैर्यतिष्ये तं—ङ. [5] बलात्—ङ.

वर्तिष्ये—अनुष्ठास्ये । आर्यमिश्राणां—आर्याः—त्रैवर्णिकाः, ते चैते मिश्राः—पूज्याः तथा। युष्माकं समक्षमिति योजनीयम् ॥ १९॥

* विष्टिकर्मान्तिकाः सर्वे मार्गशोधक[1]रक्षकाः।
प्रस्थापिता मया पूर्वं यात्राऽपि मम रोचते ॥ २० ॥

अपि च सर्वे मार्गशोधकरक्षकाः विष्टिकर्मान्तिकाः—विशेर्विष्टिः—प्रवेशः, रामाश्रितवनपुरोयुक्ताः, कर्मान्तिकाः—कर्मकरास्तथा। ममापि यात्रेति योजना ॥ २० ॥

एवमुक्त्वा तु धर्मात्मा भरतो भ्रातृवत्सलः।
समीपस्थमुवाचेदं सुमन्त्रं [2]मन्त्रकोविदम् ॥ २१ ॥
तूर्णमुत्थाय गच्छ त्वं, सुमन्त्र! मम शासनात्।
यात्रामाज्ञापय क्षिप्रं बलं चैव समानय ॥ २२ ॥
एवमुक्तः सुमन्त्रस्तु भरतेन महात्मना।
हृष्टस्तदादिशत् सर्वं यथासन्दिष्टमिष्टवत् ॥ २३ ॥

इष्टवत्-भरतस्येष्टः सन् यथासन्दिष्टं आदिशत्-आज्ञापयति स्म॥

‡ ताः प्रहृष्टाः प्रकृतयः बलाध्यक्षा बलस्य च।
श्रुत्वा यात्रां समाज्ञप्तां राघवस्य निवर्तने ॥ २४ ॥

निवर्तने-निवर्तननिमित्तम् ॥ २४ ॥

---

* विष्टयः—भृतिमन्तरेण जनपदेभ्यः समानीताः कर्मकराः। कर्मान्तिकाः—कर्मान्ते भृतिगृहीतारः। मार्गशोधकरक्षका इति विष्ट्यादिविशेषणम्। 'प्रस्थापिता मया पूर्वं' इत्यभिधानात् वसिष्ठः शिबिरकरणनियोगमजानन्नभिषेकप्रस्तावं कृतवानित्यवगम्यते—गो. वस्तुतस्तु—वसिष्ठेन अमन्त्रयित्वैव तेषां प्रेषणेऽपि, स्वकर्तव्यदृष्ट्या वसिष्ठेनाभिषेकप्रस्तावकरणं युज्यत एव। शिष्टं गतसर्गीयप्रथमश्लोकव्याख्याटिप्पण्यां द्रष्टव्यम् ॥ † इष्टवत्—इष्टार्हं—इष्टानुरूपमिति यावत्—गो. ‡ यात्रां श्रुत्वा प्रकृत्यादयः प्रहृष्टा अभवन्नित्यन्वयः।

[1] दक्षकाः, तक्षकाः—ङ. [2] मन्त्रि—ङ.

[1]ततो योधाङ्गनाः सर्वाः भर्तॄन् सर्वान् गृहे गृहे ।
*यात्रागमन[2]माज्ञाय त्वरयन्ति स्म हर्षिताः ॥ २५ ॥

यात्रार्थं गमनं—यात्रागमनम् ॥ २५ ॥

ते हयैः गोरथैः शीघ्रैः [3]स्यन्दनैश्च महाजवैः ।
[4]सह योधैर्बलाध्यक्षाः बलं [5]सर्वमचोदयन् ॥ २६ ॥

गोरथैः—बलीवर्दयुक्तशकटैः ॥ २६ ॥

सज्जं तु तद्बलं दृष्ट्वा भरतो †गुरुसन्निधौ ।
रथं मे त्वरयस्वेति सुमन्त्रं पार्श्वतोऽब्रवीत् ॥ २७ ॥

गुरुसन्निधौ—वसिष्ठसन्निधौ ॥ २७ ॥

भरतस्य तु तस्याज्ञां प्रतिगृह्य च हर्षितः‡ ।
रथं गृहीत्वा प्रययौ युक्तं परमवाजिभिः ॥ २८ ॥

§स राघवः सत्यधृतिः प्रतापवान्
ब्रुवन् [6]सुयुक्तं दृढसत्यविक्रमः ।
गुरुं महारण्यगतं यशस्विनं
प्रसादयिष्यन् भरतोऽब्रवीत्तदा ॥ २९ ॥

सुयुक्तं ब्रुवन्नित्यन्वयः । गुरुं—रामम् ॥ २९ ॥

---

* यात्रागमनं—रामागमनानुकूलं—ती. यात्राऽऽगमनं—यात्राया आगमनं सन्निहिततामिति यावत् । † गुरुसन्निधाविति अनुज्ञाकरणार्थमुक्तम्—गो. ‡ हर्षितः—सुमन्त्रः । § उक्तमर्थं पुनः सङ्ग्रहेण दर्शयति—स इत्यादिना । सत्यधृतिः—अप्रच्युतधैर्यः । सुयुक्तं ब्रुवन् गुरुं प्रसादयिष्यन्—उचितवचनेन रामं प्रीणयिष्यन्नित्यर्थः—गो.

[1] ततोऽयोध्याङ्गना.—ङ. [2] मास्थाय—ङ. [3] स्यन्दनैश्शकटैस्तथा—ङ., स्यन्दनैश्च मनोजवैः—ङ. च. [4] सहयोधिबलाध्यक्षाः—च. [5] सज्ज—ङ. [6] सयुक्तं—ङ.

तूर्णं समुत्थाय, सुमन्त्र! गच्छ
बलस्य योगाय *बलप्रधानान् ।
[1]आनेतुमिच्छामि हि तं वनस्थं
प्रसाद्य रामं जगतो हिताय ॥ ३० ॥

योगाय—सम्मेलनाय । बले प्रधानान् आज्ञापयेति शेषः ॥ ३० ॥

स सूतपुत्रो भरतेन सम्यक्
आज्ञापितः संपरिपूर्णकामः ।
शशास सर्वान् प्रकृतिप्रधानान्
बलस्य मुख्यांश्च सुहृज्जनं च ॥ ३१ ॥

ततः समुत्थाय कुले कुले ते
राजन्यवैश्या [2]वृषलाश्च विप्राः ।
†अयूयुजन् [3]उष्ट्ररथान् खरांश्च
नागान् हयांश्चैव कुलप्रसूतान् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे द्व्यशीतितमः सर्गः

कुले कुले—गृहे गृहे, 'कुलं जनपदे गृहे'। कुलप्रसूतानिति । उत्तमानिति यावत् । संग(३७)मानः (!) सर्गः ॥ ३२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे द्व्यशीतितमः सर्गः

---

*प्रधानशब्दः पुल्लिङ्गोऽप्यस्ति—गो. बलप्रधानान् गच्छ—उपसर्प । सेनायाः सेनान्याज्ञाधीनत्वादेवमुक्तः । †अयूयुजन्—सज्जानकुर्वन्—गो.

[1] आज्ञातु—ङ. [2] नगरे च—ङ. [3] उष्ट्रखरान् रथांश्च—ङ.

द्व्यशीतितमः सर्गः

[भरतचित्रकूटयात्रा]

ततः समुत्थितः * काल्यं आस्थाय स्यन्दनोत्तमम् ।
प्रययौ भरतः शीघ्रं रामदर्शन[1]काङ्क्षया ॥ १ ॥

अथ सबलस्य भरतस्यागमनं प्रस्थानम् । तत इत्यादि । काल्यमास्थाय—उषस्यनुष्ठानं कृत्वा, स्यन्दनोत्तमं चास्थाय ॥ १ ॥

अग्रतः प्रययुस्तस्य सर्वे मन्त्रि[2]पुरोधसः ।
अधिरुह्य हयैर्युक्तान् रथान् सूर्यरथोपमान् ॥ २ ॥
† नवनागसहस्राणि कल्पितानि यथाविधि ।
अन्वयुर्भरतं यान्तं इक्ष्वाकुकुलनन्दनम् ॥ ३ ॥

कल्पितानि—सज्जितानि । यथाविधि–यथारुचि ॥ ३ ॥

षष्टी रथसहस्राणि धन्विनो विविधायुधाः ।
अन्वयुर्भरतं यान्तं राजपुत्रं यशस्विनम् ॥ ४ ॥
शतं सहस्राण्यश्वानां समारूढानि राघवम् ।
अन्वयुर्भरतं यान्तं सत्यसन्धं जितेन्द्रियम् ॥ ५ ॥

समारूढानि—सादिभिरिति शेषः ॥ ५ ॥

‡ कैकेयी च सुमित्रा च कौसल्या च यशस्विनी ।
रामानयनसंहृष्टाः ययुर्यानेन § भास्वता ॥ ६ ॥

---

* काल्यं–प्रातःकाले–ती. काल्यं—अहर्मुखं प्राप्येति शेषः–गो. † अत्र 'सर्वाणि' इत्यनुक्त्वा संख्याग्रहणात् नगरस्थगजेषु तावन्त एव प्रस्थिता इति ज्ञायत इति गोविन्दराजः । ‡ अत्र कैकेय्याः प्रथमग्रहणात्, पश्चात्तापातिशयात् तस्याः त्वरातिशयः सूच्यत इव । § यानेनेत्येकवचनं प्रत्येकापेक्षया । सौहार्दादेकयानेनैव तिसृणां गमनं वा–ति.

[1] काम्यया–च. [2] पुरोहिताः–च.

कैकेयी च यथाविति। स्वप्रवृत्तेः पुत्राहितस्य संपन्नत्वात्, 'किं कृतम्' इति खिन्ना लोकसंग्रहाय राजस्त्र्यन्तरेण सह ययौ ॥ ६ ॥

प्रयाताश्चार्यसङ्घाताः रामं द्रष्टुं सलक्ष्मणम् ।
तस्यैव च कथाश्चित्राः कुर्वाणा हृष्टमानसाः ॥ ७ ॥

आर्याणां-त्रैवर्णिकानां सङ्घातास्तथा ॥ ७ ॥

मेघश्यामं महाबाहुं स्थिरसत्त्वं दृढव्रतम् ।
कदा द्रक्ष्यामहे रामं जगतः शोकनाशनम् ॥ ८ ॥
दृष्ट एव हि नः शोकं अपनेष्यति राघवः ।
तमः सर्वस्य लोकस्य समुद्यन्निव भास्करः ॥ ९ ॥
इत्येवं कथयन्तस्ते संप्रहृष्टाः कथाः शुभाः ।
परिष्वजानाश्चान्योन्यं ययुर्नागरिका जनाः ॥ १० ॥

परिष्वजानाः—परिष्वजमाना इति यावत्। नगरे चरन्तीति—नागरिकाः, 'चरति' इति ठक् ॥ १० ॥

ये च तत्रापरे सर्वे *[1] संमता ये च नैगमाः ।
रामं प्रति ययुर्हृष्टाः सर्वाः प्रकृतयस्तथा ॥ ११ ॥

तत्र नगरे सम्मताः प्रसिद्धाः नैगमाः—वणिजः। प्रकृतयः—पौरश्रेणयः ॥ ११ ॥

मणिकाराश्च ये केचित् कुम्भकाराश्च शोभनाः ।
सूत्रकर्मकृतश्चैव ये च शस्त्रोपजीविनः ॥ १२ ॥

विविच्य प्रदर्श्यन्ते—मणिकाराश्चेत्यादि। मणिकाराः—शाणायां मणिशोधनादिकर्तारः। सूत्रेण—तन्तुना पटकुटकादिकं

---

* संमताः, रामस्य—गो

[1] समेता, समस्ता—ङ.

कुर्वन्तीति तन्तुवायाः तन्तुसीवकाः*। शस्त्रनिर्माणेनोपजीविनः— शस्त्रोपजीविनः ॥ १२ ॥

†मायूरकाः क्राकचिकाः रोचका वेधकास्तथा।
दन्तकाराः [1]सुधाकाराः तथा गन्धोपजीविनः ॥ १३ ॥

मायूरकाः—मयूरग्राहिणः, इदमुपलक्षणं शुकादिग्राहिणाम्। क्राकचिकाः—'क्रकचः करपत्रं स्यात्' அருவாள்; क्रकचेन जीवन्तीति तथा। रोचकाः—काचकुप्यादिकर्तारः। वेधकाः— मण्यादिवेधकाः। दन्तकाराः—दन्तेन समुद्गकादिकर्तारः। सुधाकाराः— वज्रलेपकर्तारः। गन्धोपजीविनः—गन्धद्रव्यविक्रयिकाः ॥ १३ ॥

सुवर्णकाराः प्रख्याताः तथा [2]रङ्गोपजीविनः।
स्नापको[3]च्छेदका वैद्याः ‡धूपकाः शौण्डिकास्तथा ॥

रङ्गोपजीविनः—नटाः। स्नापकाः—उष्णोदकस्नापकाः, उच्छेदकाः—अङ्गमर्दकाः, 'उच्छेदनं समुल्लेखोद्वाहनोद्वर्तनेषु च' इति विश्वः। धूपकाः—धूपद्रव्यविक्रयिकाः। शौण्डिकाः— मद्यकराः, 'शुण्डा करिकरे मद्ये' इति वैजयन्ती ॥ १४ ॥

रजका[4]स्तुन्नवायाश्च घोषग्राममहत्तराः।
§शैलूषाश्च सह स्त्रीभिः ययुः कैवर्तकारवः ॥ १५ ॥

---

* परन्तु—80 सर्गाद्यश्लोकव्याख्याने इदं पदं अन्यथा विवृतम्. † मायूरकाः— मयूरपिञ्छैः छत्रव्यजनादिकारिणः। रोचकाः—दन्तकुड्यवेदिकादिषु कान्त्युत्पादकाः-गो. ‡ धूपकाः—गृहादिषु धूपवासकाः-गो. § यद्यपि 'रङ्गोपजीविनः' इत्यनेनैव शैलूषा अपि गृहीताः, तथापि रङ्गोपजीविन इति शैलूषव्यतिरिक्तविषयमिति भावः। सन्त्यन्येऽपि खलु बहवो रङ्गोपजीविनः।

[1] सूपकाराः–ङ. [2] कम्बलधावकाः–क. कम्बलकारकाः–च. [3] ष्णोदका–च. च्छादका–ङ. [4] स्तन्तुवायाश्च–ङ.

तुन्नवायाः—सौचिकाः। घोषः—आभीरपल्ली, ग्राममहत्तराः घोषमहत्तराश्च तथा—परिवृढाः। कैवर्तः—धीवरः दाशः—वलधरः। कारवः—कर्मकराः—கருமான், கன்னார் ॥ १५ ॥

*समाहिता वेदविदः ब्राह्मणा [1] वृत्तसम्मताः।
गोरथैर्भरतं यान्तं अनुजग्मुः सहस्रशः ॥ १६ ॥
सुवेषाः शुद्धवसनाः ताम्रमृष्टानुलेपनाः।
सर्वे ते [2] विविधैर्यानैः †शनैर्भरतमन्वयुः ॥ १७ ॥

गोरोचनाकुङ्कुमादिवस्तुसम्बन्धतः ताम्रवर्णं मृष्टं—संपूर्णं अनुलेपनं येषां ते तथा ॥ १७ ॥

‡प्रहृष्टमुदिता सेना साऽन्वयात् कैकयीसुतम्।
भ्रातुरानयने यान्तं भरतं भ्रातृवत्सलम् ॥ १८ ॥
ते गत्वा दूरमध्वानं रथयानाश्वकुञ्जरैः।
§समासेदुस्ततो गङ्गां श्रृङ्गिबेरपुरं प्रति ॥ १९ ॥
यत्र रामसखो वीरः गुहो ज्ञातिगणैर्वृतः।
‖निवसत्यप्रमादेन देशं तं परिपालयन् ॥ २० ॥

श्रृङ्गिबेरपुरं प्रतीति। लक्षणे प्रतिः कर्मप्रवचनीयः, श्रृङ्गिबेरपुर इत्यर्थः। अप्रमादेन अटवीं देशं—रामाश्रितं स्वीयं देशं सावधानतया रक्षन् ॥ २० ॥

---

* समाहिताः—योगिनः—गो. † वाहनादिसम्मर्दात्—शनैरिति। ‡ प्रहर्षः—कायिको रोमाञ्चादिः, मोदः—मानसो हर्षः—गो. ती. § श्रृङ्गिबेरपुरं प्रति दूरमध्वानं गत्वा गङ्गां समासेदुरिति सम्बन्धः—गो. ‖ अप्रमादेन—सावधानतया, रामविरोध्यागमनवारणपर इत्यर्थः—गो. अथ वा गुहस्य निषादराजत्वात् स्वं देशं सावधानं पालयन्निवसतीति वाऽर्थः।

[1] व्रतसम्मताः—ङ. [2] विमलैः—च.

उपेत्य तीरं गङ्गायाः चक्रवाकैरलङ्कृतम् ।
व्यवातिष्ठत सा सेना भरतस्यानुयायिनी ॥ २१ ॥

[1]निरीक्ष्यानुगतां * सेनां तां च गङ्गां शिवोदकाम् ।
भरतः सचिवान् सर्वान् अब्रवीद्वाक्यकोविदः ॥ २२ ॥

निवेशयत मे [2]सैन्यं † अभिप्रायेण [3]सर्वतः ।
विश्रान्ताः प्रतरिष्यामः श्व [4]इदानीमिमां नदीम् ॥ २३ ॥

अभिप्रायेण—सन्तरणाभिप्रायेण सह न्यवेशयत, गङ्गातीरे सुखमस्तीति नात्र द्वित्रदिनवासबुद्ध्या । तदेवाह—श्वः प्रतरिष्याम इति । इदानीं विश्रान्ता इत्यन्वयः ॥ २३ ॥

दातुं च तावदिच्छामि स्वर्गतस्य महीपतेः ।
और्ध्वदेहनिमित्तार्थं अवतीर्योदकं नदीम् ॥ २४ ॥

देहपातादूर्ध्वकाले प्राप्तं निमित्तं यस्य परलोकस्य सः ऊर्ध्वदेहनिमित्तः, स्वार्थिकोऽण्, ऊर्ध्वदेहनिमित्ताय—परलोकप्रयोजनाय इदं—और्ध्वदेहनिमित्तार्थम् ॥ २४ ॥

तस्यैवं ब्रुवतोऽमात्याः तथेत्युक्त्वा समाहिताः ।
न्यवेशयंस्तान् छन्देन स्वेन स्वेन पृथक् पृथक् ॥ २५ ॥

छन्दः—इच्छा ॥ २५ ॥

---

* अनुत्थितां—गमने अनुद्योगां–ति. गङ्गया निरोधादिति शेषः ।
† अभिप्रायेण— तत्तदिच्छया- गो. 'अद्य विश्रान्ताः श्वः प्रतरिष्यामः' इत्यभिप्रायेण—मदभिप्रायज्ञापनेन निवेशयतेत्यर्थः-ति. 'तस्यैवं ब्रुवतः' इत्याद्यनन्तरश्लोकपरिशीलने गोविन्दराजोक्तं स्वरसमिव ।

[1] निरीक्ष्यानुत्थितां–च. [2] सर्वं–ङ. [3] सर्वशः–ङ. [4] इदानीं महानदीम्–ङ. इमां सागरंगमाम्–च.

निवेश्य गङ्गामनु तां महानदीं
चमूं विधानैः परिबर्हशोभिनीम् ।
उवास रामस्य तदा महात्मनः
[1]विचिन्तयानो भरतो निवर्तनम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे त्र्यशीतितमः सर्गः

गङ्गामनु—अनुर्लक्षणे, कर्मप्रवचनीयः । विधानैः—वास व्यवस्थाकल्पनैः । परिबर्हैः—परिच्छदैः, यात्रानिवासोपकरणपट कुटिकादिभिः शोभमानाम् । तरि(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे त्र्यशीतितमः सर्गः

चतुरशीतितमः सर्गः

[भरतगुहसमागमः]

*ततो निविष्टां ध्वजिनीं गङ्गामन्वाश्रितां नदीम् ।
निषादराजो दृष्ट्वैव ज्ञातीन् [2]सन्त्वरितोऽब्रवीत् ॥ १ ॥

अथ भरतस्य गुहेन सङ्गमः । तत इत्यादि ॥ १ ॥

महतीयमितः सेना सागराभा प्रदृश्यते ।
नास्यान्तमधिगच्छामि मनसाऽपि विचिन्तयन् ॥ २ ॥

इतः—इह गङ्गातीरे । नास्यान्तमिति । आर्षः सन्धिः ॥ २ ॥

---

* स्वैः आश्रितां गङ्गानदीं अनु निविष्टां—इति वाऽर्थः । अथ वा ७ श्लोके 'गङ्गा-मन्वाश्रिताः' इति दाशविशेषणवत् अत्रापि 'गङ्गामन्वाश्रितः' इति निषादराजविशेषण-तया पाठः स्यात् ।

[1] विचिन्तमानो—च. [2] स परितो—ङ, च.

*[1]यदा तु खलु दुर्बुद्धिः भरतः स्वयमागतः ।
स एष हि महाकायः कोविदारध्वजो रथे ॥ ३ ॥

यदा तु खलु—यस्माद्धेतोः । दुर्बुद्धिरिति । रामपीडार्थं प्रवृत्त इत्याशयेन अयं वादः । भरत एव स्वयमागतः, तत एव महती सेना प्रदृश्यत इत्यन्वयः । कुतो भरत आगत इति विज्ञायते? इत्यत्राह— स एष इत्यादि । महाकायः—महाप्रमाणः । कोविदारध्वजः—इक्ष्वाकुकुलचिह्नभूतो रथोऽस्ति; 'कोविदारे चमरिकः'— மஹோயகக்கி ॥ ३ ॥

बन्धयिष्यति वा [2]दाशान् अथ वाऽस्मान् वधिष्यति ।
†[3]अनु दाशरथिं रामं पित्रा राज्याद्विवासितम् ॥ ४ ॥

आयातु वा भरतः, किमस्माकम्? इत्यत्राह—बन्धयिष्यतीत्यादि । स्वामात्यैरिति शेषः । वधिष्यतीति । वधिः प्रकृत्यन्तरम् । अनु दाशरथिं— दाशरथिसंहारानन्तरमित्यर्थः ॥ ४ ॥

[4]संपन्नां श्रियमन्विच्छन् तस्य राज्ञः सुदुर्लभाम् ।
भरतः केकयीपुत्रः हन्तुं [5]समधिगच्छति ॥ ५ ॥

ननु रामसंहारोद्योगो वा किमर्थोऽस्य? इत्यत्राह—संपन्नामित्यादि । संपूर्णां—कालान्तरेऽपि रामप्राप्त्या विच्छेदरहिताम् । तस्य राज्ञः—रामस्येत्यर्थः । यदि कालान्तरे आयाति तदा दायादित्वात् राज्यैकदेशं, प्राबल्यतः सर्वं राज्यं हरिष्यतीति भीत्या इदानीं तापसावस्थायां रामं हन्तुं समधिगच्छति—प्राप्नोतीव ॥ ५ ॥

---

* यदा तु खलु—ध्रुवमित्यर्थः–गो. †'अथ दाशरथिं' इति पाठे—अर्धत्रयमेकं वाक्यम् । तस्य राज्ञः—रामस्य सुदुर्लभां श्रियं अन्विच्छन्—स्वायत्तीकर्तुमिच्छन्निति भावः, दाशरथिं रामं हन्तुं समधिगच्छतीत्यन्वयः ।

[1] यथा तु खलु -ङ. [2] पाशैः–च. [3] अथ–क. [4] संपूर्णां–ङ. [5] समुपगच्छति–ङ.

भर्ता चैव सखा चैव रामो दाशरथिर्मम।
तस्यार्थकामाः सन्नद्धाः *[1]गङ्गाऽनूपे प्रतिष्ठत ॥ ६ ॥

भवतु! तावता का भीतिरस्माकम्? इत्यत्राह—भर्तेत्यादि तथा च तत्पक्ष्यत्वात् अस्माकमुक्तप्रसङ्ग इत्युक्तं भवति। अस्माभिस्तु सख्यू रामस्येष्टं कर्तव्यं, अतः नास्माभिरियं सेना तारयितव्या। अतो यूयं तस्य अर्थकामाः—तस्य रामस्य प्रयोजनाभीप्सवन्तः सन्नद्धाः अत्र गङ्गानूपे अस्मत्समीपे परिबृढास्तिष्ठत ॥ ६ ॥

तिष्ठन्तु सर्वे दाशाश्च गङ्गामन्वाश्रिता नदीम्।
जालयुक्ता नदीरक्षाः मांसमूलफलाशनाः ॥ ७ ॥
नावां शतानां पञ्चानां कैवर्तानां शतं शतम्।
सन्नद्धानां तथा यूनां तिष्ठन्त्वित्यभ्यचोदयत् ॥ ८ ॥

सर्वे च मामका दाशास्तु गङ्गानदीमेवान्वाश्रिता जालयुक्ता यावदेतन्निर्गमनं एतद्धीत्या तीरस्य दुरारोहतः नावारोपितमांसमूलफलाशनास्सन्तः नदीरक्षाः—नदीसन्तारमार्गं विघ्नन्तः सन्तः पञ्चशतीनौकानामेकैकं—कैवर्तानां यूनां युद्धार्हाणां सन्नद्धानां शतं शतमारुह्य तिष्ठन्त्वित्यभ्यचोदयत् ॥ ७–८ ॥

[2]यदि तुष्टस्तु भरतः रामस्येह भविष्यति।
इयं स्वस्तिमती सेना गङ्गामद्य तरिष्यति ॥ ९ ॥

एवं सन्नद्धतयाऽवस्थाने सति पश्चादागतस्याभिप्रायानुरोधेन कार्यं कर्म कुर्मः इत्याह—यदीत्यादि। यदि तुष्टो रामविषये,

* गङ्गानूपे—गङ्गातीरे—गो.

[1] गङ्गाकूलेऽत्र तिष्ठत—ङ.　[2] यदाऽदुष्टस्तु—ङ

तदेयं सेना स्वस्तिमती तरिष्यति। अन्यदा तु नौकासु परपारे स्थित्वा सर्वानारुरुक्षून्निहन्म इत्यर्थः ॥ ९ ॥

इत्युक्त्वोपायनं गृह्य मत्स्यमांसमधूनि च।
*अभिचक्राम भरतं निषादाधिपतिर्गुहः ॥ १० ॥

अभिचक्रामेति। दर्शनार्थमिति शेषः ॥ १० ॥

तमायान्तं तु संप्रेक्ष्य सूतपुत्रः प्रतापवान्।
भरतायाचचक्षेऽथ [1]समयज्ञो विनीतवत् ॥ ११ ॥
एष ज्ञातिसहस्रेण स्थपतिः परिवारितः।
कुशलो दण्डकारण्ये वृद्धो भ्रातुश्च ते सखा ॥ १२ ॥

स्थपतिः—प्रभुः। दण्डकारण्ये कुशल इति। निग्रहानुग्रहसमर्थ इत्यर्थः ॥ १२ ॥

†तस्मात् पश्यतु, काकुत्स्थ ! त्वां निषादाधिपो गुहः।
असंशयं विजानीते यत्र तौ रामलक्ष्मणौ ॥ १३ ॥

अपि चानेन प्रयोजनमस्तीत्याह—असंशयमित्यादि ॥ १३ ॥

एतत्तु वचनं श्रुत्वा सुमन्त्रात् भरतः शुभम्।
उवाच वचनं ‡[2]शीघ्रं गुहः पश्यतु मामिति ॥ १४ ॥
लब्ध्वाऽनुज्ञां संप्रहृष्टः ज्ञातिभिः परिवारितः।
आगम्य भरतं प्रह्वः गुहो वचनमब्रवीत् ॥ १५ ॥

ज्ञातिभिः—प्राक् गङ्गानूपस्थापितैः ॥ १५ ॥

---

* भरतभावपरिज्ञानार्थं भरताभिमुखं स्वयं जगाम। † यतोऽयं दण्डकारण्ये कुशली, ते भ्रातुश्च सखा, तस्मात्। ‡ मां शीघ्रं पश्यत्वित्यन्वयः।

[1] विनयकोङ [2] श्रीमान्—ङ.

निष्कुटश्चैव देशोऽयं *वञ्चिताश्चापि ते वयम् ।
†[1] निवेदयाम ते सर्वं स्वके [2] दाशगृहे वस ॥ १६ ॥

निष्कुट इति । अयं दण्डकारण्यदेशः युष्माकं निष्कुटः—गृहारामकल्पः, नात्राटवीशङ्काप्रसङ्ग इत्यर्थः । ते वयं त्वद्दासवर्गभूताः वञ्चिताः—प्रस्थानोद्योगसमय एवाप्रेषितनियोगसन्देशा इत्यर्थः । इयमुपचारोक्तिः । सर्वं रामविषयकं वृत्तान्तं ते निवेदयाम, लोट् । वस, अद्येति शेषः ॥ १६ ॥

अस्ति मूलफलं चैतत् निषादैः ‡[3] स्वयमार्जितम् ।
आर्द्रं शुष्कं यथा मांसं वन्यं चोच्चावचं तथा ॥ १७ ॥

वन्यं—नीवारश्यामाकं प्रियङ्ग्वादिधान्यम् ॥ १७ ॥

आशंसे स्वाशिता सेना [4] वत्स्यत्येनां विभावरीम् ।
अर्चितो विविधैः कामैः श्वः ससैन्यो [5] गमिष्यसि ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे चतुरशीतितमः सर्गः

आशंसे—प्रार्थयामि । स्वाशिता—सम्यक् भुक्तिमती । वत्स्यतीत्याशंस इति योजना । दया(१८)मानः सर्गः ॥ १८ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे चतुरशीतितमः सर्गः

---

*यद्यपि पूर्वं 'जाह्नवीं तु समासाद्य' (80–21) इति गङ्गापर्यन्तं मार्गसंस्कार उक्तः, परन्त्वत्र—भरतस्य तदानीमागमनं तेन न प्रतीक्षितमासीदिति एवमुक्तिः ।
† निवेदयामस्ते सर्वे—ते—त्वदीयाः सर्वे वयं त्वदीयेऽस्मिन् दाशगृहे वसेति निवेदयाम इति भाव इति—गो. ‡ निषादादिसङ्करजातीनां परद्रव्यापहारादेरपि संभावितत्वात्, प्रकृते द्रव्यशुद्धिसूचनाय 'स्वयमार्जितं' इत्युक्तं स्यात् ।

[1] निवेदयामस्ते सर्वे—ङ. [2] दासगृहे—ङ. [3] समुपाहृतम्, समुपार्जितम्—ङ.
[4] वसत्वेनां—ङ. [5] गमिष्यति—ङ.

पञ्चाशीतितमः सर्गः

[भरतगुहसंवादः]

एवमुक्तस्तु भरतः निषादाधिपतिं गुहम् ।
प्रत्युवाच महाप्राज्ञः वाक्यं हेत्वर्थ[1]संयुतम् ॥ १ ॥

अथ गुहस्य भरतविस्रंभः । एवमित्यादि । हेत्वर्थाभ्यां-उपपत्तिप्रयोजनाभ्यां संयुतं तथा ॥ १ ॥

ऊर्जितः खलु ते कामः कृतः, *मम गुरोः सखे !
यो मे त्वमीदृशीं सेनां अभ्यर्चयितुमिच्छसि ॥ २ ॥

ऊर्जितः–स्थिरनिष्पादनेच्छोस्ते कामः—अस्मत्सत्काराभिलाषः, स तु मम कृत एव खलु । कथमित्यतः—यो म इत्यादि ॥ २ ॥

इत्युक्त्वा स महातेजाः गुहं वचन[2]मुत्तमम् ।
अब्रवीत् भरतः श्रीमान् †[3] निषादाधिपतिं पुनः ॥ ३ ॥
कतरेण गमिष्यामि ‡ भरद्वाजाश्रमं [4] पथा ।
गहनोऽयं भृशं देशः गङ्गानूपे दुरत्ययः ॥ ४ ॥

गहनः— दुष्प्रवेशः ॥ ४ ॥

तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः ।
अब्रवीत् प्राञ्जलिर्भूत्वा गुहो गहनगोचरः ॥ ५ ॥

गहनं–वनं गोचरः–देशः यस्य स तथा ॥ ५ ॥

---

* स्वस्य रामविषयकभक्तिं द्योतयितुं—मम गुरोः सखेत्युक्तम्–गो. † पन्थानं दर्शयन् (पा.)—गन्तव्यपथि संमुखं हस्तं कुर्वन्–ति. ‡ पूर्वमेव 57 सर्गारंभे, रामस्य भरद्वाजाश्रमगमनपूर्वकचित्रकूटप्राप्तिपर्यन्तवृत्तान्तस्य सुमन्त्रेणावगतत्वकथनात्, तन्मुखावगतवृत्तान्तः भरतोऽपि भरद्वाजाश्रममार्गं पृच्छति ।

[1] संहितम्–ङ. च. [2] मर्थवत्–ङ. [3] पन्थानं दर्शयन्–च. [4] गुह–ङ.

दाशा[1]स्त्वाऽनुगमिष्यन्ति [2]देशज्ञाः सुसमाहिताः ।
अहं [3]चानुगमिष्यामि, राजपुत्र ! [4]महाबल ! ॥ ६ ॥

अहं च त्वाऽनुगमिष्यामि । अतो गहनविषयको न कश्चन विचार इति शेषः ॥ ६ ॥

कच्चिन्न दुष्टो व्रजसि रामस्याक्लिष्टकर्मणः ।
इयं ते महती सेना शङ्कां जनयतीव* मे ॥ ७ ॥

अपि तु अक्लिष्टकर्मणो रामस्य विषये दुष्टः—दुष्टभावो भूत्वा न व्रजसि कच्चित् ? ननु का ते दोषशङ्केत्यत्राह—इयमित्यादि । रामसन्दर्शनार्थगमने तु एतावत्सन्नाहस्य व्यर्थत्वात् अयमेव सन्नाहः मे शङ्कां जनयतीव ॥ ७ ॥

तमेवमभिभाषन्तं †आकाश इव निर्मलः ।
भरतः श्लक्ष्णया वाचा गुहं वचनमब्रवीत् ॥ ८ ॥
मा भूत् स कालो यत् कष्टं, न मां शङ्कितुमर्हसि ।
राघवः स हि मे भ्राता ज्येष्ठः पितृसमो मतः ॥ ९ ॥

मा भूदिति । 'यत्' इत्यव्ययम्, यस्मिन् काले कष्टं—परस्परोपमर्दलक्षणं भ्रातृकश्मलं भवति तादृशः स कालः—तादृश-दुष्प्रवृत्तिसाधनभूतकालशङ्का मा भूत्—न कर्तव्य इत्यर्थः । कुत इत्यतः—राघव इत्यादि । पितृसम इति—तद्बुद्ध्यास्पदभूतः ॥ ९ ॥

तं निवर्तयितुं यामि काकुत्स्थं वनवासिनम् ।
बुद्धिरन्या न ते कार्या, गुह ! सत्यं ब्रवीमि ते ॥ १० ॥

---

* इवशब्दः शङ्काया ईषत्त्वं द्योतयति—गो. † 'आकाश इव निर्मलः' इत्यनेन तच्छङ्कितदोषस्य तत्र प्रसक्तिरेव नास्तीत्युच्यते—गो.

[1] स्त्वनु—ङ. [2] धन्विनः—ङ. [3] त्वाऽनु—ञ. [4] महायशः—ञ.

अतो न दुश्शङ्कावकाश इत्याह—तं निवर्तयितुमित्यादि ॥ १० ॥

स तु *संहृष्ट[1]वदनः श्रुत्वा भरतभाषितम् ।
पुनरेवाब्रवीद्वाक्यं भरतं प्रति हर्षितः ॥ ११ ॥
धन्यस्त्वं न त्वया तुल्यं पश्यामि [2]जगतीतले ।
अयत्नादागतं राज्यं यस्त्वं त्यक्तुमिहेच्छसि ॥ १२ ॥
शाश्वती खलु ते कीर्तिः लोकाननु चरिष्यति ।
यस्त्वं कृच्छ्रगतं रामं प्रत्यानयितुमिच्छसि ॥ १३ ॥

चरिष्यति—प्रचरिष्यति ॥ १३ ॥

†एवं संभाषमाणस्य गुहस्य भरतं तदा ।
बभौ नष्टप्रभः सूर्यः रजनी चाभ्यवर्तत ॥ १४ ॥

नष्टप्रभ इति । मन्दीभूतरश्मिरित्यर्थः ॥ १४ ॥

सन्निवेश्य स तां सेनां गुहेन [3]परिरक्षितः ।
शत्रुघ्नेन सह श्रीमान् शयनं ‡पुनरागमत् ॥ १५ ॥

गुहेन परिरक्षितस्सन्—परिद्रुताटविकचोरबाधस्सन् ॥ १५ ॥

§रामचिन्तामयः शोकः भरतस्य महात्मनः ।
उपस्थितो ह्यनर्हस्य धर्मप्रेक्षस्य तादृशः ॥ १६ ॥

अनर्हस्येति । दुःखानर्हस्येत्यर्थः ॥ १६ ॥

---

* संहृष्टवदनः—प्रसन्नवदनः–गो. अन्तः हृष्टत्वात् संहृष्टवदन इति । † एवं भरतं संभाषमाणस्य—प्रशंसतः गुहस्य गुहे प्रशंसतीति यावत् । ‡ अत्र पुनश्शब्देन, गुहागमनात् पूर्वं श्रान्तः शयने स्थित इति गम्यते । समुपागमदिति वा पाठः । पुनः परितोषितः (पा.) इति वा सम्बन्धः–गो. §शयनं प्राप्तस्यापि निद्रा नाजगामेत्युच्यते—रामेत्यादिना ।

[1] हृदयः–ङ. [2] जगतीपते–ङ. [3] परितोषितः–च.

अन्तर्दाहेन दहनः सन्तापयति राघवम् ।
वनदाहाभिसन्तप्तं गूढोऽग्निरिव पादपम् ॥ १७ ॥

दहनः—शोकाग्निः । वनदाहकोऽग्निः—वनदाहाग्निः—दावाग्निरिति यावत्, तेन सन्तप्तं—शुष्कमिति यावत् । गूढोऽग्निः—कोटरान्तर्गतः ॥ १७ ॥

*प्रसृतः सर्वगात्रेभ्यः [1]स्वेदं शोकाग्नि[2]संभवम् ।
यथा सूर्यांशुसन्तप्तः हिमवान् प्रसृतो हिमम् ॥ १८ ॥

हिमं प्रसृत इति । कर्तरि निष्ठा, गत्यर्थत्वात् ॥ १८ ॥

†ध्याननिर्दरशैलेन विनिश्वसितधातुना ।
दैन्यपादपसङ्घेन शोकायासाधिशृङ्गिणा ॥ १९ ॥
प्रमोहानन्तसत्त्वेन सन्तापौषधिवेणुना ।
आक्रान्तो दुःखशैलेन [3]मज्जता कैकयीसुतः ॥ २० ॥

ध्यानेत्यादिना दुःखस्य पर्वतसमाधिः । रामविषयकध्यानान्येव निर्दरशैलाः—विदीर्णशिलासमूहाः यस्मिन् स तथा । धातुः गैरिकादिः ।

---

* 'हिमं प्रसृतो हिमवान्' इतिवत् 'स्वेदं प्रसृतः भरतः' इत्यन्वयः ।
† ध्याननिर्दरशैलेन । दरः—गर्तः, तस्मान्निर्गतं—निर्दरं; शिलानां समूहः शैलम्; रामविषयध्यानमेव निर्दरशैलं यस्मिन्, तेन । ध्यानस्य निरंतरत्वेन दरीविदीर्णशिलापङ्क्तिसाम्यम् । विविधं निश्वसितं—विनिश्वसितं, तदेव धातुः यस्मिन्; विविधत्वसाम्यात् । दैन्यं—करणानां स्वस्वविषयप्रवृत्तिवैमुख्यं, तस्य पादपसाम्यं अबोधरूपतया । शोकायासाधिशृङ्गिणा—शोकादय एव शृङ्गिणः—कृष्णसारादयः यस्मिन् तेन । यद्वा शोकायासाधिभिः शृङ्गिणा—शृङ्गवता; दृढत्व(दुरारोहत्व)साम्यात् । प्रमोहानन्तसत्त्वेन—प्रमोहा एव अनन्तानि सत्त्वानि जन्तवः यस्मिन्, तेन; 'द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु' इत्यमरः; प्राणभयशङ्काकरत्वात् । सन्तापौषधिवेणुना—सन्तापा एव ओषधयो वेणवश्च यस्मिन्, तेन; ओषधिवेणुसाम्यं दुष्प्रवेशत्वात् । आक्रान्तः, अभूदिति शेषः । महता—अतिगुरुणा । 'मज्जता' इति पाठे—अवयवेषु प्रविशता—गो.

[1] स्वेदः—ङ. [2] संभवः—ङ. [3] महता—ङ.

दैन्यं—दीनता, करणानां स्वस्वविषयप्रवृत्तिवैमुख्यरूपा, सा एव पादपसङ्घः यस्मिन्। शोकजः यः आयासः—चित्तश्रान्तिः सैवाधिरूपाणि शृङ्गाणि यस्य स तथा। सत्त्वं— आटविकप्राणिजातम्। सन्तापाः—अन्तर्बहिःकरणपरितापा एव ओषधयः वेणवश्च यस्मिन्। मज्जता—अन्तर्भावितणिः, मग्नं कुर्वता, सकरणग्राममात्मानमधो नयता। एवंरूपेण दुःखशैलेनाक्रान्तोऽभूत् ॥ १९-२० ॥

विनिःश्वसन् वै [1] भृशदुर्मनास्ततः
प्रमूढसंज्ञः परमापदं गतः।
शमं न लेभे हृदयज्वरार्दितः
नरर्षभो * [2] यूथहतो यथर्षभः ॥ २१ ॥

प्रकर्षेण मूढा संज्ञा—चेतना यस्य स तथा प्रमूढसंज्ञः। यूथहतः—यूथविभ्रष्टः ॥ २१ ॥

† गुहेन सार्धं भरतः समागतः
महानुभावः सजनः समाहितः।

---

*अयूथगतः(पा.)-यूथात् भ्रष्ट इत्यर्थः। यूथहत इति पाठे—हतयूथ इत्यर्थः-गो.
† अथ गुहः समागत इत्याह—गुहेनेति। सजनः-सपरिवारः समाहितः-एकाग्रचित्तः भरतः गुहेन सार्धं-सह समागतः-संगतः। अथ गुहः सुदुर्मनाः-भरतक्लेशदर्शनेन भरतादपि भृशं दुर्मनाः सन् भरतं अग्रजं प्रति-अग्रजं लक्षीकृत्य समाश्वासयत्-गो. अग्रजं प्रति समागतः भरतः गुहेन सार्धं सुदुर्मनाः-सुदुःखितः, अभूदिति शेषः। तं भरतं गुहः-पुनः गुहस्तु समाश्वासयदिति सम्बन्धः-ती. अथवा-यत्तदोर्नित्यसम्बन्धात्, अग्रजं प्रति सुदुर्मनाः यः भरतः- इतिपर्यन्तं वृत्तानुवादः; तदा पुनः तं गुहः समाश्वासयदिति-उत्तरसर्गसङ्ग्रहः। रामे निरतिशयप्रेमवतः तदीयकथाश्रवणं परमाश्वास एव। अथवा पूर्वसर्गादारभ्य पञ्चानां सर्गाणां संग्रहरूपोऽयं निष्कृष्टः श्लोकः। अत एव 89 सर्गारंभे 'व्युष्य रात्रिं' इत्युपक्रमः। भरते गुहस्य प्रत्ययात्, गुहः रामविषयककथां सर्वां कथयामास। तेन च भरतः सुदुर्मना बभूव। तं गुहः समाश्वास्य स्वगृहं गतः। पुनः प्रातरागतवान् गुह इति प्रतीयते। 89 सर्गस्य 4 श्लोकोऽत्रावधेयः।

[1] भृशदुःखित-ङ. [2] ऽयूथगतो-ङ.

सुदुर्मनास्तं भरतं तदा पुनः
[1]गुहः समाश्वासयदग्रजं प्रति ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे पञ्चाशीतितमः सर्गः

अग्रजं प्रति सुदुर्मना बभूव । तादृशं तं गुहः पुनराश्वासयदिति योजना । रात्रि(२२)मानः सर्गः ॥ २२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे पञ्चाशीतितमः सर्गः

षडशीतितमः सर्गः

[लक्ष्मणश्लाघनम्]

आचचक्षेऽथ *सद्भावं लक्ष्मणस्य महात्मनः ।
भरतायाप्रमेयाय गुहो गहनगोचरः ॥ १ ॥

अथ प्राप्तविस्रंभेन गुहेन रामलक्ष्मणवृत्तान्तबोधनम् । आचचक्ष इत्यादि । सद्भावं—साधुभावम् ॥ १ ॥

†तं जाग्रतं गुणैर्युक्तं [2]शरचापासिधारिणम् ।
भ्रातृगुप्त्यर्थमत्यन्तं अहं लक्ष्मणमब्रवम् ॥ २ ॥

तत्प्रकार एव—तं जाग्रतमित्यादि । भ्रातृगुप्त्यर्थं जाग्रतं—निर्निद्रम् । गुणैः-भ्रातृस्नेहसौशील्यादिगुणैः सहजक्षत्रधर्मैश्च युक्तम् ॥

---

* अथ—भरतस्वभावज्ञानानन्तरं-गो. † भरतस्य रामविषयकस्नेहमभिवर्धयितुं लक्ष्मणस्य ज्येष्ठानुवर्तनरूपं पूर्ववृत्तान्तमाह-- तं जाग्रतमित्यादिना-गो.

[1] शनैः–ङ.　　[2] वरचापेषु–ङ.

इयं, तात! [1]सुखा शय्या त्वदर्थमुपकल्पिता।
प्रत्याश्वसिहि *शेष्वास्यां सुखं, राघवनन्दन! ॥ ३ ॥

अथ 'इयं तात' इत्यादिरुक्तानुवादः †। सोऽसौ प्रथमोपदेशस्थले प्रपञ्च्य व्याकृतचरः ॥ ३ ॥

उचितोऽयं जनः सर्वः ‡दुःखानां, त्वं सुखोचितः।
§[2]धर्मात्मंस्तस्य गुप्त्यर्थं जागरिष्यामहे वयम् ॥ ४ ॥

न हि रामात् प्रियतरः ममास्ति भुवि कश्चन।
‖मोत्सुको भूः ब्रवीम्येतत् अप्यसत्यं तवाग्रतः ॥ ५ ॥

अस्य प्रसादादाशंसे लोकेऽस्मिन् सुमहद्यशः।
धर्मावाप्तिं च विपुलां [3]अर्थावाप्तिं च केवलाम् ॥ ६ ॥

सोऽहं प्रियसखं रामं शयानं सह सीतया।
रक्षिष्यामि धनुष्पाणिः ¶सर्वैः स्वैः ज्ञातिभिस्सह ॥ ७ ॥

[4]न हि मेऽविदितं किञ्चित् **वनेऽस्मिंश्चरतः सदा।
चतुरङ्गं ह्यपि बलं ††प्रसहेम वयं युधि ॥ ८ ॥

---

* 51 सर्गे 'साध्वस्यां, राजपुत्र! यथासुखम्' इति पाठः। † पूर्वं 51 सर्गे वृत्तोऽयं वृत्तान्त इति भावः। प्राय: उभयो: सर्गयो: आनुपूर्वीसाम्यात् विशिष्यात्र न व्याक्रियत इति भावः। अथापि दृश्यते तत्र तत्रानुपूर्वीभेद:। ‡ 'क्लेशानां' इति 51 सर्गे पाठः। § 'गुप्त्यर्थं जागरिष्याम: काकुत्स्थस्य वयं निशाम्' इति 51 सर्गे पाठः। ‖ हे लक्ष्मण! उत्सुक: मा भू:। तवाग्रतः एतत्–एतदधिकृत्य असत्यं ब्रवीम्यपि? इति काकुः। असत्यमपि ब्रवीमि? इति वा काकु:। एतत्स्थाने 'ब्रवीम्येतदहं सत्यं सत्येनैव च ते शपे' इति 51 सर्गे पाठ:। कुत्रचित्—अत्रापि तथैव पाठः–ङ. ¶ 'सर्वत:' इति 51 सर्गे पाठः। ** 'वनेऽस्मिंश्चरत:' इति 51 सर्गे पाठ:। †† 51 सर्गे 'सुमहत् प्रसहेमहि' इति पाठः।

[1] शुभा–ङ. [2] धर्मात्मंस्तव–ङ. [3] अर्थकामौ च केवलम्, अर्थावाप्तिं च पुष्कलाम्–ङ. [4] स्वभावविहितं–ङ.

*एवमस्माभिरुक्तेन लक्ष्मणेन महात्मना।
अनुनीता वयं सर्वे धर्ममेवानुपश्यता ॥ ९ ॥
कथं दाशरथौ भूमौ शयाने सह सीतया।
शक्या निद्रा मया लब्धुं जीवितं वा सुखानि वा ॥ १० ॥
यो न देवासुरैः सर्वैः शक्यः प्रसहितुं युधि।
तं पश्य, गुह! संविष्टं तृणेषु सह सीतया ॥ ११ ॥
†महता तपसा लब्धः विविधैश्च परिश्रमैः।
एको [1]दशरथस्यैषः पुत्रः सदृशलक्षणः ॥ १२ ॥
अस्मिन् प्रव्राजिते राजा न चिरं वर्तयिष्यति।
विधवा मेदिनी नूनं क्षिप्रमेव भविष्यति ॥ १३ ॥
विनद्य सुमहानादं श्रमेणोपरताः स्त्रियः।
निर्घोषोपरतं [2]नूनं अद्य राजनिवेशनम् ॥ १४ ॥
कौसल्या चैव राजा च तथैव जननी मम।
नाशंसे यदि [3]जीवेयुः सर्वे ते शर्वरीमिमाम् ॥ १५ ॥
जीवेदपि च मे माता शत्रुघ्नस्यान्ववेक्षया।
‡दुःखिता या तु कौसल्या वीरसूर्विनशिष्यति ॥ १६ ॥

---

*एतत्स्थाने–‘ लक्ष्मणस्तं तदोवाच रक्ष्यमाणास्त्वयाऽनघ। नात्र भीता वयं सर्वे धर्ममेवानुपश्यता ’ इति 51 सर्गे पाठः। †‘ यो मन्त्रतपसा लब्धः ’ इति 51 सर्गे पाठः। ‡‘ तद्दुःखं यत्तु कौसल्या ’ इति 51 सर्गे पाठः। एतदर्धानन्तरं—“ अनुरक्तजनाकीर्णा सुखा लोकप्रियावहा। राजव्यसनसंसृष्टा सा पुरी विनशिष्यति ॥ कथं पुत्रं महात्मानं ज्येष्ठं प्रियमपश्यतः। शरीरं धारयिष्यन्ति प्राणा राज्ञो महात्मनः ॥ विनष्टे नृपतौ पश्चात् कौसल्या विनशिष्यति। अनन्तरं च माताऽपि मम नाशमुपैष्यति ॥” इति श्लोकत्रयं 51 सर्गे अधिकम्।

[1] दशरथस्येष्टः–ङ. [2] नात मन्ये–ङ. [3] जीवन्ति–ङ. च.

अतिक्रान्तमतिक्रान्तं अनवाप्य मनोरथम् ।
राज्ये राममनिक्षिप्य पिता मे विनशिष्यति ॥ १७ ॥

सिद्धार्थाः पितरं वृत्तं तस्मिन् काले ह्युपस्थिते ।
प्रेतकार्येषु सर्वेषु संस्करिष्यन्ति भूमिपम् ॥ १८ ॥

रम्यचत्वरसंस्थानां सुविभक्तमहापथाम् ।
हर्म्यप्रासादसंपन्नां *सर्वरत्नविभूषिताम् ॥ १९ ॥

गजाश्वरथसंबाधां तूर्यनादविनादिताम् ।
सर्वकल्याणसंपूर्णां हृष्टपुष्टजनाकुलाम् ॥ २० ॥

आरामोद्यान[1]संपूर्णां समाजोत्सवशालिनीम् ।
सुखिता विचरिष्यन्ति राजधानीं पितुर्मम ॥ २१ ॥

अपि जीवेद्दशरथः वनवासात् पुनर्वयम् ।
प्रत्यागम्य महात्मानं अपि पश्येम सुव्रतम् ॥ २२ ॥

अपि सत्यप्रतिज्ञेन सार्धं कुशलिना वयम् ।
निवृत्ते समये ह्यस्मिन् सुखिताः प्रविशेमहि ॥ २३ ॥

परिदेवयमानस्य †तस्यैवं सुमहात्मनः ।
तिष्ठतो राजपुत्रस्य शर्वरी साऽत्यवर्तत ॥ २४ ॥

‡प्रभाते विमले सूर्ये कारयित्वा जटा उभौ ।
अस्मिन् भागीरथीतीरे सुखं संतारितौ मया ॥ २५ ॥

---

*‘गणिकावरशोभिताम्’ इति 51 सर्गे पाठः। †‘दुःखार्तस्य’ इति 51 सर्गे पाठः। ‡एतच्छ्लोकद्वयं तु 52 सर्गसङ्ग्रहरूपम्।

[1] संपन्ना—क.

जटाधरौ तौ द्रुमचीरवाससौ
[1]महाबलौ कुञ्जरयूथपोपमौ ।
वरेषुचापासिधरौ परंतपौ
[2]व्यवेक्षमाणौ सह सीतया गतौ ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे षडशीतितमः सर्गः

तरु(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे षडशीतितमः सर्गः

सप्ताशीतितमः सर्गः

[रामशयनादिप्रश्नः]

गुहस्य वचनं श्रुत्वा भरतो भृशमप्रियम् ।
*ध्यानं जगाम तत्रैव यत्र तत् श्रुतमप्रियम् ॥ १ ॥

एवं भ्रात्रोर्जटाधारणश्रवणपरितप्तः कौसल्यासमाश्वासितो भरतः पुनश्च गुहमुखादशेषवृत्तान्तमवगच्छति—गुहस्येत्यादि । भृशमप्रियं—जटाधारणादिरूपम् । यत्र तत्रैवेति । यत्र क्षणे तत्र क्षण एवेत्यर्थः ॥ १ ॥

---

* यत्र तत्रैव—यत्र क्षणे अप्रियं श्रुतं, तत्रैवेत्यर्थः । यद्वा यत्र विषये अप्रियं श्रुतं, तत्रैव ध्यानं जगाम—स्वाभिलषितकार्यसङ्कटं जातमिति चिन्तापारवश्यं प्राप्त इत्यर्थः—गो. जटाधारणात् रामप्रत्यावृत्तौ संशयो जात इति भावः ।

[1] महारथौ—ङ. [2] व्यपेक्षमाणौ—ङ.

*सुकुमारो महासत्त्वः सिंहस्कन्धो महाभुजः ।
पुण्डरीकविशालाक्षः तरुणः प्रियदर्शनः ॥ २ ॥

'ध्यानं जगाम' इत्युक्तं; तस्यैवैतदभिनयः–सुकुमार इत्यादि । प्रियदर्शनः 'कथं जटादिकं धृतवान्?' इति चिन्तां जगामेत्यन्वयः ॥२॥

प्रत्याश्वस्य मुहूर्तं तु कालं परमदुर्मनाः ।
[1]ससाद सहसा तोत्रैः [2]हृदि विद्ध इव द्विपः ॥ ३ ॥

ततो मुहूर्तकालं चिन्तया परमदुर्मनाः परमखिन्नः प्रत्याश्वस्य तु पुनश्च सहसा दुःखवेगेन ससाद–अवशोऽभूत् । तोत्रं–வாங்கோல் । हृदि–हृदयदेशे–मर्मस्थले ॥ ३ ॥

[3]भरतं मूर्छितं दृष्ट्वा विवर्णवदनो गुहः ।
बभूव व्यथितस्तत्र भूमिकम्पे यथा द्रुमः ॥ ४ ॥
तदवस्थं तु भरतं शत्रुघ्नोऽनन्तरस्थितः ।
परिष्वज्य रुरोदोच्चैः विसंज्ञः शोककर्शितः ॥ ५ ॥

तदवस्थं–विचेतनावस्थम् । अनन्तरस्थित –समीपस्थितः ॥ ५ ॥

ततः सर्वाः समापेतुः मातरो भरतस्य ताः ।
उपवासकृशा दीना भर्तुर्व्यसनकर्शिताः ॥ ६ ॥

---

* सुकुमार इत्यादिश्लोकद्वयमेकान्वयम् । प्रत्याश्वस्य मुहूर्तं कालं परमदुर्मनाः मन् सहसा पपात । ससादेति वा पाठः–गो. ती. सुकुमारत्वादिगुणेन जटादिकं धृतम्, अतो निवृत्तिर्दुर्लभेति चिन्तां जगाम–ति. अथ वा—'ध्यानं-रामविषयकचिन्तां जगाम' इत्यस्यैव विवरणम्—सुकुमार इत्यादि । अतिसङ्कटेन आत्मगतं वाक्यमिदं—सुकुमार इत्यादि । सङ्कटाधिक्यादेव वाक्यापरिसमाप्त्यादि । एवं सहसा मूर्छामन्तरा क्षणकाल-चिन्तनमपि आश्चर्यावहं इति भावेनानन्तरार्धं प्रवृत्तम् ।

[1] पपात–ङ. [2] प्रतिविद्ध–ङ. [3] अयं श्लोकः ङ. पुस्तके कुण्डलितः ।

ताश्च तं पतितं भूमौ रुदन्त्यः पर्यवारयन् ।
कौसल्या त्वनुसृत्यैनं दुर्मनाः परिषस्वजे ॥ ७ ॥

अनुसृत्य—समीपं प्राप्य ॥ ७ ॥

वत्सला स्वं यथा वत्सं *[1] उपगूह्य तपस्विनी ।
परिपप्रच्छ भरतं रुदन्ती शोकलालसा ॥ ८ ॥

स्वं वत्सं–स्वीयं पुत्रं यथा, तथा ॥ ८ ॥

† पुत्र! व्याधिर्न ते कच्चित् शरीरं [2] प्रति बाधते ।
अद्य राजकुलस्यास्य त्वदधीनं हि जीवितम् ॥ ९ ॥

हे पुत्र! ते शरीरं व्याधिः–परमपित्तप्रकोपलक्षणः न बाधते कच्चित्? अन्यथा एवं भ्रममूर्छाप्रलापनानि न स्युः ॥ ९ ॥

त्वां दृष्ट्वा, पुत्र! जीवामि रामे सभ्रातृके गते ।
वृत्ते दशरथे राज्ञि नाथ एकस्त्वमद्य नः ॥ १० ॥
‡ [3] कच्चिन्न लक्ष्मणे, पुत्र! श्रुतं ते किञ्चिदप्रियम् ।
पुत्रे वा ह्येकपुत्रायाः सहभार्ये वनं गते ॥ ११ ॥

अथ उक्तभ्रममूर्छाप्रलापानां हेत्वन्तरं पृच्छति–कच्चिन्नेत्यादि । लक्ष्मणे–तद्विषये । अप्रियं–प्राणात्ययरूपम् ॥ ११ ॥

---

* उपगूह्य—परिष्वज्य–गो. † न हि भरतस्य व्याधिश्चातुर्थिकः, अपि तु रामविरह एव (पुत्रव्याधिरित्येकं पदं) रामविरहः ते शरीरं (न) बाधते कच्चित् इत्यर्थः । अद्येति–रामो वनं गतः, चक्रवर्ती तु संस्थितः, अतस्त्वमेवेदानीं अस्माकं रक्षक इति नार्थः ; किन्तु, रामः भवतो मुखवैवर्ण्यं दृष्ट्वा न पुनरागतो भवेत् । अवश्यमागमिष्यतीत्येतदवेक्ष्य वयं जीवामः । भवान्नास्तीति श्रुतं चेत् क इमां दिशमवलोकयेदित्यर्थः–गो. परन्त्वत्र उत्तरश्लोका विलोकनीयाः । ‡ 'ततस्सर्वाः समापेतुर्मातरः ' (६) इत्यनेन भरतमूर्छाप्तिकाले कौसल्यादीनामसन्निहितत्वात् , भरतमूर्छाहेत्वपरिज्ञानात् , ' अतिस्नेहः पापशङ्की ' इति न्यायेन रामलक्ष्मणयोर्विपत्त्यादिश्रवणादेव भरतो मूर्छित इति भावनया कौसल्या पृच्छति कच्चिदित्यादि ॥

[1] उपगूह्य मनस्विनी–ङ. [2] परिबाधते–ङ. [3] कच्चिन्नु–ङ.

स मुहूर्तं समाश्वस्य रुदन्नेव महायशाः ।
कौसल्यां परिसान्त्व्येदं गुहं वचनमब्रवीत् ॥ १२ ॥

'स मुहूर्तं समाश्वस्य' इति । मुहूर्तं विसंज्ञः पश्चात् समाश्वास्येत्यर्थः । कौसल्यां परिसान्त्व्येति । 'न मे रोगः, नापि भ्रात्रोरपायः । अपि तु तयोः जटाधारणं श्रुत्वा तद्दुःखेन मूर्छितोऽस्मि' इत्युक्त्वेत्यर्थः ॥

भ्राता मे क्वावसद्रात्रौ क्व सीता क्व च लक्ष्मणः?
अस्वपच्छयने कस्मिन् किं भुक्त्वा, गुह! शंस मे ॥ १३ ॥
सोऽब्रवीत् भरतं हृष्टः* निषादाधिपतिर्गुहः ।
यद्विधं प्रतिपेदे च रामे प्रियहितेऽतिथौ ॥ १४ ॥

हृष्ट इति । लक्ष्मणवत् परिपूर्णभ्रातृभक्तिदर्शनेन सन्तुष्टः । रामे भरतविमतिशङ्काहीनश्चेत्यर्थः । यद्विधं—यत्प्रकारकं व्यवहारं रामे प्रियहितेऽतिथौ प्रतिपेदे—प्राप्तवान् तमब्रवीदित्यन्वयः ॥ १४ ॥

अन्नमुच्चावचं [1]भक्षाः फलानि विविधानि च ।
रामायाभ्यवहारार्थं [2]बहु चोपहृतं मया ॥ १५ ॥

वचनप्रकारः—अन्नमित्यादि ॥ १५ ॥

तत्सर्वं †[3]प्रत्यनुज्ञासीत् रामः सत्यपराक्रमः ।
न हि तत् प्रत्यगृह्णात् सः क्षत्रधर्ममनुस्मरन् ॥ १६ ॥

---

* हृष्टः—रामवृत्तान्तकीर्तनस्यावकाशो लब्ध इति सञ्जातहर्षः—गो. † प्रत्यनुज्ञासीत्—प्रत्य·वज्ञासीत्—पुनर्नीयतामित्यनुज्ञातवान् । अत्र हीनजातिपरिग्रहत्वात् तत्प्रत्याख्यानं, ऋषिभ्यस्तु स्वीकरिष्यतीत्याहुः—गो. इदमत्रावधेयम्—अत्र 'क्षत्रधर्ममनुस्मरन्' इत्याद्युक्तिः गुहस्यैव । तत्र तु (50 सर्गे) 'स्वागतं ते महाबाहो! तवेयमखिला मही' (38) 'भक्ष्यं भोज्यं च पेयं च लेह्यं चेदमुपस्थितम् । शयनानि च मुख्यानि' (40) इत्यादिगुहकृतराजोपचारं शृण्वन् हि रामः 'सर्वं तदनुजानामि न हि वर्ते प्रतिग्रहे । कुशचीराजिनधरं फलमूलाशिनं च माम् । विद्धि प्रणिहितं धर्मे तापसं वनगोचरम्' (44) इत्येवाह ॥

[1] भक्ष्यं—ङ. [2] बहुशोऽपा—ङ. [3] प्रत्यनुज्ञाप्य—ङ.

प्रत्यनुज्ञासीत्—मदनुग्रहार्थं केवलमङ्गीचकार । क्षत्रधर्मं—दानमेव क्षत्रियस्य, न त्वादानमिति स्मरन् न हि तत् प्रत्यगृह्णात्—अभ्यवहाराय न स्वीकृतवान् ॥ १६ ॥

न ह्यस्माभिः प्रतिग्राह्यं, सखे! देयं तु सर्वदा ।
इति तेन वयं, [1]राजन्! अनुनीता महात्मना ॥ १७ ॥

स एव उक्तधर्मः विव्रियते—न ह्यस्माभिरित्यादि । यद्येवं कथमृषिभ्यो भरद्वाजादिभ्यः पूजा प्रतिगृह्यते ? न्याय्यत्वादेव । गोमधुपर्कादिना राजा ब्राह्मणेन पूजनीयः । सा च पूजा राज्ञा अभ्युदयाय ग्राह्या । यथान्यायप्राप्तः षड्भागः करः स्वदेशात् । गुहस्तु निषादः, नास्मात् पूजा ग्राह्या ; यथाविधिपूजानधिकारात् । नापि करत्वेन, अस्वदेशत्वात् * ॥ १७ ॥

लक्ष्मणेन समानीतं पीत्वा वारि महायशाः ।
[2]औपवास्यं तदाऽकार्षीत् राघवः सह सीतया ॥ १८ ॥

'औपवास्यं तूपवासः', स्वार्थिकः ष्यञ् ॥ १८ ॥

ततस्तु जलशेषेण लक्ष्मणोऽप्यकरोत्तदा ।
† वाग्यतास्ते त्रयः सन्ध्यां समुपासत ‡ संहिताः ॥ १९ ॥

---

* यद्यपि गुहस्य तत्त्वज्ञत्वेन अस्त्येव भगवत्पूजाधिकारः, तथाऽपि व्रतस्थत्वात्तदभोजनमिति तत्त्वम्—ति. † ननु पूर्वं पुरोवादे 'ततश्चीरोत्तरासङ्गः सन्ध्यामन्वास्य पश्चिमाम् । जलमेवाददे भोज्यं लक्ष्मणेनाहृतं स्वयम्' इत्युक्तम् । कथमत्रानुवादे प्रथमं जलादानं पश्चात्सन्ध्योपासनं चोच्यते—सत्यम्—तथैव क्रमः । इह तु गुहानीतान्नाङ्गीकारे 'किं भुक्तवान् रामः?' इत्याकाङ्क्षायां लक्ष्मणेन 'यद्वार्यानीतं तत्पीतं' इति प्रसङ्गसङ्गत्या जलपानं प्रथममुक्त्वा अथ सन्ध्योपासनमुक्तमिति न दोषः—गो.
‡ संहिताः—सहिता इति वा ।

[1] सर्वे—ङ. [2] उपवासं—ङ.

अकरोदिति । पानक्रियामिति शेषः ॥ १९ ॥

सौमित्रिस्तु ततः पश्चात् अकरोत् स्वास्तरं शुभम् ।
स्वयमानीय बर्हींषि क्षिप्रं राघवकारणात् ॥ २० ॥

ततः पश्चादिति । सन्ध्यावन्दनानन्तरमित्यर्थः । बर्हींषि—दर्भान् ॥ २० ॥

तस्मिन् समाविशत् रामः स्वास्तरे सह सीतया ।
प्रक्षाल्य च तयोः पादौ व्यपाक्रामत् स लक्ष्मणः ॥

व्यपाक्रामदिति । शयनप्रदेशात् बहु दूरमिति शेषः ॥

*एतत्तदिङ्गुदीमूलं इदमेव च तत्तृणम् ।
[1]यस्मिन् रामश्च सीता च रात्रिं तां शयितावुभौ ॥

†नियम्य पृष्ठे तु तलाङ्गुलित्रवान्
शरैः सुपूर्णाविषुधी परंतपः ।
महद्धनुः सज्यमुपोह्य लक्ष्मणः
निशामतिष्ठत् [2]परितोऽस्य केवलम् ॥ २३ ॥

नियम्य—बद्धा । पृष्ठे—पश्चाद्भागे । तलयोः—करतलयोः अङ्गुलित्रमस्यास्तीति तथा । उपोह्य—धृत्वा ॥ २३ ॥

---

* गुहः दूरे हस्तेन दर्शयन् वदति—एतदित्यादि । तत्समीपगमनं तु अनन्तरसर्गे कथ्यते । † पृष्ठे-पश्चाद्भागे इषुधी—तूणीरद्वयं नियम्य--बद्धा । शूराणां सव्यापसव्य-प्रयोगार्थं इषुधिद्वयधारणमस्ति । तलाङ्गुलित्रवान्—'तलं ज्याघातवारणम्' इत्यमरः-गो. एवञ्च करयोः ज्याघर्षणवारणं तलं, ज्याऽऽकर्षणपीडावारणं अङ्गुल्योः-अङ्गुलित्रं, तदुभयवानित्यर्थः ।

[1] अस्मिन्-ङ. [2] स्वरितो-ङ.

ततस्त्वहं चोत्तमबाणचापधृत्
स्थितोऽभवं तत्र स तत्र लक्ष्मणः ।
अतन्द्रिभिः ज्ञातिभिः आत्तकार्मुकैः
महेन्द्रकल्पं [1]परिपालयं तदा ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे सप्ताशीतितमः सर्गः

परिपालयं—पर्यपालयमिति यावत् । वीर(२४)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे सप्ताशीतितमः सर्गः

अष्टाशीतितमः सर्गः

[रामशय्यादिवीक्षणम्]

तच्छ्रुत्वा *निपुणं सर्वं भरतः सह मन्त्रिभिः ।
इङ्गुदीमूलमागम्य रामशय्या[2]मवेक्ष्य ताम् ॥ १ ॥

एवं गुहात् रामशयनस्थलादिकमवगत्य तांश्च जननीभ्यः प्रदर्श्य बहु विलप्य रामकर्तव्यं व्रतं स्वयं कर्तुमध्यवस्यति । तच्छ्रुत्वेत्यादि ॥

अब्रवीज्जननीः सर्वाः, इह तेन महात्मना ।
शर्वरी शयिता भूमौ इदमस्य विमर्दितम् ॥ २ ॥

'शर्वरी शयिता' इति निष्ठयाऽधिकरणस्याभिहितत्वात् 'इदमेषामासितं' इतिवत् शर्वरीशब्दात् प्रथमा, शर्वर्यां शयनक्रियाऽभूदित्यर्थः । इदमस्य विमर्दितमित्यत्राप्यधिकरणे निष्ठा । 'क्तस्य

---

* निपुणं—सावधानमित्यर्थः—गो.

[1] परिपालयंस्तदा—ङ. [2] मवैक्षत—ङ.

च वर्तमाने' इति कर्तरि षष्ठी। अस्येति। अस्मिन् एतत्कर्तृकं विमर्दनमित्यर्थः ॥ २ ॥

महाभागकुलीनेन [1] महाभागेन धीमता।
जातो *[2] दशरथेनोर्व्यां न रामः स्वप्तुमर्हति ॥ ३ ॥

अजिनोत्तरसंस्तीर्णे वरास्तरणसञ्चये।
शयित्वा पुरुषव्याघ्रः कथं शेते महीतले ? ॥ ४ ॥

अजिनरूपेण—कदलीचमूर्वादिराजार्हमृगाजिनविशेषरूपेण उत्तरेण—मञ्चोत्तरच्छदेन संस्तीर्णे तथा। एतादृशास्तरणवत् तल्पं उष्णकाले शैत्याय। तथा कालान्तरे—वरास्तरणसञ्चये बर्हिषि, बहुव्रीहिः, सः अन्यपदार्थः पर्यङ्कः। तूलकल्पकार्पासवस्त्ररत्नकम्बलादीनि वरास्तरणानि, शैत्यानुरोधेनौष्ण्यार्थं तद्बाहुल्यम्, उक्तरूपशयनविशेषेषु शयित्वाऽसौ कथं महीतले शेते ! ॥ ४ ॥

प्रासादाग्रविमानेषु वलभीषु च सर्वदा।
† हैमराजत[3]भौमेषु वरास्तरणशालिषु ॥ ५ ॥

पुष्पसञ्चयचित्रेषु चन्दनागरुगन्धिषु।
पाण्डुराभ्रप्रकाशेषु शुकसङ्घरुतेषु च ॥ ६ ॥

‡ प्रासादवर[4]वर्येषु [5] शीतवत्सु सुगन्धिषु।
उषित्वा [6]मेरुकल्पेषु कृतकाञ्चनभित्तिषु ॥ ७ ॥

---

* दशरथेनेति पञ्चम्यर्थे तृतीया–गो. † हैमानि राजतानि–भौमानि–भूतलानि येषु तेषु–गो. ‡ प्रासादवराणामुत्तमेषु–गो.

[1] महाराजेन–ङ. [2] दशरथादुर्व्यां–ङ. [3] वर्णेषु–ङ. [4] रम्येषु–ङ. [5] शीतवत्सु–ङ. [6] मेघकल्पेषु–ङ.

गीतवादित्रनिर्घोषैः वराभरणनिःस्वनैः ।
मृदङ्गवरशब्दैश्च सततं प्रतिबोधितः ॥ ८ ॥
वन्दिभिर्वन्दितः काले बहुभिः सूतमागधैः ।
*गाथाभिरनुरूपाभिः स्तुतिभिश्च परन्तपः ॥ ९ ॥

अथ प्रासादाग्रविमानेषु—प्रासादाग्रवर्तिशिरोगृहेषु उच्यमान-विशेषणकेषु उषित्वा कथं भूमौ शेते ? तथा गीतवादित्राद्युरेतस्तुतिभिः बोध्यमानः कथं भूमौ केवलं शेते ? इत्यन्वयः । वलभी—गृहभेदः, 'कूटागारं तु वलभी' इति वैजयन्ती । हेमादिविकारजाः—हैमराजतभौमाः, तेषु । प्रासादवराणामपि वर्याः—श्रेष्ठाः ॥ ९ ॥

अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति मा ।
मुह्यते खलु मे भावः स्वप्नोऽयमिति मे मतिः ॥ १० ॥

इदं—तादृशस्य रामस्य भूशयनं लोके—अत्रत्यजने श्रुतं अश्रद्धेयमेव । तस्यैव विवरणं—न सत्यं मा—मां प्रति प्रतिभाति । अथवा—यतः मे भावः, खलु प्रसिद्धौ, मुह्यते, अतो मे मोहो वेति शेषः । अथवा अयं प्रसङ्गः स्वप्न एव भवितुमर्हतीति मे मतिः । तत्र किल असंभावितमपि संभाव्यते ॥ १० ॥

†न नूनं दैवतं किञ्चित् कालेन बलवत्तरम् ।
यत्र दाशरथी रामो [1]भूमावेव शयीत सः ॥ ११ ॥

---

* कथं भूमौ केवलायां शेते, कथं श्वापदरवैः प्रतिबोध्यते, कथमेकाकी तिष्ठतीति चोपस्कार्यम्—गो. †कालेन—कालतः बलवत्तरं किञ्चित्—किमपि दैवतं नास्तीति नूनं मन्ये—ति. सर्वं कालाधीनमेव, न तु तदपेक्षया सर्वशक्त्यनन्तशक्तत्वादिगुणकं दैवं नाम किञ्चिदस्ति नूनं—इति भावः ।

[1] भूमावेवमशेत—च.

अथ वास्तवीमुपपत्तिं परामृशति—न नूनमित्यादि। बलवत्तरं—स्वातन्त्र्यादर्थप्रापकं दैवमिति किञ्चिद्वस्तु नास्तीति नूनं—निश्चितम्; यत्र—यस्मात् स रामोऽपि कालेन बलीयसा भूमावेव शयीत। अतो दैवस्यादृष्टपर्यायस्यापि कालस्यैव प्रवर्तकत्वात् काल एव प्रारब्धमुपस्थाप्य—भूशयनादिदुःखं प्रापयतीत्यर्थः ॥ ११ ॥

* विदेहराजस्य सुता सीता च प्रियदर्शना।
दयिता शयिता भूमौ स्नुषा दशरथस्य च ॥ १२ ॥
इयं शय्या मम भ्रातुः इदं हि परिवर्तितम्।
स्थण्डिले कठिने सर्वं [1] गात्रैर्विमृदितं तृणम् ॥ १३ ॥
मन्ये साभरणा सुप्ता सीताऽस्मिन् [2] शयनोत्तमे।
तत्र तत्र हि दृश्यन्ते [3] सक्ताः † कनकबिन्दवः ॥ १४ ॥

कनकाबिन्दवः—भूषणावयवकनकशकलानि (?) ॥ १४ ॥

उत्तरीयमिहासक्तं सुव्यक्तं सीतया तदा।
तथा ह्येते प्रकाशन्ते सक्ताः [4] कौशेयतन्तवः ॥ १५ ॥
मन्ये भर्तुः सुखा शय्या येन बाला तपस्विनी।
सुकुमारी सती दुःखं न विजानाति मैथिली ॥ १६ ॥

भर्तुः शय्या यादृशी तादृश्यपि सुखा—सुखसाधनभूतेति मन्ये। स्त्रीणामिति शेषः। कुत इत्यतः—सुकुमारीत्यादि ॥ १६ ॥

---

* शयिता—शयितवती, हन्तेति शेषः—गो. यद्वा—कालप्राबल्य एव निदर्शनान्तरं—विदेहराजस्य सुतेत्यादि। 'सीता च भूमौ शयिता, अतः—न नूनं दैवतं किञ्चिदित्यन्वयः। † कनकाभरणसंमर्दाधीनतच्छायापत्तिकृतो वाऽयं निर्देशः स्यात्।

[1] गात्रं विमृदितं तृणैः—ङ. [2] शयने शुभे, शयने शुभा—ङ. [3] सिक्ताः—ङ.
[4] कनकतन्तवः—ङ.

*[1] हाहन्ताऽस्मि नृशंसोऽहं [2] यत् सभार्यः कृते मम ।
ईदृशीं राघवः शय्यां अधिशेते ह्यनाथवत् ॥ १७ ॥

मम कृत इति । कैकयीप्रवृत्तेः स्वज्ञानस्वानुमतिराहित्येऽपि स्वमुद्दिश्यैव प्रवृत्तत्वादित्याशयः ॥ १७ ॥

सार्वभौमकुले जातः [3] सर्वलोकस्य सम्मतः ।
[4] सर्वलोकप्रियः त्यक्त्वा राज्यं [5] सुखमनुत्तमम् ॥ १८ ॥
कथमिन्दीवरश्यामः रक्ताक्षः प्रियदर्शनः ।
सुखभागी न दुःखार्हः शयितो भुवि राघवः ? ॥ १९ ॥
धन्यः खलु [6] महाभागः लक्ष्मणः शुभलक्षणः ।
भ्रातरं विषमे काले यो राममनुवर्तते ॥ २० ॥

विषमे काले—सङ्कटकाले ॥ २० ॥

सिद्धार्था खलु वैदेही पतिं याऽनुगता वनम् ।
† वयं संशयिताः सर्वे हीनास्तेन महात्मना ॥ २१ ॥

संशयिताः—संशयापन्नरामसेवकाः । कालान्तरप्रार्थनीयसेवात्वादिदानीमस्माकं सेवा अनुमन्यते न वेति संशयितसेवासिद्धिमन्त इत्यर्थः ॥ २१ ॥

---

* हाहन्तेति एकनिपातः खेदार्थः—गो. † तेन महात्मना हीनाः—परित्यक्ताः वयं, अत एव संशयिताः—जीवनसंशयमेवापन्नाः । एतदेवोच्यते अनन्तरश्लोके—'शून्या' इति पदेन । 'न च सीता त्वया हीना न चाहमपि राघव । मुहूर्तमपि जीवावः' इतिवदिति भावः ।

[1] हाहतोऽस्मि—च. [2] यः पितुः सदृशो मम—ङ. [3] सर्वलोकसुखावहः—च. [4] सर्वप्रियकरः—च. [5] प्रिय—च. [6] महाबाहुः—ङ.

अकर्णधारा पृथिवी शून्येव प्रतिभाति मा ।
गते दशरथे स्वर्गं रामे चारण्यमाश्रिते ॥ २२ ॥

अकर्णधारेति । नौरिवेति शेषः । शून्येव—प्रवृत्तिशून्येवेत्यर्थः ॥ २२ ॥

*न च प्रार्थयते कश्चित् मनसाऽपि वसुन्धराम् ।
वनेऽपि वसतस्तस्य बाहुवीर्याभिरक्षिताम् ॥ २३ ॥

कश्चिदिति । मादृश इत्यर्थः ॥ २३ ॥

†शून्यसंवरणारक्षां अयन्त्रितहयद्विपाम् ।
[1]अपावृतपुरद्वारां राजधानीमरक्षिताम् ॥ २४ ॥
अप्रहृष्ट[2]बला‡मूनां विषमस्थामनावृताम् ।
शत्रवो [3]नाभिमन्यन्ते [4]भक्षान् विषकृतानिव ॥ २५ ॥

शून्या संवरणानां—प्राकाराणां आरक्षा—आ-समन्तात् रक्षणं यस्याः सा तथा । अप्रहृष्टेति बलादिना हेतुना । ऊनां—क्षीणबलां । नाभिमन्यन्ते—स्वीकर्तुं नेच्छन्ति । अतः तादृशमहिमा स एव राज्यार्हः, तमेवानेष्यामि ॥ २५ ॥

§अद्यप्रभृति भूमौ तु शयिष्येऽहं तृणेषु वा ।
फलमूलाशनो नित्यं जटाचीराणि धारयन् ॥ २६ ॥

---

* अनायकत्वे कथं राज्यं निरुपद्रवं ? तत्राह—न चेति । कश्चित्—सामन्तः । न प्रार्थयते—आक्रमितुं नेच्छति–गो. पूर्वश्लोके 'अकर्णधारा' इत्याद्यभिधानादेवं व्याख्यानम् । †रामवीर्यं विना रक्षकान्तरशून्यत्वमाह— शून्यसंवरणेत्यादि–गो. ‡न्यूनां—साधनविहीनां–गो. § उक्तसर्वानर्थस्य आत्ममूलकतया तत्प्रायश्चित्तमाह—अद्येत्यादि । श्लोकद्वयमेकान्वयम्–गो.

[1] अनावृतपुरद्वारां–च. अनावृतगृहद्वारां–ङ. [2] बलां शून्यां–च. बलान्यूनां–ङ. [3] नानुमन्यन्ते–ङ. [4] भक्ष्यान्–च.

यदि व्रतभङ्गोपाधिं वक्ष्यति, तदाऽहं तत्प्रतिनिधिः तद्व्रतमनुष्ठास्य इत्याह—अद्यप्रभृतीत्यादि ॥ २६ ॥

*[1]तस्यार्थमुत्तरं कालं निवत्स्यामि सुखं वने ।
[2]तं प्रतिश्रवमामुच्य नास्य मिथ्या भविष्यति ॥ २७ ॥

तस्यार्थे—तस्य व्रतपरिपालनार्थे उत्तरं कालं—भाविचतुर्दश-वर्षपर्यन्तं, अत्यन्तसंयोगे द्वितीया, तं प्रतिश्रवं—तदीयव्रताभ्युपगमं आमुच्य—स्वयं गृहीत्वा वने वत्स्यामीति पूर्वेणान्वयः । एवं सति नास्य मिथ्या भविष्यति, प्रतिश्रव इति शेषः ॥ २७ ॥

वसन्तं भ्रातुरर्थाय †शत्रुघ्नो माऽनुवत्स्यति ।
लक्ष्मणेन सह त्वार्यो ह्ययोध्यां पालयिष्यति ॥ २८ ॥

अभिषेक्ष्यन्ति काकुत्स्थं अयोध्यायां द्विजातयः ।
अपि मे देवताः कुर्युः इमं सत्यं मनोरथम् ॥ २९ ॥

प्रसाद्यमानः शिरसा मया स्वयं
बहुप्रकारं यदि [3]न प्रपत्स्यते ।
‡ततोऽनुवत्स्यामि चिराय राघवं
वने [4]वसन्नार्हति मामुपेक्षितुम् ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे अष्टाशीतितमः सर्गः

---

* तस्यार्थ—रामार्थमित्यर्थः-गो. † 'भरतस्यापि शत्रुघ्नः लक्ष्मणावरजो हि सः। प्राणैः प्रियतरो नित्यं तस्य चासीत् तथा प्रियः' (बाल. 18-31) इति ह्युक्तम् । ‡ यदि राघवः मत्प्रार्थनां नाङ्गीकुर्यात्, तदा अहमपि वने वसन् चिराय राघवं अनुवत्स्यामि ; राघवानुग्रहप्राप्तिपर्यन्तमिति भावः ।

[1] तस्याह—च. [2] तत् प्रतिश्रुतमार्यस्य नैव मिथ्या—च. [3] नाभिपत्स्यते—ङ. [4] चिरं नार्हति—ङ.

न प्रपत्स्यत इति। निवृत्तिविषयकप्रसादादिति शेषः। उपेक्षितुं नार्हतीति। भक्तवत्सलत्वादित्याशयः। घरा(२९)मानः (?) सर्गः ॥ ३० ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे अष्टाशीतितमः सर्गः

एकोननवतितमः सर्गः

[गङ्गासन्तरणम्]

व्युष्य रात्रिं तु *तत्रैव गङ्गाकूले स राघवः।
भरतः काल्यमुत्थाय शत्रुघ्नमिदमब्रवीत् ॥ १ ॥

अथ भरतस्य च गङ्गातरणपूर्वकं भरद्वाजाश्रमप्राप्तिः। व्युष्येति। व्युषित्वा—उषित्वा। काल्यं—'प्रत्यूषोऽहर्मुखं काल्यं', तदुचितकृत्यमित्यर्थः ॥ १ ॥

शत्रुघ्नोत्तिष्ठ किं शेषे? निषादाधिपतिं गुहम्।
शीघ्रमानय, भद्रं ते, तारयिष्यति †वाहिनीम् ॥ २ ॥
‡जागर्मि नाहं स्वपिमि [1]तमेवार्यं विचिन्तयन्।
इत्येवमब्रवीत् [2]भ्रात्रा शत्रुघ्नोऽपि प्रचोदितः ॥ ३ ॥

कार्यं विचिन्तयन्नहं तथैव जागर्मि। यथा आवां शयनात् पूर्वं तथैव मध्ये क्षणमपि मे निद्रा नास्तीत्यर्थः। नाहं स्वपिमीति। रुधादित्वादिट्। इत्येवमब्रवीदिति। नाहमपि स्वपिमीत्युक्तवानित्यर्थः ॥ ३ ॥

---

* तत्रैव—यत्र रामोऽशयिष्ट, तत्रैव–गो. † वाहिनीं—गङ्गाम्, अस्मानित्यर्थसिद्धम्–गो. ‡ एवं भ्रात्रा प्रचोदितः शत्रुघ्नोऽपि—'तमेवार्यं विचिन्तयन्नहं जागर्मि नाहं स्वपिमि'—इत्येवमब्रवीदित्यन्वयः।

[1] तथैवार्य–च. [2] भ्राता–च.

इति संवदतोरेवं अन्योन्यं नरसिंहयोः।
आगम्य प्राञ्जलिः काले गुहो भरतमब्रवीत् ॥ ४ ॥

कच्चित्सुखं *नदीतीरेऽवात्सीः, काकुत्स्थ! शर्वरीम्।
कच्चित्ते सहसैन्यस्य [1]तावत्सर्वमनामयम् ॥ ५ ॥

'अवात्सीः शर्वरीं' इति अत्यन्तसंयोगे द्वितीया ॥ ५ ॥

गुहस्य तत्तु वचनं श्रुत्वा स्नेहादुदीरितम्।
†रामस्यानुवशो वाक्यं भरतोऽपीदमब्रवीत् ॥ ६ ॥

रामस्यानुवशः—रामाधीनः ॥ ६ ॥

सुखा नः शर्वरी, [2]राजन्! पूजिताश्चापि ते वयम्।
गङ्गां तु नौभिः बह्वीभिः दाशाः सन्तारयन्तु नः ॥ ७ ॥

ते पूजिता इति। त्वया पूजिता इति यावत्, 'क्तस्य च वर्तमाने' इति षष्ठी ॥ ७ ॥

ततो गुहः ‡[3]संत्वरितं श्रुत्वा भरतशासनम्।
प्रतिप्रविश्य नगरं तं ज्ञातिजनमब्रवीत् ॥ ८ ॥

प्रतिप्रविश्य—प्रतिनिवृत्त्य ॥ ८ ॥

---

* सुखं अवात्सीः कच्चिदिति क्रियाविशेषणम्। † 'सुखमवात्सीः कच्चित्' इति गुहेन प्रश्ने, रात्रावनुभूतसङ्कटादि निवेदनादिना कालयापनमनिच्छन्, रामदर्शनैकचित्तः, पुनः प्रश्नप्रतिवचनादिकं यथा न स्यात् तथा प्रश्नस्योत्तरं देयमिति मत्वा उत्तरकार्यचिन्तयैव 'सुखा नः शर्वरी' इत्यवदद्भरतः, न तु वस्तुगत्या सुखत्वं शर्वर्याः—इति बोधयितुमाह कविः-रामस्यानुवश इति। ‡ संत्वरितं प्रतिप्रविश्येत्यन्वयः।

[1] तव सर्व—ङ. तव नित्य—च. [2] वीमन्—च. [3] संत्वरितः—च.

उत्तिष्ठत प्रबुद्ध्यध्वं भद्रमस्तु च वः सदा ।
नावः समनुकर्षध्वं तारयिष्याम वाहिनीम् ॥ ९ ॥

ते तथोक्ताः समुत्थाय त्वरिता राजशासनात् ।
पञ्च नावां शतान्याशु समानिन्युः समन्ततः ॥ १० ॥

नावां पञ्चशतानि समानिन्युरिति योजना ॥ १० ॥

*अन्याः स्वस्तिकविज्ञेयाः महाघण्टाधराधराः ।
शोभमानाः [1]पताकाभिः युक्त[2]वाताः [3]सुसंयताः ॥ ११ ॥

अन्याः—पञ्चशतीनौकाभ्योऽन्याः स्वस्तिकविज्ञेयाः—स्वस्तिकाख्यया प्रसिद्धाः, राजाधिष्ठानार्हनौकाभेदः स्वस्तिकाख्यः । तथात्वमेव तस्य प्रदर्श्यते—महाघण्टेत्यादि । महाघण्टां धारयन्तीति महाघण्टाधराः–घण्टालम्बनाधारतिर्यग्दण्डाः तास्तथा धारयन्तीति तथा ; छान्दसो दीर्घः । पृथक्पदमपि–महत्यः–बृहत्यः घण्टाः यासां तास्तथा । धरायां–धारणाशक्तिविषये अधराः याभ्यस्तास्तथा । शोभमानाः–

---

* अन्याः—क्षुद्राभ्यः पञ्चशतनौभ्योऽन्याः । स्वस्तिकविज्ञेयाः—‘स्वस्तिकः सर्वतोभद्रः’ इत्युक्तस्वस्तिकाकारावयवरचनाविशेषविशिष्टतया निर्मितत्वात् स्वस्तिका इति विज्ञेयः, ताश्च नौद्वयसंघट्टनेन संपद्यन्ते । चतुर्षु कोणेषु महाघण्टाधराः । वराः—राजार्हतया श्रेष्ठाः । शोभमानाः—कनकरूषिततया शोभमानाः । युक्तवाताः—फलककुड्यकरणेन मध्येमध्ये गवाक्षनिर्माणेन च महावातनिवारणादुचितवाताः । सुसंहताः—राजारोहणस्थानत्वेनायसकीलादिभिः दृढसन्धिबन्धाः–गो. पताकिन्यः—बह्वरित्रवत्यः—अरित्रं—नावाकर्षणदण्डः युक्तवाहाः—नौवहने नाविकवत्यः–ति. युक्तवाहाः—पर्याप्तकर्णधारयुक्ताः–ती.

[1] पताकिन्यः–च. [2] वाहाः–च. [3] सुसंहताः–ङ. च.

रुक्मादिरूषितचित्रप्रतिमादिशोभासाधनैः शोभमानाः। युक्तवाताः—उचितगतयः, गत्यर्थवातेः भावे निष्ठा। सुसंयताः—दृढसन्धिबन्धाः ॥ ११ ॥

ततः स्वस्तिकविज्ञेयां पाण्डुकम्बलसंवृताम्।
*सनन्दिघोषां कल्याणीं गुहो नावमुपाहरत् ॥ १२ ॥

पाण्डुकम्बलः—मृदुकम्बलभेदः। सनन्दिघोषां—उपरिप्रतिष्ठितमङ्गलवादकक्रियमाणमङ्गलवादित्रघोषसहिताम्। गुहो नावमुपाहरदिति। राजाधिरोहणार्थं प्रथमत इति शेषः ॥ १२ ॥

तामारुरोह भरतः शत्रुघ्नश्च [1]महाबलः।
कौसल्या च सुमित्रा च याश्चान्या राजयोषितः ॥ १३ ॥
पुरोहितश्च †तत्पूर्वं गुरवो ब्राह्मणाश्च ये।
अनन्तरं राजदाराः तथैव शकटापणाः ॥ १४ ॥

तत्पूर्वमिति। समातृकभरतारोहणात् पूर्वं नावान्तरेष्वारुरुहुरिति शेषः। अनन्तरं—भरतारोहणानन्तरम्। राजदाराः—अनुचरप्रभुस्त्रियः। शकटानि आपणाः—पण्यानि च तथा, आरोपिता इति शेषः ॥ १३-१४ ॥

‡आवासमादीपयतां तीर्थं चाप्यवगाहताम्।
भाण्डानि चाददानानां घोषस्त्रिदिवमस्पृशत् ॥ १५ ॥

---

* सनन्दिघोषां—हर्षजनककिङ्किण्यादिघोषयुक्ताम्—गो. ती. † तत्पूर्वं-तासां पूर्वं-गो. ‡ आवासं—सेनानिवेशं, आदीपयतां—अग्निना ज्वलयतां, राजभटा हि निर्गमनकाले श्रीसमागमार्थं आवासं दहन्तीति प्रसिद्धिः—गो. प्रातरेव प्रस्थानात् दीपारोहणादीनां नात्र प्रसक्तिः ॥

[1] महायशाः—ङ.

आवासं–उषितावासं आदीपयतां–अग्निसात्कुर्वताम्, अयं राजधर्मः। तीर्थः–नद्यवतारः। तदवगाहतां–अहमहमिकया प्रविशताम्। भाण्डानि–सर्वोपकरणानि ॥ १५ ॥

*पताकिन्यस्तु ता नावः [1] स्वयं दाशैरधिष्ठिताः।
वहन्त्यो जनमारूढं तदा संपेतुराशुगाः ॥ १६ ॥

आशु गच्छन्तीत्याशुगाः ॥ १६ ॥

नारीणामभिपूर्णास्तु काश्चित् काश्चिच्च वाजिनाम्।
काश्चिदत्र वहन्ति स्म यानयुग्यं † महाधनम् ॥ १७ ॥

नारीणामभिपूर्णा इति। रसस्य पूर्णा इत्यादौ सर्वप्रसिद्धा पूर्णयोगे तृतीयार्थे षष्ठी। यानानि–रथशकटादीनि, युग्यानि–अश्वाश्वतरबलीवर्दादीनि, महाधनं–जीवाजीवरूपनानाप्रकारम् ॥ १७ ॥

ताः स्म गत्वा परं तीरं अवरोप्य च तं जनम्।
निवृत्ताः काण्डचित्राणि क्रियन्ते ‡ दाशबन्धुभिः ॥ १८ ॥

धनमवरोप्य निवृत्ताः ता नावः समारुह्य दाशबन्धुभिः क्रीडार्थं काण्डचित्राणि, 'काण्डोऽस्त्री दण्डबाणार्वगर्वावसरवारिषु', जलेषु चित्रगमनानि लघुत्वात् क्रियन्ते स्मेत्यर्थः ॥ १८ ॥

---

* पताकिन्यः–वाय्वाकर्षणाय कृतपताकाः स्वयं संपेतुः–आशुगत्वेन दाशाधिष्ठानमात्रेणानायासेन जग्मुरित्यर्थः–गो. † महाधनं–बहुमूल्यं–'बहुमूल्यं महाधनम्' इत्यमरः–गो. ‡ दाशबन्धुभिः दाशाभासैः, दाशस्य–गुहस्य बन्धुभिरिति वा। भाराभावकृतलाघवातिशयेन निवर्तनकालिकदाशलीलोच्यते–गो. (दाशबन्धुभिः—दाशश्रेष्ठैः–ती.) दाशाश्च ते बन्धवश्च—दाशबन्धवः इति वा। प्रीत्यतिशयात्तथोक्तिः ॥

[1] स्वस्थ–ङ.

*सवैजयन्तास्तु गजाः गजारोहप्रचोदिताः ।
तरन्तः स्म प्रकाशन्ते सध्वजा इव पर्वताः ॥ १९ ॥

सवैजयन्ताः—सध्वजाः, "वैजयन्ते गृहे शत्रुप्राकारध्वजयोरपि" ॥ १९ ॥

नावश्चारुरुहुश्चान्ये प्लवैस्तेरुस्तथा परे ।
अन्ये †कुम्भघटैस्तेरुः अन्ये तेरुश्च बाहुभिः ॥ २० ॥

वेणुतृणादिनिर्मिताः—प्लवाः, 'उडुपं तु प्लवः कोलः', *தெப்பம்* । कुम्भाः—कूपोदकोद्धारणोचितपरिमाणाः कलशभेदाः—*தோண்டி* । घटाः—अनेककुम्भजलग्राहिणः—*குடம்* । तैर्यथोचितं केचित् तेरुः ॥ २० ॥

‡सा [1]पुण्या ध्वजिनी गङ्गां दाशैः सन्तारिता स्वयम् ।
§मैत्रे मुहूर्ते प्रययौ प्रयागवनमुत्तमम् ॥ २१ ॥

मैत्रे मुहूर्त इति । 'रौद्रः सार्पः तथा मैत्रः' इत्यनुक्रान्तः उदयमारभ्य तृतीयो मुहूर्तः, 'द्वे तु नाड्यौ मुहूर्तोऽस्त्री' इति वैजयन्ती ॥ २१ ॥

---

* सवैजयन्ताः—सपताकाः, सगृहा वा ; राजानो हि गजोपरि गृहाणि निर्माय गच्छन्ति । सध्वजाः—सगमनाः, 'ध्वज गतौ' ; जङ्गमपर्वता इव प्रकाशन्त इत्यर्थः-गो. † कुम्भघटैः—कुम्भरूपघटैः, सूक्ष्मवदना घटाः—कुम्भाः, ते हि तरणसाधनानि, न घटमात्रम्-गो. ‡ पुण्या—गङ्गास्नानादिना पूता-गो. § मैत्रे मुहूर्ते—दिवसस्य पञ्चदशभागेषु घटिकाद्वयात्मके तृतीये मुहूर्ते, 'द्वे तु नाड्यौ मुहूर्तोऽस्त्री' इति वैजयन्ती... घटिकाषट्क एव गङ्गातरणमिति भावः । यद्वा मैत्रे प्रयागवनं ययावित्यन्वयः । तत्र आतिथ्येन निरवधिकभोगलाभात् मुहूर्तविशेषोक्तिः-गो.

[1] पुण्यां ध्वजिनी गङ्गां-च.

*आश्वासयित्वा च चमूं महात्मा
निवेशयित्वा च यथोपजोषम् ।
द्रष्टुं भरद्वाजमृषिप्रवर्यं
†ऋत्विग्वृतः सन् भरतः प्रतस्थे ॥ २२ ॥

आश्वासयित्वा—विश्रम्य । यथोपजोषं—यथासुखं निवेशयित्वा च, 'तूष्णीमर्थे सुखे जोषं' इति वैजयन्ती ॥ २२ ॥

‡स ब्राह्मणस्याश्रममभ्युपेत्य
महात्मनो देवपुरोहितस्य ।
ददर्श रम्योटजवृक्षषण्डं
महद्वनं [1]विप्रवरस्य रम्यम् ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकोननवतितमः सर्गः

———

स ब्राह्मणस्येति । बृहस्पतिर्ब्रह्मा, तस्यापत्यं ब्राह्मणः । अत एव देवपुरोहितस्येत्युक्तम् । 'आत्मा वै पुत्रनामाऽसि' इति श्रुतेः । भरद्वाजो ह्युचथ्यभार्यायां बृहस्पतेर्जात इति भागवते प्रसिद्धम् । गिरि(२३)मानः सर्गः ॥ २३ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकोननवतितमः सर्गः

———

* इदं श्लोकद्वयं आगामिकथासङ्ग्रहरूपम् । † तादृशस्य ऋषेः विनीतवेषदर्शनीयत्वेन ऋत्विग्भिः—वसिष्ठादिभिः वृतस्सन् प्रतस्थे—पद्भ्यामेव जगाम—**गो.** ‡ ब्राह्मणस्य—ब्रह्म—वेदः, तदधीते—ब्राह्मणः—अधीतबहुवेदस्येत्यर्थः । 'भरद्वाजो ह त्रिभिरायुर्भिः ब्रह्मचर्यमुवास' इत्यादिना काठके तथाऽभिधानात् । ब्राह्मणस्य, ब्रह्म—परमात्मानं वेत्तीति ब्राह्मणः यद्वा 'ब्रह्म बृहस्पतिः' इति श्रुत्या ब्रह्मणः—बृहस्पतेः अपत्यं ब्राह्मणः—**गो.** बृहस्पतिः उचथ्यभार्यायां ममतायां पुत्रमुत्पादयामास । भर्तुः भिया तं पुत्रं परित्यक्तुकामां तां देवा ऊचुः, उचथ्यस्य क्षेत्रजत्वेन बृहस्पतेरौरसत्वेन भरद्वाजममुं भरेति, तस्मात् भरद्वाज इति—**ती.** एतत्कथा भागवतनवमस्कन्धे, विष्णुपुराणचतुर्थांशे च वर्तते ।

[1] प्रीतिकरं सुरम्यम्—**ङ.**

नवतितमः सर्गः

[भरद्वाजसमागमः]

*भरद्वाजाश्रमं [1]दृष्ट्वा क्रोशादेव नरर्षभः ।
[2]बलं सर्वमवस्थाप्य जगाम सह मन्त्रिभिः ॥ १ ॥

अथ भरतस्य भरद्वाजदर्शनम् । भरद्वाजेत्यादि । दृष्ट्वा जगामेति सम्बन्धः । क्रोशात्–तावद्दूरात् परत इत्यर्थः । अवस्थाप्येति । आश्रमोपरोधनिवृत्त्यर्थमिति शेषः ॥ १ ॥

पद्भ्यामेव हि धर्मज्ञः न्यस्तशस्त्र†परिच्छदः ।
वसानो वाससी क्षौमे ‡पुरोधाय पुरोधसम् ॥ २ ॥

पद्भ्यामित्यादिकं विनयप्रदर्शनार्थम् ॥ २ ॥

ततः सन्दर्शने तस्य भरद्वाजस्य राघवः ।
मन्त्रिणस्तानवस्थाप्य जगामानुपुरोहितम् ॥ ३ ॥

---

* श्लोकद्वयमेकान्वयम्–**गो.** † परिच्छदः–आभरणादिकं, भृङ्गाराद्युपकरणजातं च । वसानो वाससी क्षौमे भरद्वाजसेवार्थं उष्णीषकञ्चुकादिकमपहाय परिधानमुत्तरीयं च धृत्वा गत इत्यर्थः । ननु पूर्वं 'जटाचीराणि धारयन्' (88–26) इत्युक्तम् । 'जटिलं चीरवसनं' (100–1) इति च वक्ष्यति । कथमत्र क्षौमवासस्त्वमुच्यते–नैष दोषः । पूर्वं प्रतिज्ञामात्रं कृतम्, भरद्वाजाश्रमात्परं जटाधारणमिति–**गो.** परन्तु तत्र (88–26) 'अद्य प्रभृति' इति स्पष्टमुक्तत्वात्, उत्तरत्र जटाधारणस्य अकथनाच्च पूर्वमेव जटाचीरधारणमिति प्रतिभाति । 'वसानो वाससी क्षौमे' इत्यपि न राजार्हवस्त्रधारणमाह, किन्तु आश्रमप्रवेशानुगुणधौतधारणमेवेति । शिरस्स्नानादिकरणेन जटाया अस्पष्टत्वात्, ज्ञातत्वेऽपि इङ्गितज्ञत्वाद्वा भरद्वाजेन नैतद्विषये प्रश्नः कृतः । अथवा–नन्दिग्रामवासकाल एव–जटादिधारणम् । तत्पूर्वं तु प्रतिज्ञामात्रम् । 'जटिलं' (100–1) इति केशसंस्कारा-भावकृतं जटिलत्वमेवाह—इत्यपि केचित् । ‡ पुरोधाय–पुरस्कृत्य ।

[1] गत्वा–च. [2] जन–च.

ततः सन्दर्शन इति। आश्रमप्रवेशनानन्तरं ऋषिसन्दर्शनावसर इत्यर्थः। अनुपुरोहितं—पश्चादर्थेऽनोरव्ययीभावः, पुरोहितस्य पश्चादित्यर्थः ॥ ३ ॥

वसिष्ठमथ दृष्ट्वैव भरद्वाजो महातपाः।
संचचालासनात्तूर्णं शिष्यानर्घ्यमिति * ब्रुवन् ॥ ४ ॥

शिष्यानर्घ्यमिति ब्रुवन्निति। शिष्यान् प्रति 'अर्घ्यमानयत' इति ब्रुवन्नित्यर्थः ॥ ४ ॥

† समागम्य वसिष्ठेन भरतेनाभिवादितः।
अबुध्यत महातेजाः सुतं दशरथस्य तम् ॥ ५ ॥

अबुध्यतेति। वसिष्ठेन सहागमनाद्धेतोरिति शेषः ॥ ५ ॥

ताभ्यामर्घ्यं च पाद्यं च दत्त्वा पश्चात् फलानि च।
आनुपूर्व्याच्च धर्मज्ञः पप्रच्छ कुशलं कुले ॥ ६ ॥
अयोध्यायां बले कोशे मित्रेष्वपि च [1] मन्त्रिषु।

ताभ्यां—भरतशत्रुघ्नाभ्याम्, वसिष्ठस्यार्घ्यादिदानानन्तरमिति शेषः। तदेव दर्शितं—आनुपूर्व्याच्चेति। आनुपूर्व्याद्दत्त्वा आनुपूर्व्यात् पप्रच्छेत्यग्रेण सम्बन्धः। कुले—गृहे ॥ ६ ॥

जानन् दशरथं वृत्तं न राजानमुदाहरत् ॥ ७ ॥

दशरथं वृत्तमिति। अतीतमिति यावत्। अत एव न राजानमुदाहरदिति। राजानं प्रति कुशलप्रश्नमिति शेषः ॥ ७ ॥

---

* स्वरातिशयात् एवं अपूर्णोक्तिः लोकेऽपि प्रसिद्धा। † समागम्येति। सवयस्कत्वान्नमस्काराभावः—गो. वसिष्ठेन समागम्य वसिष्ठेन सहागत्य भरतेन अभिवादित इति वाऽन्वयः।

[1] बन्धुषु—ङ.

[1]वसिष्ठो भरतश्चैनं पप्रच्छतुरनामयम् ।
शरीरेऽग्निषु शिष्येषु वृक्षेषु मृगपक्षिषु ॥ ८ ॥

शरीरादित्रयस्य यथायोगमन्तरङ्गबहिरङ्गतया तपस्साधनत्वात् तदनामयप्रश्नः । मृगपक्षिणामभयावस्थानदानद्वारा धर्मसाधनत्वम्, शिष्यवत् प्रियत्वाच्चानामयप्रश्नः ॥ ८ ॥

तथेति तु प्रतिज्ञाय भरद्वाजो महातपाः ।
भरतं प्रत्युवाचेदं *राघवस्नेहबन्धनात् ॥ ९ ॥

तथेति तु प्रतिज्ञायेति । अनामयमित्युक्त्वेति यावत् ॥ ९ ॥

किमिहागमने कार्यं तव राज्यं प्रशासतः ।
एतदाचक्ष्व मे सर्वं न हि मे शुध्यते मनः ॥ १० ॥

मे मनो न शुध्यत इति । न विश्वसतीति यावत् ॥ १० ॥

†सुषुवे यममित्रघ्नं कौसल्या[2]नन्दवर्धनम् ।
भ्रात्रा सह सभार्यो यः चिरं प्रव्राजितो वनम् ॥ ११ ॥

किं विषयकोऽयमविश्वासः ? इत्यतः—सुषुव इत्यादि । कौसल्या यं सुषुव इत्यन्वयः ॥ ११ ॥

---

*राघवस्नेहबन्धनात्—राघवविषये स्नेहानुबन्धनात्, न तु भरते दोषदर्शनात्-गो. महर्षिरपि सन् तत्तादृशं भरतं कथं मर्मोक्तिभिरपीडयदिति शंकायां हेतुः—राघवेत्यादि । रामे भगवति अतिशयप्रेम्णा—तदेव बन्धरूपं—पाशरूपं जातमिति—'अतिस्नेहः पापशङ्की' इत्यादिवत्, विषयान्तरचिन्तादीनामप्रसक्तया एवं मर्मोक्तिरिति भावः । †'सुषुवे' इत्यादिश्लोकत्रयमेकान्वयम् । चिरं प्रव्राजितः—चिरकालमुद्दिश्य प्रव्राजितः—गो.

[1] वसिष्ठ इत्यादिश्लोकद्वयं कुत्रचिन्नास्ति—ङ्ग. [2] नन्दिवर्धनम्—ङ.

नियुक्तः [1]स्त्रीनियुक्तेन पित्रा योऽसौ महायशाः ।
वनवासी भवेतीह समाः किल चतुर्दश ॥ १२ ॥
कच्चिन्न तस्यापापस्य पापं कर्तुमिहेच्छसि ?
अकण्टकं भोक्तुमनाः राज्यं [2]तस्यानुजस्य च ॥ १३ ॥

'वनवासी भव' इति नियुक्तः इति योजना । इहेति । यद्वनं प्रव्राजितः इह वन इत्यर्थः । तस्य अनुजस्य—लक्ष्मणस्य च पापं कर्तुमिहेच्छसीत्यन्वयः । तत्र हेतुः--अकण्टकमिति । असपत्नमिति यावत् ॥ १२-१३ ॥

एवमुक्तो भरद्वाजं भरतः प्रत्युवाच ह ।
पर्यश्रुनयनो दुःखात् वाचा संसज्जमानया ॥ १४ ॥

संसज्जमानया—स्खलन्त्या ॥ १४ ॥

हतोऽस्मि यदि मामेवं [3]भगवानभि मन्यते ।
*मत्तो न दोषमाशङ्के [4]नैवं मामनु[5]शाधि हि ॥ १५ ॥

यदि—यस्मात् भगवान् मामभि--मां प्रति एवं मन्यते--पापप्रसक्तं मन्यते अतो हतोऽस्मि—व्यर्थजन्मास्मीत्यर्थः । कथमेवमित्यतः—मत्त इत्यादि । दोषं—वनप्रव्राजनदोषं मत्तः—मन्निमि-

---

* रामप्रव्राजनहेतुभूतं दोषं, मत्तः-मन्मूलं इति, नाशङ्के—'रामप्रव्राजनस्य त्वं न हेतुरिति भावयामि' इति मां प्रति मुनिः न वदति किल, सोऽपि मन्निमित्तमेव रामप्रव्राजनं मनुते किल । अतः हतोऽस्मि-इत्यर्थः । 'मत्तो न दोषमाशङ्के' इत्यत्र 'त्वत्तः' इति वक्तव्यत्वेऽपि, पूर्णानुवादरूपत्वाभावात्, शोकवैय्याकुल्या वा एवमुक्तिः । परन्तु-'सर्वज्ञो भरद्वाजः मां निर्दोषं जानीयादेव' इति प्रत्ययवन्तं भरतं प्रति भरद्वाजेन तथा प्रश्नात्—'भगवान् वा मां निर्दोषं जानीयात्' इति खलु अभावयम् । सोऽपि यद्येवं वक्ति, ततो मरणमेव मे वरमिति भरताशयः प्रतिभाति ।

[1] स्त्रीनिमित्तेन-च. [2] तस्याग्रजस्य च-ङ. [3] भगवानपि-च. [4] मैवं-च [5] शास्ति-ङ.

रतः नेति आशङ्के—स्वानुभवेन जानामि, अतो हि मामेवं अनुशाधि—अनुगृहाण ॥ १५ ॥

न चैतदिष्टं माता मे यदवोचन्मदन्तरे।
नाहमेतेन तुष्टश्च न तद्वचनमाददे ॥ १६ ॥

कथमनुभवापलापः क्रियते? इत्यत्राह—न चेत्यादि। मदन्तरे—मदसन्निधौ मे माता यदवोचत् मदभिषेकरामवनवासविषयकं न चैतत् ममेष्टम्। इदमेव विव्रियते—नाहमित्यादि। एतेन—मातृकृतव्यापारेण न च तद्वचनमाददे; इदानीमिति शेषः ॥ १६ ॥

अहं तु तं नरव्याघ्रं उपयातः * प्रसादकः।
प्रतिनेतुमयोध्यां च पादौ तस्याभिवन्दितुम् ॥ १७ ॥

भवत्वेवमपारः, अथापीह प्रवृत्तिः किमर्था? इत्यत्राह—अहं त्वित्यादि। प्रसादक इति। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति ण्वुल्, प्रीतिं कारयिष्यन्नित्यर्थः ॥ १७ ॥

[1] त्वं मामेवंगतं मत्वा प्रसादं कर्तुमर्हसि।
शंस मे, [2] भगवन्! रामः क्व संप्रति † महीपतिः? ॥

एवंगतं—एवं बुद्धिं प्राप्तवन्तम्। क्व कस्मिन् प्रदेशे ॥

वसिष्ठादिभिर्ऋत्विग्भिः ‡ याचितो भगवांस्ततः।
उवाच तं भरद्वाजः प्रसादात् भरतं वचः ॥ १९ ॥

---

* प्रसादकस्सन् उपयातः-प्रसादनार्थमागत इति यावत्। प्रसादकः, अयोध्यां प्रति नेतुं, तस्य पादावभिवन्दितुं च उपयातः। † स्वस्य राज्येऽभिलाषाभावं प्रकटयितुं—रामं 'महीपतिः' इत्याह भरतः। ‡ याचितः—भरताय प्रसन्नो भवेति प्रार्थितः–गो.

[1] तं–च. [2] भगवान्–ङ.

ऋत्विग्भिरिति । ऋत्विग्भिश्चेति शेषः । प्रसादात्—प्रीत्या ॥ १९ ॥

त्वय्येतत्, पुरुषव्याघ्र! युक्तं राघववंशजे ।
*गुरुवृत्तिर्दमश्चैव साधूनां चानुयायिता ॥ २० ॥

त्वयीत्यादि । हे पुरुषव्याघ्र! एतत्—उक्तरूपमेव वचः शंसितुं त्वयि युक्तं – तवोचितमित्यर्थः । त्वयि तु युक्तमित्येतदेव समर्थयितुमाह—गुरुवृत्तिरित्यादि । गुरुवृत्तिः—गुरुसेवा । अनुयायिता—अनुवर्तनम् ॥ २० ॥

जाने चैतन्मनस्स्थं ते दृढीकरणमस्त्विति ।
अपृच्छं त्वां [1] तवात्यर्थं कीर्तिं † समभिवर्धयन् ॥ २१ ॥

जान इति । तवास्तीति शेषः । तर्हि पापशङ्का कथं मयि भवद्भिः कृता? इत्यत्राह—एतदित्यादि । यदेतत्ते मनस्स्थं—शुभाभिप्रायजातं तस्यास्य दृढीकरणमस्त्वित्येव धिया अपृच्छम् । अस्य च फलमाह—तवेत्यादि । या तव कीर्तिः—विहाय च राज्यं धर्ममेवाशिश्रयदिति, तां अत्यर्थं समभिवर्धयन्—, हेतौ शता, कीर्त्यभिवृद्धिहेतवे अपृच्छमित्यर्थः ॥ २१ ॥

‡ जाने च रामं धर्मज्ञं ससीतं सहलक्ष्मणम् ।
[2] असौ वसति ते भ्राता चित्रकूटे महागिरौ ॥ २२ ॥

अथ 'क्व संप्रति महीपतिः?' इति भरतप्रश्नस्योत्तरमाह—जान इत्यादि ॥ २२ ॥

---

* गुरुवृत्तिः—ज्येष्ठानुवर्तनम्–**गो.** † लोके इतोऽपि सम्यक् प्रकटीकर्तुमिति भावः । ‡ रामं जाने —देशविशेषस्थितं रामं जान इत्यर्थः–**गो.**

[1] तथाऽत्यर्थं–ङ. [2] अयं–च.

श्वस्तु गन्तासि तं देशं वसाद्य सह मन्त्रिभिः।
एतं मे कुरु, सुप्राज्ञ! कामं, कामार्थकोविद!॥ २३॥

कामार्थकोविद—कामितार्थप्रदानसमर्थ ॥ २३ ॥

ततस्तथेत्येव*मुदारदर्शनः
†प्रतीतरूपो भरतोऽब्रवीद्वचः।
चकार बुद्धिं च तदा तदाश्रमे
‡निशानिवासाय नराधिपात्मजः॥ २४॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे नवतितमः सर्गः

प्रतीतं—प्रसिद्धं रूपं यशः यस्य स तथा। 'रूपं यशस्याभिरूप्ये वर्णे चैव निरूपणे'। तस्याश्रमः—तदाश्रमः, तस्मिन्। वारि(२४)मानः सर्गः॥ २४॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे नवतितमः सर्गः

एकनवतितमः सर्गः

[भरद्वाजातिथ्यम्]

कृतबुद्धिं निवासाय §तत्रैव स मुनिस्तदा।
भरतं कैकयीपुत्रं आतिथ्येन न्यमन्त्रयत्॥ १॥

---

* कामार्थकोविदत्वं रूपमेवाहेति वदति—उदारदर्शन इति। † प्रतीतरूपः—प्रकर्षेण हृष्टः-गो. ‡ निशानिवासाय—तद्दिननिशां तत्रैव नेतुम्। प्रातरेव हि भरद्वाजाश्रमप्राप्तिः पूर्वमुक्ता। § रामदर्शनेऽतीव त्वरमाणस्य भरतस्य एकरात्रिविलम्बोऽपि अनिरीक्षितः महान् विषयः इति भावेन—'तत्रैव' इत्युक्तम्।

अथ भरद्वाजेन भरतस्यातिथ्यकरणम्। कृतबुद्धिमित्यादि। निश्चितबुद्धिमित्यर्थः। आतिथ्येन—विशिष्टभोजनोपेतातिथिसत्कारहेतवे न्यमन्त्रयत्—प्रार्थितवान्॥ १॥

अब्रवीत् भरतस्त्वेनं नन्विदं भवता कृतम्।
पाद्यमर्घ्यं तथाऽऽतिथ्यं वने यदुपपद्यते॥ २॥

वने यदुपपद्यते, तेनातिथ्यं कृतं ननु इत्युवाच॥ २॥

अथोवाच भरद्वाजः भरतं *प्रहसन्निव।
†जाने त्वां प्रीतिसंयुक्तं तुष्येस्त्वं येन केनचित्॥ ३॥

प्रहसन्निवेति। इतोऽभ्यधिकातिथ्यसंपादने मम सामर्थ्यं नास्तीति किलायं मन्यत इत्याशयेन प्रहासः। जान इति। त्वं येन केनचिदपि सन्तुष्येः—तुष्टो भवेरिति, तथा कृतेन वन्यसाधनातिथ्येन प्रीतियुक्तमित्यपि जाने॥ ३॥

सेनायास्तु [1]तवैतस्याः कर्तुमिच्छामि भोजनम्।
मम प्रीतिर्यथारूपा ‡[2]तथा तां, मनुजाधिप!॥ ४॥

अथापि—सेनाया इत्यादि। मम प्रीतिः—ममेच्छा यथारूपायादृक्प्रकारा, तथारूपां तां त्वमनुविधातुमर्हसीति शेषः॥ ४॥

---

* मुनिः इतः परं किं करिष्यतीति भरताशयज्ञानेन हासः—गो. † एतेन 'नन्विदं भवता कृतम्' इति भरतवचनं, प्रीति–विनय–सङ्कोचादिप्रयुक्तमेव, न तु गर्वादिप्रयुक्तमिति सूचितम्। अत्र विश्वामित्रं प्रति वसिष्ठातिथ्यप्रार्थनाप्रकरणगतानि (बाल. ५२ सर्ग) 'कृतमित्यब्रवीत राजा', 'एवं ब्रुवन्तं राजानं' इत्यादिवाक्यानि स्मरणीयानि॥ ‡ 'त्वमर्हो मनुजाधिप' इति गो. ती. ति. पाठः। मम प्रीतिः यथारूपा—यादृशप्रकारा, तथा त्वमर्हः—तथा त्वं प्रीतो भवितुमर्हः—गो.

[1] तवैवास्याः—च. [2] त्वमर्हः—ङ. च. झ.

किमर्थं चापि निक्षिप्य दूरे बलमिहागतः ।
कस्मान्नेहोपयातोऽसि सबलः, पुरुषर्षभ! ॥ ५ ॥

बलं दूरे निक्षिप्यागत इति । एकाकीति शेषः । अस्यैवार्थस्य व्यतिरेकमुखेन समर्पणं—कस्मान्नेत्यादि ॥ ५ ॥

भरतः प्रत्युवाचेदं प्राञ्जलिस्तं तपोधनम् ।
[1] ससैन्यो नोपयातोऽस्मि, भगवन्! * भगवद्भयात् ॥ ६ ॥

अथ केवलागमनकारणप्रश्ने तद्धेतुमाह—भरत इत्यादि । भगवद्भयादिति । भगवदाश्रमपीडाप्रसङ्गभयादित्यर्थः ॥ ६ ॥

राज्ञा च, भगवन्! नित्यं राजपुत्रेण वा [2] सदा ।
यत्नतः परिहर्तव्याः † विषयेषु तपस्विनः ॥ ७ ॥

भेतव्यमेव च क्षत्रियेणेत्याह—राज्ञेत्यादि । आश्रमेषु तद्वर्ति-वृक्षोदकादिबाधाप्रसङ्गनिमित्तं परिहर्तव्याः—अनुपरोध्या इत्यर्थः ॥ ७ ॥

वाजिमुख्या मनुष्याश्च मत्ताश्च वरवारणाः ।
प्रच्छाद्य, भगवन्! भूमिं महतीमनुयान्ति माम् ॥ ८ ॥
ते वृक्षानुदकं भूमिमाश्रमेषूटजांस्तथा ।
न हिंस्युरिति तेनाहं एक एव समागतः ॥ ९ ॥
आनीयतामितः सेनेत्याज्ञप्तः परमर्षिणा ।
ततस्तु चक्रे भरतः सेनायाः समुपागमम् ॥ १० ॥

---

* भगवद्भयात्—भवान् कुप्येदिति भयात्-गो. † राज्ञा राजपुत्रेण वा विषयेषु—स्वदेशेषु तपस्विनः सदा यत्नतः परिहर्तव्याः ; तपस्विषु अपचारसंभावनाभीत्या तैः सदा जागरूकैर्भाव्यमिति भावः ।

[1] न सैन्येनो—च.　　[2] तथा—च.

परमर्षिणेति। श्रुतबलानानयनहेतुनेति शेषः। समुपागमं—समीपानयनमित्यर्थः ॥ १० ॥

*अग्निशालां प्रविश्याथ पीत्वाऽपः परिमृज्य च।
आतिथ्यस्य क्रियाहेतोः विश्वकर्माणमाह्वयत् ॥ ११ ॥

अपः पीत्वा परिमृज्येति। 'हृदयंगमाभिरद्भिः त्रिरोष्ठौ परिमृजेत्। सकृदुपस्पृशेत्' इत्युच्यमानरीत्या यथाविधि ब्राह्मं शुद्धाचमनं कृत्वेत्यर्थः। क्रियाहेतोः—संपादननिमित्तम्। विश्वकर्मा—स्रष्टृमूर्तिभेदः ॥ ११ ॥

आह्वये †विश्वकर्माणं अहं त्वष्टारमेव च।
आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् ॥ १२ ॥

आह्वयदित्युक्तं, तस्यैव प्रकारः—आह्वय इत्यादि। आह्वय इत्यात्मनेपदमपि। त्वष्टारं विश्वकर्माणमेव, तक्षणादिव्यापारोपेतं विश्वकर्माणमेव, न तु 'संवत्सरो विश्वकर्मा। संवत्सरः प्रजापतिः' इति श्रुतौ, विश्वं—सर्वं जगत्कर्म यस्य स विश्वकर्मेति समग्रयोगप्रवृत्तविश्वकर्मवाच्यभगवत्प्रजापतिरित्यर्थः। तत्र मे संविधीयतां—मदपेक्षितातिथ्ये यत् त्वष्टृसाध्यं नानाविधगृहमपेक्षितं तत् तेन संविधीयताम् ॥ १२ ॥

‡आह्वये लोकपालांस्त्रीन् देवान् [1]शक्रमुखांस्तथा।
आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् ॥ १३ ॥

---

* अग्निशालाप्रवेशः पावनत्वार्थः, देवतासन्निधानस्थलत्वात्–गो. † विश्वकर्मा सर्वशिल्पकर्ता, त्वष्टा तु तक्षणेन गृहादिनिर्माता। यद्वा—त्वष्टारमेव चेत्यवधारणेन असुरविश्वकर्मा मयो व्यावर्त्यते–गो. ‡ वक्ष्यमाणान्नपानादिरक्षणाय लोकपालानाह्वयति—आह्वय इति। शक्रमुखान्–इन्द्रप्रधानान्, शक्रस्य पृथङ्निर्देशात्। त्रीन् लोकपालान्—यमवरुणकुबेरान्। देवानित्यग्न्यादय उच्यन्ते। संविधीयतां—पालनं क्रियताम्–गो.

[1] अग्निमुखांस्तथा–ङ. शक्रपुरोगमान्–च.

अतः परं—आह्वये लोकपालानित्यर्धं प्रक्षिप्तमिति परो व्याकरोत्—तदसत्—आहूयमानविश्वकर्मादीनामिव किञ्चित्कृत्ये महर्षिणा लोकपालत्रयस्यापि नियोजनात् ॥ १३ ॥

प्राक्स्रोतसश्च या नद्यः [1] प्रत्यक्स्रोतस एव च ।
पृथिव्यामन्तरिक्षे च [2] सहायान्त्वद्य सर्वशः ॥ १४ ॥

अन्तरिक्षे नदी आकाशगङ्गा ॥ १४ ॥

अन्याः स्रवन्तु मैरेयं सुरामन्ये [3] सुनिष्ठिताम् ।
अपराश्चोदकं शीतं इक्षु[4]काण्डरसोपमम् ॥ १५ ॥

तासां कृत्यमाह—अन्याः स्रवन्त्वित्यादि । मैरेयं-मद्यभेदः, 'मैरेयं माधवे धात्री धातकी गुडवारिभिः' इति वैजयन्ती । सुरा तु 'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा' इति स्मृता । मैरेयं उक्तव्यतिरिक्तोपादानमन्यत् । सुनिष्ठितां—सुनिष्पादिताम् ॥ १५ ॥

आह्वये देवगन्धर्वान् विश्वावसुहहाहुहून् ।
तथैवाप्सरसो देवीः गन्धर्वीश्चापि सर्वशः ॥ १६ ॥

विश्वावसून्, हहाहुहूनिति छन्दोवशात् ह्रस्वः । ब्रह्माणमिति । बृहस्पतिमिति यावत् । याश्चोपतिष्ठन्तीत्यनुकर्षः ॥ १६ ॥

घृताचीमथ विश्वाचीं मिश्रकेशीमलम्बुसाम् ।
[5] नागदन्तां च हेमां च *[6] हिमामद्रिकृतस्थलाम् ॥ १७ ॥

---

* पुनश्च 'हेमां' इति पाठे पूर्वोक्तहेमापेक्षया अस्या व्यावृत्तिमाह— अद्रिकृतस्थलामिति । अद्रौ—महेन्द्रे मयेन कृतनिवासां —स्वयप्रभाबिलस्थामित्यर्थः । हिमामिति पाठे हिमवच्छीतलाङ्गी । यद्वा हिममस्या अस्तीति हिमा । अद्रिकृतस्थला चान्या—गो.

[1] तिर्यक्स्रो—च. [2] समायान्त्वद्य—च. [3] सुनिष्ठिताः—ङ. [4] खण्ड—ङ.
[5] नागदत्तां—च. [6] हेमा—ङ. सोमा—च.

*शक्रं याश्चोपतिष्ठन्ति ब्रह्माणं याश्च[1] योषितः ।
सर्वास्तुम्बुरुणा सार्धं आह्वये सपरिच्छदाः ॥ १८ ॥

सपरिच्छदाः—नृत्तगीताद्यपेक्षितपरिकरोपेताः ॥ १८ ॥

†वनं कुरुषु यद्दिव्यं वासोभूषणपत्रवत् ।
दिव्यनारीफलं शश्वत् तत्कौबेरमिहैतु च ॥ १९ ॥

अथ चैत्ररथवनाह्वानं—वनमित्यादि । कुरुषु—उत्तरकुरुषु वनं चैत्ररथाख्यं, तच्चोत्तरकुरुदेशे वर्तते । दिव्यं—देवार्हम् । दिव्यत्वमेव तस्य दर्शयति—वास इत्यादि । यद्वृत्तिवृक्षाणां वासोभूषणान्येव पत्राणि अस्मिन् सन्तीति वासोभूषणपत्रवत् । शश्वत्—सर्वदा दिव्यनार्य एव फलानि यस्मिन् तत् तथा । तथैवंभूतं यत् कौबेरमस्ति तत् इह—वने एतु – आगच्छतु । उत्तरदिक्पालत्वेन कुबेराधिष्ठितत्वात् कौबेरमित्युक्तम् । तद्देवताधिष्ठानादिदं वनं तथा भवत्वित्यर्थः । इयं च कुबेरं प्रत्येवोक्तिः । नदीनामिव वनस्याह्वानं तदधिष्ठातृदेवताद्वारा ॥ १९ ॥

‡इह मे भगवान् सोमः विधत्तामन्नमुत्तमम् ।
§भक्ष्यं भोज्यं च[2] चोष्यं च लेह्यं च विविधं बहु ॥ २० ॥
विचित्राणि च माल्यानि ‖पादपप्रच्युतानि च ।
सुरादीनि च पेयानि मांसानि विविधानि च ॥ २१ ॥

---

* शक्रं या उपतिष्ठन्ति— रम्भोर्वशीमेनकादयः । ब्रह्माणं—चतुर्मुखं ; तल्लोकेऽप्यप्सरसः सन्ति, 'तं पञ्चशतान्यप्सरसां प्रतिधावन्ति' इति श्रुतेः—**गो.** † भोगोपकरणान्याहूय भोगस्थानान्याह्वयति—वनमिति—**गो.** ‡ एवं कुबेरं प्रत्युक्त्वा अन्नपतिं चन्द्रं प्रत्याह—इहेति—**गो.** § भक्ष्यं—खाद्यमपूपादि । भोज्यं—ओदनादि । चोष्यं—पायसादि । लेह्यं—रसायनादि ॥ ‖ माल्यानामपि स्वयंसिद्धत्वस्फोरणाय—पादपप्रच्युतानीति ।

[1] भामिनीः—च. [2] पेयं—ङ.

*एवं समाधिना युक्तः तेजसाऽप्रतिमेन च ।
शीक्षास्वरसमायुक्तं [1]तपसा चाब्रवीन्मुनिः ॥ २२ ॥

शीक्षेति । शीक्षाप्रतिपाद्यवर्णोच्चारणलक्षणोपेतम्, तथा व्याकरणोपदिश्यमानप्रकृतिप्रत्ययभाषास्वरोपेतं च तथा । एवं च 'एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुक् भवति' इति प्रसिद्धार्थः महर्षेस्तपोबलादिहैव सिद्धः यथाप्रयुक्तवचनमात्रादित्युक्तं भवति । अब्रवीदिति । प्रागुक्तदेवताऽऽह्वानवाक्यमित्यनुकर्षः ॥२२॥

[2]मनसा ध्यायतस्तस्य प्राङ्मुखस्य कृताञ्जलेः ।
आजग्मुस्तानि सर्वाणि दैवतानि पृथक् पृथक् ॥ २३ ॥

तानीति । आहूतदैवतानीत्यर्थः ॥ २३ ॥

†मलयं दर्दुरं चैव ततः स्वेदनुदोऽनिलः ।
उप[3]स्पृश्य ववौ [4]युक्त्या सुप्रियात्मा शिवः सुखम् ॥२४॥

मलयं दर्दुरं चैव—चन्दनपर्वतौ । उपस्पृश्य—स्पृष्ट्वा । ततः—तस्मादारभ्य स्वेदनुदः, 'इगुपधे'ति कः । स्वेदस्य नुदः स्वेदनुदः । युक्त्या शैत्यसौरभ्यमान्द्यधर्मयोगेन । सुप्रियात्मा—सुप्रियस्वरूपः, अत एव शिवः—शुभः अनिलः सुखं ववौ ॥ २४ ॥

---

* समाधिना—योगेन, तपसा—ज्ञानेन, यद्वा अनशनादिकायक्लेशरूपेण । अत एव तेजसा—अनागमने दण्डनसामर्थ्येन च युक्तः मुनिः—गो. † मलयः—चन्दनालयः, दर्दुरः—तत्समीपस्थः चन्दनोत्पत्तिस्थानभूतो गिरिः । तदुभयमुपस्पृश्य सुप्रियात्मा सुप्रियस्वभावः, सुगन्ध इत्यर्थः, अत एव सुखः—सुखकरः, शिवः—शीतलः, युक्त्या—अङ्गस्पर्शेन—गो.

[1] सुव्रतः—च. [2] तपसा—ङ. [3] स्पृश्यायया—ङ. [4] युक्तः—ङ.

ततोऽभ्य[1]वर्तन्त घनाः दिव्याः कुसुमवृष्टयः ।
[2]दिव्यदुन्दुभिघोषश्च दिक्षु सर्वासु शुश्रुवे ॥ २५ ॥

घनाः—निबिडाः ॥ २५ ॥

प्रववुश्चोत्तमा वाताः ननृतुश्चाप्सरोगणाः ।
प्रजगुर्देवगन्धर्वाः वीणाः प्रमुमुचुः स्वरान् ॥ २६ ॥

वीणाश्चेति । वाद्यमाना इति शेषः । स्वरान्—षड्जादीन् सान्तरभेदान् ॥ २६ ॥

स शब्दो द्यां च भूमिं च प्राणिनां श्रवणानि च ।
विवेशो[3]च्चारितः श्लक्ष्णः समो लयगुणान्वितः ॥ २७ ॥

लयः—नृत्तगीतानुगततालप्रमाणः ॥ २७ ॥

[4]तस्मिन्नुपरते शब्दे दिव्ये श्रोत्रसुखे नृणाम् ।
ददर्श भारतं सैन्यं विधानं विश्वकर्मणः ॥ २८ ॥

*भरतः विश्वकर्मणो विधानं ददर्श ॥ २८ ॥

बभूव हि समा भूमिः समन्तात् पञ्चयोजना ।
शाद्वलैर्बहुभिश्छन्ना नीलवैडूर्यसन्निभैः ॥ २९ ॥

तदेव प्रकाश्यते—बभूवेत्यादि । छन्ना बभूवेति योजना । शाद्वलशब्देन कोमलतृणान्युच्यन्ते । नीलस्य—इन्द्रनीलस्य वैडूर्यस्य च सन्निभास्तथा ॥ २९ ॥

---

* अत्र यथाश्रुतव्याख्यानुरोधे, मूले 'ददर्श भरतः सर्वं' इत्येवंरीत्या पाठः स्यात्। अथ वा 'भरतस्येदं- भारतं सैन्यं विश्वकर्मणो विधानं ददर्श' इत्येव व्याख्याऽपि स्यात् ।

[1] वर्षन्त—च. [2] देव—च. [3] च्चावचः—च. [4] तस्मिन्नेवंगते—च.

तस्मिन् बिल्वाः कपित्थाश्च पनसा बीजपूरकाः ।
आमलक्यो[1] बभूवुश्च चूताश्च फल[2]भूषणाः ॥ ३० ॥

तस्मिन्—पञ्चयोजनायामप्रदेशे । बीजपूरः—मातुलङ्गकः । फलभूषणत्वं * साधारणम् ॥ ३० ॥

उत्तरेभ्यः कुरुभ्यश्च वनं † दिव्योपभोगवत् ।
आजगाम नदी [3]सौम्या तीरजैर्बहुभिर्वृता ॥ ३१ ॥

दिव्योपभोगवत् वनमाजगामेत्यन्वयः । सौम्या नदी—जम्बूनदी ॥ ३१ ॥

चतुश्शालानि शुभ्राणि शालाश्च गजवाजिनाम् ।
हर्म्यप्रासाद[4]संबाधाः ‡ तोरणानि शुभानि च ॥ ३२ ॥
सितमेघनिभं चापि राजवेश्म सुतोरणम् ।
[5]शुक्लमाल्यकृताकारं दिव्यगन्धसमुक्षितम् ॥ ३३ ॥
चतुरश्रं असम्बाधं §शयनासनयानवत् ।
दिव्यैः सर्वरसैर्युक्तं दिव्यभोजनवस्त्रवत् ॥ ३४ ॥
उपकल्पितसर्वान्नं धौतनिर्मलभाजनम् ।
‖ क्लृप्तसर्वासनं श्रीमत् स्वास्तीर्णशयनोत्तमम् ॥ ३५ ॥

---

* इतरवृक्षाणामपि साधारणमित्यर्थः । † दिव्योपभोगवत्—दिव्योपभोगार्हं—**गो.** ‡ तोरणानि—बन्धनमालाः, ‘बन्धी बन्धनमाला तु तोरणं परिकीर्तितम्’ इति हलायुधः—**गो.** § असम्बाधं—विशालम् । ‖ ‘क्लृप्तसर्वासनं’ इत्यत्र, स्नान-भोजनाद्यासनान्युच्यन्ते । ‘शयनासन’ इत्यत्र राजाऽऽसनं तत्साहचर्यात् शयनं च महाशयनम् । ‘स्वास्तीर्णशयनोत्तमम्’ इत्यत्र निद्रार्थशयनम्—**गो.**

[1] ऽथ जम्बूश्च बभूवुः—ङ. [2] भूषिताः—च. [3] दिव्या—ङ. [4] संयुक्त—च. [5] दिव्य—ङ.

सितमेघनिभं सुधालेपेन । शुक्लमाल्यैः कृतः आकारः—अलङ्कारः यस्य स तथा । समुक्षितं—सिक्तम् । यानं—शिबिकादि । धौतत्वात्—प्रक्षालितत्वात् निर्मलानि भाजनानि—पात्राणि यस्मिन् तत्तथा ॥ ३३-३५॥

प्रविवेश महाबाहुः अनुज्ञातो महर्षिणा ।
वेश्म तत् रत्नसंपूर्णं भरतः केकयीसुतः ॥ ३६ ॥

अनुजग्मुश्च तं सर्वे मन्त्रिणः सपुरोहिताः ।
बभूवुश्च मुदा युक्ताः दृष्ट्वा तं वेश्मसंविधिम् ॥ ३७ ॥

वेश्मनः संविधिः—विधानं तथा ॥ ३७ ॥

तत्र राजाऽऽसनं दिव्यं व्यजनं छत्रमेव च ।
भरतो मन्त्रिभिः सार्धं अभ्यवर्तत *राजवत् ॥ ३८ ॥

राजाऽऽसनं—सिंहासनं राजवदभ्यवर्तत ॥ ३८ ॥

†आसनं पूजयामास रामायाभिप्रणम्य च ।
वालव्यजनमादाय न्यषीदत् सचिवासने ॥ ३९ ॥

---

* राजवत्–राजार्हम् । राजार्हमासनादिकं सर्वं प्रदक्षिणं चकारेत्यर्थः–ती. राजासनं—राजार्हासनं अभ्यवर्तत—अभितोऽवर्तिष्ट—प्रदक्षिणं कृतवानिति यावत् । राजवत्–राजतुल्यं–राममिवेत्यर्थः–गो. राजवत्–राजयोग्यम्–ती. † आसनं पूजयामासेत्यत्र राजवदित्यनुकर्षः । रामाय—आसनोपरिस्थितत्वेन भाविताय–गो. एतत्प्रकरणे समापततां आशङ्कानां विषये—'व्यसृजन्त मनुष्यास्ते स्वप्नकल्पं तदद्भुतम्' (78) इति वक्ष्यमाणं वचनं विमर्शनीयम् । **तिलके** तु—आसनं पूजयामासेति । रामचन्द्रीयमेतदिति बुद्ध्या रामाय प्रणम्य, आसनोपरि प्रतिष्ठितं रामं ध्यात्वेति शेषः । अत्रेदं बोध्यम्–भरतेन वाचोक्तमपि राज्यानभिलाषं लोका न श्रद्दध्युः । अतः क्रिययाऽपि सर्वलोकप्रत्यायनाय महर्षिणा तपोव्ययेनापीदृशमातिथ्यकरणम् । किञ्च पुष्पादिभिः पूजेव इयमपि क्रिया विष्णोरंशभूतभरततुष्टये इति तत्करणम् । किञ्च भरतं प्रति 'त्वं दुष्टबुद्ध्याऽऽगतोऽसि किम्?' इति प्रश्ने तस्य ऋषेरसर्वज्ञत्वासामर्थ्यादिशङ्कावारणाय स्वसामर्थ्यदर्शनम् । अपि च भगवदेकचित्तानां स्वर्गसुखमिहापि भवतीति भगवद्रामप्रीतिमाहात्म्यं प्रदर्शयितुं तद्दर्शनेन तेषां तत्राधिकां प्रीतिमुत्पादयितुं तथाकरणं मुनेरिति दिक्–ति.

न तु तत्रोपविष्ट इत्याह—आसनं पूजयामासेत्यादि। रामभद्रीयामिति बुद्ध्येति शेषः। रामायाभिप्रणम्य चेति। आसनोपरि रामं प्रतिष्ठितं ध्यात्वेति शेषः। वालव्यजनं—तालवृन्तम्। रामसेवाशेषतयेति शेषः। सचिवासने—सचिवोपक्लृप्तासने सिंहासनाधस्तने॥

आनुपूर्व्यान्निषेदुश्च सर्वे मन्त्रिपुरोहिताः।
ततः सेनापतिः पश्चात् *प्रशास्ता च निषेदतुः॥ ४०॥

प्रशास्ता—पुररक्षकः— தலையாரி॥ ४०॥

ततस्तत्र मुहूर्तेन नद्यः पायसकर्दमाः।
उपातिष्ठन्त भरतं भरद्वाजस्य [1]शासनात्॥ ४१॥
तासामुभयतः कूलं †पाण्डुमृत्तिकलेपनाः।
रम्याश्वावसथा दिव्याः ‡[2]ब्रह्मणस्तु प्रसादजाः॥ ४२॥
तेनैव च मुहूर्तेन दिव्याभरणभूषिताः।
आगुर्विंशतिसाहस्राः §ब्रह्मणा प्रहिताः स्त्रियः॥ ४३॥

आगुः—आगतवत्यः। ब्रह्मणा—बृहस्पतिना, पुत्रकार्यसिद्ध्यर्थम्॥ ४३॥

‖सुवर्णमणि[3]मुक्तेन प्रवालेन च शोभिताः।
आगुर्विंशतिसाहस्राः कुबेर[4]प्रहिताः स्त्रियः॥ ४४॥

---

* प्रशास्ता—शिविरनियन्ता-गो. † पाण्डुमृत्तिकलेपनाः—सुधालिप्ताः-गो. ‡ ब्रह्मणः—भरद्वाजस्य-गो. § ब्रह्मणा—चतुर्मुखेन-गो. ‖ सुवर्णानि—सुवर्णमयाभरणानि, मणयः—रत्नानि, मुक्ताश्च—सुवर्णमणिमुक्तं-तेन-गो.

[1] तेजसा-ङ. [2] ब्राह्मणस्य-च. [3] युक्तेन-ङ. [4] सहिताः-ङ.

*याभिर्गृहीतः पुरुषः सोन्माद इव [1] लक्ष्यते ।
आगुर्विंशतिसाहस्राः नन्दनादप्सरोगणाः ॥ ४५ ॥

सोन्माद इति । 'गन्धर्वाप्सरसो वा एतमुन्मादयन्ति, य उन्माद्यति' इति श्रुत्येति शेषः । उद्भूतो मादः–सन्तोषः–उन्मादः, मुदहर्षे, भावे घञ्, उद्भूतसन्तोषसहिता इत्यर्थः ॥ ४५ ॥

नारदस्तुम्बुरु[2]र्गोपः प्रभया सूर्यवर्चसः ।
एते गन्धर्वराजानः भरतस्याग्रतो जगुः ॥ ४६ ॥

नारदादयो गन्धर्वराजानः । प्रभया सूर्यवर्चसः—तस्य समानतेजस्काः ॥ ४६ ॥

अलम्बुसा मिश्रकेशी पुण्डरीकाऽथ वामना ।
उपानृत्यंस्तु [3] भरतं † भरद्वाजस्य शासनात् ॥ ४७ ॥
यानि माल्यानि देवेषु यानि चैत्ररथे वने ।
प्रयागे तान्यदृश्यन्त भरद्वाजस्य तेजसा ॥ ४८ ॥

प्रयागे—क्षेत्रे ॥ ४८ ॥

बिल्वा मार्दङ्गिका आसन् ‡ शम्याग्राहा विभीतकाः ।
अश्वत्था नर्तकाश्चासन् भरद्वाजस्य [4] शासनात् ॥ ४९ ॥

बिल्वाः—बिल्ववृक्षाः । मार्दङ्गिकाः—मृदङ्गवादनशिल्पमस्य, 'तदस्य शिल्पम्' इति ठक्, 'मार्दङ्गिका मौरजिकाः'—

---

* गृहीतः —आलिङ्गितः । एतदर्धस्य पूर्वेणान्वयः–गो. दर्शनादिनाऽऽत्मवशीकृतः–ति. † भरद्वाजस्य शासनादुपानृत्यन्नित्यनेन, भरतस्य रामे वृत्तिविशेषं आतिथ्यव्याजेन परीक्षितवानृषिरिति गम्यते । एवं भरतस्य रामशेषतयैवावस्थानं, न तु भोगलौल्येनेत्युक्त्वा सेनाभोगं प्रपञ्चयति —यानीत्यादिना–गो. ‡ शम्याग्राहाः —तालग्राहकाः–गो.

[1] चोद्यते–ङ. [2] गोप्ता–ङ. [3] तारसर्वाः–ङ. [4] तेजसा–च.

கடலிக்காயாடிவாசிப்பார் । विभीतकाः—தான்றி । शम्याप्राहाः—'शम्या यज्ञायुधे ताले मशके च क्रियान्तरे' ॥ ४९ ॥

ततः सरलतालाश्च तिलका [1]नागमालकाः ।
प्रहृष्टाः तत्र संपेतुः *कुब्जा भूत्वाऽथ वामनाः ॥ ५० ॥

सरलः – देवदारुविशेषः । तालः प्रसिद्धः । तिलकः—மஞ்சக்காடி । नागमालकाः—நாகமரம் । कुब्जाः—स्थगुमन्तः ॥ ५० ॥

†शिंशुपाऽऽमलकी जम्बुः याश्चान्याः [2]काननेषु ताः ।
मालती मल्लिका जातिः याश्चान्याः कानने लताः ॥ ५१ ॥
प्रमदाविग्रहं कृत्वा भरद्वाजाश्रमे[3]ऽवसन् ।

शिंशुपा—இருவீடி । जम्बूरिति पृथक्पदं जातिवाचकम् । लताः मल्लिकादयः । ननु लतादिभिरेव स्त्र्यादिसाध्यव्यवहारः, किं तदावाहनेन ? लतादेः दिव्यस्त्र्यादितापत्तिसामर्थ्याय तदधिष्ठानार्थमिति वदामः । वनलतादेः स्त्र्यादिताऽपत्तिश्च ॥ ५१ ॥

‡[4]सुराः सुरापाः पिबत पायसं च बुभुक्षिताः ।
मांसानि च सुमेध्यानि भक्ष्यन्तां यावदिच्छथ ॥ ५२ ॥
[5]उच्छाद्य स्नापयन्ति स्म नदीतीरेषु §वल्गुषु ।
अप्येकमेकं पुरुषं प्रमदाः सप्त चाष्ट च ॥ ५३ ॥

---

* विहारार्हत्वाय एवंभावः। † स्त्रीलिङ्गवृक्षाणां स्त्रीभावपरिग्रहमाह—शिंशपेत्यादि । ‡ एवमूचुरिति शेषः–ति. 'इत्यवदन्' (पूर्वश्लोके पाठान्तरम्) इति सम्बन्धः–गो. § वल्गुषु–मनोज्ञेषु ।

[1] नागमल्लिकाः–ङ. मनमालकाः–च. [2] कानने लताः–च. [3] ऽवदन्–ङ. [4] सुरां–च. [5] उच्छोष–च.

उच्छाद्य—उद्वर्तनं कृत्वा। एकमेकामिति। 'एकं बहुव्रीहिवत्' इति बहुव्रीहिवद्भावाभाव आर्षः ॥ ५३ ॥

संवाहन्त्यः समापेतुः नार्यो [1] रुचिरलोचनाः।
* परिमृज्य [2] तथाऽन्योन्यं पाययन्ति वराङ्गनाः ॥ ५४ ॥

संवाहन्त्य इति। संवाहयन्त्य इति यावत्। संवाहनं—पादमर्दनादि। समापेतुः—सङ्गता बभूवुः। परिमृज्य—स्नात्वा। पाययन्तीति। मद्यभेदानिति शेषः ॥ ५४ ॥

हयान् गजान् खरानुष्ट्रान् तथैव सुरभेः सुतान्।
अभोजयन् [3] वाहनपाः तेषां भोज्यं यथाविधि ॥ ५५ ॥

सुरभिसुताः—बलीवर्दाः ॥ ५५ ॥

इक्षूंश्च मधुलाजांश्च भोजयन्ति स्म वाहनान्।
इक्ष्वाकुवरयोधानां चोदयन्तो महाबलाः ॥ ५६ ॥

इक्ष्वाकुवरयोधानां वाहनान् चोदयन्तः—रक्षणाय प्रेरयन्तः सन्तः इक्ष्वादीन् भोजयन्ति स्म ॥ ५६ ॥

† नाश्वबन्धोऽश्वमाजानात् न गजं कुञ्जरग्रहः।
मत्तप्रमत्तमुदिता सा चमूस्तत्र संबभौ ॥ ५७ ॥

अत एव—नाश्वबन्ध इत्यादि। अश्वान् बध्नातीत्यश्वबन्धः। मत्ताः मदकरद्रव्यसेवया, प्रमत्ताः मधुपानेन, मुदिताः स्रक्चन्दनवनितादिभोगेन ॥ ५७ ॥

---

* परिमृज्य—जलार्द्रमङ्गं वस्त्रादिना परिमृज्य, अलङ्कृत्येति वाऽर्थः—गो.
† नाजानात्—न ज्ञातवान्—गो.

[1] विपुल—च. [2] यथान्याय्यं—ङ. तदाऽन्योऽन्यं—च. [3] तदारोहाः—ङ.

तर्पिताः सर्वकामैस्ते रक्तचन्दनरूषिताः ।
अप्सरोगणसंयुक्ताः सैन्या वाचमुदीरयन् ॥ ५८ ॥

सैन्याः— सेनायां समवेताः । वाचं—क्रीडावाचं उदीरयन्—उदैरयान्निति यावत् । ताभिरप्सरोभिस्सहेति शेषः ॥ ५८ ॥

नैवायोध्यां गमिष्यामः न गमिष्याम दण्डकान् ।
कुशलं भरतस्यास्तु रामस्यास्तु तथा सुखम् ॥ ५९ ॥

कां वाचमुदीरयन्नित्यतः—नैवेत्यादि । न गमिष्यामेति । छान्दसः सकारलोपः । भरतस्य कुशलमस्तु, भूमौ स्वर्गसुखप्रदत्वादित्याशयः ॥ ५९ ॥

इति पादातियोधाश्च हस्त्यश्वारोहबन्धकाः ।
*अनाथास्तं विधिं लब्ध्वा वाचमेतामुदीरयन् ॥ ६० ॥

पादाभ्यां अदन्ति—गच्छन्ति इति पादातयः; ते चैते योधास्तथा । चकारतोऽधिकसमुच्चयः । हस्त्यश्वानामारोहाः—सादिनः, हस्त्यादिबन्धकाः तद्भृत्याश्च तथा । तं विधिं—तं सत्कारं लब्ध्वा अनाथाः अपरतन्त्रा इव—इत्येतां वाचमुदीरयन्निति सम्बन्धः ॥ ६० ॥

संप्रहृष्टा विनेदुस्ते नरास्तत्र सहस्रशः ।
भरतस्यानुयातारः स्वर्गोऽयमिति चाब्रुवन् ॥ ६१ ॥

विनादः—शूराणां प्रहृष्टानां शब्दविशेषः ॥ ६१ ॥

नृत्यन्ति स्म हसन्ति स्म गायन्ति स्म च सैनिकाः ।
समन्तात् परिधावन्ति †माल्योपेताः सहस्रशः ॥ ६२ ॥

---

* पदात्यादयः खलु ताः । अतः—एतावता कालेन एतादृशातिथ्याद्यनुभवगतिरहिताः—इत्येवं स्या लोकोक्तिर्वा अनाथा इति । तेन चातिथ्यप्रशंसनम् । † माल्योपेताः—माल्याद्यलङ्कृता इति यावत् ।

ततो भुक्तवतां तेषां तदन्नममृतोपमम् ।
दिव्यानुद्वीक्ष्य भक्ष्यांस्तान् अभवद्भक्षणे मतिः ॥६३ ॥

अभवद्भक्षणे मतिरिति । परितृप्तत्वेऽपि भक्ष्यसौष्ठवात् पुनश्चाकाङ्क्षाऽभूदित्यर्थः ॥ ६३ ॥

प्रेष्याश्चेटचश्च वध्वश्च बलस्थाश्च सहस्रशः ।
बभूवुस्ते भृशं [1]तृप्ताः सर्वे * चाहतवाससः ॥ ६४ ॥

प्रेष्याः—किङ्कराः । चेट्यः—दास्यः । बले—सेनायां तिष्ठन्तीति तथा । अहतवासस इति । नूतनवस्त्रपरिधाना इत्यर्थः ॥ ६४ ॥

कुञ्जराश्च खरोष्ट्राश्च [2]गोऽश्वाश्च मृगपक्षिणः ।
बभूवुः सुभृतास्तत्र †[3]नान्यो ह्यन्यमकल्पयत् ॥ ६५ ॥

खरोष्ट्रा इत्यादौ 'सर्वो द्वन्द्वो विभाषा' इत्येकत्वाभावः । मृगपक्षिणः क्रीडार्थाः । सुभृताः—सुपुष्टाः । तत्र—सेनायाम् । अन्यः अन्यं प्रति अन्नादिकं नाकल्पयत्, ऋषिकृतमेव सर्वमुपयुक्तवन्त इत्यर्थः ॥ ६५ ॥

नाशुक्लवासास्तत्रासीत् क्षुधितो मलिनोऽपि वा ।
रजसा ध्वस्तकेशो वा नरः कश्चिददृश्यत ॥ ६६ ॥

आजैश्चापि च वाराहैः निष्ठानवरसञ्चयैः ।
फलनिर्व्यूहसंसिद्धैः [4]सूपैर्गन्धरसान्वितैः ॥ ६७ ॥

---

* अहतवाससः—नूतनवस्त्राः । यद्वा, आहतवाससः—निर्णिक्तवाससः—गो.

† एते परस्परं उपचारादिकं नाकुर्वन् ; महर्षिप्रेषितपरिचारकैरेवेष्टसंपत्त्या परस्परापेक्षा नासीदिति भावः ।

[1] दृप्ताः—ङ. प्रीताः—च. [2] गावश्च—ङ. [3] नातो—च. [4] यूपै—ङ.

आजैरित्यादि। आजादिपदार्थैः पूर्णाः। आजैः—अजमांसैः। तथा वाराहैः। 'निष्ठानं व्यञ्जनं ज्ञेयम्' इति हरिः, व्यञ्जनश्रेष्ठानां सञ्चयास्तथा। निर्व्यूहः— क्वाथरसः, 'द्वार्यापीडे क्वाथरसे निर्व्यूहो नागदन्तके'। सिद्धैः—भावे निष्ठा, सिद्धिः पाक इति यावत्, पनसाम्रादिफलक्वाथरसपाकभेदैरित्यर्थः। अपि च फलनिर्व्यूहसन्निहिततया सिद्धैः—पक्वैः सूपैरिति सूपविशेषणमपि। तादृशसूपः केरलप्रसिद्धः। गन्धरसान्वितैरिति साधारणं विशेषणम्। गन्धः—भर्जनादिसंस्कारादिजो गन्धविशेषः, तथा रसविशेषोऽपि॥ ६७॥

पुष्पध्वजवतीः पूर्णाः शुक्लस्यान्नस्य[1] चाभितः।
ददृशुर्विस्मितास्तत्र नरा * लौहीस्सहस्रशः॥ ६८॥

पुष्पवत्यः ध्वजवत्यश्च तथा, इदमलङ्कारार्थं गन्धार्थं च। पूर्णयोगे षष्ठी सर्वत्र इति प्रागेवोक्तम्। लौहीः—स्वर्णरजतमयपात्रीः ददृशुरित्यन्वयः। लोहशब्दः पञ्चलोहसाधारणः॥ ६८॥

बभूवुर्वनपार्श्वेषु कूपाः पायसकर्दमाः।
ताश्च कामदुघा गावः द्रुमाश्चासन्[2] मधुस्रुतः॥ ६९॥

वनपार्श्वेषु—चैत्ररथवनवत् प्रतिभातवनप्रदेशेषु पञ्चयोजनपरिमितेष्वित्यर्थः। ताश्च तद्वनवर्तिन्यो गाश्च कामदुघा आसन्, दुहः क्विप्, घश्च। वनप्रदेशेष्वेवं भोगसाधनसंपादनं अपाङ्क्त्याटविकवननिषादादिबलाद्यर्थम्॥ ६९॥

वाप्यो मैरेयपूर्णाश्च मृष्टमांसचयैर्वृताः।
† प्रतप्त[3]पैठरैश्चापि मार्गमायूरकौक्कुटैः॥ ७०॥

---

* सर्वलोहेषु प्रधानत्वात् सुवर्णमत्र लोहशब्देन उच्यते—गो. † निषादादिबलतृप्त्यर्थं प्रतापमात्रेण संस्कार्याः—प्रतप्ताः, तथा पिठरः—कपालं, तेषु संस्कृताः—पक्वाः—पैठराः—ति. प्रतप्तपिठरैः—प्रतप्तपिठरसंस्कृतैः—गो.

[1] चोच्छ्रिता.—ङ. [2] मधुच्युतः—च. [3] पिठरै—ङ.

प्रतप्तपैठरैः—पिठरः—कपालः—ஓடு—तेषु संस्कृताः पकाः—पैठराः, 'संस्कृतं भक्षाः' इत्यण्, प्रतापमात्रतः संस्कार्याः—प्रतप्ताः पैठराश्च तथा। मृगादिसम्बद्धमांसाः—मार्गादयः ॥ ७० ॥

*पात्रीणां च सहस्राणि स्थालीनां नियुतानि च।
न्यर्बुदानि च पात्राणि शातकुम्भमयानि च ॥ ७१ ॥

पात्रीणां—अन्नपानीयपात्रीणां—மிடாக்கள்। स्थालीनां—व्यञ्जनस्थालीनां—சொம்புகள்। नियुतं—लक्षं। न्यर्बुदानि—शतकोट्यः। पात्राणि—भोजनपात्राणि—வட்டில் ॥ ७१ ॥

स्थाल्यः कुम्भ्यः करम्भ्यश्च दधिपूर्णाः सुसंस्कृताः।
यौवनस्थस्य गौरस्य कपित्थस्य सुगन्धिनः ॥ ७२ ॥

स्थाल्यः—தாலம்। कुम्भ्यः—தோண்டிகள்। दधिपूर्णत्वं कुम्भविशेषणम्। करम्भ्यः—दधिमन्थनस्थाल्यः। यौवनस्थस्य—न अपक्वस्य नातिपक्वस्य, मध्यमसुपरिपाकस्येत्यर्थः। गौरस्य—सुपक्वत्वादेव पीतवर्णस्य, 'पीतो गौरो हरिद्राभः'; उक्तविशेषणकपित्थस्य—விளாம்பழம்—सम्बन्धिसुगन्धवतः ॥ ७२ ॥

ह्रदाः पूर्णा रसालस्य दध्नः श्वेतस्य चापरे।
बभूवुः [1]पायसस्यान्ये †[2]शर्कराणां च सञ्चयाः ॥ ७३ ॥

रसालस्य—तक्रविशेषस्य, 'अपक्वतक्रं सव्योषं चतुर्जातं गुडार्द्रकम्। सजीरकं रसालं स्यात् मज्जिका शिखरिण्यपि' इति

---

* 'पात्रीणां' इत्यारभ्य 'सञ्चयाः' इत्यन्तमेकं वाक्यम्—गो. † 'शर्करायावसञ्चयाः' इति च पाठः, शर्करामिश्रयवविकारापूपसञ्चया इत्यर्थः—गो.

[1] पयसश्चान्ये—च. [2] शर्करायावसञ्चयाः—ङ.

वैजयन्ती । पायसस्यान्य इति । पूर्णा ह्रदा इत्यनुकर्षः । शर्कराणां सञ्चयाः—राशयश्च, पायसोपयुक्ता बभूवुरित्यनुकर्षः ॥ ७३ ॥

कल्कां*श्चूर्णकषायांश्च स्नानानि विविधानि च ।
ददृशुर्भाजनस्थानि †तीर्थेषु सरितां नराः ॥ ७४ ॥

उक्तह्रदान् कल्कादींश्च ददृशुरित्यन्वयः । कल्कान्—आमलक्यादिकल्कतैलान् चूर्णकषायांश्च—स्नानचूर्णक्काथतकषायांश्च ददृशुरिति सम्बन्धः । तथा विविधानि स्नानानि—स्नान्त्यनेनेति स्नानानि—उष्णोदकानि ॥ ७४ ॥

शुक्लानंशुमतश्चापि दन्तधावनसञ्चयान् ।
‡शुक्लांश्चन्दनकल्कांश्च समुद्गेष्ववतिष्ठतः ॥ ७५ ॥

शुक्लान्—निर्मलान् । अंशुमतः—अग्रे कूर्चवतः, दन्तधावनायेति यावत् । चन्दनकल्कान्—घृष्टचन्दनान् । समुद्गः—संपुटः—பிங்கண் ॥ ७५ ॥

दर्पणान् §परिमृष्टांश्च वाससां चापि सञ्चयान् ।
‖पादुको[1]पानहं चैव युग्मानि च सहस्रशः ॥ ७६ ॥

पादुका—பாவுரி । उपानत्—செருப்பு । पादुकापानहमिति । 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इति टच् समासान्तः । युग्मान्—उभयपादार्थं युग्मरूपान् ॥ ७६ ॥

---

* चूर्णानि—माषादिचूर्णानि, कषायाः क्वथितानि—गो. † सरितां तीर्थेषु—नद्या अवतारस्थलेषु । ‡ स्नानानन्तरमलङ्कारोपकरणानि दर्शयति— शुक्लानिति—गो. § परिमृष्टान्— निर्मलीकृतान्-गो. ‖ पादुकाः— दारुनिर्मिताः, उपानहः —चर्मनिर्मिताः-गो.

[1] पानहश्चापि—ङ.

आञ्जनीः कङ्कतान् कूर्चान् [1]शस्त्राणि च धनूंषि च ।
[2]मर्मत्राणानि चित्राणि शयनान्यासनानि च ॥ ७७ ॥

आञ्जन्यः—மைக்கூண்டு । कङ्कतः—केशमार्जनम्—சீப்பு । कूर्चाः—श्मश्रुप्रसाधकाः—பாணிபண்ணுவார் । मर्मत्राणं—कवचम् ॥ ७७ ॥

प्रतिपानह्रदान् पूर्णान् खरोष्ट्र[3]गजवाजिनाम् ।
अवगाह्यसुतीर्थांश्च ह्रदान् सोत्पलपुष्करान् ॥ ७८ ॥

प्रतिपानं—भुक्तजीर्णार्थं यत् पीयते तत् प्रतिपानम्—குடிநீர் । अवगाह्यसुतीर्थानिति । अवगाहितुं योग्याः सुखावताराश्चेत्यर्थः । 'पुष्करं पङ्कजे व्योम्नि' इति विश्वः ॥ ७८ ॥

*आकाशवर्णप्रतिमान् स्वच्छतोयान् सुखाप्लवान् ।
नीलवैडूर्यवर्णांश्च मृदून् यवससञ्चयान् ॥ ७९ ॥
निर्वापार्थं पशूनां ते ददृशुस्तत्र सर्वशः ।

आकाशवर्णप्रतिमानिति । नीलवर्णान्, उपाधिभेदादिति शेषः । सुखेन आप्लवः—स्नानं येषां ते तथा । यवसानां सञ्चयस्तथा, 'यवसं तृणमर्जुनम्' । निर्वापार्थं—भक्षणार्थम् ॥ ७९ ॥

व्यस्मयन्त मनुष्यास्ते [4]†स्वप्नकल्पं तदद्भुतम् ।
दृष्ट्वाऽऽतिथ्यं कृतं तादृक् [5]भरतस्य महर्षिणा ॥ ८० ॥

स्वप्नकल्पमिति । द्रागुत्पन्नसुदुष्प्रापविचित्रपदार्थत्वात् ॥ ८० ॥

---

* आकाशवर्णप्रतिमान्—आकाशवन्निर्मलानित्यर्थः—**गो.** † स्वप्नकल्पत्वोक्तिः अयत्नसिद्धत्वात्, अपूर्वत्वात्, आश्चर्यकरत्वाच्च—**गो.** स्वप्नकल्पं—मर्त्यदुर्लभम्—**ति.**

[1] छत्राणि—**च.** [2] तनुत्राणि च—**ङ.** [3] रथ—**ङ.** [4] स्वर्गकल्पं—**ङ.** [5] भरद्वाज—**च.**

[1]इत्येवं रममाणानां देवानामिव नन्दने।
भरद्वाजाश्रमे रम्ये सा रात्रिर्व्यत्यवर्तत ॥ ८१ ॥

प्रतिजग्मुश्च ता नद्यः गन्धर्वाश्च यथाऽऽगतम्।
*भरद्वाजमनुप्राप्य ताश्च सर्वा वराङ्गनाः ॥ ८२ ॥

तथैव मत्ता मदिरोत्कटा नराः
तथैव दिव्यागरुचन्दनोक्षिताः।
तथैव दिव्याः विविधाः स्रगुत्तमाः
†पृथक् [2]प्रकीर्णा मनुजैः प्रमर्दिताः ॥ ८३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकनवतितमः सर्गः

अथ स्वप्नादिवत् ऋषिकृतमातिथ्यं किं मिथ्या? इति शङ्कां व्यावर्तयितुमाह—तथैव मत्ता इत्यादि। मत्ताः—दृप्ताः। मदिरया उत्कटाः—मदिरोत्कटाः। 'मत्त शौण्डोत्कटक्षीबाः'। तथैवेति। यथा सार्वभौमाश्वमेधयागतृप्तजनस्य भुक्तवस्तु परिपाकपर्यन्तं सत्यं, तथैवात्रापि सत्य एव भोगोऽभूदित्यर्थः। स्रगुत्तमाः—स्रक्श्रेष्ठाः प्रकीर्णाः प्रमर्दिताश्च, उपभोगवशादिति शेषः। गज(८३)मानः सर्गः ॥ ८३ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकनवतितमः सर्गः

---

* भरद्वाजात् अनुमतिं प्राप्येत्यर्थः। † पृथक्—पूर्वस्रग्भ्यो विलक्षणाः—गो.

[1] इत्येषां—ङ. [2] विकीर्णा—ङ.

द्विनवतितमः सर्गः

[भरद्वाजामन्त्रणम्]

ततस्तां रजनीं व्युष्य भरतः सपरिच्छदः।
[1] कृतातिथ्यो भरद्वाजं *कामादभिजगाम ह ॥ १ ॥

अथ भरद्वाजाश्रमात् भरतनिर्याणम्। तत इत्यादि। व्युष्य—उषित्वा। सपरिच्छदः—सपरिवारः, 'परिवारः परिकरः परिष्कन्दः परिग्रहः' ॥ १ ॥

तमृषिः पुरुषव्याघ्रं प्राञ्जलिं प्रेक्ष्य चागतम्।
हुताग्निहोत्रो भरतं भरद्वाजोऽभ्यभाषत ॥ २ ॥

†अत एवाश्रमादुपनिष्क्रान्तं तं ऋषिरुवाचेति ॥ २ ॥

कच्चिदत्र सुखा रात्रिः तवास्मद्विषये गता।
‡समग्रस्ते जनः कच्चित् आतिथ्ये शंस मेऽनघ! ॥ ३ ॥

अस्मद्विषये—अस्मदाश्रमे। समग्रः—सम्यक्तृप्तिकः ॥ ३ ॥

तमुवाचाञ्जलिं कृत्वा भरतोऽभिप्रणम्य च।
§ [2] आश्रमादभिनिष्क्रान्तं ऋषिमुत्तमतेजसम् ॥ ४ ॥

---

* कामात—रामप्राप्तीच्छया–गो. तदाह्वानात पूर्वं स्वस्येच्छयेति वाऽर्थः। † एतद्दृष्ट्या 'आश्रमादुपनिष्क्रान्तं' इति तृतीयपादः स्यादिति भाति। 'तं' इत्यस्य विवरणरूपं वा—आश्रमादुपनिष्क्रान्तं—इति। ४ श्लोकगतपादसांकर्यं वेदम्। ‡ आतिथ्ये विषये समग्रः—संपूर्णतृप्त इति यावत। अनघेत्यनेन पूर्वं भरताशयपरीक्षणार्थमेवातिथ्यकरणमिति द्योतितम्–गो. § अभिनिष्क्रान्तमित्यनेन कौसल्यादिसर्वजनदर्शनार्थं भरतागमनकाल एव बहिर्निर्गतवान् ऋषिरिति व्यञ्जितम्–गो. जनसमूहस्य बहुत्वात सर्वेषां स्वदर्शनेन कृतकृत्यत्वायाश्रमान्निष्क्रान्तम्–ति. आदरसौलभ्यादिना वा निष्क्रान्तम् ॥

[1] कृतातिथ्यं–ङ. [2] आश्रमादुप–च.

सुखोषितोऽस्मि, भगवन्! समग्रबलवाहनः।
[1]तर्पितः सर्वकामैश्च सामात्यो बलवत् त्वया ॥ ५ ॥

बलवत्—अत्यन्तम् ॥ ५ ॥

अपेतक्लमसन्तापाः [2]सुभिक्षाः सुप्रतिश्रयाः।
अपि प्रेष्यानुपादाय सर्वे स्म [3]सुसुखोषिताः ॥ ६ ॥

क्लमः—ग्लानिः। सन्तापः—देहौष्ण्यम्। प्रेष्यानपि उपादाय—आरभ्य। सुभिक्षाः—समृद्धान्नपानाः। सुप्रतिश्रयाः—शोभनावासस्थाः ॥ ६ ॥

आमन्त्रयेऽहं, भगवन्! कामं त्वां, ऋषिसत्तम!
समीपं प्रस्थितं भ्रातुः *मैत्रेणेक्षस्व चक्षुषा ॥ ७ ॥

आमन्त्रये—आपृच्छे। कामं—अभ्यधिकम्। मैत्रेण चक्षुषेति। स्निग्धचक्षुषेत्यर्थः ॥ ७ ॥

†आश्रमं तस्य, धर्मज्ञ! धार्मिकस्य महात्मनः।
आचक्ष्व [4]कतमो मार्गः कियानिति च शंस मे ॥ ८ ॥

तस्येति। रामस्येत्यर्थः। कियान्—कियद्दूरपरिमाणः ॥ ८ ॥

---

* पूर्वं 'कच्चिन्न तस्यापापस्य पापं कर्तुमिहेच्छसि। अकण्टकं भोक्तुमनाः राज्यं तस्यानुजस्य च' (90–13) इति भरद्वाजोक्त्या वा प्रार्थयति—मैत्रेणेत्यादि ॥

† रामाश्रमप्रदेशाभिज्ञेषु गुहशानिषु विद्यमानेषु मुनिं प्रति प्रश्नः तस्य पूजार्थम्—गो. अथवा—'भरद्वाजाभिगमनं प्रयागे च सभाजनम्। आगिरेर्गमनं' (57–2) इत्यनेन भरद्वाजाभिगमनादेव रामस्य चित्रकूटप्रस्थानस्य सुमन्त्रेणावगमात्, स विषयः भरद्वाजेनैव सम्यग्ज्ञातः स्यात्, मुनिकल्पस्य रामस्य वृत्तान्तादिकं हि मुनय एव सम्यग्जानीयुरिति बुद्ध्या भरद्वाजं प्रति प्रश्नः स्यात्।

[1] बलवत्तर्पितश्चाहं बलवान् भगवंस्त्वया—ङ.   [2] सुभक्षाः—ङ.   [3] सुसुखोचिताः—ङ.   [4] कतरो—ङ.

इति पृष्टस्तु भरतं भ्रातृदर्शनलालसम् ।
प्रत्युवाच महातेजाः भरद्वाजो महातपाः ॥ ९ ॥
*** भरतार्धतृतीयेषु योजनेष्वजने वने ।**
चित्रकूटो गिरिस्तत्र रम्यनिर्दर[1]कन्दरः ॥ १० ॥

अर्धं तृतीयं येषां तानि अर्धतृतीयानि, तेषु; सार्धयोजनद्वितयेष्विति शेषः । निर्दराः–विदीर्णपाषाणाः, कन्दराः–गुहाः, निर्दरकन्दरा इति बहुव्रीहिः । गिरिस्तत्र रम्ये वने वर्तत इति योजना ॥ १० ॥

उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी ।
पुष्पितद्रुम[2]संछन्ना रम्यपुष्पितकानना ॥ ११ ॥

मन्दाकिनी नाम काचन नदी, न तु गङ्गा । तस्य चित्रकूटस्योत्तरं पार्श्वमासाद्य–प्राप्य तिष्ठतीति शेषः ॥ ११ ॥

अनन्तरं तत्सरितः चित्रकूटं च पर्वतम् ।
तयोः पर्णकुटी, तात ! तत्र तौ वसतो ध्रुवम् ॥ १२ ॥

तत्सरितः अनन्तरं समीपे चित्रकूटं च पर्वतं द्रक्ष्यसीति शेषः । तयोः चित्रकूटमन्दाकिन्योः मध्ये तयोः–रामलक्ष्मणयोः पर्णकुटी । हे तात ! तत्र तौ वसतः–पर्णकुटीर एव निवासे ध्रुवं वसत इति शेषः ॥ १२ ॥

---

* अर्धतृतीयेषु—अर्धयुक्ततृतीयेषु इत्यर्थः । सार्धयोजनद्वये वा—ती. अर्धतृतीयेषु—अर्धमेव तृतीयं यस्मिन्, सार्धद्वयमित्यर्थः । तस्यैकशेषेण कपिञ्जलाधिकरणन्यायेन सार्धसप्तत्यर्थः—रा. पूर्वं 'दशक्रोश इतस्तात गिरिर्यस्मिन्निवत्स्यसि' (54-28) इत्युक्त्या —एकयोजनस्य चतुःक्रोशात्मकत्वप्रसिद्धिप्राचुर्यात् सार्धद्वययोजन इत्यर्थः स्वरसः ॥

[1] काननः–च. [2] संपन्ना–ङ.

*दक्षिणेनैव मार्गेण सव्यदक्षिणमेव वा ।
गजवाजिरथाकीर्णां वाहिनीं, वाहिनीपते! ॥ १३ ॥
वाहयस्व, [1] महाभाग! ततो द्रक्ष्यसि राघवम् ।

दक्षिणेनैव मार्गेण — यमुनाया दक्षिणतीरस्थेन मार्गेणैव गत्वा कियद्दूरं गतः, पश्चात् सव्यदक्षिणमेव च — तस्य मार्गस्य शाखा-मार्गयोः सव्यभागवतो यो दक्षिणदिग्गामी मार्गोऽस्ति तमेव मार्गं वाहिनीं वाहयस्व, न त्वन्यं शाखामार्गम् ॥ १३ ॥

†प्रयाणमिति तच्छ्रुत्वा राजराजस्य योषितः ।
हित्वा यानानि यानार्हाः ‡ब्राह्मणं पर्यवारयन् ॥ १४ ॥

ब्राह्मणं — ब्रह्मपुत्रं भरद्वाजं पर्यवारयन्, नमस्कारार्थमिति शेषः ॥ १४ ॥

वेपमाना कृशा दीना सह देव्या सुमित्रया ।
कौसल्या [2] तत्र जग्राह कराभ्यां चरणौ मुनेः ॥ १५ ॥
असमृद्धेन कामेन सर्वलोकस्य गर्हिता ।
कैकेयी [3] तस्य जग्राह चरणौ सव्यपत्रपा ॥ १६ ॥

असमृद्धेन — यथाऽभिलषितमप्राप्तेन कामेन, उपलक्षितेति शेषः ॥ १६ ॥

---

* अस्मादाश्रमात् दक्षिणेन मार्गेण किञ्चिद्दूरं गत्वा, ततः सव्यदक्षिणं नैर्ऋतदिग्भागो यथा भवति तथा वाहिनीं वाहयस्व । किञ्चिद्दूरं दक्षिण एको मार्गः, ततः शाखामार्गेण नैर्ऋतदिग्भागगामिना गन्तव्यमिति भावः । कान्तारमार्गस्य सूक्ष्मत्वात् यथायाग्यं मार्गस्य वामतो दक्षिणतश्च विरलप्रदेशे वाहिनीं प्रापयस्वेत्यर्थ इत्यप्याहुः—गो.
† इति तत् प्रयाणं श्रुत्वा—प्रस्थानं अतिसन्निहितं ज्ञात्वेत्यर्थः ।　　‡ ब्राह्मणं—ब्रह्मविदम्—गो.

[1] महाबाहो-ङ.　　[2] तस्य—ङ.　　[3] तत्र--ङ.

*तं प्रदक्षिणमागम्य भगवन्तं महामुनिम् ।
अदूरात् भरतस्यैव तस्थौ दीनमनास्तदा ॥ १७ ॥

दीनमना इति । कैकेयीति शेषः ॥ १७ ॥

ततः पप्रच्छ भरतं भरद्वाजो †दृढव्रतः ।
विशेषं ज्ञातुमिच्छामि मातॄणां तव, राघव! ॥ १८ ॥
एवमुक्तस्तु भरतः भरद्वाजेन धार्मिकः ।
उवाच प्राञ्जलिर्भूत्वा वाक्यं वचनकोविदः ॥ १९ ॥
यामिमां, भगवन्! दीनां शोकानशनकर्शिताम् ।
पितुर्हि महिषीं देवीं देवतामिव पश्यसि ॥ २० ॥
एषा तं पुरुषव्याघ्रं [1]व्याघ्रविक्रान्तगामिनम् ।
कौसल्या सुषुवे रामं धातारमदितिर्यथा ॥ २१ ॥

शोकानशनेति । शोकः, तद्वशप्राप्तं अनशनं—यथोचितयथा-कालान्नस्वीकाराभावश्च तथा । यां पश्यसि, एषेति योजना । व्याघ्रस्य विक्रान्तः—गमनं, तद्वद्गामिनं—गमनशीलम् । धातारं—उपेन्द्रम् । धाता—प्रजापतिः, तस्यापरमूर्तित्वात् तद्वाच्य उपेन्द्रः ॥ २०-२१ ॥

‡अस्या वामभुजं श्लिष्टा यैषा तिष्ठति दुर्मनाः[2] ।
कर्णिकारस्य शाखेव शीर्णपुष्पा वनान्तरे ॥ २२ ॥

---

* लज्जावशादेव कौसल्यादिभिः सह मुनेः पुरतः स्थातुमशक्ता प्रदक्षिणव्याजेन भरतं गतेत्याह—तमित्यादिना—**गो.** † दृढव्रत इत्यनेन सर्वज्ञत्वं लक्ष्यते । सर्वज्ञोऽपि कैकेयीशिक्षार्थं पप्रच्छेत्यर्थः । विशेषं—संज्ञासंज्ञिसम्बन्धादिविशेषम्—**गो.** 'इयं का, इयं का' इत्येवंरूपं विशेषम्—**ती.** ‡ वामभुजं श्लिष्टा—कौसल्याया वेपमानाङ्गत्वात् तद्धारणार्थं तद्वामभुजमध्यास्थितेत्यर्थः—**गो.** दयाप्रीत्यादितः तां स्पृशन्तीवातिसमीपे वामभागे स्थितामिति वाऽर्थः ।

[1] सिंह-ङ. च. झ. [2] एतदनन्तरं—इयं सुमित्रा दुःखार्ता देवी राज्ञश्च मध्यमा—इत्यधिकं—ङ. च.

एतस्यास्तु सुतौ देव्याः कुमारौ * देववर्णिनौ ।
उभौ † लक्ष्मणशत्रुघ्नौ वीरौ सत्यपराक्रमौ ॥ २३ ॥

कर्णिकारः– கொங்கு । देववर्णिनौ–देवतुल्यरूपौ ॥२२-२३॥

यस्याः कृते नरव्याघ्रौ ‡ जीवनाशमितो गतौ ।
राजा पुत्रविहीनश्च स्वर्गं दशरथो गतः ॥ २४ ॥

क्रोधनामकृतप्रज्ञां दृप्तां § सुभगमानिनीम् ।
ऐश्वर्यकामां कैकेयीं अनार्यामार्यरूपिणीम् ॥ २५ ॥

ममैतां मातरं विद्धि नृशंसां पापनिश्चयाम् ।
यतो मूलं हि पश्यामि व्यसनं महदात्मनः ॥ २६ ॥

जीवनाशं—प्राणपीडान्तदुःखम् । इतः–दण्डकारण्ये । अकृतप्रज्ञां—अशिक्षितबुद्धिम् । आर्यरूपिणीं–सात्त्विकीमिव प्रतिभासमानां इदानीम् ॥ २४-२६ ॥

इत्युक्त्वा [1] नरशार्दूलः [2] बाष्पगद्गदया गिरा ।
स निशश्वास ताम्राक्षः नागः क्रुद्ध इव श्वसन् ॥ २७ ॥

---

* देववर्णिनौ—अश्विनीदेवतुल्यौ–गो. † महर्षिणा–कौसल्यादिनाम्नां, तत्पुत्ररामादिनाम्नां रामादीनां च पूर्वमेव परिचितत्वात्, विशिष्य तादृशसंज्ञावाच्यभूतव्यक्तिपरिचयार्थमेव प्रश्नकरणन, सुमित्रेति नामनिर्देशाभावेऽपि तत्पुत्रलक्ष्मणशत्रुघ्नद्वारैव परिचयकरणम् । ऋषिरपि 'विशेषं ज्ञातुमिच्छामि' इति खलु पप्रच्छ । ‡ राक्षसभूयिष्ठं दण्डकारण्यं प्रति विवासनात् जीवस्य जीवस्य नाशं–गो. 'सजीववधो जातः' इति लोके व्यवहारवत् जीवन्तावेव नाशं गतौ इति वाऽर्थः । § स्वसौन्दर्यादिमत्ता — 'सौभाग्यमदगर्विता' (अयो. 9–55) इति खलूक्तम् ।

[1] नृपशार्दूलः–ङ. [2] बाष्पोपहतया–ङ.

भरद्वाजो महर्षिस्तं ब्रुवन्तं भरतं तदा ।
प्रत्युवाच *महाबुद्धिः [1]इदं वचनमर्थवत् ॥ २८ ॥

ब्रुवन्तमिति । मातरि सकोपं ब्रुवन्तमित्यर्थः ॥ २८ ॥

†न दोषेणावगन्तव्या कैकेयी, भरत ! त्वया ।
रामप्रव्राजनं ह्येतत् सुखोदर्कं भविष्यति ॥ २९ ॥

दोषेण—दुष्टकृत्ययुक्तत्वेनेत्यर्थः । कुतो नावगन्तव्येत्यतः—रामेत्यादि ॥ २९ ॥

देवानां ‡दानवानां च ऋषीणां [2]भावितात्मनाम् ।
हितमेव भविष्याद्धि रामप्रव्राजनादिह ॥ ३० ॥

हितमेव भविष्यदिति । हि—यस्मात् इह—वने रामप्रव्राजनात् हितमेव—लोकहितमेव सर्वथा भविष्यत्—शत्रन्तम्, विजानीहीति शेषः । एवंवाद ऋषीणां नापूर्वः ॥ ३० ॥

अभिवाद्य तु संसिद्धः कृत्वा चैनं प्रदक्षिणम् ।
आमन्त्र्य भरतः सैन्यं युज्यतामित्यचोदयत् ॥ ३१ ॥

अभिवाद्य तु अत एव संसिद्धः—प्राप्ताशीर्वादानुग्रहः । युज्यतां—सन्नह्यताम्, गमनायेति शेषः ॥ ३१ ॥

ततो वाजिरथान् युक्त्वा दिव्यान् हेमपरिष्कृतान् ।
अध्यारोहत् [3]प्रयाणार्थी बहून् बहुविधो जनः ॥ ३२ ॥

---

* महाबुद्धिः—भावज्ञः-गो. † दोषेण—दोषवत्तया, नावगन्तव्या ; तस्याः देवप्रेरितत्वात्-गो. रावणवधादिकं जानन् ऋषिरेवमवोचत् । इदं अनन्तरश्लोके स्पष्टम् ।
‡ सकललोकहितत्वात् दानवानामपि हितमेव रावणवधादि ।

[1] नृशंसां पापनिश्चयाम्—ङ. [2] च महात्मनाम्—ङ. [3] प्रयाणार्थे—च.

गजकन्या गजाश्चैव *हेमकक्ष्याः पताकिनः ।
जीमूता इव †घर्मान्ते सघोषाः संप्रतस्थिरे ॥ ३३ ॥

गजकन्याः—करेणवः । सघोषा इति । घण्टाघोषसहिता इत्यर्थः ॥ ३३ ॥

विविधान्यपि ‡यानानि महान्ति च लघूनि च ।
प्रययुः सुमहार्हाणि §पादैरेव पदातयः ॥ ३४ ॥

सुमहार्हाणि यानान्यारुह्य तद्योग्याः प्रययुः । पदातयस्तु पादैरेव प्रययुः ॥ ३४ ॥

अथ यानप्रवेकैस्तु कौसल्याप्रमुखाः स्त्रियः ।
रामदर्शनकाङ्क्षिण्यः प्रययुर्मुदितास्तदा ॥ ३५ ॥

'प्रवेकानुत्तमोत्तमाः' ॥ ३५ ॥

‖ [1]चन्द्रार्कतरुणाभासां [2]नियुक्तां शिबिकां शुभाम् ।
आस्थाय प्रययौ श्रीमान् भरतः सपरिच्छदः ॥ ३६ ॥

नियुक्तां, वाहकैरिति शेषः ॥ ३६ ॥

---

* हेमकक्ष्याः — हेममयबन्धनरज्जवः । सघोषाः — घण्टाघोषयुक्ताः—**गो.** † घर्मान्ते—वर्षर्तौ । ‡ यद्वा यानानीति तत्स्था लक्ष्यन्ते—**गो.** § यानैः समं ययुरिति भावः—**गो.** ‖ चन्द्रार्कतरुणाभासां—तरुणचन्द्रार्ककान्तिम् । नियुक्तां—वसिष्ठादिभिराज्ञप्ता—**गो.** चन्द्रार्कतरुणाभासां—तरुणचन्द्रार्कसदृशीं, कचिद्भागे स्फटिकादिनिर्मितां, कचिद्भागे पद्मरागादिनिर्मितामिति यावत्—**ति.** निर्युक्तां—सज्जीकृतां—**ती.**

[1] स चार्क—ङ. [2] निर्युक्तां—ङ.

सा प्रयाता महासेना गजवाजि[1]रथाकुला ।
दक्षिणां दिशमावृत्य महामेघ इवोत्थितः ॥ ३७ ॥
*वनानि तु व्यतिक्रम्य जुष्टानि मृगपक्षिभिः ।
गङ्गायाः परवेलायां गिरिष्वपि नदीषु च ॥ ३८ ॥

गङ्गायाः परवेलायां—प्रयागे दक्षिणप्रवाहायाः पश्चिमतीरे स्थिता सा सेना वनानि व्यतिक्रम्य प्रयाता बभूवेति योजनीयम् ॥३८॥

†सा संप्रहृष्ट[2]द्विपवाजियोधा
[3]वित्रासयन्ती मृगपक्षिसङ्घान् ।
महद्वनं तत् [4]प्रतिगाहमाना
रराज सेना भरतस्य तत्र ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे द्विनवतितमः सर्गः

धरा(२९)मानः (?) सर्गः ॥ ३९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे द्विनवतितमः सर्गः

---

* गङ्गायाः दक्षिणवाहिन्याः परवेलायां—पश्चिमभागे, स्थितेति शेषः । महासेना वनानि व्यतिक्रम्य, गिरिषु नदीषु च विश्रम्येति शेषः, ...यद्वा—महासेना गिरिषु नदीषु च वनानि व्यतिक्रम्येति वाऽन्वयः—गो. गिरिष्वपि नदीषु च प्रयातेति वाऽन्वयः ॥

† भरतस्य सेना संप्रहृष्टद्विजवाजियोधा रराज ।

[1] समाकुला—ङ. ञ. [2] द्विजवाजियोधा—ङ. द्विपवाजियूथा—च. [3] विवासयन्ती—ङ. [4] प्रविगाहमाना—च.

त्रिनवतितमः सर्गः

[चित्रकूटागमनम्]

तया महत्या [1]यायिन्या ध्वजिन्या वनवासिनः।
अर्दिता यूथपा मत्ताः सयूथाः संप्रदुद्रुवुः ॥ १ ॥

अथ भरतेन चित्रकूटे रामाश्रमसमीपे सेनानिवेशनम्। तयेत्यादि। यायिन्या—गच्छन्त्या। 'यूथनाथस्तु यूथपः'॥ १ ॥

ऋक्षाः पृषत[2]सङ्घाश्च रुरवश्च समन्ततः।
*दृश्यन्ते [3]वनराजीषु गिरिष्वपि नदीषु च ॥ २ ॥

पृषतः—புள்ளிமான்। रुरुः—கலைமான் ॥ २ ॥

स संप्रतस्थे धर्मात्मा प्रीतो दशरथात्मजः।
वृतो महत्या [4]नादिन्या सेनया चतुरङ्गया ॥ ३ ॥

नादिन्या—घोषवत्या ॥ ३ ॥

सागरौघनिभा सेना भरतस्य महात्मनः।
महीं संछादयामास प्रावृषि द्यामिवाम्बुदः ॥ ४ ॥

द्यां—आकाशम् ॥ ४ ॥

तुरङ्गौघैरवतता वारणैश्च [5]महाजवैः।
अनालक्ष्या चिरं कालं तस्मिन् काले बभूव [6]भूः ॥ ५ ॥

अवतता—व्याप्ता ॥ ५ ॥

---

* दृश्यन्ते—अदृश्यन्त-गो.

[1] गच्छन्त्या—ङ. [2] मुख्याश्च—च. [3] वनवाटेषु—च. [4] यायिन्या-ङ.
[5] महाबलैः—च. [6] सा—च. (सा-चमूः–ति.)

स यात्वा दूरमध्वानं सुपरिश्रान्तवाहनः ।
उवाच भरतः श्रीमान् * वसिष्ठं मन्त्रिणां वरम् ॥ ६ ॥

मन्त्रिणां—मन्त्रविदां वरं—वरिष्ठम् ॥ ६ ॥

यादृशं लक्ष्यते रूपं यथा चैव श्रुतं मया ।
व्यक्तं प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् ॥ ७ ॥

यादृशमित्यादि । भरद्वाजः यं देशं—चित्रकूटदेशं यादृशमब्रवीत्, मया च यथा श्रुतं तस्मात्, तथैवैतद्देशस्य रूपं—स्वरूपं लक्ष्यते—अनुभूयते । तस्मात व्यक्तं—निश्चितं देशं—चित्रकूटदेशं प्राप्ताः स्म, छान्दसः सकारलोपः ॥ ७ ॥

अयं गिरिश्चित्रकूटः इयं मन्दाकिनी नदी ।
एतत् प्रकाशतेऽदूरात् नीलमेघनिभं वनम् ॥ ८ ॥

प्राप्तिमेव विवृणोति—अयमित्यादि । अपरोक्षतयाऽनुभूयमान इत्यर्थः । अदूरादिति पदम् ॥ ८ ॥

गिरेः सानूनि रम्याणि चित्रकूटस्य संप्रति ।
वारणैरवमृद्यन्ते मामकैः पर्वतोपमैः ॥ ९ ॥

प्रथमदर्शनत्वात् अवमृद्यन्ते—पीड्यन्त इति यावत् ॥ ९ ॥

मुञ्चन्ति कुसुमान्येते नगाः पर्वतसानुषु ।
नीला इवातपापाये तोयं † तोयधरा घनाः ॥ १० ॥

---

* औचित्यात् मन्त्रशब्दः कार्यविचारे वर्तते–गो. पुरोहितोऽपि सन् वसिष्ठः मन्त्रिप्रधानोऽपीति बालकाण्डोपक्रम एवोक्तम् । † शरत्कालिकमेघस्यापि घनपदवाच्यत्वात् तद्व्यावृत्तये तोयधरा इति ।

अत एवैते नगाः—वृक्षाः पर्वतसानुषु कुसुमानि मुञ्चन्ति। आतपापाये—वर्षाकाले घना इव स्थिता नगा इत्यन्वयः ॥ १० ॥

*किन्नरा[1]चरितं देशं पश्य, शत्रुघ्न! [2]पर्वतम्।
[3]मृगैः समन्तादाकीर्णं मकरैरिव सागरम् ॥ ११ ॥

एते मृगगणा भान्ति शीघ्रवेगाः प्रचोदिताः।
वायुप्रविद्धाः शरदि मेघ[4]राजिरिवाम्बरे ॥ १२ ॥

प्रचोदिता इति। सैनिकैरिति शेषः। वायुना प्रविद्धाः—क्षिप्ताः ॥ १२ ॥

†कुर्वन्ति कुसुमापीडान् [5]वाजिनः सुरभीनमी।
मेघप्रकाशैः फलकैः दाक्षिणात्याः [6]शशिप्रभान् ॥ १३ ॥

---

* किन्नराचरितदेशरूपं पर्वतमित्यन्वयः। † दक्षिणादिग्भवा नराः मेघप्रकाशैः—ऋक्षादिनीलचर्मपिनद्धतया नीलमेघतुल्यैः फलकैः साधनभूतैः शिरस्सु कुसुमापीडान्—कुसुमसमूहान् यथा कुर्वन्ति यथा धारयन्ति, तथैव अमी वृक्षाः कुसुमापीडान्—कुसुमस्तबकान् शिरस्सु धारयन्ति। दाक्षिणात्या हि फलकान् ऋक्षादिचर्मपिनद्धान् कृत्वा तेषु पुष्पाणि विकीर्य शिरस्सु धारयन्तीति प्रसिद्धिः। यद्वा—अमी भटाः मेघप्रकाशैः फलकैरुपलक्षिताः सन्तः दाक्षिणात्या नरा इव कुसुमापीडान्—कुसुमशेखरान् शिरस्सु कुर्वन्ति—ती. अमी भटाः मेघप्रकाशैः फलकैः—केशबन्धविशेषैः वनसञ्चारार्थं कल्पितैः उपलक्षिताः सन्तः दाक्षिणात्या यथा नराः—दाक्षिणात्या नरा इव शिरस्सु कुसुमापीडान् कुर्वन्ति। दाक्षिणात्या हि केशानुद्धृत्य बद्ध्वा कुसुमापीडैरलङ्कुर्वन्ति—गो. अत्र गोविन्दराजयोजना स्वरसा। परन्तु तत्रापि—'अमी—वृक्षाः' इति व्याख्यानं युक्तम्। भटानां तथा शेखरधारणं तु तद्देशीयानां असंभवि। अतः पुष्पितान् वृक्षान् दृष्ट्वेयमुक्तिः स्यात्। भटानां शिरस्सु पतितानि पुष्पाणि वीक्ष्य वा तथोक्तिः स्यात् ॥

[1] चरितोद्देशं—ङ. [2] पर्वते—च. [3] हयैः—च. [4] जाला इवा—च. [5] शिरस्सु सुरभीनमी—ङ. च. झ. शिरस्सु सुरभीनगाः—ङ. [6] यथा नराः—ङ. च. झ.

कुर्वन्तीत्यादि । दाक्षिणात्याः—दक्षिणदण्डकारण्यभवाः । मेघप्रकाशैः—अतिनिबिडोपचितप्रत्यग्रपलाशभूयिष्ठतया मेघवदवभासमानैः फलकैः—महास्कन्धशाखिभिरुपलक्षिता अमी वाजिनः—वाजः—फलादि, तदस्त्येषां अस्मिन्निति वा—वृक्षा इति यावत् । वृक्षवर्णनप्रकरणाच्चायमर्थः सिद्धः । अत एते शशिप्रभान् सुरभीन् कुसुमापीडान्—स्तबकशेखरान् कुर्वन्ति—वहन्तीति यावत् । 'आपीडशेखरोत्तंसाऽवतंसाः शिरसि स्रजः' हरिः । नानाऽन्य इहाह—तदसङ्गतम् ॥ १३ ॥

निष्कूजमिव * भूत्वेदं वनं घोरप्रदर्शनम् ।
अयोध्येव [1] जनाकीर्णा संप्रति प्रतिभाति मा ॥ १४ ॥

निष्कूजं—निश्शब्दं इव ॥ १४ ॥

[2] खुरैरुदीरितो रेणुः [3] दिवं प्रच्छाद्य तिष्ठति ।
तं वहत्यनिलः शीघ्रं † कुर्वन्निव मम प्रियम् ॥ १५ ॥

मम प्रियं कुर्वन्निवेति । चित्रकूटदेशदर्शननिरोधनिवर्तकत्वादित्याशयः ॥ १५ ॥

‡ स्यन्दनांस्तुरगोपेतान् सूतमुख्यैरधिष्ठितान् ।
एतान् संपततः शीघ्रं पश्य, शत्रुघ्न! कानने ॥ १६ ॥

शीघ्रं पतत इति । गच्छत इत्यर्थः । काननभुवः कठिनत्वादित्याशयः ॥ १६ ॥

---

* पुरा एवंभूतं संप्रति असंख्ययोधपूर्णत्वात् जनाकीर्णायोध्येव मा—मां प्रति भाति ॥ † रामाश्रमदर्शनप्रदानादिति भावः—गो. ‡ वक्ष्यमाणत्रासहेतुत्वेनाह—स्यन्दनानिति—गो.

[1] समाकीर्णा—ङ. [2] खुरैरुद्दीपितो—ङ. [3] दावं—ङ

एतान् वित्रासितान् पश्य बर्हिणः प्रियदर्शनान् ।
*[1] एतमाविशतः शीघ्रं अधिवासं [2] पतत्रिणः ॥ १७ ॥

† अतिमात्रमयं देशः मनोज्ञः प्रतिभाति [3] मा ।
तापसानां निवासोऽयं व्यक्तं स्वर्गपथो यथा ॥ १८ ॥

व्यक्तं—स्पष्टम् । स्वर्गपथः—स्वर्गप्रदेश इत्यर्थः ॥ १८ ॥

‡ मृगा मृगीभिः सहिताः बहवः पृषता वने ।
मनोज्ञरूपा लक्ष्यन्ते कुसुमैरिव चित्रिताः ॥ १९ ॥

पृषतानां सबिन्दुत्वात् कुसुमैः चित्रिता इवेति ॥ १९ ॥

§ साधु ! सैन्याः प्रतिष्ठन्तां विचिन्वन्तु च कानने ।
यथा तौ पुरुषव्याघ्रौ दृश्येते रामलक्ष्मणौ ॥ २० ॥

साधु—सम्यक्—यथोचितम्, 'साधुस्त्रिषूचिते सौम्ये' इति वैजयन्ती । प्रतिष्ठन्तां—प्रस्थापनं कुर्वन्ताम् । किमर्थमित्यतः—विचिन्वन्त्वित्यादि । चिञ् द्विकर्मकः ॥ २० ॥

भरतस्य वचः श्रुत्वा पुरुषाः शस्त्रपाणयः ।
[4] विविशुस्तद्वनं शूराः [5] धूमाग्रं ददृशुस्ततः ॥ २१ ॥

ते समालोक्य ‖ धूमाग्रं ऊचुर्भरतमागताः ।
नामनुष्ये भवत्यग्निः व्यक्तमत्रैव राघवौ ॥ २२ ॥

---

* एतं अधिवासं—वासस्थानं शीघ्रं आविशतः । † अतिमात्रं मनोज्ञः । ‡ पृषता मृगाः इत्यन्वयः । § 'साधु' इति प्रत्येकं पदं तृप्तिसूचकम् । सैन्याः प्रतिष्ठन्तां—अत्रैव प्रतिष्ठिता भवन्तु इति वा ॥ ‖ धूमाग्रमित्यनेन दावानलधूमो व्यावर्त्यते । तेन च 'नामनुष्ये भवत्यग्निः' इति समर्थनं युक्तमेव ।

[1] एवमापततः शैलं–च. [2] पतत्रिणाम्–च. [3] मे–च. [4] व्यचिन्वंस्तद्वनं–ङ. [5] धूमं च–ङ.

धूमाग्रं—धूमशिखां आलोक्य तेन अग्निं तत्साधकत्वेन सामान्यतो राघवौ चानुमाय भरतमूचुः। किमूचुरित्यतः—नामनुष्य इत्यादि। विमतो धूमः—कारणपूर्वकः—कार्यत्वात्, अनेवंत्वे एवंत्वातिपात इत्यनुमानेन अनुभूतधूमबलसिद्धः योऽयमग्निरस्ति विशिष्टः, असौ मनुष्यकारणक एव भवितुमर्हति, अग्निविशेषत्वात्। मनुष्यरूपकारणाभावे तु नायमग्निर्भवितुमर्हति। यश्च तत्कारणं मनुष्यः तौ रामलक्ष्मणावेव व्यक्तं भवितुमर्हतः ॥ २२ ॥

[1]अथ नात्र नरव्याघ्रौ राजपुत्रौ परंतपौ।
[2]अन्ये रामोपमाः सन्ति व्यक्तमत्र तपस्विनः* ॥ २३ ॥

अथ पुरुषान्तरमूलकत्वस्याग्नेः संभवात्, राजनि च 'सर्वथा राघवमूलकः' इति भीत्या वक्तुमशक्नुवन्तः पक्षान्तरमुपाददते—अथेत्यादि। अत्र—अनुमिताग्निविषये राजपुत्रौ यदि कारणं न भविष्यतः, तदा अन्ये रामोपमास्तपस्विन एवात्र सन्तीति व्यक्तं—'रामस्त्वत्रैव प्रदेशे' इत्याप्तवाक्यात् सिद्धम्। स चानुमिताग्निमूलतपस्विमुखाद्वा सुबोधः आश्रमविशेषो रामस्य इत्युक्तवन्त इत्यर्थः ॥ २३ ॥

तच्छ्रुत्वा भरतस्तेषां वचनं †साधुसम्मतम्।
सैन्यानुवाच [3]सर्वांस्तान् अमित्रबलमर्दनः ॥ २४ ॥

साधुसम्मतमिति। न्यायवित्सम्मतं तेषां तद्वचनं श्रुत्वा तत्र प्रदेशे रामावस्थितिं निश्चित्य सर्वांस्तान् सैन्यानुवाच ॥ २४ ॥

---

* रामस्यात्राभावेऽपि अत्रत्यतपस्विजनानां विचारणे रामावासस्थानं ज्ञास्येतैवेत्याशयः। अत एव 'रामोपमाः' इति। † 'प्रियं हितं च' इतिवत् 'साधु सम्मतं' इति प्रत्येकं पदं वा।

[1] अथवा नौ—ङ. [2] मन्ये—ङ. [3] सर्वान् स्वान्—ङ.

यत्ता भवन्तः तिष्ठन्तु नेतो गन्तव्यमग्रतः ।
अहमेव गमिष्यामि *सुमन्त्रो [1]धृतिरेव च ॥ २५ ॥

किमित्यतः—यत्ता इत्यादि । यत्ताः—सावधानाः भयभक्तियुक्ताः कोलाहलमकुर्वन्तः तिष्ठन्तु, नेतोऽग्रतो गन्तव्यमिति । धृतिरिति अशोकमन्त्रिणो नामान्तरम् ॥ २५ ॥

एवमुक्तास्ततः [2]स्सर्वे तत्र तस्थुः समन्ततः ।
भरतो यत्र धूमाग्रं तत्र दृष्टिं समादधात् ॥ २६ ॥

व्यवस्थिता या भरतेन सा चमूः
निरीक्षमाणाऽपि च [3]धूममग्रतः ।
बभूव हृष्टा †नचिरेण [4]जानती
प्रियस्य रामस्य समागमं तदा ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे त्रिनवतितमः सर्गः

व्यवस्थिता—व्यवस्थापितस्थितिका । सार(२७)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे त्रिनवतितमः सर्गः

---

* अहमेव राजसु, मन्त्रिषु सुमन्त्र एव, ऋत्विक्षु वसिष्ठ एव । धृतिरिति पाठे सुमन्त्र एवोच्यते—गो. 99 सर्गे 'शत्रुघ्नमनुदर्शयन्' (1), 'शत्रुघ्नश्चापि रामस्य ववन्दे चरणौ' (40) इति कथनात् शत्रुघ्नोऽपि सह गत इति गम्यते । एवं 'सुमन्त्रस्त्वपि शत्रुघ्नमदूरादन्वपद्यत' (3), 'शत्रुघ्नं चाब्रवीत् हृष्टः तानमात्यांश्च सर्वशः' (8), 'ततः सुमन्त्रेण गुहेन चैव' (41), इति दर्शनात् सुमन्त्रादयोऽपि केचन गता इति गम्यते । 'ऋषिं वसिष्ठं संदिश्य मातॄर्मे शीघ्रमानय । इति त्वरितमग्रे स जगाम' (2), 'वसिष्ठः पुरतः कृत्वा दारान् दशरथस्य च । अभिचक्राम तं देशं' (103-1) इति दर्शनात् अन्ते वसिष्ठः कौसल्यादिभिस्सहाऽऽययौ इति गम्यते । जनास्तु यथावकाशं यथाबलं आगताः इति 'रामं ददर्श सहसा जनः' (102-45) इति कथनात् गम्यते ।
† नचिरेण—शीघ्रमेव रामस्य समागमं जानती—प्रतीक्षन्ती ।

[1] गुरुरेव च–ङ. [2] स्सैन्याः–च. [3] भूमिमग्रतः–च. [4] जानकी–ङ.

चतुर्नवतितमः सर्गः

[चित्रकूटसौन्दर्यम्]

दीर्घकालोषितस्तस्मिन् गिरौ गिरि[1]वनप्रियः।
वैदेह्याः प्रियमाकाङ्क्षन् स्वं च चित्तं विलोभयन् ॥ १ ॥
*अथ दाशरथिश्चित्रं चित्रकूटमदर्शयत्।
†भार्याममरसङ्काशः शचीमिव पुरन्दरः ॥ २ ॥

अथ कविः रामस्य चित्रकूटप्राप्तिमुपवर्ण्य पुनर्भरतानयनादि-चित्रकूटप्राप्तिपर्यन्तवृत्तान्तमुपवर्ण्य अथ परमप्रकृतं रामवृत्तान्तमुपवर्णयति—दीर्घेत्यादि। दैर्घ्यस्य सापेक्षत्वात् द्विदिनापेक्षया मासोऽपि दीर्घकाल इत्युच्यते। वैदेह्याः प्रियं—सन्तोषं आकाङ्क्षन्—स्वैकालम्बनतया घोरं वनमागतवत्यास्तद्दुःखस्य नानाप्रकारत उपशमनीयत्वात् चित्रकूटरमणीयताप्रदर्शनेन तस्याश्चित्तं उपलालयन्। स्वं च चित्तं विलोभयन्निति। स्वचित्तस्यापि प्राप्ताभिषेकनिवर्तनहान्यादि-खिन्नत्वात् तदप्युपलालयन्नित्यर्थः ॥ १-२ ॥

न राज्याद् भ्रंशनं, भद्रे! न सुहृद्भिर्विनाभवः।
मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम् ॥ ३ ॥

विनाभवः—ऋदोरप् छान्दसः, विप्रयोग इति यावत् ॥ ३ ॥

पश्येममचलं, भद्रे! नानाद्विजगणायुतम्।
शिखरैः खमिवोद्विद्धैः धातुमद्भिर्विभूषितम् ॥ ४ ॥

खमुद्विद्धैरिति। शीलितादिवत् कर्तरि निष्ठा, वेधकैरिति यावत्, अभ्रंलिहैरित्यर्थः ॥ ४ ॥

---

*अथ—प्रातः कर्तव्यकर्मानुष्ठानानन्तरं ...... दीर्घकालोषितः—मासमात्रमुषितोऽपि—गो. † भार्यां चित्रकूटं अदर्शयत।

[1] वरप्रियः—च.

केचिद्रजतसङ्काशाः केचित् क्षतजसन्निभाः ।
पीतमाञ्जिष्ठवर्णाश्च *केचिन्मणिवरप्रभाः ॥ ५ ॥

क्षतजं—रक्तम् । पीतवर्णा माञ्जिष्ठवर्णाश्च तथा—மஞ்சாடிவிளா ॥ ५ ॥

पुष्यार्क[1]केतकाभाश्च केचिज्ज्योतीरसप्रभाः ।
विराजन्तेऽचलेन्द्रस्य देशा [2]धातुविभूषिताः ॥ ६ ॥

पुष्यः-पुष्यरागः । अर्कः-स्फटिकः. 'अर्कः स्फटिकसूर्ययोः'। ज्योतिः—नक्षत्रम् । रसः—पारदः ॥ ६ ॥

† नानामृग[3]गणद्वीपितरक्ष्वृक्षगणैर्वृतः ।
अदुष्टैर्भात्ययं शैलः बहुपक्षि[4]समायुतः ॥ ७ ॥

द्वीपी-கொடிப்புலி । तरक्षुः-வேங்கைப்புலி । अदुष्टैः-हिंसादिदोषरहितैः ; तपस्विनां वैभवादिति शेषः ॥ ७ ॥

‡ आम्रजम्ब्वसनैः लोध्रैः प्रियालैः पनसैर्धवैः ।
अङ्कोलैर्भव्य[5]तिनिशैः बिल्वतिन्दुकवेणुभिः ॥ ८ ॥

'पीतसारोऽसनो मतः' வேங்கை । राजादनं प्रियालः—முறளி । 'धवोऽश्वयुधुरः' நமை । अङ्कोलः- அழிஞ்சில் । 'भव्यो न्युब्जः'- தம்மாக்கை । तिनिशः-स्यन्दनः—குமிசு ॥

काश्मर्यरिष्ट[6]वरुणैः मधूकैस्तिलकैस्तथा ।
बदर्यामलकैर्नीपैः वेत्रधन्वनबीजकैः ॥ ९ ॥

---

* मणिवरप्रभाः—इन्द्रनीलप्रभाः-गो. † नानाविधानां मृगाणां गणैः—मृगाणां बाहुल्यात् प्रत्येकमत्रापि गणपदप्रयोगः स्यात् । ‡ अस्य सर्वस्यापि 'एवमादिभिराकीर्णः' इत्युत्तरत्रान्वयः ।

[1] कनका-ङ. [2] रसानु-ङ. [3] गणैः-च. [4] समाकुलः-च. [5] तिमिशैः-ङ. [6] वरणैः-ङ.

अरिष्टः—पिचुमन्दः-வேம்பு । वरुणः—वारुणसेतुः-மாவிலங்கை । धन्वनाः—इन्द्रवृक्षाः-மருதம் । बीजकाः-बीजपूराः दाडिमादयः ॥ ९ ॥

पुष्पवद्भिः फलोपेतैः छायावद्भिर्मनोरमैः ।
एवमादिभिराकीर्णः श्रियं पुष्यत्ययं गिरिः ॥ १० ॥

पुष्यति—वर्धयति ॥ १० ॥

शैलप्रस्थेषु रम्येषु पश्येमान् [1]रामहर्षणान् ।
किन्नरान् द्वंद्वशः, भद्रे! रममाणान् मनस्विनः ॥ ११ ॥
शाखावसक्तान् *खड्गांश्च प्रवराण्यम्बराणि च ।
पश्य †विद्याधरस्त्रीणां क्रीडोद्देशान् मनोरमान् ॥ १२ ॥

खड्गानिति । किन्नराणामिति शेषः ॥ १२ ॥

जलप्रपातैरुद्भेदैः निष्यन्दैश्च [2]क्वचित् क्वचित् ।
स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः ॥ १३ ॥

जलप्रपातैः, उन्नतगिरिप्रदेशादिति शेषः । उद्भेदैः—भुवमुद्भिद्य प्रवर्तमानैः—ஊற்று । निष्यन्दैः—அருவி । स्रवद्भिः—प्रवहद्भिः, साधारणमिदम् ॥ १३ ॥

गुहासमीरणो गन्धान् नानापुष्प[3]भवान् वहन् ।
‡घ्राणतर्पणमभ्येत्य कं नरं न प्रहर्षयेत्! ॥ १४ ॥

गुहाद्वारप्रवृत्तः समीरणः—गुहासमीरणः, गवाक्षवायुवत् । वहन्निति हेतौ शतृप्रत्ययः । अत एव हेतोः घ्राणतर्पणं-अभ्येत्य—प्राप्य स्थितं कं नरं—कं पुरुषं अयं गिरिः न प्रहर्षयेत् ॥

---

* खड्गादीनि विद्याधराणामेव-गो. † विद्याधरस्त्रीणां क्रीडोद्देशान् ।
‡ घ्राणतर्पणमिति क्रियाविशेषणम्-गो.

[1] कामहर्षणान्-ङ. च. [2] पृथक्पृथक्-ङ. [3] भरान् बहून्-ङ.

यदीह शरदोऽनेकाः त्वया सार्धं, अनिन्दिते!
लक्ष्मणेन च वत्स्यामि न मां शोकः प्रधक्ष्यति ॥ १५ ॥
शरदः— संवत्सराः ॥ १५ ॥

बहुपुष्पफले रम्ये नानाद्विजगणायुते।
विचित्रशिखरे ह्यस्मिन् रतवानस्मि, भामिनि! ॥ १६ ॥
अनेन वनवासेन मया प्राप्तं फलद्वयम्।
पितुश्चानृणता धर्मे भरतस्य प्रियं तथा ॥ १७ ॥
धर्मे—सत्यपरिपालनलक्षणे ॥ १७ ॥

वैदेहि! रमसे कच्चित्? चित्रकूटे मया सह।
पश्यन्ती विविधान् * भावान् † मनोवाक्काय[1]संयता ॥
मन आदयः संयताः यस्याः सा तथा ॥ १८ ॥

‡ इदमेवामृतं प्राहुः, राज्ञि! राजर्षयः परे।
वनवासं भवार्थाय प्रेत्य मे प्रपितामहाः ॥ १९ ॥
भवार्थायेति। संसारक्लेशनिवृत्त्यर्थमित्यर्थः ॥ १९ ॥

---

* भावान्—विभावान्। यद्वा भावाः— किन्नरमृगादीनां चेष्टाः—**गो**. † रमणस्य केवलैन्द्रियिकत्वव्यावृत्तये—मनोवाक्कायसंयतेति। ‡ वनवासं—वनवासरूपं इदं अमृतं—अमृतवद्भोग्यं वस्तु, मे प्रपितामहाः—मत्पितृवंश्याः परे—पूर्वे राजर्षयः प्रेत्य—प्रारब्धशरीर-वियोगं प्राप्य भवार्थाय—संसारविनाशायेत्यर्थः. 'तमसे दीपः', 'मशकार्थो धूपः' इत्यादिवन्निर्देशः, प्राहुः—प्रोचुः। यद्वा—इदमिति लिङ्गव्यत्यय आर्षः। इमं वनवासं—वानप्रस्थोचितनियमसहितं वनवासं अमृतं—मोक्षसाधनं प्राहुः—**गो.** वनवासं प्रेत्य एतच्छरीरत्यागोत्तरं भवार्थाय—भवः शिवः—हिरण्यगर्भः, तल्लोकप्राप्तिरूपायार्थाय—प्रयोजना-येत्येके—**ति**. हे राज्ञि! भवार्थाय—लोककल्याणाय, प्रवृत्ता इति शेषः, परे उत्कृष्टाः राजर्षयः मे प्रपितामहाः— मनुप्रभृतयः प्रेत्य—विचार्य इदं सनियमं वनवासं अमृतं प्राहुः। सर्वनाम्नां उद्देश्यविधेयान्यतरलिङ्गतेति नियमात् क्लीबता—**रा**. भवः—संसारः, तस्य अर्थाय—निवृत्तये, 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यप्यन्ये ॥

[1] सम्मतान्—**च**.

शिलाः शैलस्य शोभन्ते विशालाः शतशोऽभितः ।
बहुला बहुलैर्वर्णैः नीलपीतसितारुणैः ॥ २० ॥

अभित इति पदम् । अरुणैरुपलक्षिताः शैलाः शोभन्त इत्यन्वयः ॥ २० ॥

निशि भान्त्यचलेन्द्रस्य हुताशनशिखा इव ।
ओषध्यः स्वप्रभा[1]लक्ष्याः भ्राजमानाः सहस्रशः ॥ २१ ॥

ओषध्यो भान्तीत्यन्वयः ॥ २१ ॥

केचित्[2] क्षयनिभा देशाः केचिदुद्यानसन्निभाः ।
केचिदेकशिला भान्ति पर्वतस्यास्य, भामिनि ! ॥ २२ ॥

क्षयनिभाः—गृहसदृशाः, अतिनिबिडबहुपलाशवृक्षकत्वादिति शेषः । उद्यानसन्निभा इति । चम्पकपुन्नागादिवृक्षबाहुल्यात् । एकशिलाः—अनेकजनावस्थानक्षमसमतलैकशिलायुक्ता इत्यर्थः ॥ २२ ॥

भित्त्वेव वसुधां भाति चित्रकूटः समुत्थितः ।
चित्रकूटस्य कूटोऽसौ दृश्यते सर्वतः[3] शुभः ॥ २३ ॥
कुष्ठपुन्नागस्थगरभूर्जपत्रोत्तरच्छदान्* ।
कामिनां स्वास्तरान् पश्य कुशेशयदलायुतान् ॥ २४ ॥

'व्याधिः कुष्ठं पारिभाव्यम्'—கோட்டம் । स्थगरः—पुत्रकः—தகரம் । कुशेशयं—पद्मम् ॥ २४ ॥

मृदिताश्चापविद्धाश्च दृश्यन्ते कमलस्रजः ।
कामिभिः, वनिते ! पश्य †फलानि विविधानि च ॥ २५ ॥

---

* कुष्ठादीनां पत्राणि उत्तरच्छदाः—उपर्यास्तरणानि येषां ते—तादृशान् ॥

† फलानीत्यत्रापि मृदितानि, अपविद्धानि इति योज्यम्—गो.

[1] लक्ष्म्या—च. [2] वेश्म—ङ. [3] शिवः—ङ.

*वस्वोकसारां नलिनीं अत्येतीवोत्तरान् कुरून् ।
पर्वतश्चित्रकूटोऽसौ बहुमूलफलोदकः ॥ २६ ॥

वस्वोकसारा—अलका । नलिनी—शक्रपुरी, 'वस्वोकसारा श्रीदस्य शक्रस्य नलिनी पुरी'—हरिः ॥ २६ ॥

[1]इमं तु कालं, वनिते! विजह्रिवान्
त्वया च, सीते! सह लक्ष्मणेन ।
रतिं प्रपत्स्ये †कुलधर्मवर्धनीं
सतां पथि स्वैर्नियमैः परैः स्थितः ॥ २७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे चतुर्नवतितमः सर्गः

इममित्यादि । हे वनिते—सीते! परैः—श्रेष्ठैः स्वैः नियमैः सह सतां पथि स्थितः सन् इमं कालं—चतुर्दशसमासम्मितकालं त्वया लक्ष्मणेन च सह इह—चित्रकूटे विजह्रिवान्—हरतेर्लिटः क्वसुः, इडार्षः—प्राप्तविहारवानहं कुलधर्मवर्धनीं त्वां इहापि प्राप्य इह रतिं—सौख्यं प्रपत्स्ये । दारु(२८)मानः ‡ सर्गः । २७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे चतुर्नवतितमः सर्गः

---

* वस्वौकसारा—पूर्वदिगवस्थिता शक्रपुरी, 'वस्वौकसारा शक्रस्य पूर्वस्यां दिशि संस्थिता' इति विष्णुपुराणवचनात् । यद्वा—वस्वौकसारा—कुबेरपुरी, 'पुरी वस्वौकसारा स्यात् विमानं पुष्पकोऽस्त्रियाम्' इति यादवः । नलिनीं—मानससरसीं, सौगन्धिकाख्यसरसीं वा—**गो.** † एवं कालं—चतुर्दशवर्षावधिकालं सतां—राजर्षीणां स्वैर्नियमैः सह स्थितस्सन् त्वया लक्ष्मणेन च सह विजह्रिवान् यदि तदा कुलधर्मवर्धनीं—सत्यप्रतिपालनरूपधर्मवर्धनीं रतिं प्रीतिं प्रपत्स्ये—**ती. ति.** इह—चित्रकूटे विजह्रिवान्—विहृतवान् । पश्चात् कुलधर्मवर्धनीं—कुलधर्मः प्रजापालनं, तद्वर्धनीं रतिं—राज्यसुखं प्रपत्स्ये—**गो.** ‡ अष्टाविंशतिश्लोका अत्रेति कतकः-**ति.**

[1] एवं तु कालं—**ङ.**

पञ्चनवतितमः सर्गः

[मन्दाकिनीसौन्दर्यम्]

अथ शैलाद्विनिष्क्रम्य मैथिलीं कोसलेश्वरः ।
अदर्शयच्छुभजलां रम्यां मन्दाकिनीं नदीम् ॥ १ ॥

अथ नदीप्रदर्शनेन सीताया उपलालनम् । अथेत्यादि । शैलाद्विनिष्क्रम्येति । एतावत्कालमनुभावितात् पर्वतात् निष्क्रम्य—अपसृत्य ॥ १ ॥

अब्रवीच्च वरारोहां चारुचन्द्रनिभाननाम् ।
विदेहराजस्य सुतां रामो राजीवलोचनः ॥ २ ॥

वरारोहां—उत्तमस्त्रीम् । २ ॥

***विचित्रपुलिनां रम्यां हंससारससेविताम् ।**
[1]कुसुमैरुप[2]संपन्नां पश्य मन्दाकिनीं नदीम् ॥ ३ ॥

कुसुमैः—पद्मादिकुसुमैः † ॥ ३ ॥

नानाविधैस्तीररुहैः वृतां पुष्पफलद्रुमैः ।
राजन्तीं राजराजस्य नलिनीमिव सर्वतः ॥ ४ ॥

तीरे रोहन्तीति तीररुहाः, इगुपधात् कः । राजराजस्य नलिनी सौगन्धिकसरसी ॥ ४ ॥

---

* पुलिनस्य विचित्रत्वं नवोलपाङ्कृतत्वात्–**गो.** वस्तुतस्तु विचित्रजलप्रवाहैर्विचित्रितत्वादिति युक्तम् । † वृक्षेभ्यः पतितैश्च ।

[1] कमलै–ङ. [2] संछन्नां–ङ.

मृगयूथनिपीतानि कलुषाम्भांसि सांप्रतम् ।
तीर्थानि रमणीयानि *[1]रतिं सञ्जनयन्ति मे ॥ ५ ॥

मृगयूथनिपीतानि, अत एव सांप्रतं कलुषाम्भांसि। तीर्थ—जलावतारः ॥ ५ ॥

जटाजिनधराः काले वल्कलोत्तरवाससः ।
ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं, प्रिये ! ॥ ६ ॥
आदित्यमुपतिष्ठन्ते नियमादूर्ध्वबाहवः ।
एतेऽपरे, विशालाक्षि ! मुनयः संशितव्रताः ॥ ७ ॥

उपतिष्ठन्त इति । 'उपान्मन्त्रकरणे' इत्यात्मनेपदम् नियमात् हेतोः संशितव्रताः अपरे एते मुनयः प्रकाशन्ते, जपपरा इति शेषः ॥ ७ ॥

† मारुतोद्धूतशिखरैः प्रनृत्त इव पर्वतः ।
पादपैः पत्रपुष्पाणि सृजद्भिरभितो नदीम् ॥ ८ ॥

प्रनृत्तः—आदिकर्मणि क्तः, नृत्तं कर्तुमुपक्रान्त इवेत्यर्थः ॥

क्वचिन्मणिनिकाशोदां क्वचित्पुलिनशालिनीम् ।
क्वचित् सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥ ९ ॥

मणिः—मुक्तादिः । ‡ उदभाव आर्षः ॥ ९ ॥

---

* रतिं—अवगाहनविषयां प्रीतिम्—गो. † मारुतैः उद्धूतानि शिखराणि—अग्राणि येषां ते, तादृशैः पादपैः । ‡ मणिनिकाशोदामित्यत्र उदकशब्दस्य इति शेषः ।

[1] मैथिलि प्रतिभान्ति मे—ङ.

* निर्धूतान् वायुना पश्य विततान् पुष्पसञ्चयान् ।
पोप्लूयमानानपरान् [1] पश्येहाचलमध्यमे ! ॥ १० ॥

अम्भसि पोप्लूयमानान्—पुनःपुनः प्लवमानान् पुष्पसञ्चयान् पश्य। अचलमध्यमे—कृशत्वात् चलनाशक्तमध्यमवति ! ॥ १० ॥

† [2] तांश्चातिवल्गुवचनः रथाङ्गाह्वयना द्विजाः ।
अधिरोहन्ति, कल्याणि! विकूजन्तः शुभा गिरः ॥ ११ ॥

आह्वयनं—नामधेयम्, आहूयतेऽनेनेति आह्वयनं, आत्वाभाव आह्वयतेरार्षः ॥ ११ ॥

दर्शनं चित्रकूटस्य मन्दाकिन्याश्च, शोभने !
अधिकं पुरवासाच्च ‡ मन्ये च तव दर्शनात् ॥ १२ ॥

तव दर्शनाच्च अधिकं—अधिकसुखावहम् ॥ १२ ॥

विधूतकल्मषैः सिद्धैः तपोदमशमान्वितैः ।
नित्यविक्षोभितजलां विगाहस्व मया सह ॥ १३ ॥

---

* वायुना निर्धूतान् विततान्—तीरे व्याप्तान् पुष्पसञ्चयान् पश्य। जलमध्यगान् पोप्लूयमानान् भृशं पुनःपुनर्वा प्लवमानान् अपरान् पुष्पसंचयांश्च त्वं पश्य—**गो.** † रथाङ्गाह्वयनाः—चक्राह्वयाः द्विजाः—चक्रवाकाः तान्—पुष्पसंचयान् अधिरोहन्ति—शयनमारोहन्तीत्यर्थः--**गो.** रथाङ्गं—चक्रं, तद्वाचकः शब्दः आह्वयने—नामनि येषामिति विग्रहः। अधिरोहन्ति, पुलिनानीति शेषः—**ति.** ‡ तव दर्शनात् अधिकं मन्ये, भवत्या असान्निध्याने तु न तथेति भावः। चकारः एवकारार्थको वा, तव दर्शनादेव अधिकं मन्ये।

[1] पश्य त्वं जलमध्यगान्—ङ. पश्य त्वं तनुमध्यमे !—**च.** [2] पश्यतान्—**ङ.** पश्यतत—**च.**

*सखीव चावगाहस्व, सीते! मन्दाकिनीं नदीम् ।
कमलान्यवमज्जन्ती† पुष्कराणि च, भामिनि! ॥ १४ ॥

सखीवेति। मन्दाकिन्या इति शेषः। कमलपुष्कर—रक्तसित-पद्मे । अवमज्जन्ती—अवक्षिपन्ती सती अवगाहस्वेत्यन्वयः ॥ १४ ॥

‡त्वं पौरजनवत् व्यालान् अयोध्यामिव पर्वतम् ।
मन्यस्व, वनिते! नित्यं सरयूवदिमां नदीम् ॥ १५ ॥

पौरजनवत्—कैकेय्यादिजनवत् व्यालान्—सर्पान् मन्यस्व ॥

§लक्ष्मणश्चापि धर्मात्मा मन्निदेशे व्यवस्थितः ।
त्वं चानुकूला, वैदेहि! प्रीतिं जनयतो मम ॥ १६ ॥

जनयतः—संपादयतः ॥ १६ ॥

उपस्पृशंस्त्रिषवणं मधुमूलफलाशनः ।
नायोध्यायै न राज्याय स्पृहयेऽद्य त्वया सह‖ ॥ १७ ॥

---

* संकोचादिकं विहाय अवगाहस्व, इति तात्पर्येण वा सखीवेत्युक्तिः। † अवमज्जन्ती—अवमज्जयन्ती-गो. ‡ त्वं व्यालान् वनचरजन्तून् पौरजनवत् पश्य, पौरजनप्रीतिं व्यालेषु कुर्वित्यर्थः। एवमुत्तरत्रापि। अतः पौरजनाद्यनवलोकनक्लेशो न कार्य इति भावः-गो. § सौभ्रात्रं, अनुकूलभार्यात्वं च सौख्यरसायनमिति भावः-गो. ‖ त्वया सह त्रिषवणमुपस्पृशन्—इत्यन्वयः। अयोध्यायै न स्पृहये—अयोध्यागमनं नापेक्ष इति भावः।

*इमां हि रम्यां [1] मृगयूथशालिनीं
निपीततोयां गजसिंहवानरैः ।
[2] सुपुष्पितैः पुष्पवनैरलङ्कृतां
न सोऽस्ति यः स्यादगतक्लमः सुखी ॥ १८ ॥

पुष्पवनैरलङ्कृतामिमां अवगाह्य यो गतक्लमः सुखी च न स्यात्, स नास्तीति योजनीयम् ॥ १८ ॥

इतीव रामो बहु † सङ्गतं वचः
प्रियासहायः सरितं प्रति ब्रुवन् ।
चचार रम्यं नयनाञ्जनप्रभं
स चित्रकूटं रघुवंशवर्धनः ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे पञ्चनवतितमः सर्गः

बहु ब्रुवन्नित्युक्ते असङ्गताऽव्यावृत्त्या—सङ्गतमिति । नयनयोरञ्जनं नयनाञ्जनं, तद्वन्नीलप्रभमित्यर्थः । चित्रकूटं चचार—चित्रकूटे विहृतवानित्यर्थः । धन्य(१९)मानः सर्गः ॥ १९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे पञ्चनवतितमः सर्गः

---

* अत्र 'उपस्पृशन्' इत्यनुषज्यते—गो. † संगतं—प्रसक्तानुप्रसक्तं—गो.

[1] मृगयूथलोलिनीं—ङ. गजयूथलोडिनीं—च. [2] सुपुष्पितां पुष्पफलै—ङ. सुपुष्पितां पुष्पभरै—च.

प्रक्षिप्तः सर्गः

[काकासुरवृत्तान्तः]

रामस्तु नलिनीं रम्यां चित्रकूटं च पर्वतम् ।
उत्तरे तु गिरेः पादे चित्रकूटस्य राघवः ॥ १ ॥
ददर्श कन्दरं रम्यं शिलाधातुसमन्वितम् ।
सुखप्रसेकैस्तरुभिः पुष्पभारावलम्बिभिः ॥ २ ॥
संवृतं च रहस्यं च मत्तद्विजगणायुतम् ।
तद्दृष्ट्वा सर्वभूतानां मनोदृष्टिहरं वनम् ॥ ३ ॥
उवाच सीतां काकुत्स्थः वनदर्शनविस्मितः ।
वैदेहि ! रमते चक्षुः तवास्मिन् गिरिकन्दरे ? ॥ ४ ॥
परिश्रमविघातार्थं साधु तावदिहास्यताम् ।
त्वदर्थमिह विन्यस्ता त्वियं श्लक्ष्णसमा शिला ॥ ५ ॥
यस्याः पार्श्वे तरुः पुष्पैः प्रविष्ट इव केसरैः ।
राघवेणैवमुक्ता सा सीता प्रकृतिदक्षिणा ॥ ६ ॥
उवाच प्रणयस्निग्धं इदं श्लक्ष्णतरं वचः ।
अवश्यकार्यं वचनं तव मे, रघुनन्दन ! ॥ ७ ॥
बहुशो भ्रमितश्चाद्य तव चैवं मनोरथः ।
एवमुक्त्वा वरारोहा शिलां तामुपसर्प ह ॥ ८ ॥
सह भर्त्राऽनवद्याङ्गी रन्तुकामा मनस्विनी ।
तामेवं ब्रुवतीं सीतां रामो वचनमब्रवीत् ॥ ९ ॥
रम्यं पश्यसि भूतार्थं वनं पुष्पितपादपम् ।
पश्य, देवि ! गिरौ रम्ये रम्यपुष्पाङ्कितानिमान् ॥ १० ॥
गजदन्तक्षतान् वृक्षान् पश्य निर्यासवर्षिणः ।
झिल्लिकाविरुतैः दीर्घैः रुदतीव समन्ततः ॥ ११ ॥
पुत्रप्रियोऽसौ शकुनिः पुत्र पुत्रेति भाषते ।
मधुरां करुणां वाचं पुरेव जननी मम ॥ १२ ॥
विहगो भृङ्गराजोऽयं सालस्कन्धसमाश्रितः ।
सङ्गीतमिव कुर्वाणः कोकिलेनावकूजति ॥ १३ ॥
अयं वा बालकः शङ्के कोकिलानां विहङ्गमः ।
सुखबद्धमसम्बद्धं तथा ह्येष प्रभाषते ॥ १४ ॥

एषा कुसुमिता नूनं पुष्पभारानता लता ।
दृश्यते मामिवात्यर्थं श्रमाद्, देवि त्वमाश्रिता ॥ १५ ॥
एवमुक्ता प्रियस्याङ्के मैथिली प्रियभाषिणी ।
भूयस्तरां त्वनिन्द्याङ्गी समारोहत भामिनी ॥ १६ ॥
अङ्के तु परिवर्तन्ती सीता सुरसुतोपमा ।
हर्षयामास रामस्य मनो मनसिजार्पितम् ॥ १७ ॥
स निघृष्याङ्गुलिं रामः धौते मनश्शिलोच्चये ।
चकार तिलकं तस्याः ललाटे रुचिरं तदा ॥ १८ ॥
बालार्कसमवर्णेन तेजसा गिरिधातुना ।
चकासे विनिविष्टेन ससन्ध्येव निशा सिता ॥ १९ ॥
केसरस्य च पुष्पाणि करेणामृद्य राघवः ।
अलकं पूरयामास मैथिल्याः प्रीतमानसः ॥ २० ॥
अभिरम्य तदा तस्यां शिलायां रघुनन्दनः ।
अन्वीयमानो वैदेह्या देशमन्यं जगाम ह ॥ २१ ॥
विचरन्ती तदा सीता ददर्श हरियूथपम् ।
वने बहुमृगाकीर्णे वित्रस्ता राममाश्लिषत् ॥ २२ ॥
रामस्तां परिरब्धाङ्गीं परिरभ्य महाभुजः ।
सान्त्वयामास वामोरूं अवभर्त्स्याथ वानरम् ॥ २३ ॥
मनश्शिलायास्तिलकः सीतायाः सोऽथ वक्षसि ।
समदृश्यत संक्रान्तः रामस्य विपुलौजसः ॥ २४ ॥
प्रजहास तदा सीता गते वानरपुङ्गवे ।
दृष्ट्वा भर्तरि संक्रान्तं अपाङ्गं समनश्शिलम् ॥ २५ ॥
नातिदूरे त्वशोकानां प्रदीप्तमिव काननम् ।
ददर्श पुष्पस्तबकैः तर्जद्भिरिव वानरैः ॥ २६ ॥
वैदेही त्वब्रवीत् रामं अशोककुसुमार्थिनी ।
वयं तदभिगच्छामः वनं, इक्ष्वाकुनन्दन ! ॥ २७ ॥
तस्याः प्रिये स्थितो रामः देव्या दिव्यार्थरूपया ।
सहितस्तदशोकानां विशोकः प्रययौ वनम् ॥ २८ ॥
तदशोकवनं रामः सभार्यो व्यचरत्तदा ।
गिरिपुत्र्या पिनाकीव सह हैमवतं वनम् ॥ २९ ॥

तावन्योन्यमशोकस्य पुष्पैः पल्लवधारिभिः ।
समलंचक्रतुरुभौ कामिनौ नीललोहितौ ॥ ३० ॥
आबद्धवनमालौ तौ कृतापीडावतंसकौ ।
भार्यापती तावचलं शोभयांचक्रतुर्भृशम् ॥ ३१ ॥
एवं स विविधान् देशान् दर्शयित्वा प्रियां प्रियः ।
आजगामाश्रमपदं सुसंश्लिष्टमलङ्कृतम् ॥ ३२ ॥
प्रत्युज्जगाम तं भ्राता लक्ष्मणो गुरुवत्सलः ।
दर्शयन् विविधं धर्मं सौमित्रिः सुकृतं तदा ॥ ३३ ॥
शुद्धबाणहतांस्तत्र मेध्यान् कृष्णमृगान् दश ।
राशीकृतान् शुष्यमाणान् अन्यान् कांश्चन कांश्चन । ३४ ॥
तद्दृष्ट्वा कर्म सौमित्रेः भ्राता प्रीतोऽभवत्तदा ।
क्रियन्तां बलयश्चेति रामः सीतामथान्वशात् ॥ ३५ ॥
अग्रं प्रदाय भूतेभ्यः सीताऽथ वरवर्णिनी ।
तयोरुपाददत् भ्रात्रोः मधु मांसं च तत् भृशम् ॥ ३६ ॥
तयोस्तुष्टिमथोत्पाद्य वीरयोः कृतशौचयोः ।
विधिवज्जानकी पश्चात् चक्रे सा प्राणधारणम् ॥ ३७ ॥
शिष्टं मांसं निकृष्टं यत् शोषणायावकल्पितम् ।
तत् रामवचनात् सीता काकेभ्यः पर्यरक्षत ॥ ३८ ॥
तां ददर्श तदा भर्ता काकेनायासितां दृढम् ।
यस्या हारान्तरचरः कामचारी विहङ्गमः ॥ ३९ ॥
काकेनारोध्यमानां तां सा मुमोह तदातुरम् ।
सा चुकोपानवद्याङ्गी भर्तृप्रणयदर्पिता ॥ ४० ॥
इतश्चेतश्च तां काको वारयन्तीं पुनःपुनः ।
पक्षतुण्डनखाग्रैश्च कोपयामास कोपनाम् ॥ ४१ ॥
तस्याः प्रस्फुरमाणोष्ठं भ्रुकुटीपुटसूचितम् ।
मुखमालोक्य काकुत्स्थः तं काकं प्रत्यषेधयत् ॥ ४२ ॥
स धृष्टमानो विहगः रामवाक्यमचिन्तयन् ।
सीतामभिपपातैव ततश्चुक्रोध राघवः ॥ ४३ ॥
सोऽभिमन्त्र्य शरैषीकां ऐषीकास्त्रेण वीर्यवान् ।
काकं तमभिसन्धाय ससर्ज पुरुषर्षभः ॥ ४४ ॥

स तेनाभिद्रुतः काकः त्रीन् लोकान् पर्यगात् ततः ।
देवैर्दत्तवरः पक्षी द्वारान्तरचरो लघुः ॥ ४५ ॥

यत्र यत्रागमत् काकः तत्र तत्र ददर्श ह ।
इषीकां भूतसङ्काशां स रामं पुनरागमत् ॥ ४६ ॥

स मूर्ध्ना न्यपतत् काकः राघवस्य महात्मनः ।
सीतायास्तत्र पश्यन्त्याः मानुषीमैरयत् गिरम् ॥ ४७ ॥

प्रसादं कुरु मे, राम ! प्राणैः सामग्र्यमस्तु मे ।
अस्त्रस्यास्य प्रभावेण शरणं न लभे क्वचित् ॥ ४८ ॥

तं काकमब्रवीत् रामः पादयोः शिरसा गतम् ।
सानुक्रोशतया धीमान् इदं वचनमर्थवत् ॥ ४९ ॥

मया रोषपरीतेन सीताप्रियहितार्थिना ।
अस्त्रमेतत् समाधाय त्वद्वधायाभिमन्त्रितम् ॥ ५० ॥

यत्तु मे चरणौ मूर्ध्ना गतस्त्वं जीवितेप्सया ।
अत्रास्त्यवेक्षा त्वयि मे रक्ष्यो हि शरणागतः ॥ ५१ ॥

अमोघं क्रियतामस्त्रं एकमङ्गं परित्यज ।
किमङ्गं शातयतु ते शरैषीका ब्रवीहि मे ॥ ५२ ॥

एतावद्धि मया शक्यं तव कर्तुं प्रियं, खग !
एकाङ्गहीनं क्षत्रेण जीवितं मरणाद्वरम् ॥ ५३ ॥

एवमुक्तस्तु रामेण संप्रधार्य स वायसः ।
अभ्यगच्छत् द्वयोरक्ष्णः त्यागमेकस्य पण्डितः ॥ ५४ ॥

सोऽब्रवीत् राघवं काकः नेत्रमेकं त्यजाम्यहम् ।
एकनेत्रोऽपि जीवेयं त्वत्प्रसादात्, नराधिप ! ॥ ५५ ॥

रामानुज्ञातमस्त्रं तत् काकस्य नयनेऽपतत् ।
वैदेही विस्मिता तत्र काकस्य नयने हते ॥ ५६ ॥

निपत्य शिरसा काकः जगामाशु यथेप्सितम् ।
लक्ष्मणानुचरो रामः चकारानन्तरक्रियाः ॥ ५७ ॥

इति प्रक्षिप्तः सर्गः

षण्णवतितमः सर्गः

[लक्ष्मणसंरम्भः]

तां तथा दर्शयित्वा तु मैथिलीं गिरिनिम्नगाम् ।
निषसाद गिरिप्रस्थे सीतां *मांसेन छन्दयन् ॥ १ ॥

एवं सीतामात्मानं च गिरिनदीदर्शनादिना वीतशोकं संपाद्यावतिष्ठमानेन रामेण कस्मिंश्चिद्दिवसे भरतसेनोपलब्धिः । तां तथेत्यादि । गिरेः निम्नगा—गिरिनिम्नगा—मन्दाकिनीति यावत् । मांसेनेति । मांसविशेषप्रदर्शनेनेत्यर्थः । छन्दयन्—सान्त्वयन्—लालयन्निति यावत् ॥ १ ॥

इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना ।
एवमास्ते स धर्मात्मा सीतया सह राघवः ॥ २ ॥

तस्यैव प्रकारः—इदमित्यादि । 'इदं अग्निना निष्टप्तं सत् तावता स्वादु भवति' इत्येवं वदन्नास्ते इति योजना ॥ २ ॥

तथा तत्राऽऽसतस्तस्य [1]भरतस्योपयायिनः ।
सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभःस्पृशौ ॥ ३ ॥

तथेत्यादि । तथा तत्र गिरिप्रस्थे आसतः—आसेः छान्दसः शतृप्रत्ययः, आसीनस्येति यावत्, तस्य रामस्य पुरस्तात् उपयायिनो भरतस्य सैन्यरेणवः सैन्यशब्दश्चेति उभावपि नभःस्पृशौ प्रादुरास्तां—प्रादुर्बभूवतुः ॥ ३ ॥

---

* मांसेन छन्दयन्-वशीकुर्वन्-गो. मांसेन—तापसोपभोग्यफला देना—रा.

[1] भरतस्यानुयायिनः—ङ.

एतस्मिन्नन्तरे त्रस्ताः शब्देन महता *ततः ।
अर्दिता यूथपा मत्ताः [1]सयूथा दुद्रुवुर्दिशः ॥ ४ ॥

एतस्मिन्नन्तरे—सेनाशब्दप्रवृत्तिसमये ॥ ४ ॥

स तं सैन्यसमुद्भूतं शब्दं शुश्राव राघवः ।
तांश्च विप्रद्रुतान् [2]सर्वान् यूथपानन्ववैक्षत ॥ ५ ॥

स राघवः—रामश्च सैन्येन समुद्भूतं—उत्पादितम् ॥ ५ ॥

तांश्च विद्रवतो दृष्ट्वा तं च श्रुत्वा स निस्वनम् ।
उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसम् ॥ ६ ॥

स निस्वनमित्यत्र 'सः' इति पदम् ॥ ६ ॥

†हन्त ! लक्ष्मण ! पश्येह ‡ सुमित्रा सुप्रजास्त्वया ।
[3]भीमस्तनितगंभीरः तुमुलः श्रूयते स्वनः ॥ ७ ॥

भीमं—भयङ्करं यत स्तनितं—मेघनिर्घोषः तद्वत् गंभीरः तुमुलः—निबिडः योऽयं स्वनः श्रूयते तस्य कारणं पश्येति योजना ॥ ७ ॥

गजयूथानि वाऽरण्ये महिषा वा महावने ।
वित्रासिता मृगाः सिंहैः सहसा प्रद्रुता दिशः ॥ ८ ॥

सिंहैः वित्रासितानि सहसा दिशो विद्रावितानि गजयूथानि वा कारणानीति विपरिणामः; तथा महिषादयो वा कारणमिति विज्ञातुमर्हसि ॥ ८ ॥

---

* ततः—तेन—गो. † हन्तेति व्यग्रतायामव्ययम्—गो. ‡ सुमित्रा सुप्रजाः त्वया—त्वया सुमित्रा सत्पुत्रेति सान्त्वोक्तिः—गो.

[1] स्वयूथात्—च. [2] भीतान्—ङ. [3] महीस्तनित—ङ.

राजो वा *[1] राजमात्रो वा मृगयामटते वने ।
अन्यद्वा श्वापदं किञ्चित्, सौमित्रे! ज्ञातुमर्हसि ॥ ९ ॥

अथवा राजादिः मृगयामटते वेति ज्ञातुमर्हसि। तथाप्येवं वने शब्दो भवति किल! सिंहादि? अन्यद्वा श्वापददुष्टमृगं वा किञ्चित् वनं क्षोभयते? इति ज्ञातुमर्हसि ॥ ९ ॥

† सुदुश्चरो गिरिश्चायं पक्षिणामपि, लक्ष्मण!
सर्वमेतत् यथातत्त्वं अचिरात् ज्ञातुमर्हसि ॥ १० ॥

स लक्ष्मणः संत्वरितः सालमारुह्य पुष्पितम् ।
प्रेक्षमाणो दिशः सर्वाः पूर्वां दिशमुदैक्षत ॥ ११ ॥

सालः—वृक्षः ॥ ११ ॥

उदङ्मुखः प्रेक्षमाणः ददर्श महतीं चमूम् ।
रथाश्वगजसम्बाधां यत्तैर्युक्तां पदातिभिः ॥ १२ ॥

यत्तैः—सज्जैः ॥ १२ ॥

तामश्व[2]गजसंपूर्णां रथध्वजविभूषिताम् ।
शशंस सेनां रामाय वचनं चेदमब्रवीत् ॥ १३ ॥

सेनां शशंसेति। सेनामेव श्रुतशब्दकारणं उक्तवानित्यर्थः ॥

---

* राजमात्रः—राजतुल्यः—गो.　† अयं गिरिः पक्षिणामपि सुदुश्चरो वर्तते—पक्षिसञ्चारोऽपीदानीं नास्तीत्यर्थः—गो. नावत्रिबिडेऽस्मिन् गिरौ एतादृशमहाकोलाहलस्य कारणं ज्ञातुमर्हसीति वा तात्पर्यम् ।

[1] राजपुत्रो—च.　[2] रथ—च.

अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् ।
सज्यं कुरुष्व चापं च *शरांश्च कवचं तथा ॥१४॥

आर्यः अग्निं संशमयत्विति । क्षोभकालेऽग्निशमनव्यापारः गणकग्रामवासिभिः अस्माभिः भूयोऽनुभूतः । गुहां—अन्तर्गुहाम् । शरांश्च, गृहाणेति शेषः ॥ १४ ॥

†अङ्गावेक्षस्व, सौमित्रे! कस्येमां मन्यसे चमूम् ।

एवं युद्धसन्नाहवादिनं लक्ष्मणं रामो विमृश्यकारित्वादाह—अङ्गेत्यादि । यां एनां वनक्षोभहेतुभूतां चमूं मन्यसे—अवगच्छसि, इमां कस्येति वीक्षस्व ॥

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ।
‡दिधक्षन्निव तां सेनां रुषितः पावको यथा ॥ १५ ॥

रुषित इति कर्तरि निष्ठा ॥ १५ ॥

§संपन्नं राज्यमिच्छंस्तु व्यक्तं [1] प्राप्ताभिषेचनम् ।
आवां हन्तुं समायाति [2] कैकेय्या भरतः सुतः ॥ १६ ॥

प्राप्ताभिषेचनं—प्राप्तनिजाभिषेकं राज्यं संपन्नं—संसिद्धं कर्तुमिच्छन् भरत आयाति ॥ १६ ॥

---

* यद्वा—कुरुष्वेत्यनुषङ्गः । करोतेः क्रियासामान्यवाचित्वात् औचित्येन शरान् गृहाण, कवचं धारयेत्यर्थः-**गो.** †'अङ्ग' इति सम्बोधने । ‡ रुषितः सन् पावक इव दिधक्षन्नित्यन्वयः । § भरतः अभिषेचनं प्राप्य . . . . तावताऽप्यतृप्तः संपन्नं—समृद्धं, निष्कण्टकमिति यावत्, राज्यमिच्छन् सन्-**गो.**

[1] प्राप्या-**सर्वत्र.** [2] भरतः कैकयीसुतः-**ङ.**

*एष वै सुमहान् श्रीमान्[1] विटपी संप्रकाशते ।
विराज[2]त्युद्गतस्कन्धः† कोविदारध्वजो रथे[3] ॥ १७ ॥

कथमवगम्यतेऽसावित्यत्राह—एष वा इत्यादि । विटपः प्रकाशतां! किं तावता भरतनिश्चये? तत्राह—विराजतीत्यादि । न केवलं यः कश्चन विटपो भातीति मयोच्यते, अपि त्वस्मत्कुलचिह्नः कोविदारवान् ध्वजो रथे विराजतीत्येव मयोच्यते । अतो भरत इति निश्चीयते मयेत्यर्थः ॥ १७ ॥

भजन्ते हि यथाकामं अश्वानारुह्य शीघ्रगान् ।
एते भ्राजन्ति संहृष्टाः गजानारुह्य ‡सादिनः ॥ १८ ॥

हि—यस्मात् शीघ्रतरानश्वान् आरुह्य यथाकामं भजन्ते—आगच्छन्ति ॥ १८ ॥

गृहीतधनुषौ चावां §गिरिं, वीर! श्रयावहै ।
अथ वेहैव तिष्ठावः सन्नद्धावुद्यतायुधौ ॥ १९ ॥

अतः—गृहीतधनुषावित्यादि ॥ १९ ॥

---

* विटपी—ध्वजचिह्नभूतो वृक्षः प्रकाशते—स्पष्टं दृश्यते । तमेव विशिनष्टि—विराजतीति-गो. य एष वृक्षो महान् संप्रकाशते, तत्समीपे तं लक्षीकृत्य रथे कोविदार-ध्वजो विराजते-ति. † उद्गतस्कन्धत्वं लिखितवृक्षद्वारा-ती. गो. ‡ सादिनः—गजारोहाः-गो. अश्वारोहाः-ती. गृहीतसादिचिह्ना गजारोहाः-ति. 'सादी तुरङ्गमातङ्गरथारोहेषु दृश्यते' इति मेदिनी । § दुर्गे स्थित्वा युद्धार्थं गिरेः श्रयणम्-गो. उत्तरार्धपरिशीलने—यावच्छक्ति अपसर्पावः, गत्यन्तराभावे योत्स्यावः इति पूर्वार्धस्य, गत्यन्तराभावे कुतः, अत्रैव स्थित्वा योत्स्याव एव—इति उत्तरार्धस्य चाशयः स्यादिति भाति ।

[1] विटपीव प्रकाशते, विटपीव महाद्रुमः-ङ. [2] त्युज्ज्वल-च. [3] एतदनन्तरं—असौ हि सुमहास्कन्धः विटपी च महाद्रुमः । विराजते महासैन्ये कोविदारध्वजो रथे-इत्यधिकम्-ङ.

अपि मे वशमागच्छेत् कोविदारध्वजो रणे ।
अपि [1] द्रक्ष्यामि भरतं यत्कृते व्यसनं महत् ॥ २० ॥
त्वया, राघव! संप्राप्तं सीतया च मया तथा ।

'अपि मे' इत्यादावपिः कामप्रवेदने । कोविदारध्वजो रणे मे वशं आगच्छेदपि, सादिनश्च, शैलमुपाश्रयन्नपि भरतं द्रक्ष्याम्यपि, तदाऽसौ मे भरतः वध्य एव । कुत इत्यतः—यत्कृते व्यसनमित्यादि ॥ २० ॥

यन्निमित्तं भवान् राज्यात् च्युतः, राघव! शाश्वतात् ।
संप्राप्तोऽयमरिः, वीर! भरतो वध्य एव मे ॥ २१ ॥
भरतस्य वधे दोषं नाहं पश्यामि, राघव!
[2] पूर्वापकारिणां * त्यागे न ह्यधर्मो विधीयते ॥ २२ ॥

पूर्वापकारिणां त्याग इति । भ्रातॄणामिति शेषः ॥ २२ ॥

पूर्वापकारी भरतः † [3] त्यक्तधर्मश्च, राघव!
एतस्मिन् निहते कृत्स्नां अनुशाधि वसुन्धराम् ॥ २३ ॥
अद्य पुत्रं हतं सङ्ख्ये कैकेयी राज्यकामुका ।
‡ मया पश्येत् सुदुःखार्ता हस्तिभग्नमिव द्रुमम् ॥ २४ ॥

सङ्ख्ये—युद्धे, 'मृधमास्कन्दनं सङ्ख्यं' ॥ २४ ॥

कैकेयीं च वधिष्यामि सानुबन्धां सबान्धवाम् ।
कलुषेणाद्य महता मेदिनी परिमुच्यताम् ॥ २५ ॥

कलुषेण—पापेन ॥ २५ ॥

---

* त्यागे—वधे–गो. ति. † अपकारश्च न प्रामादिक इत्याह—त्यक्तधर्म इति–गो. इदानीमस्मद्वधार्थागमनमेव एतन्निरूपयतीति भावः । ‡ मया हतमित्यन्वयः ।

[1] द्रक्ष्याम–ङ. [2] पूर्वापकारिणं हत्वा–च. [3] त्यागे धर्मश्च–च.

अद्येमं *संयतं क्रोधं असत्कारं च, मानद!
मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् ॥ २६ ॥

असत्कारं च। कैकेयीकृतमिति शेषः ॥ २६ ॥

†अद्यैतच्चित्रकूटस्य काननं निशितैः शरैः।
[1]भिन्दन् शत्रुशरीराणि करिष्ये शोणितोक्षितम् ॥ २७ ॥
शरैर्निर्भिन्नहृदयान् कुञ्जरांस्तुरगांस्तथा।
श्वापदाः परिकर्षन्तु नरांश्च निहतान् मया ॥ २८ ॥
‡शराणां धनुषश्चाहं [2]अनृणोऽस्मि [3]महामृधे।
ससैन्यं भरतं हत्वा भविष्यामि न संशयः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे षण्णवतितमः सर्गः

हर(२८)मानः (?) सर्गः ॥ २९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे षण्णवतितमः सर्गः

---

* संयतं-एतावता कालेन नियमितं क्रोधं-अवमानं च। † शत्रुशरीराणि भिन्दन् काननं शोणितोक्षितं करिष्ये। ‡ अहं यतः पूर्वं तत्र तत्र युद्धे शराणां धनुषश्च विषये अनृणः-ऋणरहितः, शत्रुकलेबरादानेन परिहृतऋणः, स्वयं युद्धे क्वाप्यपराजितः शत्रुजयैकशील इत्यर्थः ; अतः, अस्मीति अहमित्यर्थेऽव्ययम : अस्मि--अहं महामृधे-भाविन्यपि युद्धे ससैन्यं भरतं हत्वा, अनृण इत्यनुकर्षः : अनृणो भविष्यामीत्यन्वयः। वनवासात पूर्वमपि शम्बरसुतजयादिप्रतिपादनात, तत्र लक्ष्मणस्यापि सहभावावश्यंभावात युद्धसंभवः। अस्मीति क्रियापदं वा। तदा, अभवमित्यर्थः-**गो.** 'शराणां धनुषश्चाहमनृणोऽस्मि' इति स्वजीवनध्येयं सामान्यरूपेणोक्तम। तादृशत्वादेव ससैन्यं भरतं हत्वा अनृणो भविष्यामि इत्यर्थः। 'अनृणोऽस्मिन्' इति पाठे—अस्मिन्-सन्निहिते महामृधे-महायुद्धे ससैन्यं भरतं हत्वा शराणां धनुषश्चाहं अनृणो भविष्यामि-एतावता धृतानां धनुरादीनां सार्थक्यं सम्पादयामीति भावः।

[1] छिन्दन्-**च.**　[2] अनृणोऽस्मिन्-**ङ. च.**　[3] महावने-**च.**

सप्तनवतितमः सर्गः

[भरतप्रशंसा]

*सुसंरब्धं तु [1]सौमित्रिं लक्ष्मणं क्रोधमूर्छितम् ।
रामस्तु परिसान्त्व्याथ वचनं चेदमब्रवीत् ॥ १ ॥

एवं कुपितो लक्ष्मणः सर्वभूतभावाभिज्ञेन भगवता रामेण भरतागमनप्रयोजनकथनेन निवृत्तरोषः क्रियते । सुसंरब्धमित्यादि । सुतरां संरम्भवन्तं–युद्धोद्योगवन्तम् ॥ १ ॥

किमत्र धनुषा कार्यं असिना वा †सचर्मणा ।
[2]महेष्वासे महाप्राज्ञे भरते स्वयमागते ॥ २ ॥

किमत्रेति । भरतविषय इत्यर्थः ॥ २ ॥

‡पितुः सत्यं प्रतिश्रुत्य, हत्वा भरत[3]मागतम् ।
किं करिष्यामि राज्येन सापवादेन, लक्ष्मण! ॥ ३ ॥

सापवादेनेति । 'पित्रा दत्तं राज्यं भरतस्य रामो न पालितवान्' इत्येवंरूपापवादेनेत्यर्थः ॥ ३ ॥

यद्द्रव्यं बान्धवानां वा मित्राणां वा §क्षये भवेत् ।
नाहं तत् प्रतिगृह्णीयां भक्षान् विषकृतानिव ॥ ४ ॥

क्षय इति । कृत इति शेषः ॥ ४ ॥

---

* भरतं प्रति सुसंरब्धं–ति. पूर्वं तु सुसंरब्धं–सुतरां प्रीतं, 'संरंभः प्रणयेऽपि च'; अद्य तु तद्वैलक्षण्येन क्रोधमूर्छितम् । यद्वा क्रोधमूर्छितत्वादेव सुसंरब्धं–क्रोधकार्ययुद्धोन्मुख्यवन्तम् । तत्र हेतुः सपत्नीपुत्रत्वमित्याह–सौमित्रिमिति । यद्वा सुमित्रापुत्रत्वस्मारणपूर्वकमुक्तवानिति द्योत्यते–गो. अथवा–सुमित्रया 'रामं दशरथं विद्धि' इत्युक्तत्वात् रामरक्षणपरमित्यर्थः । † परप्रतिघातरक्षकं वामहस्ते धार्यमाणं चर्म । ‡ भरताय राज्यदानस्य पित्रैव अंगीकृतत्वात्, कथं तद्वधः–इति भावः । § क्षये सति–इति वाऽर्थः ।

[1] भरतं–च. [2] महाबले महोत्साहे–च. [3] माहवे–च.

धर्म*मर्थं च कामं च पृथिवीं चापि, लक्ष्मण !
इच्छामि भवतामर्थे एतत् प्रतिशृणोमि ते ॥ ५ ॥

†भ्रातॄणां संग्रहार्थं च सुखार्थं चापि, लक्ष्मण !
राज्यमप्यहमिच्छामि सत्येनायुधमालभे ॥ ६ ॥

आयुधमालभ इति । आयुधं स्पृष्ट्वा शपे । सत्यं करोमीत्यर्थः ॥ ६ ॥

[1]नेयं मम मही, सौम्य ! [2]दुर्लभा सागराम्बरा ।
न हीच्छेयमधर्मेण शक्रत्वमपि, लक्ष्मण ! ॥ ७ ॥

नेयमिति । इयं मह्येव केवलं अधर्मेण न—अपेक्षितेति न, अपि तु—न हीत्यादि ॥ ७ ॥

‡यद्विना भरतं त्वां च शत्रुघ्नं चापि, [3]मानद !
भवेन्मम सुखं किञ्चित् भस्म तत् कुरुतां शिखी ॥ ८ ॥

§मन्येऽहमागतोऽयोध्यां भरतो भ्रातृवत्सलः ।
मम [4]प्राणात् प्रियतरः कुलधर्ममनुस्मरन् ॥ ९ ॥

मन्येऽहमित्यादि । द्रष्टुमभ्यागत इति मन्य इति योजना । कुलधर्म—ज्येष्ठस्य राज्यमित्येवंरूपम् ॥ ९ ॥

---

* अर्थं—पृथिवीभिन्नं रत्नादिकं-गो. † तमेवार्थं शपथेन द्रढयति—भ्रातृणामिति । संग्रहार्थं—सम्यक् पालनार्थं, अत एव तेषां सुखार्थं च-ति. ‡ भरतादीन् विना मम किञ्चित्सुखं भवेच्चेत्, तत् शिखी नाशयतु । § श्लोकत्रयमेकं वाक्यम् । अयोध्यामागतो भरतः त्वया सीतया च सह मां प्रव्राजितं श्रुत्वा, कुलधर्ममनुस्मरन्, स्नेहेनाक्रान्तहृदयः मां द्रष्टुमभ्यागत इति मन्ये—इत्यन्वयः ।

[1] एवं-ङ.　[2] सकला-ङ.　[3] राघव-ङ.　[4] प्राणैः-च.

श्रुत्वा प्रव्राजितं मां हि जटावल्कलधारिणम् ।
जानक्या सहितं वीर! त्वया च, [1]पुरुषर्षभ! ॥ १० ॥

स्नेहेनाक्रान्तहृदयः शोकेनाकुलितेन्द्रियः ।
द्रष्टुमभ्यागतो ह्येषः *भरतो नान्यथाऽऽगतः ॥ ११ ॥

अम्बां च कैकयीं [2]रुष्य [3]परुषं चाप्रियं वदन् ।
प्रसाद्य पितरं श्रीमान् राज्यं मे दातुमागतः ॥ १२ ॥

कैकयीं रुष्येति। रोषं कृत्वेति यावत्। पितरं प्रसाद्येति। 'त्वया सत्यपरिपालनवशात् मयि प्राप्तं राज्यं मयैव रामाय दीयते, अतो न ते सत्यभ्रंशदोषः, अतो मत्कर्तृकं दानमनुमन्यस्व' इति प्रसाद्येत्यर्थः ॥

†प्राप्तकालं यदेषोऽस्मान् भरतो [4]द्रष्टुमिच्छति ।
अस्मासु मनसाऽप्येषः [5]नाप्रियं किञ्चिदाचरेत् ॥ १३ ॥

विप्रियं कृतपूर्वं ते भरतेन कदा नु किम्?
‡ईदृशं वा भयं तेऽद्य भरतं [6]योऽत्र शङ्कसे ॥ १४ ॥

ते—तुभ्यमपि वेत्यर्थः। ईदृशमित्यादि। यस्त्वमद्य भरतं शङ्कसे, तस्य ते ईदृशं वा भयं; कुत इति शेषः ॥ १४ ॥

§न हि ते निष्ठुरं वाच्यः [7]भरतेनाप्रियं कृतम् ।
अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते ॥ १५ ॥

---

* वाक्यस्य दीर्घत्वात् लोक इव भरत इति पुनर्निर्देशः। † प्राप्तकालं—उचितम्-ति. ‡ ईदृशं भयं वा—त्वदुक्तसदृशं भयजनकवाक्यं वा कृतपूर्वं किं—उक्तपूर्वं किम ?–गो. § ते—त्वया भरतः अप्रियं निष्ठुरं वचः न वाच्यः–गो.

[1] पुरुषोत्तम–च. [2] रोषात्–ङ. [3] भरतश्चाप्रियं–च. [4] द्रष्टुमर्हति–च. [5] नाहितं–चं. [6] यद्विशङ्कसे–च. [7] भरतो नाप्रियं वचः–ङ. च.

न हि त इति। 'कृत्यानां कर्तरि वा' इति षष्ठी। त्वया अयं भरतः न निष्ठुरं वाच्यः। कुत इत्यतः —*न हि भरतेनाप्रियं कृतम्। अहं हीति। भरतस्य अतः परं अप्रिये—अप्रियवचने कृते अहं ह्यप्रियमुक्तः स्यां त्वया ॥ १५ ॥

†कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि।
भ्राता वा भ्रातरं हन्यात्, सौमित्रे! प्राणमात्मनः ॥१६॥

आत्मनः प्राणं—प्राणसमं भ्रातरमित्यन्वयः ॥ १६ ॥

यदि राज्यस्य हेतोस्त्वं इमां वाचं प्रभाषसे।
वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥ १७ ॥

इमां वाचमिति। भरतवधवाचमित्यर्थः। अस्मै प्रदीयतां— अस्मै लक्ष्मणाय प्रदीयतामिति वक्ष्यामि ॥ १७ ॥

‡उच्यमानोऽपि भरतः मया, लक्ष्मण! [1]तत्त्वतः।
राज्यमस्मै प्रयच्छेति बाढमित्येव [2]वक्ष्यति ॥ १८ ॥

वचनमात्रेण किं प्रयोजनम्? स तु न दद्यादित्यत्राह— उच्यमान इत्यादि। प्रयच्छेत्युच्यमान इति योजना ॥ १८ ॥

---

* नञः अनुकर्ष इति भावः। † पूर्वं दशरथो वध्यतां (वध्यतां वध्यतामपि— अयो. 21-12) इत्युक्तम्, इदानीं भरतो वध्यत इति। इत उपरि तूष्णीमवस्थाने कार्यहानिः भविष्यतीति भयात् तां रौद्रीं बुद्धिं नियम्य निवर्तयति— कथं न्वित्यादिना। प्राणं—प्राणभूतम्—गो. ‡ उच्यमानोऽपि—अहृदयमुक्तोऽपि तत्त्वतः बाढमिति वक्ष्यत्येव—गो.

[1] तद्वचः—च. [2] मंस्यते—च.

तथोक्तो धर्मशीलेन भ्रात्रा * तस्य हिते रतः ।
लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥ १९ ॥

तथोक्त इति । राज्यलिप्सा चेत् ते राज्यमेव दापयिष्यामि, किं ते भ्रातृवधेनेत्युक्त इत्यर्थः । तस्य हित इति । रामस्य हित इत्यर्थः । लज्जया स्वानि गात्राणि प्रविवेशेवेति । किमुक्तं धर्मैकप्रतिष्ठितभ्रात्रभिप्रायमविजानता मयेति लज्जया सङ्कुचितबहिरन्तः-करणव्यापारो बभूवेत्यर्थः ॥ १९ ॥

† तद्वाक्यं लक्ष्मणः श्रुत्वा व्रीडितः प्रत्युवाच ह ।
त्वां मन्ये द्रष्टुमायातः पिता दशरथः स्वयम् ॥ २० ॥

एवमनुचितवादव्रीडापरिहाराय उचितमेव वादमाह लक्ष्मणः-- तद्वाक्यमित्यादि । पिता दशरथ एव त्वां द्रष्टुं स्वयमायात इति मन्ये । कोविदारध्वजेन प्रियभरतप्रसङ्गस्तु त्वदाशयपरिज्ञानायैव केवलमुपन्यस्तः इत्यर्थः ॥ २० ॥

‡ व्रीडितं लक्ष्मणं दृष्ट्वा [1] राघवः प्रत्युवाच ह ।
एष मन्ये महाबाहुः इहास्मान् द्रष्टुमागतः ॥ २१ ॥

एवं पितृप्रसङ्गः लक्ष्मणस्य व्रीलापरिहारमूल इति ज्ञात्वा तदेवानुकुर्वन्नाहेत्याह--व्रीलितमित्यादि । एष इति । लक्ष्मण-प्रस्तावमनुयायी पितेत्यर्थः ॥ २१ ॥

---

* भरतवधं यस्य हितं मेने, तेनैव रामेण भरतमधिकृत्य एवमुक्तत्वात् लक्ष्मणोऽतीव लज्जितो बभूव । † व्रीडया प्रसङ्गान्तरं प्रस्तौति—त्वामिति । लोके स्वोक्तिभङ्गेन व्रीडितः पुरुषः प्रस्तावान्तरं हि वदति—गो. ‡ भावज्ञो रामोऽपि औचित्येन लक्ष्मणकृत-प्रस्तावं व्रीडाशमनाय प्रपञ्चयामासेत्याह—व्रीडितमिति -गो.

[1] भावज्ञः-ङ.

अथवा *नौ ध्रुवं मन्ये मन्यमानः सुखोचितौ ।
वनवासमनुध्याय गृहाय प्रतिनेष्यति ॥ २२ ॥

अनुध्याय—अनुचिन्त्य ॥ २२ ॥

इमां वाऽप्येष वैदेहीं †अत्यन्तसुखसेविनीम् ।
पिता [1] मे राघवः श्रीमान् वनादादाय यास्यति ॥ २३ ॥

इमां वा आदायेत्यन्वयः ॥ २३ ॥

एतौ तौ संप्रकाशेते [2] ‡गात्रवन्तौ [3] मनोजवौ ।
वायुवेगसमौ, [4] वीर! जवनौ तुरगोत्तमौ ॥ २४ ॥

गात्रवन्तौ—प्रशस्तगात्रयुक्तौ। जवनौ, पामादित्वात् नः। अत एव मनोजवावित्यादि। तुरगोत्तमाविति। राजैपवाह्यावित्यर्थः॥

स एष सुमहाकायः कम्पते वाहिनीमुखे ।
नागः शत्रुञ्जयो नाम §वृद्धस्तातस्य धीमतः ॥ २५ ॥

पितुरागमनचिह्नान्तरमप्याह—स एष इत्यादि। कम्पते—चलति, आगच्छतीति यावत्। वृद्धः—वयसा आकारबलाभ्यां चेत्यर्थः ॥ २५ ॥

---

*नाविति द्विवचनं प्राधान्यात्-गो. नौ सुखोचितौ मन्यमानः—स्मरन् गृहाय ध्रुवं प्रतिनेष्यतीति मन्ये। †अत्यन्तेत्यनेन तन्मात्रनयने हेतुरुक्तः-गो. ‡गोत्रवन्तौ—प्रशस्तनामानौ। यद्वा प्रशस्तकुलप्रसूतौ-गो. §वृद्धः—उन्नतः। धीमतः—गजपरिपालनज्ञस्य तातस्य नागः शत्रुञ्जयः; न तु मया सुयज्ञाय दत्तः मातुलाल्लब्धः शत्रुंजय इत्यर्थः-गो.

[1] दशरथः-ङ. [2] गोत्रवन्तौ-ङ. [3] मनोरमौ-ङ. [4] वीरौ-च.

न तु पश्यामि तच्छत्रं पाण्डुरं लोकसत्कृतम् ।
पितुर्दिव्यं, [1] महाबाहो! संशयो भवतीव मे ॥ २६ ॥

इह मे संशयो भवति—छत्रस्यादर्शनात् दशरथागमविषये संशयो जायत इत्यर्थः ॥ २६ ॥

[2] इतीव रामो धर्मात्मा सौमित्रिं तमुवाच ह ।
वृक्षाग्रादवरोह त्वं कुरु, लक्ष्मण! मद्वचः * ॥ २७ ॥

इतीव—इत्येव तं–वृक्षाग्रस्थितं सौमित्रिं उवाच । अथ वृक्षाग्रादवरोहणमाज्ञापयति—वृक्षाग्रादित्यादि । मद्वचः कुर्विति । शङ्कां विहाय मदुच्यमानं सालावरोहणं कुर्वित्यर्थः ॥ २७ ॥

अवतीर्य तु सालाग्रात् तस्मात् स समितिञ्जयः ।
लक्ष्मणः प्राञ्जलिर्भूत्वा तस्थौ रामस्य †पार्श्वतः ॥ २८ ॥

स एवं प्राप्ताज्ञः लक्ष्मणः अवतीर्य रामस्य पार्श्वे तस्थौ ॥२८॥

‡ भरतेनापि सन्दिष्टा सम्मर्दो न भवेदिति ।
समन्तात्तस्य शैलस्य सेना वासमकल्पयत् ॥ २९ ॥

सम्मर्दो न भवेदिति । रामाश्रमस्येति शेषः ॥ २९ ॥

अध्यर्धमिक्ष्वाकुचमूः योजनं पर्वतस्य सा ।
पार्श्वे न्यविशदावृत्य गजवाजि[3]रथाकुला ॥ ३० ॥

अधिकं अर्धं यस्मिन् तत् अध्यर्धं, सार्धयोजनमित्यर्थः ॥

---

* न तु धनुरादिग्रहणं कुर्वित्यर्थः । † पार्श्वतः, भ्रातर्यस्थाने भयशङ्कयेति भावः–गो. लज्जावहं वाक्यमुक्तवत्यपि रामे सौहार्दाच्च तथा । ‡ एवं रामलक्ष्मणयोरवस्थितिमुक्त्वा भरतप्रवृत्तिमाह—भरतेनापीति ।

[1] महाभाग–च. [2] अत्र पूर्वोत्तरार्धयोः वैपरीत्यं प्रायः सर्वत्र दृश्यते । [3] नराकुला–च.

*सा चित्रकूटे[1] भरतेन सेना
　　धर्मं पुरस्कृत्य विधूय दर्पम् ।
प्रसादनार्थं रघुनन्दनस्य
　　विराजते नीतिमता प्रणीता ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे सप्तनवतितमः सर्गः

प्रणीता—शिक्षितेति यावत् ।　योग(३१)मानः सर्गः ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे सप्तनवतितमः सर्गः

अष्टनवतितमः सर्गः

[रामाश्रमदर्शनम्]

निवेश्य सेनां तु विभुः पद्भ्यां पादवतां वरः ।
अभिगन्तुं स काकुत्स्थं इयेष †[2] गुरुवर्तकम् ॥ १ ॥

अथ भरतस्य रामाश्रमसमीपगमनम् । पादवतामिति । चरप्राणिनामित्यर्थः । गुरुवर्तकं—मातापित्राचार्यशुश्रूषकम् ॥ १ ॥

---

* भरतेन धर्मं पुरस्कृत्य—विनीतवेषेण राजाऽभिगन्तव्य इति धर्ममनुसृत्य दर्पं विधूय स्थितेन रघुनन्दनस्य प्रसादनार्थं प्रणीता—आनीता–गो. दर्पं विधूय धर्मं पुरस्कृत्य प्रसादनार्थं—इति वाऽन्वयः । एतेन भरतविनयातिशय उक्तो भवति । स्वयंप्राप्तराज्यः, राज्यभ्रष्टं भ्रातरं दैन्यदयादिभिर्यथोपसर्पेत्, न तथा भरतः उपससर्पेति तात्पर्यम् । अत एवानन्तरसर्गे 'भर्तारं सागरान्तायाः पृथिव्याः' (11) इत्युक्तिरपि।

† गुरुवर्तकं—गुरुवचनानुवर्तकम्–गो. अथवा–विभुस्सन्नपि पद्भ्यां अभिगन्तुमियेषेत्यत्र हेतुः—गुरुवर्तकमिति । वर्तकमिति कर्तरि ण्वुल्, गुरुरिव वर्तमानमिति यावत् ।

[1] भरतस्य–ङ.　　[2] गुरुवर्तकः–ङ.

निविष्टमात्रे सैन्ये तु यथोद्देशं विनीतवत् ।
भरतो भ्रातरं वाक्यं शत्रुघ्नमिदमब्रवीत् ॥ २ ॥

यथोद्देशं—शिबिरसन्निवेशे अमुकस्य अमुकदिग्भाग इति स्वाम्युद्दिष्टप्रदेशमनतिक्रम्येत्यर्थः । विनीतवत्—विनीतः सन् ॥ २ ॥

क्षिप्रं वनमिदं, सौम्य ! नरसङ्घैः समन्ततः ।
लुब्धैश्च सहितैरेभिः त्वमन्वेषितुमर्हसि ॥ ३ ॥

लुब्धाः—निषादाः । एभिरिति । गुहभृत्यैः आसन्नैः सहेत्यर्थः ॥

गुहो ज्ञातिसहस्रेण शरचापासि[1]धारिणा ।
समन्वेषतु [2]काकुत्स्थौ अस्मिन् परिवृतः स्वयम् ॥ ४ ॥

ज्ञातिसहस्रेण परिवृत इत्यन्वयः ॥ ४ ॥

अमात्यैः सह पौरैश्च गुरुभिश्च द्विजातिभिः ।
वनं सर्वं चरिष्यामि पद्भ्यां परिवृतः स्वयम् ॥ ५ ॥

पौरैः—पुरप्रधानकुटुम्बिभिरित्यर्थः । चरिष्यामि, अहमपीति शेषः॥

यावन्न रामं [3]द्रक्ष्यामि लक्ष्मणं वा महाबलम् ।
वैदेहीं वा महाभागां न मे शान्तिर्भविष्यति ॥ ६ ॥
यावन्न चन्द्रसङ्काशं द्रक्ष्यामि [4]च शुभाननम् ।
भ्रातुः *[5]पद्मपलाशाक्षं न मे शान्तिर्भविष्यति ॥ ७ ॥

शुभाननमिति कर्मधारयः ॥ ७ ॥

यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ ।
शिरसा [6]धारयिष्यामि न मे शान्तिर्भविष्यति ॥ ८ ॥

---

* पद्मपलाशाक्षं—पद्मदलाक्षम्, आननविशेषणमिदम् ।

[1] पाणिना—च. [2] काकुत्स्थं—ङ. [3] पश्यामि—ङ. [4] शुभमाननम्—ङ [5] पद्मविशालाक्षं—च. [6] प्रग्रहीष्यामि—च

पार्थिवव्यञ्जनं—रेखाध्वजकुलिशातपत्रादि ॥ ८ ॥

यावन्न राज्यं राज्यार्हः * पितृपैतामहे स्थितः ।
[1] अभिषेकजलक्लिन्नः न मे शान्तिर्भविष्यति ॥ ९ ॥
[2] सिद्धार्थः खलु सौमित्रिः यश्चन्द्रविमलोपमम् ।
मुखं पश्यति रामस्य राजीवाक्षं महाद्युति ॥ १० ॥

चन्द्रविमलोपमं—विशेष्यपूर्वनिपात आर्षः, विमलचन्द्रोपममिति यावत् ॥ १० ॥

कृतकृत्या महाभागा वैदेही जनकात्मजा ।
भर्तारं सागरान्तायाः पृथिव्याः याऽनुगच्छति ॥ ११ ॥
[3] सुभगश्चित्रकूटोऽसौ गिरिराजोपमो गिरिः ।
यस्मिन् वसति काकुत्स्थः कुबेर इव नन्दने ॥ १२ ॥

गिरिराजः—हिमवान् ॥ १२ ॥

कृतकार्यमिदं दुर्गं वनं व्यालनिषेवितम् ।
यदध्यास्ते [4] महातेजाः रामः शस्त्रभृतां वरः ॥ १३ ॥

कृतकार्यं–कृतार्थम् । दुर्गं–दुष्प्रवेशम् । व्यालः–सर्पः । यत्–यस्मात् ॥ १३ ॥

एवमुक्त्वा महातेजाः भरतः पुरुषर्षभः ।
पद्भ्यामेव महाबाहुः प्रविवेश महद्वनम् ॥ १४ ॥

---

* पितृपैतामहे मार्गे स्थितः, अत एव राज्यार्हः, अतश्च अभिषेकजलक्लिन्नः यावन्न राज्यं, लभत इति शेषः ।

[1] अभिषिक्तो–च. [2] अयं श्लोकः च पुस्तके 'यावन्न चरणौ' इति श्लोकात् पूर्वं दृश्यते । [3] सुशुभ–च. [4] महाराजः–च.

स तानि द्रुमजालानि जातानि गिरिसानुषु ।
पुष्पिताग्राणि मध्येन जगाम वदतां वरः ॥ १५ ॥

मध्येनेति । दिक्छब्दत्वात् एनप्, तद्योगे 'तानि' इत्यादि-द्वितीया, द्रुमजालानां मध्य इत्यर्थः ॥ १५ ॥

स गिरेश्चित्रकूटस्य [1] सालमासाद्य पुष्पितम् ।
*रामाश्रम[2]गतस्यान्ते ददर्श [3] ध्वजमुच्छ्रितम् ॥ १६ ॥

चित्रकूटस्य गिरेः सालं वृक्षमासाद्य आश्रमगतस्य तस्य सालस्य अन्ते—उपरि प्रतिष्ठापितं उच्छ्रूतं ध्वजं ददर्श । एवं 'रामाश्रमगतस्यान्ते' इति पाङ्क्ते पाठे योजनाऽशक्त्या 'रामाश्रम-गतस्याग्नेः' इति पठित्वा यथेष्टं योजयत्यन्यः † । धूमस्तु पूर्वमेव दृष्टः ॥

तं दृष्ट्वा भरतः श्रीमान् ‡[4] मुमोह सहबान्धवः ।
§ अत्र राम इति ज्ञात्वा गतः [5] पारमिवांहसः ॥ १७ ॥

---

* पवित्रस्थलसूचनार्थं तत्रत्योन्नतवृक्षेषु ध्वजारोपणं इदानीमपि कुत्रचिद्देशेषु दृश्यते । गोविन्दराजस्तु 'रामाश्रमगतस्याग्नेः ददर्श ध्वजमुच्छ्रितम्' इति पाठमादृत्य—'अग्नेः ध्वजः—धूमः । पूर्वं धूमाग्रदर्शनम्, अधुना तु समीपत्वात् तन्मूलदर्शनमिति न पुनरुक्तिः' इति व्याचख्यौ ॥ † महेश्वरतीर्थः, गोविन्दराजो वा । ‡ मुमोह—मोहसदृशं पारवश्यं प्राप, मुमोदेति च पाठः-गो. § यद्यपि नाद्यापि पर्णशालादर्शनम्, तत्तु अनन्तरसर्ग एव (4) वक्ष्यते ; अथापि 93 सर्गे "ते समालोक्य धूमाग्रं ऊचुर्भरतमागताः । नामनुष्ये भवत्यग्निः व्यक्तमत्र तपस्विनौ । अथ नात्र नरव्याघ्रौ राजपुत्रौ परंतपौ । मन्ये रामोपमाः सन्ति व्यक्तमत्र तपस्विनः" इति श्लोकयोः, अत्रत्यस्य "स गिरेः चित्रकूटस्य सालमासाद्य पुष्पितम् । रामाश्रमगतस्याग्नेः ददर्श ध्वजमुच्छ्रितम्' इति श्लोकस्य च परिशीलने—पूर्वं रामान्वेषणाय गताः भटाः दूरात् धूमाग्रं वीक्ष्य सामान्याकारण तापससान्निध्यं ज्ञात्वाऽगत्य भरतायोक्तवन्तः, न तु भरतः धूमाग्रादिकं तदा दृष्टवान् । ततः स्वयं प्रस्थायागतो भरतः दूरात् सामान्याकारेणाश्रमं—तत्समीपे धूमं च पश्यन्—रामलक्ष्मण-स्वभावचेष्टिताद्यभिज्ञः, भरद्वाजोक्तलक्षणसंवादाच्च तं धूमं रामाश्रमगतं मने इति ज्ञायते । अत एव अनन्तरसर्गे 'मन्ये प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत्' (9) इति च वक्ष्यति ॥

[1] सालमारुह्य—च. [2] गतस्याग्नेः—ङ. च. झ. [3] ध्वजमुत्तमम्—ङ. मुमोद—च. [5] पारमिवाम्भसः—ङ. च. झ.

तं दृष्ट्वेति । कुलचिह्नकोविदारध्वजं दृष्ट्वेत्यर्थः । अंहसः—पापस्य, अपराधस्य मातृकृतस्य चेत्यर्थः ॥ १७ ॥

स चित्रकूटे तु गिरौ निशम्य
रामाश्रमं पुण्यजनोपपन्नम् ।
गुहेन सार्धं त्वरितो जगाम
पुनर्निवेश्यैव चमूं महात्मा ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे अष्टनवतितमः सर्गः

पुण्याश्च ते जनाः, तपस्विन इति यावत् । पुनश्च चमूं निवेश्येति । अन्वेषणनियोजितनिषादचमूमित्यर्थः । जय(१८)मानः सर्गः ॥ १८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे अष्टनवतितमः सर्गः

एकोनशततमः सर्गः

[रामसंगमः]

निविष्टायां तु सेनायां उत्सुको भरतस्तदा ।
जगाम भ्रातरं द्रष्टुं शत्रुघ्नमनुदर्शयन् ॥ १ ॥

अथ भरतस्य रामदर्शनम् । निविष्टायामित्यादि । शत्रुघ्नमनुदर्शयन्निति । 'अनुर्लक्षणे' इति अनुः कर्मप्रवचनीयः; शत्रुघ्नस्य रामाश्रमप्रत्यासत्तिचिह्नानि दर्शयन्नित्यर्थः ॥ १ ॥

ऋषिं वसिष्ठं संदिश्य मातॄर्मे शीघ्रमानय ।
*इति त्वरितमग्रे सः जगाम[1]गुरुवत्सलः ॥ २ ॥

---

* अनेन 'रामावासं निश्चित्य पश्चादानेष्यामि' इति धिया महासेनानिवेशे मातॄर्निवेशितवानिति गम्यते—गो.

[1] भ्रातृवत्सलः—ङ.

आनयेति संदिश्य स्वयं त्वरितः सन् अग्रे मार्गे जगाम; न तु मातृः प्रतीक्ष्य स्थित इत्यर्थः ॥ २ ॥

गच्छन्नेव महाबाहुः द्युतिमान् भरतस्तदा ।
शत्रुघ्नं चाब्रवीत् हृष्टः *तानमात्यांश्च सर्वशः ॥ ३ ॥

एवं त्वरितो गच्छन्नेव शत्रुघ्नादीनब्रवीदिति । एवमेव समीचीने पाङ्क्ते क्रमे स्थिते 'सुमन्त्रस्त्वपि' इत्यादिपञ्चश्लोक्यनन्तरं 'गच्छन्नेवाथ' इत्यादिश्लोकद्वयं, अस्य पूर्वं पाठः प्रामादिक इत्यन्यः†। एवं क्रम एवासङ्गतः । 'करीषैः शीतकारणात्' इत्यनन्तरं पुनरपि आश्रमचिह्नस्यैव 'उच्चैर्बद्धानि चीराणि' इत्यादेर्वक्तव्यत्वात् । सर्वश इति स्वार्थमात्रे शस्--सर्वानिति यावत् ॥ ३ ॥

मन्ये [1]प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् ।
नातिदूरे हि मन्येऽहं नदीं मन्दाकिनीमितः ॥ ४ ॥

---

* अमात्यान्— सुमन्त्रं, बहुवचनं पूजार्थम् । यद्वा अनेनैवावगम्यते अन्येऽप्यमात्याः सुमन्त्रेण सहागता इति–गो. † गोविन्दराजः, महेश्वरतीर्थो वा । कतकरीत्या व्याख्याने इदं चिन्त्यम्—'शत्रुघ्नं चाब्रवीत्' (3) इति अत्र स्थितेः 'मन्ये प्राप्ताः स्म' इत्येकं श्लोकं भरतवचनम्, 'गच्छन्नेवाथ' (6) इत्यादिश्लोकचतुष्टयं तु कविवाक्यमेव । 'उच्चैर्बद्धानि' (9) इत्यादिश्लोकचतुष्टयं तु पुनः भरतवचनम् । ततः 'अथ गत्वा' इत्येकं श्लोकं कविवचनम् । ततः पुनः भरतवचनम् । एवं सति यथा अत्र 'शत्रुघ्नं चाब्रवीत्' (3) इति, तत्र 'तं जनं चेदमब्रवीत्' (14) इति च दृश्यते, न तथा 'उच्चैर्बद्धानि चीराणि' (10) इत्यस्य पूर्वं दृश्यते । तत एतद्व्याख्याने वाक्यविच्छेद एव स्यात् । अतः गोविन्दराजादिसम्मतः क्रम एव युक्तः प्रतिभाति । तत्र च 'सुमन्त्रस्त्वपि' (3) इत्यनन्तरं 'गच्छन्नेवाथ' (4) इत्यारभ्य 'करीषैः शीतकारणात्' (7) इत्यन्तं भरतदर्शनानुवादः कवेः । 'उच्चैर्बद्धानि' (10) इत्यादिकं तु साक्षात् भरतवाक्यम् । नानयोः एकवाक्यतेति 'गच्छन्नेव' (8) 'मन्ये प्राप्ताः स्म' (9) इति मध्यगतश्लोकाभ्यां न रामाश्रमवर्णनक्रमविच्छेदप्रसक्तिरिति ज्ञेयम् ॥

[1] प्राप्तोऽस्मि–ङ.

सुमन्त्रस्त्वपि शत्रुघ्नमदूरादन्वपद्यत ।
[1]रामदर्शनजस्तर्षः भरतस्येव तस्य च ॥ ५ ॥

सुमन्त्रस्त्वपि त्वरया गच्छद्भरतानुधावच्छत्रुघ्नं दूरादपरित्यज्य अन्वपद्यत—अनुधावति स्म । भरतवदस्यापि सुमन्त्रस्य रामदर्शनहेतुः अविशिष्ट इत्याह—रामदर्शनेत्यादि ॥ ५ ॥

गच्छन्नेवाथ भरतः तापसालयसंस्थिताम् ।
*भ्रातुः पर्णकुटीं श्रीमान् उटजं च ददर्श ह ॥ ६ ॥

तापसानामालयैः सह संस्थिता तथा। पर्णकुटी—पर्णप्राधान्येन निर्मिता कुटी—शाला तथा ; इयं दर्शनप्रयोजनागततपस्व्यादिसंव्यवहारप्रयोजना उटजात् बहिः प्रतिष्ठापिता । उटजमिति । सभित्तिकवाटं सदारुबन्धगृहं सीतानिवासप्रयोजनं तत् प्रागुक्तं 'सीता गुहां भजताम्' इति ॥ ६ ॥

शालायास्त्वग्रतस्तस्याः ददर्श भरतस्तदा ।
काष्ठानि चावभग्नानि [2]पुष्पाण्यपचितानि च ॥ ७ ॥

तस्या बहिष्ठपर्णशालाया अग्रतः काष्ठानि च ददर्शेत्यन्वयः । अवभग्नानीति । होमार्थमिति शेषः ॥ ७ ॥

सलक्ष्मणस्य रामस्य ददर्शाश्रम[3]मेयुपः† ।
कृतं वृक्षेष्वभिज्ञानं कुशचीरैः क्वचित् क्वचित् ॥ ८ ॥

---

* पर्णकुटीं—अग्न्यगारभूतां पर्णशालां, उटजं—दिदृक्षया समागतैः तापसैः सह सुखावस्थानार्थमुपकल्पितां पर्णशालाम् । यद्वा—भ्रातुः पर्णकुटीं—सीतया सह शयनार्थं निर्मितां पर्णशालां, उटजं—दिवाऽवस्थानार्थं कल्पितं पर्णमण्डपम् । यद्वा—पर्णशालां—महाशालां, उटजं—तन्मध्यवर्तिसुखावस्थानास्थानम् ; तथैव वक्ष्यति—'ददर्श महतीं' (18) इत्यादिना—गो. † ईयुषः—जलाशयादाश्रमं गच्छतो रामस्य, कुशादिभिः कृतं अभिज्ञानं—चिह्नं, अन्योन्यस्य गमनागमनपरिज्ञानार्थं कृतं—गो. मार्गपरिज्ञानार्थं—ति.

[1] रामदर्शनजो हर्षः—ङ. [2] पुष्पाण्युपचितानि—ङ. [3] मीयुषः—ङ

पृषुषः, आङ्पूर्वादिणः क्सुः । कुशचीरैः वृक्षेषु कृतं—अवसज्जनकृतं अभिज्ञानं ददर्श ॥ ८ ॥

ददर्श च वने तस्मिन् महतः सञ्चयान् कृतान् ।
मृगाणां महिषाणां च करीषैः *शीतकारणात् ॥ ९ ॥

मृगादीनां करीषैः कृतान् सञ्चयान् ददर्श । किमर्था इत्यतः—शीतकारणात्—शीतपरिहारहेतोरित्यर्थः ॥ ९ ॥

उच्चैर्बद्धानि चीराणि † लक्ष्मणेन भवेदयम् ।
अभिज्ञानकृतः पन्था विकाले गन्तुमिच्छता ॥ १० ॥

उच्चैरित्यादि । विकाले—मार्गस्य स्पष्टदर्शनायोग्यकाले जलाहरणादिकिञ्चित्प्रयोजनाय गन्तुमिच्छता लक्ष्मणेन अभिज्ञानकृतः—अभिज्ञानैः कृतज्ञापनः आश्रमस्य पन्था अयमेव भवेत् । यत इह पथि चीराणि उच्चैः—व्यक्ताग्रेषु बद्धानि ॥ १० ॥

‡ इदं चोदात्तदन्तानां कुञ्जराणां तरस्विनाम् ।
शैलपार्श्वे परिक्रान्तं अन्योन्यमभिगर्जताम् ॥ ११ ॥

एवं आश्रममार्गं ज्ञात्वाऽथ यत्सन्देहादाश्रममार्गस्याभिज्ञानकरणं तं वनमार्गं चापश्यदित्याह—इदं चेत्यादि । 'इदं कुञ्जराणां परिक्रान्तं' इति अधिकरणे निष्ठादिः, 'इदमेषामासितं' इत्यादिवत्; अस्मिन् वने कुञ्जराः परिक्रान्ता इत्यर्थः ॥ ११ ॥

---

* शीतकारणात्—शीतनिवृत्तिकारणात् . . . . . चैत्रशुक्लदशम्यां प्रस्थानेन तत्र काले वैशाखान्तं शीतस्यापररात्रे जायमानत्वात्-ति. आगामिशीतवारणार्थमिति वा ॥ † चीराणि दृश्यन्ते-गो. ‡ अन्योऽन्यकोपातिशयेन वेगाद्दन्तादन्तिप्रहारं कुर्वतां आश्रमप्रवेशस्याशक्यत्वात् आश्रमप्रान्तगमनं आश्रमप्रदेशं सूचयतीत्यर्थः-गो. गजानामयं गमनमार्गः । तत्र गमननिवृत्त्यर्थं चेदमभिज्ञानकरणमिति भावः-ति.

***यमेवाधातुमिच्छन्ति तापसाः सततं वने।**
तस्यासौ दृश्यते धूमः संकुलः कृष्णवर्त्मनः ॥ १२ ॥

यमेव कृष्णवर्त्मानं—त्रेताग्निं वने आधातुं सततमिच्छन्ति, तस्य च धूमो दृश्यते ॥ १२ ॥

अत्राहं पुरुषव्याघ्रं † गुरु[1]संस्कारकारिणम्।
आर्यं द्रक्ष्यामि [2]संहृष्टः महर्षिमिव राघवम् ॥ १३ ॥

---

* पचनाग्नेः होमाग्नेश्च व्यावृत्तं सन्ततस्थायिगार्हपत्याग्निं दर्शयितुं संकुलशब्दः। पचने ज्वालानां होमे चाङ्गाराणामपेक्षितत्वात् न तदा धूमनिबिडतासंभव इति भावः। अनेन रामस्याग्न्याधानाभावात् श्रौताग्निरत्र नोच्यते, किन्तु धार्यः स्मार्ताग्निः। यदि हि तस्य त्रेताग्निः स्यात् तदा 'रामः कमलपत्राक्षः पुरोधसमथाब्रवीत्। अग्निहोत्रं व्रजत्वग्रे सर्पिर्ज्वलितपावकम्' (उत्तर. 109–1) इति चरमयात्रायामग्निहोत्रपुरस्कारश्रवणात् वनयात्रायामपि तथा दृश्येत। अनुसरन्तोऽपि हि पौरवृद्धाः साग्नय एव समागता इत्युच्यन्ते। किञ्च 'दीक्षितं व्रतसंपन्नं वराजिनधरं शुचिम्। कुरङ्गशृङ्गपाणिं च पश्यन्ती त्वां भजाम्यहम्' (अयो. 16–23) इति सीतामनोरथश्रवणात् राज्याभिषेकात्पूर्वं न यज्ञोऽनुष्ठित इति गम्यते। ततोऽयमग्निर्गृह्याग्निरेव। न च तस्याप्यानयनं न पूर्वमुक्तमिति वाच्यम्; तस्यात्मसमारोपणेनानेतुं शक्यत्वात्। ननु चात्मसमारोपणेऽपि सायंप्रातः होमः कार्यः, स तु नोक्तः; प्रत्युत तमसातीरे, गङ्गाकूले, वृक्षमूले, भरद्वाजाश्रमे, यमुनातटे च सन्ध्यावन्दनमेवोक्तम्। अत्र च श्लोके तापसवनशब्दाभ्यां वने तापसानां शीतनिवारणप्रकाशकरणकन्दमूलादिपचनसाधनतया संग्राह्य एवाग्निरुच्यत इति वक्तुं शक्यते आधातुं–संग्रहीतुमित्यर्थः। अतोऽयमग्निः पचनाद्यर्थ एव, न तु धार्यः स्मार्ताग्निरिति चेत् न—'प्रागुदक्प्रवणां वेदिं विशालां दीप्तपावकाम्' (24) इति वक्ष्यमाणविरोधात् यद्येवं तर्हि कथं सायंप्रातर्होमावचनमिति चेत्—न ह्येकं स्वच्छन्दगामिना मुनिना असत्यामिच्छायामसति च फले पुनःपुनर्वक्तव्यम्। वक्ष्यति तूपरिष्टात् सुतीक्ष्णाश्रमे—'अथ तेऽग्निं सुरांश्चैव' इति। अतः चतुर्दशसु वनवाससंवत्सरेषु सीताहरणपर्यन्तं रामस्य चित्रकूटादिपञ्चवट्यन्तप्रदेशेषु यत्र माससंवत्सरादिवासेन चिरकालावस्थानं तत्र बहिः स्मार्तनित्याग्निधारणम्, अन्यत्र आत्मनि समिधि वा समारोप्य होमकालेऽवरोप्य सायंप्रातरुपासनमिति दिक्–**गो.** † गुरुसंस्कारः श्रेष्ठसंस्कारः मन्त्रोपदेशादिः, तत्कारिणं–**गो.**

[1] सत्कार–**च.**　　[2] संहृष्टं–**च.**

अथ गत्वा मुहूर्तं तु चित्रकूटं स राघवः ।
मन्दाकिनीमनु प्राप्तः तं जनं चेदमब्रवीत् ॥ १४ ॥

स राघवः—भरतः मन्दाकिनीमनु चित्रकूटं प्राप्त इत्यन्वयः । तं जनं—अमात्यादिजनम् ॥ १४ ॥

*जगत्यां पुरुषव्याघ्रः आस्ते वीरासने रतः ।
[1]जनेन्द्रो निर्जनं प्राप्य धिङ्मे जन्म च जीवितम् ॥

वीरासने—योगाय वीरासनावस्थाने रतः सन् जगत्यां—भूमौ आस्ते । 'एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितम् । इतरस्मिंस्तथा चोरुं वीरासनमुदाहृतम्' इति योगवासिष्ठे ॥ १५ ॥

मत्कृते व्यसनं प्राप्तः लोकनाथो महाद्युतिः ।
सर्वान् कामान् परित्यज्य वने वसति राघवः ॥ १६ ॥

'मे जन्म धिक्' इत्यत्र कारणमाह—मत्कृत इत्यादि ॥

†इति लोकसमाक्रुष्टः पादेष्वद्य प्रसादयन् ।
रामस्य निपतिष्यामि [2]सीताया ‡लक्ष्मणस्य च ॥

इति लोकसमाक्रुष्टः—निन्दितः यस्मात्, तस्मात् मे जन्म धिक् । सोऽहमेतदपयशःपरिहाराय रामं प्रसादयन्—रामप्रसादहेतवे तस्य रामस्य पादेषु, पूजायै बहुवचनं, सीताया लक्ष्मणस्य च पादयोः

---

* जनेन्द्रः सन् निर्जनं देशं प्राप्य—इत्युत्तरार्धपरिशीलने जगत्यां पुरुषव्याघ्रः सन्—सकललोकपूज्यः सन् वीरासने रत आस्ते । जगत्यां पुरुषव्याघ्रः जनेन्द्रः निर्जनं प्राप्य वीरासने रतः आस्ते—इति वाऽन्वयः । सकलजनपरिवृतः राजा एवं एकान्ते मुनिर्वर्तेत इति भावः । † इति लोकसमाक्रुष्टः—एवंप्रकारेण लोकैरपवादं प्रापितः–गो.
‡ लक्ष्मणस्य कनिष्ठत्वेऽपि कार्यगौरवात् पादपतनम्–गो.

[1] नरेन्द्रो–ङ. [2] सीतायाश्च पुनःपुनः–ङ.

पतिष्यामि । स्वापराधप्रसादने कनीयस्स्वपि सर्वथाऽनुचितवन्दनेष्वपि प्रणामः प्रसिद्धः—कैकेयीदशरथादौ । रामद्रोह एव लक्ष्मणद्रोहः । एवं व्यवस्थिते श्रद्धाजाड्यात् 'सीतायाश्च पुनःपुनः' इति पाठ इत्याह * ॥ १७ ॥

एवं स † विलपंस्तस्मिन् वने दशरथात्मजः ।
ददर्श महतीं पुण्यां पर्णशालां मनोरमाम् ॥ १८ ॥
सालतालाश्वकर्णानां पर्णैर्बहुभिरावृताम् ।
विशालां ‡ मृदुभिस्तीर्णां कुशैर्वेदिमिवाध्वरे ॥ १९ ॥

सालाः—वटपलाशादिदृढविशालपर्णवन्तः । तालाः—प्रसिद्धाः । अश्वकर्णः—सर्ज्जः—முள்மாமரம் ॥ १९ ॥

शक्रायुधनिभैश्चैव § कार्मुकैः [1] भारसाधनैः ।
रुक्मपृष्ठैर्महासारैः शोभितां शत्रुबाधकैः ॥ २० ॥

शक्रायुधनिभैः, अत एव भारसाधनैः—अतिगुरुरणकार्यसाधकैः । 'सारो बले स्थिरांशे च' ॥ २० ॥

अर्करश्मिप्रतीकाशैः [2] घोरैस्तूणीगतैः शरैः ।
शोभितां दीप्तवदनैः सर्पैर्भोगवतीमिव ॥ २१ ॥

भोगवती—नागलोकः ॥ २१ ॥

---

* गोविन्दराजीये एवं पाठान्तरं प्रदर्शितम् । † विलपन् सन् , गच्छन्निति शेषः । ‡ अध्वरे वेदिमिव मृदुभिः कुशैस्तीर्णां, अधस्तात् तालादिपर्णैराच्छाद्य उपरि तृणाद्यास्तरणेन उटजनिर्माणं प्रसिद्धमेव । § कार्मुकैरिति बहुवचनात् अभ्यासयोग्यं कार्मुकान्तरमस्तीति गम्यते । भारसाधनैः—गुर्ववयवैः । यद्वा अतिगुरुतररणकार्यसाधनभूतैः । यद्वा भारः—धनुःपरिमाणविशेषः । यथोक्तं धनुर्वेदे ईशानसंहितायां — 'भारं पलशतं विदुः । तेन भारेण चापानां प्रमाणमुपलभ्यते' इति—गो.

[1] भारवाहनैः—ङ.　　[2] घोरैस्तूण—च.

* महारजतवासोभ्यां असिभ्यां च विराजिताम् ।
रुक्मबिन्दुविचित्राभ्यां चर्मभ्यां चापि शोभिताम् ॥

महारजतवासोभ्यां—स्वर्णमयकोशवद्भ्यामित्यर्थः । चर्म—'खेटकः फलकं चर्म' ॥ २२ ॥

† गोधाङ्गुलित्रैरासक्तैः [1] चित्रैः काञ्चनभूषणैः ।
अरिसङ्घैरनाधृष्यां मृगैः सिंहगुहामिव ॥ २३ ॥

काञ्चनभूषणैरुपलक्षितामिति शेषः । सिंहगुहामिव पर्णशालां ददर्शेत्यन्वयः ॥ २३ ॥

प्रागुदक्प्रवणां वेदिं विशालां [2] दीप्तपावकाम् ।
ददर्श भरतस्तत्र [3] पुण्यां [4] रामनिवेशने ॥ २४ ॥

अथ प्रत्यासत्त्या पर्णशालान्तर्गतपदार्थदर्शनम्—प्रागुदगित्यादि । प्रागुदक्—ईशानदिक्, तत्र किञ्चिन्निम्नपर्यवसानां; 'प्रवणो दक्षिणे प्रह्वे क्रमनिम्ने चतुष्पथे' वैजयन्ती ॥ २४ ॥

‡ निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुम् ।
उटजे राममासीनं जटामण्डलधारिणम् ॥ २५ ॥

निरीक्ष्य स मुहूर्तं त्विति । अग्निमिति शेषः । गुरुं—रामम् ॥

---

* महारजतवासोभ्यां—कुसुम्बभासोभ्याम् । † उपलक्षणे तृतीया । शोभितामित्यनुकर्षो वा—गो. गोधा—करयोः ज्याघातवारणम । अङ्गुलत्रं—ज्याकर्षणेनाङ्गुलिघातवारणम् । ‡ निरीक्ष्येति । जटामण्डलधारित्ववैलक्षण्येन निश्चयार्थं मुहूर्तं निरीक्ष्य, तेजोविशेषेण सामान्येन स्वगुरुं ज्ञातवानित्यर्थः—गो. प्रथमदर्शनेन स्तब्धः सन् किञ्चित्कालं स्थित इति वा तात्पर्यम् । अथवा—एतादृशीं पर्णशालां निरीक्ष्य ततः तत्रोटजे आसीनं रामं ददर्श इत्यर्थः ।

[1] चित्रकाञ्चन—च. [2] दीप्ततेजसम्—ङ. [3] पुण्ये—ङ. [4] रामनिकेतने—ङ.

*तं तु कृष्णाजिनधरं चीरवल्कलवाससम् ।
ददर्श राममासीनं अभितः पावकोपमम् ॥ २६ ॥

यं रामं ददर्श, तं कृष्णाजिनेत्याद्युच्यमानविशेषणकं अभितो ददर्श—समीपे ददर्शेत्यर्थः, अव्ययान्यनेकार्थानि ॥ २६ ॥

सिंहस्कन्धं महाबाहुं पुण्डरीकनिभेक्षणम् ।
पृथिव्याः सागरान्तायाः भर्तारं धर्मचारिणम् ॥ २७ ॥
उपविष्टं महाबाहुं ब्रह्माणमिव शाश्वतम् ।
† स्थण्डिले [1] दर्भसंस्तीर्णे सीतया लक्ष्मणेन च ॥ २८ ॥

शाश्वतं ब्रह्माणं—श्रीहिरण्यगर्भमिव स्थितं, तदवतारत्वादेवं भासमानम् ॥ २८ ॥

तं दृष्ट्वा भरतः श्रीमान् [2] दुःखशोकपरिप्लुतः ।
अभ्यधावत धर्मात्मा ‡ भरतः कैकयीसुतः ॥ २९ ॥

अभ्यधावत—अभिजगाम ॥ २९ ॥

[3] दृष्ट्वैव विललापार्तः बाष्पसन्दिग्धया गिरा § ।
‖ अशक्नुवन् [4] धारयितुं धैर्यात् वचन[5]मब्रुवन् ॥ ३० ॥

---

* विशेषतो दर्शनमाह—तं त्वित्यादिना । .... उत्तरीयतया कृष्णाजिनधरं, अधराम्बरत्वेन चीरवल्कलवाससम् .... अभितः पावकोपमं—तादृशतपोविशेषेण समन्तात्तेजः-परिवृतम् ... यद्वा दुर्दर्शमित्यर्थः । अत एव पूर्वश्लोके 'निरीक्ष्य स मुहूर्तं' इत्युक्तम्—गो. † स्थण्डिले— भूमौ—गो. ‡ द्वितीयभरतशब्दः उत्तरश्लोकेन संबध्यते—गो. भरतस्येव कवेरपि वर्णनीयमयीभावेनातिहर्षाविष्टत्वात् अत्र प्रकरणे द्विरुक्तिर्न दोषाय—ति. § गिरा, उपलक्षितः—गो. ‖ 'धनेन क्रीतुमशक्नुवन्' इत्यादौ क्रयण-साधनधनस्याभावबोधवत् धारणसाधनस्य धैर्यस्याभावात् धारयितुं अशक्नुवन्नित्यर्थलाभः ।

[1] चर्मसंस्तीर्णे—ङ. [2] दुःखमोह—च. [3] दृष्ट्वैवं—ङ. [4] वारयितुं—च. [5] मब्रवीत्—ङ.

दृष्ट्वैव–दर्शनमात्रेणैव। आर्तः–खिन्नः सन्, तां चार्तिं धैर्यात् धारयितुमशक्नुवन्, अत एव बाष्पसन्दिग्धया–शोकोष्मसन्दिग्धवर्णया गिरा–वागिन्द्रियेण वचनं अब्रुवन्*–अव्यक्तं वदन् विललाप। एवं स्थिते पाठे 'वचनमब्रवीत्' इति पठित्वा असङ्गतमेव च व्याख्यामकरोत् ॥ ३० ॥

यः संसदि प्रकृतिभिः भवेद्युक्त उपासितुम् ।
वन्यैर्मृगैरुपासीनः सोऽयमास्ते ममाग्रजः ॥ ३१ ॥

तादृशं विलापवचनं—यस्संसदीत्यादि ॥ ३१ ॥

वासोभिः बहुसाहस्रैः यो [1] महात्मा पुरोचितः† ।
[2] मृगाजिने सोऽयमिह प्रवस्ते धर्ममाचरन् ॥ ३२ ॥

वासोभिरिति। वसनोचित इति शेषः। बहुसाहस्रैः—बहुसाहस्रमूल्यक्रीतैः, 'प्राग्वतेः सङ्ख्यापूर्वपदानां तदन्तग्रहणं अलुकि' इतिवचनेन 'शतमानविंशतिकसहस्र' इति सूत्रेण सहस्रान्तादप्यणि 'विभाषा कार्षापण' इत्यादिना लुगभावपक्षे 'सङ्ख्यायाः संवत्सरसङ्ख्यस्य च' इत्युत्तरपदवृद्धौ रूपम्। सोऽयं–पुरा तादृग्वासोवसनार्हः इह–वने, मृगाजिने–अन्तरीयोत्तरीयरूपे, प्रवस्ते। किमर्थमेवमित्यतः–धर्ममाचरन्निति। पितृवचनपरिपालनरूपः–धर्मः ॥

[3] अधारयद्यो विविधाः चित्राः सुमनस[4]स्तदा ।
सोऽयं जटाभारमिमं [5] वहते राघवः कथम्? ॥ ३३ ॥

---

* गिरा वचनमब्रुवन्नित्यनेन–गीरूपवचनमब्रुवन्नित्यर्थलाभादेवं व्याख्यातम्। शोकात् किञ्चिदप्यवदन् केवलं सन्दिग्धया गिरा विललाप इत्यन्वयो वा। † उचितैः, अलंकर्तुमिति शेषः; षष्ठ्यर्थे तृतीया वा। मृगाजिने–मृगचर्मणि प्रवस्ते–आच्छादयति–गो.

[1] महार्हैः–ङ. [2] मृगाजिनैः–ङ. [3] आधारयद्यो–च. [4] स्सदा–च. [5] सहते–च.

यस्य यज्ञैः [1] यथोद्दिष्टैः युक्तो धर्मस्य सञ्चयः ।
शरीरक्लेशसंभूतं स धर्मं परिमार्गते ॥ ३४ ॥

यस्य यज्ञैः ऋत्विक्क्लेशसाध्यैः धर्मस्य सञ्चयो युक्तः, सोऽयं स्वशरीरक्लेशेन संभूतं उत्पन्नं धर्मं परिमार्गते ॥ ३४ ॥

चन्दनेन महार्हेण यस्याङ्गमुपसेवितम् ।
* मलेन तस्याङ्गमिदं कथमार्यस्य सेव्यते ? ॥ ३५ ॥

मलेनेति । उद्वर्तनरहितदण्डवात्त्रिषवणाप्लवमात्रात् मलस्थितिरङ्गे ॥

† मन्निमित्तमिदं दुःखं प्राप्तो रामः सुखोचितः ।
धिक्! जीवितं नृशंसस्य मम लोकविगर्हितम् ॥ ३६ ॥
इत्येवं विलपन् दीनः प्रस्विन्नमुखपङ्कजः ।
पादावप्राप्य रामस्य पपात भरतो रुदन् ॥ ३७ ॥
दुःखाभितप्तो भरतः राजपुत्रो महाबलः ।
उक्त्वाऽऽर्येति [2] सकृद्दीनं ‡ पुनर्नोवाच किञ्चन ॥ ३८ ॥

पादावप्राप्येति दुःखातिशयवशात् । पुनर्नोवाचेत्यपि तत एव ॥ ३७–३८ ॥

§ बाष्पापिहितकण्ठश्च प्रेक्ष्य रामं यशस्विनम् ।
[3] आर्येत्येवाथ संक्रुश्य व्याहर्तुं [4] नाशकत्तदा ॥ ३९ ॥

बाष्पाभिभूतः—बाष्पाभिरुद्धः कण्ठः यस्य स तथा ॥ ३९ ॥

---

* चन्दनेनेति पूर्वार्धे निर्देशात्, वने तदभावेन मलेनेति निर्देशः। वनसञ्चारादिना तस्य सम्भवश्च । † मम राज्यसंपादनेच्छया खलु कैकेय्या एवं कृतमिति भावः । ‡ दीनं उक्त्वेति क्रियाविशेषणम् । § वक्तुमशक्यत्वे हेतुमाह—बाष्पापिहितकण्ठ इत्यादिना–गो.

[1] यथामृष्टैः, यथादृष्टैः–ङ. यथादिष्टैः–च. [2] सकृद्दीनः–ङ. [3] अर्येत्येवाभि–च. [4] नाशकत्पुनः–ङ.

शत्रुघ्नश्चापि रामस्य ववन्दे चरणौ रुदन् ।
तावुभौ स समालिङ्ग्य रामश्चाश्रूण्यवर्तयत् ॥ ४० ॥

ततः सुमन्त्रेण गुहेन तेन
समीयतू राजसुतावरण्ये ।
दिवाकरश्चैव निशाकरश्च
यथाऽम्बरे शुक्रबृहस्पतिभ्याम् ॥ ४१ ॥

तेन—भरतेनेत्यर्थः । राजसुतौ—रामलक्ष्मणौ ॥ ४१ ॥

तान् पार्थिवान् वारणयूथपाभान्
समागतांस्तत्र महत्यरण्ये ।
*वनौकसस्तेऽपि समीक्ष्य सर्वेऽ-
प्यश्रूण्यमुञ्चन् प्रविहाय हर्षम् ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकोनशततमः सर्गः

हर्षं विहायाश्रूण्यमुञ्चन्निति । तेषां राज्ञां दर्शनजः सन्तोषः प्रथमं, तेषां दुःखदर्शनात् अनन्तरं दुःखादश्रुपातश्च । रवि(४२)मानः सर्गः ॥ ४२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकोनशततमः सर्गः

---

* वनौकसः—ऋषयोऽपि एतावता कालेन रामसंवासजं स्वाभाविकं वा हर्षं प्रविहाय अश्रूण्यमुञ्चन् ।

शततमः सर्गः

[कुशलप्रश्नः]

*जटिलं चीरवसनं प्राञ्जलिं पतितं भुवि ।
ददर्श रामो †दुर्दर्शं युगान्ते [1]भास्करं यथा ॥ १ ॥

अथ रामेण कुशलप्रश्नः । जटिलमित्यादि । 'अद्य प्रभृति भूमौ तु शयिष्ये' 'जटाचीराणि धारयन्' इत्यष्टाशीतितमसर्गे भरतेनोक्तत्वात् जटिलत्वं भरतस्य च । युगान्ते भास्करमित्यनुकर्षः । इदं तु कवीनामुत्प्रेक्षामात्रम्, न तु सूर्यपातः कदाऽपि ॥ १ ॥

‡कथंचिदभिविज्ञाय विवर्णवदनं कृशम् ।
भ्रातरं भरतं रामः परिजग्राह [2]बाहुना ॥ २ ॥
आघ्राय रामस्तं मूर्ध्नि परिष्वज्य च [3]राघवः ।
अङ्के भरतमारोप्य [4]पर्यपृच्छत् समाहितः ॥ ३ ॥

---

*दर्शनमात्रेण भरतो राज्यं पालयतीति कृत्वा राज्यनीतिं पृच्छति शततमे । ननु गङ्गातीरे 'अद्य प्रभृति भूमौ तु शयिष्येऽहं तृणेषु वा । फलमूलाशनो नित्यं जटाचीराणि धारयन्' (अयो. 88-26) इति जटावल्कलधारणं प्रतिज्ञातम् । पुनर्नवतितमे भरद्वाजदर्शनसमये 'वसानो वाससी क्षौमे' (अयो. 90-2) इति क्षौमवस्त्रं धृतवानित्युच्यते । अत्र तु 'जटिलं चीरवसनं' इति सिद्धवदनूद्यते । कथमेतत्संगच्छत इति चेत्—अत्राहुः—प्रतिज्ञाया रात्रौ कृतत्वात् अपरेद्युर्भरद्वाजदर्शनानन्तरं जटावल्कले धृतवानित्यविरोध इति—गो. यद्यपि नवतितमे सर्गे 'वसानो वाससी क्षौमे' (2) इति भरद्वाजदर्शनवेलायां श्रूयते; तथाऽपि गुहग्रामे प्रतिज्ञातस्य भरद्वाजाश्रमनिर्गमानन्तरं धारणमिति न विरोधः—ति. अधिकं तत्रैव द्रष्टव्यम् । अत्र आद्यश्लोकद्वयं गतसर्गान्तिमभागानुवादरूपम् । †युगान्ते भास्करं यथा—प्रलयकालिकसूर्यमिव दुर्दर्शमिति वा । ‡कथञ्चिदभिविज्ञाने हेतुद्वयं—विवर्णवदनं कृशमिति—गो.

[1] भरतं—ङ. [2] पाणिना—च. [3] बाहुना—ङ, राघवम्—च. [4] पर्यपृच्छत सादरम—च.

समाहित इति । कुशलप्रश्नद्वारा धर्मबोधनसावधानचित्त इत्यर्थः ॥ ३ ॥

क्व नु तेऽभूत् पिता, तात! यदरण्यं त्वमागतः ।
न हि त्वं जीवतस्तस्य वनमागन्तुमर्हसि* ॥ ४ ॥

हे तात! ते पिता क्वाभूत्? इह वा परत्र वेत्यर्थः । कुत एवं संशयप्रसङ्ग इत्यतः—न हि त्वमित्यादि । जीवतस्तस्येति । सेवां हित्वेति शेषः । नार्हसीति । पितृशुश्रूषाया नित्यकर्तव्यत्वात् मदसन्निधानसमये त्वयेत्याशयः ॥ ४ ॥

†चिरस्य बत पश्यामि दूरात् भरतमागतम् ।
‡दुष्प्रतीकमरण्येऽस्मिन् किं, तात! वनमागतः ॥ ५ ॥

दूरात्—मातुलदेशात् चिरस्यागतं भरतं पश्यामि बत! इति सन्तोषवचनं सामान्यतः, न भरतं प्रति । दुष्प्रतीकं—दुर्दशाकारणम् । भरतस्य वेदं विशेषणम्, वनस्य वा । हे तात! दुष्प्रतीकं वनं किमागतः? अस्मिन्नरण्ये तव किं प्रयोजनम्? ॥ ५ ॥

कच्चिद्धारयते, तात! राजा यत् त्वमिहागतः ।
[1]कच्चिन्नु दीनः सहसा राजा लोकान्तरं गतः ॥ ६ ॥

---

*रामस्य प्रश्नान्तरसम्बन्धदर्शनेन भरतो नोत्तरमुक्तवानिति बोध्यम्—गो.
†बतेत्यद्भुते । दूरात्—दूरावस्थितकेकयनगरात् । ‡दुष्प्रतीकं—वैवर्ण्यादिना दुर्ज्ञेयावयवम्—गो. दुष्प्रतीकमिति भरतविशेषणं, वनविशेषणं वा । आद्ये कार्श्यवैवर्ण्यादिना दुर्ज्ञेयाकारं, वनमपि भीषणतया । .... अरण्यं गजाद्युपभोग्यं, तद्वर्ति वनं आम्रादियुतं मनुष्यभोग्यम्—ति. दूरात् चिरस्यागतं भरतं अरण्येऽस्मिन् दुष्प्रतीकं पश्यामि । यद्वा चिरस्य दूरादागतं दुष्प्रतीकं भरतं अरण्ये पश्यामि तव । अरण्येऽस्मिन् आगतमिति वा ॥

[1]कच्चिन्न—ङ. च.

अथ भरतस्यागमनप्रयोजनं, शासति राजनि तदाज्ञया रामानयनं वा स्यात्? अथवा राज्ञोऽप्यपाये निरालम्बतया दुःखाद्वा रामदर्शनाय वा स्यात्? तत्र प्रथमः पक्ष उपन्यस्यते--कच्चिदित्यादि। यत्–यस्मात् त्वं राजाज्ञयेहागतः, तस्मात् राजा प्राणान् धारयते कच्चित्? अथ द्वितीयप्रश्नः—अथवा दीनः सः लोकान्तरं गतः कच्चित्तु? यत् त्वमिहागत इत्यनुकर्षः ॥ ६ ॥

कच्चित्, सौम्य! न ते राज्यं भ्रष्टं बालस्य शाश्वतम्* ।
कच्चित् शुश्रूषसे, तात! [1] पितरं सत्यविक्रमम् ॥ ७ ॥

इममेव पक्षमाश्रित्य प्रश्नः—न ते राज्यं भ्रष्टमिति। मूलप्रभोरत्ययाद्धेतोः प्राप्ता भ्रंशशङ्का। अथाजीवनपक्षस्य निश्चयाभावात् अश्लीलत्वाच्च तं पक्षं परित्यज्य राजजीवनपक्षमेवावलम्ब्य प्रश्नः--कच्चित् शुश्रूषस इत्यादि ॥ ७ ॥

कच्चिद्दशरथो राजा [2]कुशली [3]सत्यसङ्गरः ।
राजसूयाश्वमेधानां आहर्ता [4]धर्मनिश्चितः ॥ ८ ॥

धर्मान्वितं निश्चितं--निश्चयः यस्य स तथा, भावे निष्ठा ॥ ८ ॥

† स कच्चित् ब्राह्मणो विद्वान् धर्मनित्यो महाद्युतिः ।
इक्ष्वाकूणामुपाध्यायः यथावत्, तात! पूज्यते ॥ ९ ॥

इक्ष्वाकूणां उपाध्यायः—वसिष्ठः ॥ ९ ॥

---

* शाश्वतं राज्यं भ्रष्टं न कच्चित्। † वसिष्ठकौसल्यादीनामागमनं 103 सर्गे वक्ष्यते।

[1] पितुः सत्यपराक्रम—च. [2] कुलीनः—ङ. [3] विगतज्वरः—ङ. [4] धर्मनिश्चयः—ङ.

सा, तात! कच्चित् कौसल्या *सुमित्रा च प्रजावती।
सुखिनी कच्चिदार्या च देवी नन्दति कैकयी ॥ १० ॥

कच्चिद्विनयसंपन्नः कुलपुत्रो बहुश्रुतः।
†अनसूयुरनुद्रष्टा [1]सत्कृतस्ते पुरोहितः ॥ ११ ॥

कुलपुत्रः——महाकुलप्रसूतः। अनुद्रष्टा——तावकसकलहितकृत्यस्यानुक्षणद्रष्टा। तथा ते पुरोहित इति। रामस्य वसिष्ठवत प्रातिस्विकपुरोहित इत्यर्थः ॥ ११ ॥

‡कच्चिदग्निषु ते युक्तः [2]विधिज्ञो मतिमानृजुः।
हुतं च होष्यमाणं च काले वेदयते सदा ॥ १२ ॥

विधिज्ञः——अग्निहोत्राद्यश्वमेधान्तसकलहोमविधिज्ञ इत्यर्थः। काले——होमकाले। वेदयते, तुभ्यमिति शेषः ॥ १२ ॥

---

* प्रजावती—सुप्रजा: सुमित्रा च सुखिनी कच्चिदित्यन्वयः। आर्येति स्वमात्रपेक्षयाऽपि बहुमानोक्तिः, कैकेयी नन्दति कच्चित्–गो. अत्र कौसल्यासुमित्रयोः 'सुखिनी' इति, कैकेय्याः 'नन्दति' इति च पदं प्रयुक्तं अवधेयम्। † अनुद्रष्टा—वसिष्ठोपदिष्टानामुपद्रष्टा। ते पुरोहित इत्यनेन रामस्य सुयज्ञ इव भरतस्यापि प्रातिस्विकः कश्चित् पुरोहितोऽस्तीति गम्यते। सुयज्ञ एवोच्यत इत्यप्याहुः–गो. ‡ 'पितृव्यपुत्रे सापत्ने परनारीसुतेषु च। विवाहदानयज्ञादौ परिवेदो न दूषणम्' इति स्मरणात् द्वैमातुरेष्वधिवेदनदोषाभावात् यज्ञोऽपि कृत इत्यारोप्य पृच्छति—कच्चिदग्निष्विति। अथवा अग्निषु—अग्निकार्येषु। युक्तः-सावधानः नियुक्तो वा। अग्निशुश्रूषणपर इत्यर्थः–गो.

[1] सम्मतस्ते–ङ. [2] दानज्ञो–ङ.

कच्चिद्देवान् पितॄन् [1] मातॄः गुरून् पितृसमानपि ।
वृद्धांश्च [2] तात * वैद्यांश्च ब्राह्मणांश्चाभिमन्यसे ॥ १३ ॥

वैद्यांश्च ब्राह्मणानिति । 'ब्राह्मणांश्च नमस्यसि' इत्यग्रे सामान्यतः प्रश्नो भविष्यति । अत्र तु धन्वन्तरिशास्त्रपरिश्रमवन्तो ब्राह्मणा एव पृच्छ्यन्ते । ते किल नित्यं पूज्याः, आत्मरक्षाहेतुत्वात् । ननु कथं ब्राह्मणस्य भैषज्यकर्म ? सति सामर्थ्ये तदभ्यासस्याप्यदोषत्वात् । ननु 'अपूतो ह्येषोऽमेध्यो यो भिषक्' इति श्रुत्या निन्दितत्वात् कथं ब्राह्मणो भिषक् ? तत्तु वैद्यशास्त्रार्थविज्ञानसंप्रदायक्रियायोगादिरहिततया चिकित्साप्रवृत्तस्य हत्यातत्पापसंभवात् अज्ञविषयम् । वस्तुतस्तु आवश्यकस्थले ब्राह्मणोत्तमसाध्यं भैषज्यं महते पुण्याय । श्रुतिसम्मततरमेव तस्य सुब्राह्मण्यम्, 'विप्रस्स उच्यते भिषक्' 'रक्षोहामीव चातनः' इति घण्टाघोषात् ॥ १३ ॥

† इष्वस्त्रवरसंपन्नं अर्थशास्त्रविशारदम् ।
‡ सुधन्वानमुपाध्यायं कच्चित् त्वं, [3] तात ! मन्यसे ॥१४॥

---

* विद्या येषां सन्तीति वैद्याः—विद्वांसः, तान् । ब्राह्मणान्—ब्रह्मविदः यद्वा वैद्यान्—भिषजः । तेषां बहुमतिश्च धनादिना परितोषणम् । ब्राह्मणानिति जातिमात्रपरो वा । तदा विद्याशीलादिकमपरीक्ष्य ब्राह्मणत्वमात्रेण यथायोग्यं बहुमानं विवक्षितम्-गो. 'वैद्यांश्च ब्राह्मणांश्च' इति चकारद्वयसत्त्वादेवं व्याख्यानम् । उत्तरत्र ६१ श्लोके 'ब्राह्मणांश्च नमस्यसि' इति प्रश्नेऽपि तत्र 'सिद्धार्थान्' इति विशेषणात् गुणतोऽपि ब्राह्मण्यं विवक्षितम् । अत्र तु सामान्यतो ब्राह्मण्यमिति न पौनरुक्त्यम् ॥
† इषवः—अमन्त्रका बाणाः, अस्त्राणि—समन्त्रकाः-गो. ‡ सुधन्वानं—सुधन्वनामकं उपाध्यायं—धनुर्वेदाचार्यम्-गो.

[1] भृत्यान्—च. [2] तत्र—ङ. [3] नावमन्यसे—ङ.

इषवः—केवलं बाणप्रयोगः, अस्त्रं—समन्त्रबाणप्रयोगः, वरशब्द उभयसम्बद्धः, तदुभयसंपन्नस्तथा। अर्थसाधकं शास्त्रं—राजनीतिशास्त्रमिति यावत्। उपाध्यायं—धनुर्वेदोपाध्यायम्॥ १४॥

कच्चिदात्मसमाः* शूराः श्रुतवन्तो जितेन्द्रियाः।
कुलीनाश्चेङ्गितज्ञाश्च [1] कृतास्ते, तात! मन्त्रिणः॥ १५॥
मन्त्रो विजयमूलं हि राज्ञां भवति, राघव!
† सुसंवृतो [2] मन्त्रधरैः अमात्यैः शास्त्रकोविदैः॥ १६॥

सुसंवृतो मन्त्र इत्यन्वयः॥ १६॥

‡ कच्चिन्निद्रावशं नैषीः कच्चित् काले प्रबुध्यसे।
कच्चिच्चापररात्रेषु चिन्तयस्यर्थनैपुणम्॥ १७॥

अर्थनैपुणं—नैपुणं—सामर्थ्यं—उपायः—अर्थप्राप्त्युपाय इत्यर्थः॥

§ कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिस्सह।
कच्चित्ते [3] मन्त्रितो मन्त्रः राष्ट्रं न परिधावति॥ १८॥

राष्ट्रं न परिधावति। लोकैर्न ज्ञायत इत्यर्थः॥ १८॥

कच्चिदर्थं विनिश्चित्य लघुमूलं महोदयम्।
क्षिप्रमारभसे [4] कर्तुं न दीर्घयसि, राघव!॥ १९॥

---

* आत्मसमाः—विश्वसनीया इति यावत्-गो. † अमात्यैः सुसंवृतः—गुप्तं रक्षितः मन्त्रः राज्ञां विजयमूलमित्यन्वयः। ‡ निद्रावशमिति कथनात् अजितनिद्रत्वं विवक्षितम्। § 'अन्या मध्यस्थचिन्ता हि विमर्शाभ्यधिकोदया' (अयो. १-१६) इति तूक्तम्। एवं बहुभिर्मन्त्रणेऽपि ऐकमत्यं, मन्त्रगोपनं च दुर्लभं स्यात्। अतः परिमितैः मन्त्रणमभिमतम्।

[1] सत्कृताः—ङ. [2] मन्त्रिधुरैः—च. [3] मन्त्रिते—ङ. [4] कर्म—च.

लघुमूलं—अल्पयत्नसाध्यम्। महोदयं—महाफलम्। न दीर्घयसि—दीर्घकालविलम्बं न करोषि॥ १९॥

कच्चित्ते सुकृतान्येव *कृतरूपाणि वा पुनः।
विदुस्ते सर्वकार्याणि न कर्तव्यानि पार्थिवाः॥ २०॥

कृतरूपाणि—कृतकल्पानि। सुकृतान्येव विदुः, कृतरूपाणि वा विदुः, न तु कर्तव्यानि विदुः कच्चित्॥ २०॥

†कच्चिन्न तर्कैर्युक्त्या वा ये चाप्यपरिकीर्तिताः।
त्वया वा तव वाऽमात्यैः बुध्यते, तात! मन्त्रितम्॥२१॥

ये चापि मन्त्राः त्वया अमात्यैश्च अपरिकीर्तिता अपि युक्त्या-अर्थापत्त्या तर्कैः-अनुमानैर्वा परैर्न बुध्यते कच्चित्। परैर्मन्त्रितं तु त्वया तवामात्यैश्च युक्त्यादिभिः बुध्यते कच्चित्॥ २१॥

कच्चित् ‡[1]सहस्रान्मूर्खाणामेकमिच्छसि पण्डितम्।
पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निश्श्रेयसं महत्॥ २२॥

अर्थकृच्छ्रेषु—कार्यसङ्कटेषु। महन्निःश्रेयसं कुर्यादिति। अव्यभिचरितनिस्तरोपायबोधनेनेति शेषः॥ २२॥

---

* सुकृतान्येव—सुनिष्पन्नान्येव...कृतरूपाणि—कृतप्रायाणि वा...मन्त्रेण कर्तव्यतया निश्चितानि करणात् पूर्वं न विदुरित्यर्थः—**गो.** † मन्त्रितं कार्यं त्वया वा, तवामात्यैर्वा हेतुभिः, तर्कैः—ऊहैः, युक्त्या वा—अनुमानेन वा, ये चाप्यपरिकीर्तिताः—इङ्गितादयः तैर्वा न बुध्यते कच्चित्, परैरिति शेषः। भवान् भवदीयामात्याश्च मन्त्रितार्थविषय-पराभ्यूहस्थानानि सूक्ष्माण्यपि स्थगयन्ति कच्चिदित्यर्थः—**गो.** ‡ मूर्खाणां सहस्रात्—मूर्खसहस्रापेक्षया।

[1] सहस्रैर्मूर्खाणां—**च.**

*सहस्राण्यपि मूर्खाणां यद्युपास्ते महीपतिः।
अथवाऽप्ययुतान्येव नास्ति तेषु सहायता ॥ २३ ॥
एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः।
राजानं †[1] राजमात्रं वा प्रापयेन्महतीं श्रियम् ॥ २४ ॥
कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः।
जघन्यास्तु जघन्येषु भृत्याः कर्मसु योजिताः ॥ २५ ॥

योजिता इति। कार्यार्थमिति शेषः ॥ २५ ॥

अमात्यानुपधातीतान्‡ पितृपैतामहान् शुचीन्।
श्रेष्ठान् श्रेष्ठेषु कच्चित् त्वं नियोजयसि कर्मसु ॥ २६ ॥

उपधातीतान्—उपाधिप्रयुक्तसंश्रयरहितान्। सन्तानपरंपरया स्वाभाविकराजसंश्रयान्। तदेवोक्तं—पितृपैतामहानिति ॥ २६ ॥

§ कच्चिन्नोग्रेण दण्डेन [2] भृशमुद्वेजितप्रजम्।
[3]राष्ट्रं तवानुजानन्ति मन्त्रिणः, कैकयीसुत ! ॥ २७ ॥

उद्वेजितप्रजं सत् नानुजानन्ति—नानुसन्दधते कच्चित् ॥ २७ ॥

---

* अन्वयेनोक्तं व्यतिरेकेन द्रढयति—सहस्राण्यपीति। † राजमात्रं—राजतुल्यमिति यावत्। ‡ उपधातीतान्—स्वव्यतिरिक्तेष्वर्थाद्युपाधिरहितान्। यद्वा, सुपरीक्षाऽतीतान्, 'उपधा सुपरीक्षा स्यात्' इति वैजयन्ती। श्लाघ्यवस्त्राभरणादिकं पुरुषमुखेन संप्रेष्य अन्तःपुरप्रेषितं, परराजप्रेषितं इति प्रलोभ्य परीक्षां कुर्वन्ति राजानः, तामतीतानित्यर्थः—गो. उपधा—उत्कोचः, तमतीतान्—ति. 'उपधा धर्माद्यैः यत् परीक्षणम्' इत्यमरः। § तव उग्रेण दण्डेन उद्वेजितप्रजं—पीडितप्रजायुक्तं, राष्ट्रं—राज्यं, मन्त्रिणः नानुजानन्ति—नानुमन्यन्ते कच्चित्। राजानं त्वां उग्रदण्डात् निवर्तयन्ति कच्चिदित्यर्थः—गो.

[1] राजपुत्रं—च. [2] भृशमुद्वेजिताः प्रजाः—च. [3] राष्ट्रे—च.

कच्चित् त्वां नावजानन्ति याजकाः पतितं यथा ।
* [1] उग्राप्रतिग्रहीतारं कामयानामिव स्त्रियः ॥ २८ ॥

नावजानन्तीति । अयाज्योऽयमिति तावत्ककिञ्चित्पापानुसन्धानेन तु यथा साक्षात्पतितमुपेक्षन्ते, तथा त्वां नोपेक्षन्ते कच्चित् । तत्र दृष्टान्तः—उग्रेत्यादि । स्त्रियः—कुलस्त्रियः । उग्रा—उग्राख्यहीनजातिस्त्री, तत्प्रतिग्रहीतारं, तां च कामयमानं—मुगभाव आर्षः, तन्नित्यसक्तमित्यर्थः, पतिमिति शेषः ॥ २८ ॥

† उपायकुशलं वैद्यं [2] भृत्यं सन्दूषणे रतम् ।
शूरमैश्वर्यकामं च यो न हन्ति स [3] वध्यते ॥ २९ ॥

उपायकुशलं—राज्ञः सकाशादर्थग्रहणाय व्याध्युल्बणोपायकुशलं वैद्यं—भिषजम् ; सन्दूषणे—स्वामिदूषणे रतं भृत्यं—सेवकं ; ऐश्वर्यकामं—राजानमपच्छिद्य तदैश्वर्यकामं शूरं—प्रभुं च यो न हन्ति, स राजा तैरेव भिषगादिभिर्हन्यते । लोकप्रसिद्धश्चायमर्थः ॥ २९ ॥

---

* उग्रप्रतिग्रहीतारमिति उपमानोपमेययोः साधारणविशेषणम् । उग्रेण—दण्डोपायेनादण्ड्येभ्यो धनग्रहणं कुर्वन्तं त्वां उग्रप्रतिग्रहीतारं—उग्रेण दुर्दानेन धनप्रतिग्रहीतारं पतितं—यष्टुकामं पतितं याजकाः—ऋत्विज इव । उग्रेण कर्मणा—बलात्कारेण प्रतिग्रहीतारं कामयानं पुरुषं स्त्रिय इव—गो. उग्रेण कर्मणा—बलात्कारादिना प्रतिग्रहीतारं कामयानं—कामुकं त्रिय इव याजकाः पतितमिव च नावजानन्ति, प्रजा इति शेषः । ....परे तु—उग्रः—शिवः, तत्प्रतिग्रहीतारं —अल्पपुंस्त्वं ; तत्प्रतिग्रहीतुः ईदृशषण्ढतायाः कर्मविपाकशास्त्रे उक्तेरित्याहुः—ति. प्रजातिक्रमणं उग्रकरग्रहणं च त्वयि नास्ति कच्चिदिति भावः—ती. † उपायेषु—सामाद्युपायेषु कुशलं—निपुणम् । वैद्यं—कणिकोक्तकुटिलनीतिविद्याविदम् । [चाणक्याद्युक्तकुटिलनीतिशास्त्रविदम्] । भृत्यसन्दूषणे रतं—अन्तरङ्गभृत्यानां सन्दूषणे—असद्दोषोद्घाटनेन तद्विघटने रतम् । शूरं—राजहिंसनेऽपि निर्भयं, ऐश्वर्यकामं—क्रमेण राजैश्वर्याक्रमणकामं च—गो.

[1] उग्र—ङ. च. झ. [2] भृत्यसन्दूषणे—ङ. [3] हन्यते—ञ.

*कच्चिद्धृष्टश्च शूरश्च मतिमान् धृतिमान् शुचिः ।
कुलीनश्चानुरक्तश्च दक्षः सेनापतिः कृतः ॥ ३० ॥

बलवन्तश्च कच्चित्ते मुख्या युद्धविशारदाः ।
†[1]दृष्टापदानविक्रान्ताः त्वया सत्कृत्य मानिताः ॥ ३१ ॥

दृष्टं—कृतरणानुभूतं अपदानं—शौर्यं, तज्ज विक्रान्तं—परयोधाभिभवनं येषां ते तथा ॥ ३१ ॥

कच्चित् बलस्य भक्तं च वेतनं च यथोचितम् ।
संप्राप्त[2]कालं दातव्यं ‡ददासि न विलम्बसे ॥ ३२ ॥

भक्तं—दैनन्दिनदेयान्नम् । वेतनं—प्रतिमासदेयं सेवाभृतिः ॥

कालातिक्रमणाच्चैव भक्तवेतनयोर्भृताः§ ।
[3]भर्तुः कुप्यन्ति ‖दुष्यन्ति सोऽनर्थः सुमहान् स्मृतः ॥

भृताः—कर्मणि क्तः, भृत्या इति यावत् । दुष्यन्ति—विनाशयन्ति कार्याणि । स इति । भृत्यकोप इति यावत् ॥ ३३ ॥

---

* हृष्टः—राजकृतसत्कारेण सन्तुष्टः । यद्वा—धृष्ट इति च्छेदः ; धृष्टः—व्यवहारेषु प्रगल्भः । तादृशं पूर्वसेनापतिं विहाय अतादृशमन्यं न परिगृहीतवानसि कच्चिदित्यर्थः—गो.

† दृष्टं—साक्षात्कृतं अपदानं —पूर्ववृत्तं ('अपदानं कर्म वृत्तं' इत्यमरः) पौरुषं येषां ते तथोक्ताः—गो.

‡ ददासि, न विलम्बसे कच्चित्—कालातिक्रमणं विना ददासि कच्चित्—गो.

§ भृताः—भृतिजीविनः, भटा इति यावत्—गो.

‖ यतः कुप्यन्ति, अत एव दुष्यन्ति—'क्रुद्धो हन्यात् गुरूनपि' इति हि नीतिः ।

[1] दृष्टापदानाः—ङ. [2] काले—ङ. [3] भर्तुरप्यतिकुप्यन्ति—च.

*कच्चित् सर्वेऽनुरक्तास्त्वां †कुलपुत्राः ‡प्रधानतः ।
कच्चित् प्राणांस्तवार्थेषु संत्यजन्ति समाहिताः ॥ ३४ ॥

कुलपुत्राः—कुलदासाः । प्रधानतः—प्राधान्येन—अन्तरङ्गतया ॥

कच्चिज्जानपदो विद्वान् दक्षिणः प्रतिभानवान् ।
§यथोक्तवादी दूतस्ते कृतः, भरत ! पण्डितः ॥ ३५ ॥

जानपदः—स्वजनपदे भवः । विद्वान्—सर्वशास्त्रवित् । प्रतिभानवान्—प्रत्युत्पन्नमतिः । यथोक्तवादी—यथोक्तसन्देशप्रतिसन्देशवादी । पण्डितः—परिच्छेत्ता । 'दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् । इङ्गिताकारचेष्टाज्ञं शुचिं दक्षं कुलोद्भवम् ॥' इति मनुः ॥ ३५ ॥

‖कच्चिदष्टा[1]दशान्येषु स्वपक्षे दश पञ्च च ।
त्रिभिस्त्रिभिरविज्ञातैः वेत्सि तीर्थानि [2]चारकैः ॥ ३६ ॥

---

* राज्ञः अङ्गरक्षकाः वंशपरंपरयाऽऽगताः त्वां अनुरक्ताः कच्चित् । तादृशाः ते त्वदर्थं प्राणानपि त्यक्तुं समाहिता वर्तन्ते कच्चिदिति भावः । अङ्गरक्षकाणामयं धर्मः सुप्रसिद्धः । † कुलपुत्राः—ज्ञातयः—ति. क्षत्रियकुलप्रसूताः, ज्ञातय इति वा—गो. ‡ प्रधानतः—प्रधानाः सार्वविभक्तिकः तसिः—गो. § उक्तमनतिक्रम्य सन्देशप्रतिसन्देशवदनशीलः : कार्योपयोगितया बहुमुखं व्याहरन्नपि स्वाम्युक्तमजहदेव व्यवहरतीति यावत्—गो. ‖ अन्येषु परपक्षेषु अष्टादशतीर्थानि स्वपक्षे पञ्चदशतीर्थानि च । स्वकीयमन्त्रिपुरोहितयुवराजा न परीक्ष्याः, तेषां सदा स्वसमीपवर्तित्वेन तत्स्वभावस्य स्वेनैव ज्ञातत्वात् । तथोक्तं नीतिशास्त्रे—'चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च । पाषण्डादीनविज्ञातानन्योन्यमितरैरपि । मन्त्रिणं युवराजं च हित्वा स्वेषु पुरोहितम्' इति । एषां तीर्थशब्दवाच्यत्वमुक्तं हलायुधे 'योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद्दर्शनेष्वपि' इति—गो. अधिकं तत्रैव द्रष्टव्यम् ॥

[1] दशान्येषु—ङ. [2] चारणैः—ङ.

कच्चिदष्टादशेत्यादि । अष्टादशाख्येषु— अष्टादशसङ्ख्यासङ्ख्येयेषु तीर्थेषु, स्वपक्षे पञ्चदशतीर्थानि, चकारात् परपक्षे सर्वतीर्थानि च । एकस्मिन्नेकस्मिन् विषये नियुक्तैः परस्परमविज्ञातैः त्रिभिस्त्रिभिः चारैः—अपसर्पैः वेत्सि कच्चित्? तीर्थानि तु—मन्त्रिपुरोहितसेनापतियुवराजाः, प्रतिहारी, अन्तर्वंशिकाः, कारागाराधिकृतः, अर्थसञ्चयकृत्, कार्यनियोक्ता, प्राड्विवाकः, सेनाधिनायकः । पश्चात् कर्मान्तिकनगराध्यक्षौ धर्माधिकृच्च सभ्यश्च राष्ट्रान्तदुर्गदण्डपालास्तीर्थं दशाष्टौ च । तत्र प्रतिहारी—दौवारिकः, 'स्त्री द्वार्द्वारं प्रतीहारः' । अन्तर्वंशिक इति । 'अन्तःपुरे त्वधिकृतः स्यादन्तर्वंशिको जनः' । कारागारं—बन्धनालयः । अर्थसञ्चयकृत्—धनाध्यक्षः । कार्यनियोक्ता—राजवचनस्य बहिस्सञ्चारकः । *प्राड्विवाकः—व्यवहारद्रष्टा । सेनाधिनायकः—सेनाया जीवितभृतिदानाध्यक्षः । कर्मान्तिकाः—कर्मान्ते वेतनग्राहिणः । नगराध्यक्षः—पुरपरिपालकः । धर्माध्यक्षः—धर्मासनाधिकृत् । सभ्यः—सभ्यव्यवहारनिर्णेता । राष्ट्रान्तः—इतरराष्ट्रान्तस्वराष्ट्रान्तः—सीमान्तः । दुर्गं—जलगिरिवनस्थलदुर्गम् । दण्डस्तु दुष्टदण्डनम् । पालाः—उक्तपालनाधिकृताः । अत्र मन्त्रिपुरोहितयुवराजव्यतिरिक्ततीर्थपञ्चदशकं स्वदेशे विचार्यम् । परराष्ट्रे मन्त्रिपुरोहितयुवराजाश्च । एभिः स्वाधिकारः न्यायतः प्रवर्तते? अन्यायतो वा? इति विचारणीयमित्यर्थः ॥ ३६ ॥

[1]कच्चिद्व्यपास्तान् अहितान् प्रतियातांश्च [2]सर्वदा ।
दुर्बलाननवज्ञाय वर्तसे, रिपुसूदन! ॥ ३७ ॥

---

* प्राड्विवाकः—व्यवहारद्रष्टा । तल्लक्षणमुक्तं 'विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च । प्रियपूर्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः' इति—गो.

[1] १.चिरमपास्तान्—ङ.   [2] सर्वशः—ङ.

अपास्तान्---निष्कासितान्। प्रतियातान्--पुनः आगतान्, अवज्ञया दुर्बलोऽयमहितः किमस्माकं करिष्यति ! इति उपेक्षां न करोषि कच्चित् !॥ ३७ ॥

*कच्चिन्न लोकायतिकान् ब्राह्मणांस्तात ! सेवसे।
अनर्थकुशला ह्येते बालाः पण्डितमानिनः ॥ ३८ ॥

लोकायतिकान्---लोकः---सर्वलोकसिद्धं प्रत्यक्षप्रमाणमेव अयनं---प्रतिष्ठा अस्त्येषामिति, 'अत इनि ठनौ' इति ठन्, चार्वाकशास्त्रवावदूकान् शुष्कतर्कवावदूकांश्च ब्राह्मणान् न सेवसे कच्चित् ! ब्राह्मणत्वेऽपि तदपरिग्रहहेतुः---अनर्थेत्यादि। हि--यस्मात् परलोकतत्साधनानुष्ठानाभावरूपानर्थप्रतिपादनकुशलाः। तर्हि कौशलमस्ति चेत् क्वचिदपि कथं न ते ग्राह्या इत्यतः---बाला इति। अज्ञाः परमार्थवेदवादिसन्निधाविति शेषः। अत एव पण्डितमानिनः---स्वयुक्त्यैव केवलमात्मनः पण्डितान् मन्यन्ते, नान्यत्र ॥ ३८ ॥

†धर्मशास्त्रेषु मुख्येषु [1]विद्यमानेषु दुर्बुधाः।
बुद्धिमान्वीक्षकीं प्राप्य निरर्थं प्रवदन्ति ते ॥ ३९ ॥

---

* लोकेष्वायतं---विस्तृतं प्रत्यक्षप्रमाणं ; यद्वा लोकायतशब्दाभ्यां प्रत्यक्षमनुमानं चोच्यते। लोकायतिकाः---नास्तिका बौद्धचार्वाकादयः-गो. एतेषां ब्राह्मणत्वं च जन्मतः। † अनर्थकुशलत्वमेवोपपादयति---धर्मशास्त्रेष्विति। दुर्बुधाः---वेदमार्गविपरीत-बुद्धयः ते मुख्येषु---तामसस्मृतिपुराणादिभ्यात्त्वृत्तेषु सात्त्विकमहर्षिप्रणीतेषु सज्जना-दरणीयेषु धर्मशास्त्रेषु---धर्मप्रमापकशास्त्रेषु विद्यमानेषु---तत्संप्रदायपरंपरया पठ्यमानेषु सत्सु आन्वीक्षकीं बुद्धिं प्राप्य---शुष्कतर्कविषयां बुद्धिमास्थाय निरर्थं---निष्प्रयोजनं प्रवदन्ति-गो. धर्मस्यातिसूक्ष्मत्वेन तर्कैः निर्णेतुमशक्यत्वेन, तर्कमवलम्ब्यैव वादकरणे अनर्थ एव पर्यवसानं स्यादिति भावः।

[1] बाध्यमानेषु-ङ.

अथ द्वितीयं लोकायतानामपरिग्राह्यत्वे हेतुमाह—धर्मेत्यादि। मुख्यप्रमाणभूतेषु श्रुतिस्मृतिलक्षणधर्मशास्त्रेषु विद्यमानेष्वपि केचन दुर्बुधाः—दुर्विद्वांसः आन्वीक्षकीं—'आन्वीक्षकी दण्डनीतिः तर्कविद्यार्थशास्त्रयोः', शुष्कतर्कविद्याजनितां बुद्धिमवलम्ब्य निरर्थं—निष्प्रयोजनमेव—मिथ्याप्रयोजनमेव प्रवदन्तीति। न हि षोडशपदार्थज्ञानान्मोक्ष इति काचित् श्रुतिः स्मृतिर्वाऽस्ति। नापि च तत्प्रतिपाद्यजडात्मनः ईश्वरात् भिन्नस्य ज्ञानाद्वा मुक्तिरित्यस्ति। नापि चात्मा जडः, नापीशभिन्नः। नापि चेशो युज्यते तत्प्रकल्प्यमाननित्यज्ञानादिगुणकः जगन्निमित्तमिति। अयं प्रसङ्गः श्रीमत्पञ्चाशिकायामेवावधार्यः। एषामपि लोकायतत्वं सिद्धम्। 'प्रत्यक्षमेकं चार्वाकाः कणादः सौगतः पुनः। अनुमानं च तच्चेति'। ननु! न्यायैकदेशिभिः शब्दोऽप्यङ्गीक्रियते। तत् कथं आन्वीक्षकीबुद्धिमतां विशेषणं लोकायतत्वम्? एकदेशिभिरपि स्वदुर्मताविरुद्धधर्मादिमानः स्वीक्रियते। तद्विरुद्धचित्स्वभावात्मप्रत्यग्ब्रह्माभेदादिकं शाब्दं न स्वीक्रियत एव॥ ३९॥

*वीरैरध्युषितां पूर्वं अस्माकं, तात! पूर्वकैः।
सत्यनामां दृढद्वारां हस्त्यश्वरथसङ्कुलाम्॥ ४०॥

वीरैरित्यादि। सत्यनामामिति। अयोध्येत्यन्वर्थनामवतीमित्यर्थः॥

ब्राह्मणैः क्षत्रियैर्वैश्यैः स्वकर्मनिरतैः सदा।
जितेन्द्रियैर्महोत्साहैः वृतामार्यैः सहस्रशः॥ ४१॥

आर्यैरिति। ब्राह्मणैरित्याद्युक्तरूपैस्त्रैवर्णिकैरित्यर्थः॥ ४१॥

---

* वीरैरित्यादिश्लोकत्रयमेकं वाक्यम्। पूर्वं यतादृशीं अयोध्यां समुदितां स्फीतां परिरक्षसि कच्चित्—प्राक्तनवैभवादेर्लोपो यथा न भवेत् तथा रक्षसि किम्?

प्रासादैर्विविधाकारैः वृतां [1]वैद्यजनाकुलाम् ।
कच्चित् [2]समुदितां स्फीतां अयोध्यां परिरक्षसि ॥ ४२ ॥

वैद्याः—प्राज्ञ्याकृताः । समुदितां—प्रसिद्धाम् । स्फीतां—समृद्धाम् ॥ ४२ ॥

*[3]कच्चिच्चित्यशतैर्जुष्टः सन्निविष्टजनाकुलः ।
देवस्थानैः प्रपाभिश्च तटाकैश्चोपशोभितः ॥ ४३ ॥

अथ जनपदकुशलप्रश्नः—कच्चिच्चित्येत्यादि । चित्यशतैः—अश्वमेधान्तमहायागानेकचयनप्रदेशैः । सन्निविष्टैः—संप्रतिष्ठितैः जनैः आकुलः—निबिडः तथा ॥ ४३ ॥

†[4]प्रभिन्ननरनारीकः समाजोत्सव[5]शोभितः ।
सुकृष्टसीमा[6]पशुमान् हिंसाभिः परिवर्जितः ॥ ४४ ॥

प्रभिन्नेति । प्रभेदः—सन्तोषः । सुकृष्टाः सीमाः—तत्तत्क्षेत्रप्रदेशाः पशवश्च यस्मिन् स तथा ॥ ४४ ॥

अदेवमातृको रम्यः श्वापदैः परिवर्जितः ।
परित्यक्तो ‡ भयैः सर्वैः खनिभिश्चोपशोभितः ॥ ४५ ॥

अदेवमातृक इति । नदीमातृक इत्यर्थः । खनिः—स्वर्णरत्नाद्याकरः ॥ ४५ ॥

---

* एतदादिश्लोकचतुष्टयमेकं वाक्यम् । एतादृशो जनपदः सुखं वसति कच्चिदित्यन्वयः । अत्र आदावन्ते च कच्चिच्छब्दप्रयोगात् प्रतिविशेषणं प्रत्येकं प्रश्नो गम्यते । आदरातिशयाच्च तथा प्रश्न इति गोविन्दराजः । † 'प्रभिन्नो गर्जितो मत्तः', मत्तनरनारीकः, अतिपुष्टहृष्टनरनारीक इति यावत् । ‡ पूर्वार्धे दुष्टमृगोपलक्षकश्वापदप्रयोगात् भयमत्र चोरादिभ्यो विवक्षितम् ।

[1] सन्य—ङ. [2] सुमुदितां—ङ. [3] कच्चिच्चैत्य—ङ. च. [4] प्रहृष्ट—ङ. च. [5] सेवितः—ङ. [6] शुचिमान्—ङ.

त्रिवर्जितो नरैः पापैः मम पूर्वैः सुरक्षितः।
कच्चिज्जनपदः स्फीतः सुखं वसति, राघव ! ॥ ४६ ॥

कच्चित्ते दयिताः सर्वे कृषिगोरक्षजीविनः।
* वार्तायां [1] संस्थितः, तात ! [2] लोको हि सुखमेधते ॥

वार्तायां—'कृषिगोरक्ष्यवाणिज्यक्षेत्रं वार्तेत्युदाहृतम्'। लोकः–कृष्यादिजीविलोकः वार्तायां कृष्यादौ संस्थितः––प्रवृत्तः सन सुखमेधते कच्चित् ! ॥ ४७ ॥

† तेषां गुप्तिपरीहारैः कच्चित्ते भरणं कृतम्।
रक्ष्या हि राज्ञा धर्म्येण सर्वे विषयवासिनः॥ ४८ ॥

तेषां––कृष्यादिजीविनां गुप्तिपरिहारैः––गुप्त्यर्थनियुक्तैः राजमनुष्यैः क्रियमाणैः तस्करपीडादुर्बलपीडादुर्व्यवहाराद्यनर्थपरिहारैः हेतुभिः ते––त्वया भरणं कृतं कच्चित् ? ॥ ४८ ॥

‡ कच्चित् स्त्रियः सान्त्वयासि [3] कच्चित्तास्ते सुरक्षिताः।
कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे § ॥ ४९ ॥

तास्त इति। ताः स्त्रियः त्वयेत्यर्थः। न श्रद्दधास्यासामिति। वचनादिकं, वास्तवमिति शेषः। आसां गुह्यं न भाषस इति। अप्रकाश्यवृत्तान्तं दुष्टेति मत्वा न भाषसे कच्चित् ? ॥ ४९ ॥

---

* 'वार्ता तु जीवनम्'; कृषिगोरक्षादिजीवनोपायनिष्ठो हि लोकः सुखं वसेत्। † गुप्तिपरीहारैः—इष्टप्रापणानिष्टनिवारणैः–गो. ‡ स्त्रियः—स्वस्त्रियः–गो. § गुह्यं न भाषसे, ताभ्य इति शेषः, स्त्रीणामतिचञ्चलमतित्वेन रहस्यभेदप्रसङ्गादिति भावः–गो.

[1] सांप्रतं–च. [2] लोकोऽयं–च. [3] कच्चित्ताश्च–ङ.

कच्चिन्नागवनं गुप्तं कच्चित्ते सन्ति *धेनुकाः ।
कच्चिन्न गणिकाश्वानां कुञ्जराणां च तृप्यसि ॥ ५० ॥

नागवनं — गजोत्पत्तिकाननम् । धेनुकाः — कामधेनवः, स्वार्थे कः । गणिकाश्वानामिति । करिण्यः—गणिकाः, 'वेश्याकरिण्योर्गणिका' वैजयन्ती, करिण्यादिसंपादनविषये तृप्तिं नाप्नोषि कच्चित्? ॥ ५० ॥

कच्चिद्दर्शयसे नित्यं मनुष्याणां †विभूषितम् ।
उत्थायोत्थाय पूर्वाह्ने, राजपुत्र! ‡[1]महापथे ॥ ५१ ॥

दर्शयस इति । सभायां स्थित्वाऽऽत्मानमिति शेषः । उत्थायेति । अन्तःकक्ष्येभ्य इति शेषः ॥ ५१ ॥

§कच्चिन्न सर्वे कर्मान्ताः प्रत्यक्षास्तेऽविशङ्कया ।
सर्वे वा पुनरुत्सृष्टाः मध्यमेवात्र कारणम् ॥ ५२ ॥

अविशङ्कया—निर्भयतया प्रत्यक्षाः—त्वत्सन्निधिं प्राप्ताः न कच्चित्? अथवा सर्वे कर्मान्तिकाः पुनरुत्सृष्टाः—दर्शनाप्रदानेन परित्यक्ता न? अत्र—कर्मान्तिकविषये मध्यमेव—नातिदर्शनात्यदर्शनयोर्मध्यमरीत्याश्रयणमेव कारणं—अर्थप्राप्तिकारणम् ॥ ५२ ॥

---

*धेनुकाः—करिण्यः, 'करिणी धेनुका वशा' इत्यमरः। गणिकाश्वानां—गणिकाः—करिण्यः, 'वेश्याकरिण्योर्गणिका' इति वैजयन्ती–गो. यद्यपि पूर्वार्धे अश्वा न निर्दिष्टाः, अथापि ते अपि उपलक्षिता इत्यभिप्रायेण उत्तरार्धे गज-करिणी-अश्वाः—निर्दिष्टाः । †प्रतिदिनं राजवीथ्यां विभूषितं आत्मानं प्रजानुरागाय दर्शयसे कच्चित् । ‡महापथे—सभामार्गमिति यावत्-गो. §कर्मकाराः सर्वे स्वातन्त्र्येण भवन्तं नोपसर्पन्ते कच्चित्, तथाऽपि भवता ते अतीवौदासीन्येन विलोकिता न कच्चित्। मध्यमरीतिरनुष्ठियते वा—इति भावः ।

[1] महारथ–ङ.

कच्चित् सर्वाणि * दुर्गाणि धनधान्यायुधोदकैः ।
यन्त्रैश्च [1] परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥ ५३ ॥

आयस्ते विपुलः कच्चित् कच्चिदल्पतरो व्ययः ।
† अपात्रेषु न ते कच्चित् कोशो गच्छति, राघव ! ॥ ५४ ॥

आयः—धनागमः । व्ययः—भोगबलादिरक्षायै त्यागः । अपात्रेषु—नटगायकादिषु ॥ ५४ ॥

‡ देवतार्थे च पित्रर्थे ब्राह्मणाभ्यागतेषु च ।
योधेषु मित्रवर्गेषु कच्चिद्गच्छति ते व्ययः ॥ ५५ ॥

व्यय इति । आयात् न्यून इति शेषः ॥ ५५ ॥

कच्चिदार्यो विशुद्धात्माऽऽक्षारित [2] श्चापकर्मणा § ।
[3] अपृष्टः शास्त्रकुशलैः न ‖ लोभात् वध्यते शुचिः ॥ ५६ ॥

कच्चिदार्य इत्यादि । आर्यः—साधुः विशुद्धात्माऽपि सन् अपकर्मणा — स्तेयागम्यागमनादिदोषेण आक्षारितः — अभिशस्तः शास्त्रकुशलैः—धर्मशास्त्रनिष्णातैः अपृष्टस्सन् लोभात् शुचिरपि सन् न वध्यते—न दण्डयते कच्चित् ? ॥ ५६ ॥

---

* अत्र कामन्दकः—'औदकं पार्वतं वार्क्षं ऐरिणं धान्वनं तथा । जलान्तायुधयन्त्राढ्यं वीरयोधैरधिष्ठितम् । गुप्तिप्रधानमाचार्याः दुर्गं समनुमेनिरे' इति–गो. † अपात्रेषु—नटविटगायकेषु, तेभ्योऽपरिमितं न देयमिति भावः–गो. केवलक्रीडाव्यसनवान् मा भवेति यावत् । ‡ धनव्ययस्योचितं पात्रमाह—देवतार्थ इति । § यदृच्छया चोरकर्मणा (पाठान्तरं) आक्षारितः–अभिशस्तः–गो. अत्र विशुद्धात्मा इत्यनेनात्मशुद्धिः, शुचिः इत्यनेन प्रकृतिशुद्धिश्च कथिता, तेन न पौनरुक्त्यम् । ‖ 'लुभ विमोहने' इति धातोः–व्यामोहादित्यर्थो वा ।

[1] प्रतिपूर्णानि–च. [2] श्चोरकर्मणा–ङ. [3] अदृष्टः–च.

गृहीतश्चैव पृष्टश्च काले दृष्टः सकारणः ।
कच्चिन्न मुच्यते चोरः धनलोभात्, नरर्षभ ! ॥ ५७ ॥

गृहीत इत्यादि । सकारणः—चोरत्वेन ग्रहणकारणसहित-स्सन् दृष्टः, अत एव गृहीतः पालकैः पृष्टश्चैव—किं किमचूचुर इति कृतप्रश्नश्च चोरः धनलोभात्—चोरेणैवोत्कोचतया दीयमानधन-लोभात् पालकैः न मुच्यते कच्चित् ? ॥ ५७ ॥

***[1] व्यसने कच्चिदाढ्यस्य [2] दुर्गतस्य च, राघव !**
† अर्थं विरागाः पश्यन्ति तवामात्या बहुश्रुताः ॥ ५८ ॥

व्यसन इत्यादि । आढ्यस्य—धनिनः दुर्गतस्य वा व्यसने—क्षेत्रवित्तादिविनाशकृच्छ्रे राजकीयैकनिवर्त्ये तयोः अर्थं—कार्यं बहुश्रुताः तवामात्याः विरागाः—धनस्पृहारहितास्सन्तः धनिदरिद्राविशेषं पश्यन्ति—विचारयन्ति कच्चित् ? ॥ ५८ ॥

‡ यानि मिथ्याभिशस्तानां [3] पदन्यासानि, राघव !
तानि पुत्रपशून् घ्नन्ति § प्रीत्यर्थमनुशासतः ॥ ५९ ॥

यानीत्यादि । मिथ्याभिशस्तानां—राज्ञा च विचार्यानिवर्तित-मिथ्याभियोगानां—प्रजानां यानि पदन्यासानि सन्ति, छान्दसं

---

* आढ्यदरिद्रयोः परस्परं व्यवहारे प्राप्ते तव अमात्याः, आढ्यप्रभावापरवशाः, दरिद्रदुर्गतिदीना वा भूत्वा माध्यस्थ्यं अत्यजन्तः धर्ममात्रं पश्यन्ति कच्चिदिति भावः । † अर्थं—व्यवहारं, 'अर्थः स्यात् विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु' इति वैजयन्ती–गो. ‡ पूर्वापरानुरूप्यादिपरिशीलने अस्य श्लोकस्य 'कच्चिदार्यो विशुद्धात्मा' इतिश्लोकानन्तर्यं औचित्यातिशयः प्रतिभाति । § स्वेष्टसंपत्त्यर्थमिति यावत् ।

[1] व्यसनेः–ङ. [2] दुर्बलस्य–च. [3] पतन्त्यस्राणि—पतन्त्यश्रूणि–ङ.

नपुंसकं, तानि प्रीत्यर्थं—राजभोगजप्रीतिप्राप्तिमात्रप्रयोजनायानुशासतो राज्ञः पुत्रपशून् घ्नन्ति ॥ ५९ ॥

कच्चिद् वृद्धांश्च बालांश्च [1]वैद्यमुख्यांश्च, राघव !
*दानेन मनसा वाचा त्रिभिरेव बुभूषसे ॥ ६० ॥

वैद्यमुख्याः—भिषक्छ्रेष्ठाः। त्रिभिरेवेति। त्रिभिः प्रत्येकमेव बुभूषसे—संभाषितुमिच्छसि ? अन्तर्भावितणिः ॥ ६० ॥

कच्चिद्गुरूंश्च वृद्धांश्च तापसान् देवताऽतिथीन्।
†[2]चैत्यांश्च सर्वान् [3]सिद्धार्थान् [4]ब्राह्मणांश्च नमस्यसि ॥

चैत्यान्—चतुष्पथान्। सिद्धार्थान्—विद्याव्रततपोभिः कृतार्थितजन्मनः ॥ ६१ ॥

कच्चिदर्थेन वा धर्मं अर्थं धर्मेण वा पुनः।
उभौ वा ‡[5]प्रीतिलोभेन कामेन च न बाधसे ॥ ६२ ॥

अर्थेनेत्यादि। अर्थप्राप्तिरूपेण हेतुना धर्मं न बाधसे कच्चित्—धर्मं हित्वा अर्थं न गृह्णासि कच्चिदित्यर्थः। तथा धर्मेण—धर्मप्राप्तिहेतुना कुटुम्बनिर्वाहापेक्षितमर्थं—वित्तं न बाधसे—धर्मार्थावुभावपि प्रीतिलोभेन विषयसन्तोषलोभेन च न बाधसे ! गणिकादिसक्तौ उभयमपि नश्यति ॥ ६२ ॥

---

* दानेन—अभिमतवस्तुप्रदानेन मनसा—स्नेहेन वाचा—सान्त्ववचनेन एतैस्त्रिभिः बुभूषसे—प्राप्तुमिच्छसि वशीकर्तुमिच्छसि कच्चिदिति यावत्। भू प्राप्तौ—गो.

† चैत्यान्—देवतावासभूतचतुष्पथस्थमहावृक्षान्—गो. ति. ‡ प्रीतिलोभेन—सुखाभिलाषेण हेतुना कामेन—गो. विषयसन्तोषलोभरूपेण कामेन—ति. धर्मकामार्थान् परस्पराबाधेन सेवसे कच्चिदिति यावत्।

[1] वैद्यान् मुख्यांश्च—च. [2] देवांश्च—ङ. [3] सिद्धांश्च—ङ. [4] ब्राह्मणांश्चानुमन्यसे—ङ. [5] प्रीतियोगेन—ङ.

*कच्चिदर्थं च धर्मं च कामं च, जयतां वर!
विभज्य काले, कालज्ञ! सर्वान्, [1]वरद! सेवसे ॥ ६३ ॥

विभज्य सेवस इति। धर्मस्य नित्यदानादिधर्मसेवायाः कालः प्रातः। अर्थस्य तु तदनन्तरं आस्थान्यां राज्यविचारकालः सेवाकालः। निशि यामात्परः कामसेवाकालः ॥ ६३ ॥

कच्चित्ते [2]ब्राह्मणाः शर्म सर्वशास्त्रार्थ[3]कोविदाः।
[4]आशंसन्ते, महाप्राज्ञ! पौरजानपदैः सह ॥ ६४ ॥

'शर्म जोषं च शं सुखम्', शर्म आशंसन्ते–सुखं प्रार्थयन्ते इत्यर्थः ॥ ६४ ॥

नास्तिक्यमनृतं† क्रोधं प्रमादं दीर्घसूत्रताम्।
[5]अदर्शनं ज्ञानवतां आलस्यं पञ्चवृत्तिताम् ॥ ६५ ॥
एकचिन्तनमर्थानां अनर्थज्ञैश्च मन्त्रणम्।
निश्चितानामनारंभं मन्त्रस्यापरिरक्षणम् ॥ ६६ ॥
‡[6]मङ्गलाद्यप्रयोगं च प्रत्युत्थानं च [7]सर्वशः।
कच्चित् त्वं वर्जयस्येतान् राजदोषांश्चतुर्दश ॥ ६७ ॥

---

*प्रातर्दानादिधर्मकालः, तदनन्तरं, आस्थान्यां राज्यविचारेणार्थकालः, रात्रौ कामकाल इत्येवं विभज्य सेवसे कच्चित्–गो. पूर्वश्लोके 'न बाधसे' इति, अत्र 'सर्वान् वरद सेवसे' इति च कथनात्—पूर्वश्लोके परस्परबाधाभावः, अत्र भ्रान्तिदौर्बल्यादिनाऽन्यतमस्यात्यागश्च विवक्षित इति प्रतिभाति। †क्रोधः—अस्थानकालयोः। दीर्घसूत्रता –कार्यविलम्बः, आलस्यं तु कायघातकं करणानौन्मुख्यम्; मातापित्राचार्यब्राह्मणदुर्बलादिषु कृतापराधेष्वपि तद्विषयकं क्रोधम्–गो. ‡मङ्गलस्य—प्रातर्दर्पणघृतालोकनस्य अप्रयोगं—अननुष्ठानम्। मङ्गलान्यप्रयोगमिति पाठे अमङ्गलाचरणमित्यर्थः। सर्वतः प्रत्युत्थानं—नीचस्यानीचस्याप्यागमने प्रत्युत्थानमित्यर्थः। यद्वा: सर्वदिगवस्थितशत्रूद्देशेन युगपद्दण्डयात्रामिति वा–गो.

[1] भरत–ङ. [2] ब्राह्मणः–च. [3] कोविदः–च [4] आशंसते–च. [5] अमाननं च साधूनां–ङ. [6] मङ्गलस्याप्रयोगं–ङ. च., मङ्गलान्यप्रयोगं–ङ. [7] सर्वतः–ङ.

नास्तिकस्य भावः—नास्तिक्यम्। दीर्घसूत्रता—प्रक्रान्तकार्यविलम्बनम्, 'दीर्घसूत्रश्चिरक्रियः'। ज्ञानवतां—विदुषां अदर्शनम्। आलस्यं—नित्यकृत्यालस्यम्। नृत्तादिभिः चक्षुरादिपञ्चेन्द्रियवृत्तितृप्तिपरता—पञ्चवृत्तिता। अर्थानां—राज्यप्रयोजनानां एकचिन्तनं—अमन्त्रिसहायतया चिन्तनम्। निश्चितानां—मन्त्रिभिः सह संमन्त्र्य निश्चितानां अनारम्भः—अनुद्योगः। मङ्गलाद्यप्रयोगः—मङ्गलस्य आदौ—प्रातःकाले अप्रयोगः—अननुष्ठानम्। सर्वशः प्रत्युत्थानमिति। यं कञ्चन प्रत्युत्थानायोग्यं पुरुषमुद्दिश्यापि प्रभावं मत्वा चापल्यादासनाचलनमित्यर्थः ॥ ६५–६७ ॥

***दश पञ्च चतुर्वर्गान् सप्तवर्गं च तत्त्वतः।**
अष्टवर्गं त्रिवर्गं च विद्यास्तिस्रश्च, राघव! ॥ ६८ ॥

दश पञ्चेत्यादि। दशवर्गादीन् बुध्वा यथावत् अनुमन्यसे—अनुजानासि इत्यग्रेण सम्बन्धः। दशवर्गस्तु † 'मृगयाऽक्षौ दिवास्वप्नः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाऽट्या च कामजो दशको गुणः' इति मनुः। तौर्यत्रिकं—नृत्तगीतवाद्यम्। वृथाऽट्या—यथेच्छपर्यटनम्। शेषः स्पष्टः। पञ्चवर्गस्तु—'औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा। इति दुर्गं पञ्चविधं पञ्चवर्ग उदाहृतः'‡ इरिणं—औषरं सर्वसस्यशून्यप्रदेश इत्यर्थः, तत्सम्बन्धी ऐरिणं दुर्गम्। तादृश-

---

* श्लोकत्रयमेकं वाक्यम्। † कामन्दकस्तु प्रकारान्तरेण—'लोभक्रोधालस्यासत्यवचनत्वप्रमादभीरुत्वास्थिरत्वमौढ्यानयावमन्तृत्वानि दशवर्गः' इत्याशयेनाह—'लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः। मूढोऽनयोऽवमन्ता च सुखच्छेद्यो रिपुर्मतः' इति–गो. ‡ यद्वा पञ्चवर्गः—पञ्चविधवैराणि; अत्रापि कामन्दकः 'सापत्नं वस्तुजं स्त्रीजं वाग्जातमपराधजम्। वैरप्रभेदान्निपुणैः वैरं पञ्चविधं स्मृतम्' इति–गो.

स्थलमपि परेण गन्तुमशक्यत्वात् दुर्गम्। अयं तु उष्णकालमपेक्ष्य दुर्गो भवति। इतरद्दुर्गत्रयं सर्वप्रसिद्धम्। चतुर्वर्गस्तु 'साम दानं च भेदश्च दण्डश्चेति चतुर्गुणः'*। सप्तवर्गस्तु—'स्वाम्यमात्याश्च राष्ट्रं च दुर्गकोशौ बलं सुहृत्। परस्परोपकारीदं राज्यं सप्ताङ्गमुच्यते'†। अष्टवर्गस्तु—'पैशुन्यं साहसं द्रोहं ‡ईर्ष्याऽसूयाऽर्थदूषणम्। वाग्दण्डयोश्च पारुष्यं क्रोधजोऽपि गुणोऽष्टकः' § वाक्पारुष्यं परुषदण्डत्वं च द्वयम्। त्रिवर्गस्तु—'त्रिवर्गो धर्मकामार्थैः' इति। तथा उत्साहप्रभुमन्त्रशक्तित्रयोऽपि त्रिवर्गः‖। त्रिविद्यास्तु त्रयीवार्तादण्डनीतयः¶। त्रयी—वेदाः, वार्ता—कृष्यादित्रयम्, दण्डनीतिः—नीतिशास्त्रम्॥ ६८॥

---

*यद्वा चतुर्विधमित्राणि वा। यथाऽऽह कामन्दकः 'औरसं तन्तुसम्बन्धं तथा वंशक्रमागतम्। रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम्' इति। यद्वा धनानां न्यायार्जनादिधर्मचतुष्टयं वा। तदपि तत्रैवोक्तम् 'न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा। सत्पात्रे प्रतिपत्तिश्च राज्यवृत्तं चतुर्विधम्' इति–**गो.** †यद्वा स्वपक्षस्थजनावान्तरभेदसप्तकं वा। यथाऽऽह 'निजोऽथ मैत्रश्च समाश्रितश्च सुबन्धुजः कायसमुद्भवश्च। भृत्यो गृहीतो त्रिविधोपचारैः पक्षं बुधाः सप्तविधं वदन्ति' इति। यद्वा प्रधानव्यूहाः सप्त वा सप्तवर्गः। यथा 'श्येनः सूची च वज्रश्च शकटो मकरस्तथा। दण्डव्यूहः पद्मनामा च व्यूहाः सप्त प्रधानतः' इति–**गो.** ‡ईर्ष्या–असहना–असूया—गुणेष्वपि दोषारोपः। §अष्टवर्गमाह कामन्दकः 'कृषिवाणिज्यदुर्गाणि सेतुः कुञ्जरबन्धनम्। खन्याकरकरादानं शून्यानां च निवेशनम्। अष्टवर्गमिमं साधु स्वस्थवृत्तो न लोपयेत्' इति–**गो.** ‖यद्वा परेषां क्षयस्थानवृद्धयः 'क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्' इत्यमरः। यद्वा अशक्यसमुद्यमादिकार्यव्यसनत्रयम्। यथाऽऽह कामन्दकः 'वस्तुष्वशक्येषु समुद्यमश्च शक्येषु मोहादसमुद्यमश्च। शक्येष्वकालेषु समुद्यमश्च त्रिधैव कार्यं व्यसनं वदन्ति' इति–**गो.** ¶'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च' इति विद्याश्चतुर्विधाऽपि आन्वीक्षिक्यास्त्रय्यामन्तर्भावः। यथाऽऽह कामन्दकः—'त्रयी वार्ता दण्डनीतिरिति विद्या हि मानवाः। त्रय्या एव विशेषोऽयमियमान्वीक्षिकी मता' इति–**गो.**

इन्द्रियाणां जयं बुध्वा षाड्गुण्यं दैवमानुषम् ।
कृत्यं विंशतिवर्गं च तथा प्रकृतिमण्डलम् ॥ ६९ ॥

इन्द्रियाणां जयमिति । जयोपायमित्यर्थः । इन्द्रियजयोपायो योग एव । षड्गुणा एव षाड्गुण्यम् । तत्तु—'सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः' इति । द्वैधं—शत्रुवर्गाणामुपजापः । दैव-मानुषव्यसने तु—'हुताशनो जलं व्याधिः दुर्भिक्षं मरकस्तथा' इति । मरकः—तन्निमित्तं मार्यादि । 'आयुक्तकेभ्यश्चोरेभ्य परेभ्यो राजवल्लभात् । पृथिवीपतिलोभाच्च व्यसनं मानुषं त्विदम्' । आयुक्ताः—अधिकारिणः । अथ कृत्यवर्गं तु—'अलब्धवेतनो लुब्धः मानी चाप्यवमानितः । क्रुद्धश्च कोपितोऽकस्मात् तथा भीतश्च भीषितः । भेद्याः शत्रैस्तु चत्वारः नृपकृत्यमिदं मतम्' । अथ विंशतिवर्गः *—'राज्यस्त्रीस्थानदेशानां ज्ञातीनां च धनस्य च । अपहारो मदो मानः पीडा वैषयिकी तथा ॥ ज्ञानार्थशक्तिधर्माणां विघातो दैवमेव च । मित्रार्थयोश्चापमानः तथा बन्धुविनाशनम् । भूतानुग्रहविच्छेदः तथा मण्डलदूषणम् । एकार्थाभिनिवेशित्वं विंशति-र्विग्रहास्पदम्' । अत्र अपहारशब्दः पूर्वैः षड्भिस्सह सम्बध्यते । विघातशब्दश्चतुर्भिः । अवमानशब्दस्य मित्रशब्देन अर्थशब्देन च

---

* यथाऽह कामन्दकीये—'बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः । भीरुको भीरुजनको लुब्धो लुब्धजनस्तथा । विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः । दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्ष-व्यसनोपेतो बलव्यसनसंकुलः । अदेशस्थो बहुरिपुः युक्तोऽकालेन यश्च यः । सत्यधर्म-व्यपेतश्च विंशतिः पुरुषा अमी । एतैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलम्' इति—गो. भीरवः जनाः—मन्त्रिसेनापतियोधाः यस्य सः—भीरुजनकः । दैवाचिंतकः—दैवमेव सर्वं कुर्यादिति मत्वा पुरुषव्यापारमकुर्वाणः ।

सम्बन्धः । भूतानुग्रहविच्छेदः—लोकानुग्रहराहित्यम् । अथ प्रकृतयः प्रकृतिमण्डलं च तथा । प्रकृतयस्तु—'अमात्या राष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः । एताः प्रकृतयस्तज्ज्ञैः विजिगीषोरुदाहृताः' इति कामन्दकः । *मण्डलं—द्वादशराजमण्डलम् । तत्तु—'अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् । मित्रारिमित्रं मित्रं च विजिगीषोः पुरस्सराः ॥ पार्ष्णिग्राहः ततः पश्चात् आक्रन्दस्तदनन्तरः । आसारपृष्ठभागस्थौ मध्यमोदासिनाविति । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोः व्यस्तयोर्निग्रहे प्रभुः । मण्डलात् बहिरेतेषां उदासीनो बलाधिकः' इति ॥ ६९ ॥

---

* मण्डलं द्वादशविधराजात्मकम् । मध्यतो विजिगीषुः । तस्य शत्रुः मित्रं शत्रोर्मित्रं मित्रमित्रं शत्रुमित्रमित्रं चेति पुरोवर्तिनः पञ्च । पार्ष्णिग्राहः आक्रन्दः पार्ष्णिग्राहासारः—आक्रन्दासारश्चेति पृष्ठभागस्थाश्चत्वारः । पार्श्वस्थो मध्यमः । तेषां बहिरवस्थित उदासीनश्चेति । तथा च कामन्दकः—'संपन्नस्तु प्रकृतिभिः महोत्साहः कृतश्रमः । जेतुमेषणशीलश्च विजिगीषुरिति स्मृतः । अरिर्मित्रं अरेर्मित्रं मित्रमित्रमतः परम् । तथाऽरिमित्रमित्रं च विजिगीषोः पुरस्सराः । पार्ष्णिग्राहस्ततः पश्चात् आक्रन्दस्तदनन्तरः । आसारावनयोश्चैव विजिगीषोस्तु पृष्ठतः । अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः । अनुग्रहे संहतयोः व्यस्तयोर्निग्रहे प्रभुः । मण्डलाद्बहिरेतेषां उदासीनो बलाधिकः । अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः' इति । अत्र शत्रुमित्रशब्देन पुरस्तादव्यवहितानन्तरराष्ट्राधिपतिं एकव्यवहितानन्तरराष्ट्राधिपतिं च क्रमेण वदतः । पार्ष्णिग्राहाक्रन्दशब्दावपि पृष्ठतस्तादृशौ क्रमेण वदतः, न तु प्रसिद्धशत्रुमित्रपरौ । आसारः—सुहृद्बलम् । 'आसारः स्यान्मित्रबले' इति रत्नमाला । मध्यमशब्देन च अरिविजिगीषोः व्यस्तयोः समस्तयोश्च निग्रहानुग्रहसमर्थः पार्श्वदेशस्थः कश्चित् उक्तेभ्योऽन्यो राजोच्यते । न तु मध्यवर्ती । उदासीनशब्देन च एतेषां सर्वेषामपि व्यस्तानां समस्तानां च निग्रहानुग्रहसमर्थः कश्चिद्विप्रकृष्टदेशस्थो राजोच्यते—गो.

यात्रादण्डविधानं च द्वियोनी सन्धिविग्रहौ ।
कच्चिदेतान्, महाप्राज्ञ ! यथावदनुमन्यसे ॥ ७० ॥

यात्रा—यानम्। तत् पञ्चविधम्— तथा कामन्दकः—'विगृह्य सन्धाय तथा संभूयाथ प्रसङ्गतः । उपेक्ष्य चेति निपुणैः यानं पञ्चविधं मतम्' इति । विगृह्य यानमित्यादिना यानशब्दस्य प्रत्येकं सम्बन्धः । बलवत्तया पार्ष्णिग्राहादिभिर्विगृह्य अन्यत्र शत्रौ यानं विगृह्य यानम् । तत्सन्धायान्यत्र यानं–सन्धाययानम् । सामन्तैस्सह यानं–संभूययानम् । अन्यं प्रति यातस्य अन्यं प्रति यदृच्छया यानं–अन्यत्रयानम् । अन्यप्रसंगं कृत्वा बलवत्तया शत्रुमुपेक्ष्य तस्य मित्रेषु यानं–उपेक्ष्ययानम् । दण्डविधानमिति । दण्डः–सेना, तस्य विधानं–व्यूहभेदविधानम् * । 'दण्डो यमे मानभेदे लगुडे मदसैन्ययोः' । 'द्वियोनी सन्धिविग्रहौ' इति † । सन्धिविग्रहयानेत्यादिना षोढा पठितषड्गुणानां मध्ये सन्धिविग्रहौ इतरेषां चतुर्णां योनी । द्वैधीभावसमाश्रयौ सन्धियोनिकौ, यानासने तु विग्रहयोनिके इत्यर्थः । यथावदनुमन्यस इति । उक्तदश-

---

* यद्वा दण्डः—शत्रुनिरसनं, तस्य विधानं—प्रकारः । यात्रा च दण्डविधानं च यात्रादण्डविधानं ; प्रकृतिमण्डलं इत्यत्रापि च एकवद्भावः–गो. † सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाः षड्गुणाः पृथक्पृथक् प्रतिपादिताः । इदानीं द्वैगुण्यमतावलम्बनेन यानादीन् सन्धिविग्रहयोरन्तर्भाव्य वदति । यानासने विग्रहस्य स्वरूपम्, द्वैधीभावसमाश्रयौ सन्धेरूपम् । तत्र विजिगीषोः अरिं प्रति यात्रा यानम्, तयोर्मिथःप्रतिबद्धशक्त्योः कालप्रतीक्षया तूष्णीमवस्थानं आसनम् । दुर्बलस्य प्रबलयोः द्विषतोः वाचिकमात्मसमर्पणं द्वैधीभावः । तथाऽह—'बलिनोर्द्विषतोर्मध्ये वाचाऽत्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः' इति । अरिणा पीड्यमानस्य बलवदाश्रयणं समाश्रय इति विवेकः । तदुक्तं कामन्दकेन—'यानासने विग्रहस्य रूपं सद्भिरिति स्मृतम् । सन्धेश्च सन्धिमार्गज्ञैः द्वैधीभावसमाश्रयौ' इति–गो.

वर्गादीनां तत्त्वं ज्ञात्वा तत्र ये हेयाः, तान् जहासि? ग्राह्यान् गृह्णासि कच्चित्? इत्यर्थः ॥ ७० ॥

मन्त्रिभिस्त्वं *[1]यथोद्दिष्टं चतुर्भिस्त्रिभिरेव वा ।
कच्चित् समस्तैर्व्यस्तैर्वा मन्त्रं मन्त्रयसे[2] मिथः ॥ ७१ ॥

यथोद्दिष्टमिति । नीतिशास्त्रोक्तमन्त्रविचारमार्गमनतिक्रम्ये-त्यर्थः । व्यस्तैः—क्रमशःप्राप्तैः, तथा समस्तैः—संभूयप्राप्तैर्वा मिथः—रहसि मन्त्रं मन्त्रयसे कच्चित्? सर्वथा नैकाकी मन्त्रयसे? इति यावत् ॥ ७१ ॥

कच्चित्ते सफला वेदाः कच्चित्ते सफलाः क्रियाः† ।
कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतम् ॥ ७२ ॥

वेदाः सफला इति । अग्निहोत्रादिकर्मप्रवर्तनेनेति शेषः । ते क्रियाः—आरब्धसन्धिविग्रहादिराजकार्याणि तत्तदुद्देश्यफलयुक्तानि कच्चित्? दाराः सफला इति । धर्मरतिप्रजालक्षणप्रयोजनवन्त इति यावत् । श्रुतं—बहुश्रुतं, तस्य साफल्यं विनीतत्वम् ॥ ७२ ॥

[3]कच्चिदेष्वेव ते बुद्धिः यथोक्ता मम, राघव!
‡आयुष्या च यशस्या च धर्मकामार्थसंहिता ॥ ७३ ॥

एष्वेवेति । यथोक्ता मम धर्मबुद्धिः येष्वेव राजधर्मेषु प्रतिष्ठिता, तेष्वेव तवापि बुद्धिः प्रतिष्ठिता कच्चित्? यथोक्ता बुद्धिश्च आयुष्या—दीर्घायुष्करी, तथा यशस्या ॥ ७३ ॥

---

* यथोद्दिष्टैः—शास्त्रोक्तमन्त्रिलक्षणलक्षितैः-गो. † क्रियन्ते-साध्यन्त इति क्रियाः धनानि-गो. ‡ आयुष्या यशस्या—धर्मकामार्थसंहिता उक्ता एषा बुद्धिः मम यथा, तथैव तव वर्तते कच्चित्-गो.

[1] यथोद्दिष्टैः-ङ. [2] बुध-च. [3] कच्चिदेषा च-ङ. कच्चिदेषैव-ङ. च.

*यां वृत्तिं वर्तते तातः यां च नः प्रपितामहाः ।
तां वृत्तिं वर्तसे कच्चित् या च सत्पथगा शुभा ॥ ७४ ॥

सत्पथगा—शिष्टानुष्ठानमार्गगा ॥ ७४ ॥

कच्चित् स्वादुकृतं भोज्यं एको नाश्नासि, राघव !
कच्चिदाशंसमानेभ्यः† मित्रेभ्यः संप्रयच्छसि ॥ ७५ ॥

स्वादुतया कृतं—सिद्धं—स्वादुकृतम् । आशंसमानेभ्यः—स्नेहवृद्धिमपेक्षमाणेभ्यः मित्रेभ्यः—स्निग्धेभ्यः ॥ ७५ ॥

राजा तु धर्मेण हि पालयित्वा ‡
[1] महामतिर्दण्डधरः प्रजानाम् ।
अवाप्य कृत्स्नां वसुधां यथावत्
इतश्च्युतः स्वर्गमुपैति विद्वान् ॥ ७६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे शततमः सर्गः

इतश्च्युत इति । एतद्दुलोकाभ्यामित्यर्थः । तथा(७६)मानः सर्गः ॥ ७६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे शततमः सर्गः

---

* वर्तते—अवर्तिष्ट । यद्वा दशरथमरणस्याज्ञातत्वात् वर्तत इत्युक्तिः । 'पितामहस्य अजस्य चिरं राज्यपरिपालनाभावात् प्रपितामहा इत्युक्तम्–गो. वस्तुतस्तु—बहुवचनसत्त्वात 'अस्मत्पूर्वे सर्वेऽपि' इत्यर्थः स्वरसः । वर्तत इत्यस्य च आकर्षः, बहुवचनान्ततया परिणामश्च । † आशंसमानेभ्यः, धनमिति शेषः–गो. ‡ पालयित्वा, महीमिति शेषः । महामतिः—उक्तनीतिधर्मज्ञः । दण्डधरः–युक्तदण्डधरः । यथावत्—पूर्वराजवत । इतः—अस्माल्लोकात । च्युतः—प्रारब्धकर्मावसाने मृत इत्यर्थः । विद्वान् —शरीरभिन्नात्मज्ञानवान्–गो.

[1] महीपति–च.

एकोत्तरशततमः सर्गः

[भरतप्रार्थना]

*[1]तं तु रामः [2]समाज्ञाय [3]भ्रातरं गुरुवत्सलम् ।
लक्ष्मणेन सह भ्रात्रा प्रष्टुं समुपचक्रमे ॥ १ ॥

अथ रामेण भरतागमनप्रश्नः । तं त्वित्यादि । अत्राहान्यः †—

---

* एवं कचित्प्रश्नानन्तरं स्वस्य राजत्वाभावं सूचयितुं तदुत्तरमप्रयच्छन्तं भरतं प्रति रामेणागमनप्रयोजनप्रश्नः—तं त्वित्यादि–ति. † गोविन्दराजः । तथाहि—'रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच ह' इत्यादिरयं सर्ग एवात्र लेखनीयः । 'तं तु रामः समाश्वास्य भ्रातरं गुरुवत्सलम्' इत्यादिसर्गस्तु लेखकैः प्रमादाल्लिखितः ; तस्योक्तप्रश्नोत्तरत्वाभावात् । अत्र भरतोच्यमानपितृमरणश्रवणानन्तरं रामस्य दुःखितत्वाश्रवणात् । अत्र महेश्वरतीर्थेन सर्गपौर्वापर्यवैपरीत्यमनालोच्य स्वदृष्टकोशमात्रप्रामाण्येन 'तं तु रामः समाश्वास्य' इत्यादिकं सर्गमेव एकोत्तरशततमं मन्वानेन तत्सर्गव्याख्यानान्ते तत्रत्यार्थविरोधमालोच्य एवमाक्षेपपरिहारावुक्तौ—ननु 'आर्यं तातः परित्यज्य कृत्वा कर्म सुदुष्करम् । गतः स्वर्गं महाराजः पुत्रशोकाभिपीडितः' (5) इति, 'इमाः प्रकृतयः सर्वाः विधवा मातरश्च याः । त्वत्सकाशमनुप्राप्ताः' (9) इति च भरतेनोक्ते रामस्तदानीमशोचन् तदुक्तद्वयाभिषेकप्रत्याख्यानमेव किमिति कृतवान् ? नैष दोषः—तस्मिन् भरतवाक्यप्रबन्धे पितृमरणमानुषङ्गिकत्वेनोक्तम् ; राज्यस्वीकरणमेव प्राधान्येनोक्तम् । अतो रामस्त्वेवं मन्यते—पिता पुत्रशोकेन मृतकल्पः न पुनर्जीविष्यतीति मृत इत्युच्यते । मातरश्च विधवाकल्पा इति विधवा इत्युच्यन्ते । अनेन ममाभिषेचनमेव प्राधान्येनोच्यत इति । अतोऽशोचन्नभिषेकप्रत्याख्यानं कृतवान् । स्ववाक्ये पितृमरणानुवादस्य चायमेवार्थ इति । अत्रायं परिहारो न युज्यते—यदि च पिता मृतकल्पत्वेन मृत इत्युच्यत इति रामो गृह्णीयात्, तदा 'व्यादिश्य च महातेजाः दिवं दशरथो गतः' (24) इति नानुवदेत् । यस्तु स्वाशयं स्वयमेव एवमिति वदति तस्यान्येन गत्यन्तरे सति तद्विरुद्धाभिप्रायकल्पनं कथं कर्तुं शक्यम् ? अतोऽनेनैवानुवादेन रामेण पिता मृत इत्येव गृहीतमिति प्रतिभाति । किञ्च प्रकृतीनां मातॄणां च समागमनात्पूर्वं 'इमाः प्रकृतयः सर्वाः विधवा मातरश्च याः । त्वत्सकाशमनुप्राप्ताः प्रसादं कर्तुमर्हसि' (9) इत्यङ्गुल्यादिनिर्देशानुपपत्तेश्च । अतः 'तं तु रामः समाश्वास्य' इत्यादिसर्गः 'वसिष्ठं पुरतः कृत्वा' इति त्र्युत्तरशततमसर्गानन्तरं चतुरुत्तरशततमसर्गत्वेन लेखनीयः पठनीयश्च'–गो. तिलकस्तु–भरतस्याभिषेककरणप्रत्याशावारणाय कैकेय्या लोकानां चान्यथासंभावनावारणाय शोककालेऽपि धैर्यमवलम्ब्य तदनाविष्करणं "शोककालेऽप्येवं धैर्यं कर्तव्यम्" इति लोकोपदेशाय चेति मम प्रतिभाति—इत्याह ॥

[1] ङ, झ पुस्तकयोः अयं सर्गः 104 तमत्वेन पठ्यते । [2] समाश्वास्य–ङ.
[3] भरतं–ङ.

“ कश्चित्सर्गानन्तरं ‘ तं तु रामः समाज्ञाय ’ इत्यादिकः सर्गो वर्तते क्वचित्—तन्न तथा—कश्चित्सर्गकृतकुशलप्रश्नोत्तरादर्शनात् । अप्रप्रतिपाद्यमानपितृमरणानन्तरं दुःखव्यापारावन्धनात् । ‘ इमा मातरस्त्वत्सकाशं प्राप्ताः ’ इति निर्देशाच्च । तर्हि किमयं सर्ग एव नास्ति? अस्त्येव । किन्तु ‘ वसिष्ठः पुरतः कृत्वा दारान् दशरथस्य च ’ इतिसर्गानन्तरं ‘ तं तु रामः समाज्ञाय ’ इत्यस्य स्थानम् ” इति —इदमप्यसङ्गतम्—‘ तं तु रामः ’ इतिसर्गान्ते ‘ यदब्रवीन्मां नरलोकसत्कृतः ’ इत्यादिना पितृवचनात् वनवास एव मे परमहितं, न तु ततः प्राक् त्वद्दीयमानराज्यस्वीकार इति परिसमाप्तत्वात् अस्य सर्गस्य, ‘ ततः पुरुषसिंहानां वृतानां तैस्सुहृद्गणैः ’ इत्याद्युत्तरसर्गासांगत्यात् । *पूर्वसर्गान्ते सुहृद्गणसमागमाप्रतिपादनात् । ‘ वसिष्ठः पुरतः ’ इत्यनेनैव च मात्रादिसर्वेष्टसमागमप्रतिपादनात् । तदनन्तरं ‘ ततः

---

*‘त तु रामः समाज्ञाय’ इत्यादिसर्गान्ते इत्यर्थः। एतत्पूर्वतने हि ‘वसिष्ठः पुरतः कृत्वा’ इत्यादिसर्गे सुहृत्समागमादिरुक्त इति भावः। परन्तु—प्रपूर्वतनसर्गान्ते कथितस्यापि ‘वृतानां तैः सुहृद्गणैः’ इत्यनेन परामर्शः संभवत्येव। ‘वसिष्ठः पुरतः कृत्वा’ इति सर्गानन्तरमेव यदि ‘ततः पुरुषसिंहानां’ इति सर्गः स्यात् तदा वसिष्ठः पुरत इत्यादिसर्गान्तगतं ‘किमेष वाक्यं भरतोऽद्य राघवं प्रणम्य सत्कृत्य च साधु वक्ष्यति। इतीव तस्यार्यजनस्य तत्त्वतः बभूव कौतूहलमुत्तमं तदा’ इति श्लोकेन उक्ता रामभरतसंवादनिरीक्षा असंगता स्यात्। ‘ततः पुरुषसिंहानां’ इत्यत्र हि ‘शोचतामेव रजनी दुःखेन व्यत्यवर्तत’ इति संवादाभाव एव उच्यते। किञ्च कश्चित्सर्गानन्तरं यदि ‘तं तु रामः समाज्ञाय’ इति सर्गः स्यात् तदा तदनन्तरसर्गाद्यश्लोकोऽपि न घटेत। तत्र हि ‘रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच ह। किं मे धर्माद् विहीनस्य राजधर्मः करिष्यति’ इति वर्तते। अत्र राजधर्मपदेन राजधर्मोपदेशश्रवणसमनन्तरमेव इदं वाक्यं प्रवृत्तमिति स्पष्टम्। गोविन्दराजोक्तानुपपत्तयस्त्वपरिहार्या एव। अतश्च कश्चित्सर्गसमनन्तरं ‘रामस्य वचनं श्रुत्वा’ इत्यादिसर्ग एव युक्तः। अधिकं तु पूर्वापरश्लोकविमर्शकानां स्वयं ज्ञायेतेति विस्तरभयान्न लिख्यते। अतो गोविन्दराजोक्तक्रम एव स्वरसः। अस्मत्पुस्तकेऽप्ययमेव क्रम आदृतः।

पुरुषसिंहानां' इत्यस्यैव सर्गस्य प्राप्तावसरत्वाच्च। अतः कुशलप्रश्नानन्तरं 'तं तु रामः' इति कार्यप्रश्नसर्ग एव न्यायप्राप्तः। *ननु कथं कुशलप्रश्नस्योत्तरानुक्तिः? कुशलाभावादेव। अथापि कथं 'इमास्त्वत्सकाशं प्राप्ताः' इत्याद्युक्तिः? उच्यते—अस्य सर्गस्य पितृवचनानुष्ठानविश्रान्तस्य स्वितः परं काण्डसमाप्तिप्रतिपाद्यार्थस्य संक्षेपार्थत्वात् *सर्वमेवोपपन्नम्। यथोपपद्यते तथा दर्शयिष्यामः। अतः कच्चित्सर्गानन्तरं कार्यप्रश्नसर्गस्य स्थितिरिति स्थितम्। समाज्ञायेति। कुशलप्रश्नव्याजेन सर्वधर्मं ज्ञापयित्वा—बोधयित्वेत्यर्थः ॥ १ ॥

किमेतदिच्छेयमहं श्रोतुं प्रव्याहृतं त्वया।
यस्मात् त्वमागतो देशं इमं [1]चीरजटाजिनी ॥ २ ॥

किमेतदित्यादि। यस्मात् त्वमिमं देशं चीरजटाजिनी भूत्वा आगतोऽसि, तस्मात् एतत्—एतदागमनं किंकारणमिति त्वया प्र-स्पष्टं व्याहृतं श्रोतुमहमिच्छेयम् ॥ २ ॥

†[2]यन्निमित्तमिमं देशं कृष्णाजिनजटाधरः।
हित्वा राज्यं प्रविष्टस्त्वं तत्सर्वं वक्तुमर्हसि ॥ ३ ॥

उक्तश्लोकस्यैव व्याख्या—यन्निमित्तमित्यादि ॥ ३ ॥

इत्युक्तः कैकयीपुत्रः काकुत्स्थेन महात्मना।
‡प्रगृह्य बलवत् भूयः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ४ ॥

---

* इदं सर्वमपि अस्वरसनेव। अस्य सर्गस्य काण्डसमाप्तिप्रतिपाद्यार्थसंक्षेपरूपत्वमपि तादृशार्थस्यात्रादर्शनात् न स्वरसम् ॥ † एवमुक्तेऽपि शोकेन तूष्णीं स्थितं पुनः पृच्छति—किंनिमित्तमित्यादिश्लोकद्वयेन—गो. अत एव 'प्रगृह्य बलवद्भूयः इत्युक्तः' इत्युक्तिरित्याशयः। ‡ बलवत् प्रगृह्य—गाढं परिष्वज्य तत्सर्वं वक्तुमर्हसीति भूय उक्तः—गो. यद्वा प्रथमदर्शनदिने 'आघ्राय रामस्तं मूर्ध्नि परिष्वज्य च' इति कथनात् भाषणोपक्रमणात् पूर्वं धैर्योपोद्बलनाय भूयः प्रगृह्य इत्येव वाऽन्वयः।

[1] चीरजटाधरः, चीरजटाजिनः—ङ. [2] किंनिमित्त—ङ. इदमर्धं क्वचिन्नास्ति—झ.

[1]आर्य ! तातः* परित्यज्य कृत्वा कर्म सुदुष्करम् ।
गतः स्वर्गं महाबाहुः पुत्रशोकाभिपीडितः ॥ ५ ॥
स्त्रिया नियुक्तः कैकेय्या मम मात्रा, परन्तप !

अथ पूर्वसर्गे 'क नु तेऽभूत् पिता' इत्यादिना प्रथमपृष्टस्यैवार्थस्य पुनः प्रश्नं तस्यैवोत्तरमाह—आर्य तात इत्यादि । परित्यज्येति । अस्मान् सर्वान् इमं च लोकमिति शेषः । सुदुष्करमिति अतिघोरत्वात् ॥ ५ ॥

चकार [2]सा महत्पापं इदमात्मयशोहरम् ॥ ६ ॥

सा चकारेति योजना ॥ ६ ॥

सा राज्यफलमप्राप्य विधवा शोककर्शिता ।
पतिष्यति महाघोरे [3]निरये जननी मम ॥ ७ ॥
तस्य मे दासभूतस्य प्रसादं कर्तुमर्हसि ।
अभिषिञ्चस्व चाद्यैव †[4]राज्येन मघवानिव ॥ ८ ॥

एवं पितृमरणे श्रुते तदुचितसर्वकृत्ये च कृते‡ ततः परं यद्वक्तव्यं तत् भरतो ब्रूते—तस्य म इत्यादि ॥ ८ ॥

इमाः प्रकृतयः सर्वाः विधवा मातरश्च याः ।
त्वत्सकाशमनुप्राप्ताः प्रसादं कर्तुमर्हसि ॥ ९ ॥

---

* आर्य (पाठान्तरं) त्वां परित्यज्य—विवास्य—गो. गोविन्दराजरीत्या—अयं श्लोकः उत्तरवाक्यप्रस्तावार्थानुवादरूपः । † राज्येन हेतुना—गो. ‡ परन्त्वेवं व्याख्यानेऽनन्तरसर्गादीनामसंगतिरेव । सङ्ग्रहविस्ताररूपत्वाङ्गीकारेऽपि अवश्यवक्तव्यस्य द्विसर्गेण प्रतिपाद्यमानस्यार्थस्यात्रासङ्ग्रहः न स्वरसः । अतो गोविन्दराजोक्तक्रम एव साधीयान् ।

[1] आर्य—ङ. झ. [2] सुमहत्पापं—ङ. [3] नरके—ङ. [4] राज्येऽस्मिन् मम राघव—ङ.

इमाः प्रकृतय इत्यादि । 'वसिष्ठः पुरतः कृत्वा' इत्यादि-सप्रपञ्चमारादुच्यमानवक्ष्यमाणरीत्या समागता इति शेषः ॥ ९ ॥

*[1] तदानुपूर्व्या [2] युक्तश्च युक्तं चात्मनि, मानद !
राज्यं प्राप्नुहि धर्मेण सकामान् सुहृदः कुरु ॥ १० ॥

तदिति । यस्मान्मातरः प्रकृत्यादयः सर्वे वयं त्वत्प्रसादनार्थमागताः, यतश्च त्वं आनुपूर्व्या—ज्येष्ठत्वलक्षणया युक्तः तस्मात्, आत्मनि—त्वयि अभिषेचनं युक्तं, तस्मात् धर्मेण राज्यं प्राप्नुहि ॥

भवत्वविधवा भूमिः समग्रा †पतिना त्वया ।
शशिना विमलेनेव शारदी ‡रजनी यथा ॥ ११ ॥

एभिश्च सचिवैः सार्धं शिरसा याचितो मया ।
§ भ्रातुश्शिष्यस्य दासस्य प्रसादं कर्तुमर्हसि ॥ १२ ॥

तदिदं शाश्वतं पित्र्यं सर्वं [3] सचिवमण्डलम् ।
‖ पूजितं, पुरुषव्याघ्र ! नातिक्रमितुमर्हसि ॥ १३ ॥

सचिवमण्डलं—तत्प्रार्थनामिति यावत् ॥ १३ ॥

एवमुक्त्वा महाबाहुः सबाष्पः कैकयीसुतः ।
रामस्य शिरसा पादौ जग्राह [4] विधिवत् ¶ पुनः ॥ १४ ॥

---

* आनुपूर्व्या युक्तं—ज्येष्ठानुक्रमेण संगतं आत्मनि युक्तं च भरणसमर्थ त्वय्येव प्राप्तं च राज्यं-गो. † नामाव आर्षः-गो. पत्या इति वक्तव्य इति शेषः । ‡ चन्द्रः खलु निशापतिः, 'ओषधीशो निशापतिः' इत्यमरः । § शिष्यः—अनुशासनीयः, दासः—नित्यकिङ्करः । ‖ पूजितं – पूजार्हम्-गो. ¶ पुनरिति । पूर्वं याचितवान्, ततः शरणागतिमकरोदित्यर्थः—गो. आगस्योपवेशनकाले प्रणामकरणात् पुनरित्युक्तं स्यात् । 'विधिवत्पुनः' इति वाक्यशैली वा ।

[1] तथा—ङ. च. [2] युक्तं च—ङ. झ. [3] प्रकृति—ङ. [4] भरतः च.

तं मत्तमिव मातङ्गं निश्वसन्तं पुनःपुनः ।
भ्रातरं भरतं रामः परिष्वज्येदमब्रवीत् ॥ १५ ॥

मत्तं, तथाप्यकस्मात्प्राप्तदुःखेन निश्वसन्तं मातङ्गमिव स्थितम् ॥

कुलीनः [1] सत्त्वसंपन्नः तेजस्वी चरितव्रतः ।
राज्यहेतोः कथं * पापं आचरेत् [2] त्वद्विधो जनः ॥ १६ ॥

भरतव्यवहारमनुमोदते भगवान् रामः—कुलीन इत्यादि ॥

न दोषं [3] त्वयि पश्यामि सूक्ष्ममप्यरिसूदन !
न चापि जननीं बाल्यात् त्वं विगर्हितुमर्हसि ॥ १७ ॥

बाल्यात्—अज्ञानात् ॥ १७ ॥

* कामकारः, महाप्राज्ञ ! गुरूणां सर्वदाऽनघ !
उपपन्नेषु दारेषु पुत्रेषु च विधीयते ॥ १८ ॥

कथं कैकेयीगर्हणस्याज्ञानमूलत्वमित्यत्राह—कामकार इत्यादि । हे महाप्राज्ञ ! गुरूणां—पित्रादीनां उपपन्नेषु दारेषु पुत्रेषु च सर्वथा कामकारः—स्वेच्छया नियोजनं विधीयत एव ॥ १८ ॥

† वयमस्य यथा लोके संख्याताः, सौम्य ! साधुभिः ।
भार्याः पुत्राश्च शिष्याश्च [4] ‡ त्वमपि ज्ञातुमर्हसि ॥ १९ ॥

---

* पापं—ज्येष्ठविषयप्रातिकूल्याचरणम्-गो. एतदेव स्वीक्रियते समनन्तरं 'न दोषं त्वयि पश्यामि' इति । † कामकारः—स्वच्छन्दकरणं, उपपन्नेषु—शिष्यदासादिषु-गो. ‡ वयमस्य तथा संख्याताः, यथा भार्याः पुत्राः शिष्याश्च पत्न्यादीनां साधुभिः संख्याताः । सामान्योऽयं धर्मः, अतः त्वमप्येतत् पालयितुमर्हसीति भाव. । § अनुज्ञातुं (पाठान्तरं), त्वं ज्ञातुमर्हसि, अनु नैरर्थकः-गो.

[1] सत्यसंकल्पः-ङ. [2] मद्विधो-च. [3] तव-ङ. [4] त्वमनुज्ञातु-ङ.

ततः किमित्यतः—वयमित्यादि । भार्याः पुत्राः शिष्याश्च लोके साधुभिर्यथा समाख्याताः—इच्छातिनियोगार्हतया, तथा सर्वे वयं सर्वप्रकारगुरोरस्य राज्ञ इति त्वमपि ज्ञातुमर्हसि ॥ १९ ॥

वने वा *[1]चीरवसनं, सौम्य! कृष्णाजिनाम्बरम् ।
राज्ये वाऽपि [2]महाराजः मां वासयितुमीश्वरः ॥ २० ॥

अस्तु, प्रकृते किमायातमित्यतः—वन इत्यादि । ॥ २० ॥

यावत् पितरि [3]धर्मज्ञ गौरवं †लोक[4]सत्कृतम् ।
तावत्, धर्मभृतां श्रेष्ठ! जनन्यामपि गौरवम् ॥ २१ ॥

प्रकृतजनन्याविगर्हणमुपसंहरति—यावत्पितरीत्यादि । यावत्परिमाणकमित्यर्थः ; 'यत्तदेतेभ्यः परिमाणे वतुप्' तावज्जनन्यामपि गौरवम् । अतो मां त्वां च कैकेयी च माता कामचारेण नियोक्तुं शक्ता इत्येव । अतो नास्या गर्हणमित्यर्थः ॥ २१ ॥

एताभ्यां धर्मशीलाभ्यां वनं गच्छेति, राघव!
मातापितृभ्यामुक्तोऽहं कथमन्यत् समाचरे ॥ २२ ॥

यदेवं, अतः—एताभ्यामित्यादि । समाचरे—समाचरामीति यावत् ॥ २२ ॥

त्वया राज्यमयोध्यायां प्राप्तव्यं लोक[5]सत्कृतम् ।
वस्तव्यं दण्डकारण्ये मया वल्कलवाससा ॥ २३ ॥
[6]एवं कृत्वा [7]महाराजः विभागं लोकसन्निधौ ।
व्यादिश्य च [7]महातेजाः दिवं दशरथो गतः ॥ २४ ॥

लोकसन्निधाविति । मन्त्रिपुरोहितादिजनसन्निधावित्यर्थः ॥

---

* चीरं-द्रुमवल्कलं वसनं उत्तरीयं यस्य तम् । कृष्णाजिनं अम्बरं—अधरीयं यस्य तम्—गो. † लोकसत्कृतं—लोकसम्मतमिति यावत् ।

[1] सौम्यवसनं—ङ. [2] महाबाहो—ङ [3] धर्मज्ञ-च. [4] सत्कृते—ङ.
[5] सम्मतम्—ङ. [6] एवमुक्त्वा—च. [7] महाभागः—ङ.

स च प्रमाणं [1]धर्मात्मा राजा लोकगुरुस्तव * ।
पित्रा दत्तं यथाभागं उपभोक्तुं त्वमर्हसि[2] ॥ २५ ॥

यथाभागमुपभोक्तुं त्वमर्हसीति । न त्विदानीमस्मद्भागोऽपि पित्रा दत्तः । सौमित्र्योस्तु न दत्त एव । अपि तु तदपेक्षया ज्येष्ठत्वादभिषेकश्चानुमतः । अतश्चतुर्दशसमानन्तरमहमप्यस्मद्भागं पित्रा दत्तमुपभोक्ष्ये । मात्रा तु मे वनवासमात्रं परिमितकालप्रवृत्तम् । न तु सर्वथा स्वभागपरित्यागो वृतः, पित्रा च तावदेवानुमतः । अतः कालान्तरे तु भोक्ष्यामीत्यर्थः ॥ २५ ॥

यदब्रवीन्मां नरलोकसत्कृतः
पिता महात्मा विबुधाधिपोपमः ।
तदेव मन्ये † [3]परमात्मनो हितं
न सर्वलोकेश्वरभाव[4]मव्ययम् ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकोत्तरशततमः सर्गः

मथितसिद्धान्तस्योपसंहार —यदब्रवीदित्यादि । अव्ययं सर्वलोकेश्वरभावमिति । ब्रह्मत्वमित्यर्थः । पित्रननुमतमिति शेषः । चर(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकोत्तरशततमः सर्गः

---

* लोकगुरुः स राजा एव तव प्रमाणम् । अतः पित्रा दत्तमित्यादि ।
† आत्मनः परं हितमित्यन्वयः ।

[1] धमज्ञ–ङ. [2] एतदनन्तर—चतुर्दश समाः सौम्य दण्डकारण्यमाश्रितः । उपभोक्ष्ये त्वहं दत्तं भागं पित्रा महात्मना—इत्यधिकम्–ङ. झ. [3] चिरमात्मनो–ङ. [4] मप्यहम्–ङ.

द्व्युत्तरशततमः सर्गः

[दशरथगतिनिवेदनम्]

रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच ह ।
किं मे *धर्माद्विहीनस्य राजधर्मः करिष्यति ॥ १ ॥

एवं संक्षिप्योपदिष्टार्थस्य विस्तरोपदेशः। स्वभावश्चायं कवेः प्रायेण। रामस्येत्यादि। पूर्वसर्गादौ 'क तेऽभूत् पिता' इत्यादिना पितृवृत्तान्तः पृष्टः। तदनन्तरं 'कच्चिच्छुश्रूषसे' इत्यादिना सर्गसमाप्ति-पर्यन्तं धर्मप्रश्नः कृतः। तत्र राजधर्मप्रश्नं मध्यमनवसरदुःस्थ इत्याह—किं म इत्यादि। धर्माद्विहीनस्येति। 'सति कुलोचितकर्मणि' इति न्यायेन धर्म्यं राजत्वमेव मे नास्ति, तस्य मे राजधर्मः किं करिष्यति? अनुपनीतयागवत् ॥ १ ॥

शाश्वतोऽयं सदा धर्मः स्थितोऽस्मासु, नरर्षभ!
[1]ज्येष्ठे पुत्रे स्थिते, [2]राजन्! न कनीयान् नृपो भवेत् ॥

कुतस्ते उक्तधर्माभाव इत्यतः—शाश्वतोऽयमित्यादि। अयं धर्मः अस्मासु-अस्मद्वंश्येषु यथा-यथाशास्त्रं स्थितः-प्रतिष्ठितः। अयमिति कतम इत्यतः—ज्येष्ठ इत्यादि। अतः कनीयस्त्वान्मे न राजत्व-प्रसक्तिरिति बहिरुपसंहारः ॥ २ ॥

स समृद्धां मया सार्धं अयोध्यां गच्छ, राघव!
अभिषेचय चात्मानं कुलस्यास्य † भवाय नः ॥ ३ ॥

---

* धर्मात्—स्वस्सेवारूपमुख्यधर्मात्। यद्वा—धर्मात्—त्वदुक्तराजधर्मानुष्ठानहेतु-भूतराजभावात्—गो. वस्तुतस्तु उत्तरश्लोकपर्यालोचनायां—ज्येष्ठानुक्रमरूपसामान्य-धर्मात् विहीनस्य राजधर्मरूपविशेषधर्मस्य का प्रसक्तिरित्याशयः स्वरसः प्रतिभाति।

† भवाय—क्षेमाय, 'भवः क्षेमेशसंसारे' इति मेदिनी।

[1] ज्येष्ठपुत्रे—ङ. [2] राज्ञां—ङ., राजा—च.

यदेवं, अतः—स इत्यादि। सः त्वं गच्छ—आगच्छेति यावत्। भवाय—अभ्युदयाय ॥ ३ ॥

*राजानं मानुषं प्राहुः देवत्वे स मतो मम।
यस्य धर्मार्थसहितं वृत्तमाहुरमानुषम् ॥ ४ ॥

राजानं सामान्यतः सर्वेऽपि जना मानुषमेव प्राहुः। मम तु †त्वं राजा दैवत्वेन सम्मतः—'मतिबुद्धि' इति क्तः, मया त्वं दैवत्वेन संमन्यमानो भवसीत्यर्थः। तत्र हेतुमाह—यस्येत्यादि। अमानुषं—मनुष्यासंभाव्यमित्यर्थः ॥ ४ ॥

केकयस्थे च मयि तु त्वयि चारण्य[1]माश्रिते।
[2]दिवमार्यो गतो राजा यायजूकः सतां मतः ॥ ५ ॥

अथ प्रथमस्य राजवृत्तान्तप्रश्नस्योत्तरमाह—केकयस्थ इत्यादि। सतां मत इति। सद्भिः पूज्यमान इति यावत् ॥ ५ ॥

‡निष्क्रान्तमात्रे भवति सहसीते सलक्ष्मणे।
दुःखशोकाभिभूतस्तु राजा त्रिदिव[3]मभ्यगात् ॥ ६ ॥

उत्तिष्ठ, पुरुषव्याघ्र! क्रियतामुदकं पितुः।
अहं चायं च शत्रुघ्नः पूर्वमेव कृतोदकौ ॥ ७ ॥

पूर्वमेव कृतोदकाविति। कृतसपिण्डीकरणान्तसर्वकृत्याविल्यर्थः ॥ ७ ॥

---

* न सर्वसुलभं राजत्वमित्याह—राजानमिति—गो. † वस्तुतस्तु मूलं सामान्यविषयकं स्वरसम्। यस्य वृत्तमित्यन्वयः। ‡ पूर्वश्लोके प्रतीतां दशरथमरणस्य व्याध्यादिकारणान्तरसंभावनां वारयति—निष्क्रान्तमात्र इति।

[1] मास्थिते—ङ. [2] श्रीमान् स्वर्गं—च. [3] मत्यगात्—ङ.

प्रियेण खलु दत्तं हि पितृलोकेषु, राघव!
अक्षय्यं भवतीत्याहुः भवांश्चैव पितुः प्रियः ॥ ८ ॥

तर्हि किंकृतकरणेनेत्यत्राह--प्रियेणेत्यादि ॥ ८ ॥

*त्वामेव शोचन् तव दर्शनेप्सुः
त्वय्येव सक्तामनिवर्त्य बुद्धिम् ।
त्वया विहीनस्तव †शोकरुग्णः
त्वां [1]संस्मरन्नस्तमितः पिता ते ॥ ९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे द्व्युत्तरशततमः सर्गः

धी(९)मानः सर्गः ॥ ९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे द्व्युत्तरशततमः सर्गः

त्र्युत्तरशततमः सर्गः

[निवापनिर्वर्तनम्]

तां श्रुत्वा करुणां‡ वाचं पितुर्मरण[2]संहिताम् ।
राघवो भरतेनोक्तां बभूव गतचेतनः ॥ १ ॥

अथ श्रुतपितृविपत्तिकेन रामेण यथाप्राप्तदुःखपरिपालनाचारः । तां श्रुत्वेत्यादि । करुणां-शोकावहाम् ॥ १ ॥

---

* प्रियस्त्वमेवोपपादयति—त्वामेवेत्यादि । † रुग्णः-पीडित इति यावत्-गो. न रोगान्तरहेतुकं तन्मरणमिति वा भावः । ‡ यद्वा अकरुणां-करुणारहितां, क्रूरामिति यावत्-गो.

[1] संस्मरन्नेव गतः-च. [2] संयुतां-ङ.

*तं तु वज्रमिवोत्सृष्टं आहवे दानवारिणा ।
वाग्वज्रं भरतेनोक्तं अमनोज्ञं परंतपः ॥ २ ॥

दानवारिः–इन्द्रः ॥ २ ॥

प्रगृह्य बाहू रामो वै †[1]पुष्पिताग्रो यथा द्रुमः ।
वने परशुना कृत्तः [2]तथा भुवि पपात ह ॥ ३ ॥

प्रगृह्य–प्राग्रीकृत्येत्यर्थः ॥ ३ ॥

तथा निपतितं रामं जगत्यां जगतीपतिम् ।
‡कूलघातपरिश्रान्तं प्रसुप्तमिव कुञ्जरम् ॥ ४ ॥

भ्रातरस्ते महेष्वासं सर्वतः शोक[3]कर्शितम् ।
रुदन्तः सह वैदेह्या सिषिचुः सलिलेन वै ॥ ५ ॥

सर्वतः सिषिचुरिति । सर्वगात्राणि मोहशान्तये सिक्तवन्त इत्यर्थः ॥ ५ ॥

स तु संज्ञां §पुनर्लब्ध्वा नेत्राभ्यामस्रमुत्सृजन् ।
उपाक्रामत काकुत्स्थः कृपणं बहु भाषितुम् ॥ ६ ॥

कृपणं भाषितुमिति । विलपितुमिति यावत् ॥ ६ ॥

स रामः स्वर्गतं श्रुत्वा पितरं [4]पृथिवीपतिम् ।
उवाच भरतं वाक्यं [5]धर्मात्मा धर्मसंहितम् ॥ ७ ॥

---

* एतादृशं वाग्वज्रं श्रुत्वा गतचेतनो बभूव इति पूर्वश्लोकेन, वाग्वज्रं श्रुत्वा भुवि पपात इत्युत्तरश्लोकेन वाऽन्वयः । † भरतादिदर्शनेन हर्षात् पुष्पितांगद्रुमसादृश्यम्–ति. ‡ मदेन दन्तकण्डूया च कृतेन कूलप्रहारेण परिश्रान्तम्–गो. हृष्ट-पुष्ट-पतितगजत्वे दृष्टान्तोऽयम् । § गलितां संज्ञां पुनर्लब्ध्वेत्यर्थः ।

[1] पुष्पिताङ्गो–च. [2] तदा भूमौ–ङ. [3] कर्शिताः–ङ. [4] जगती–ङ. [5] धर्मज्ञ–ङ.

किं करिष्याम्ययोध्यायां [1]ताते *दिष्टां गतिं गते ।
कस्तां † [2]राजवराद्धीनां अयोध्यां पालयिष्यति ॥ ८ ॥

दिष्टां–स्वसुकृतादिसृष्टाम् ॥ ८ ॥

किं नु तस्य मया कार्यं [3]दुर्जातेन महात्मनः ।
यो मृतो मम शोकेन मया चापि न संस्कृतः ॥ ९ ॥

दुर्जातेन–वृथाजन्मना ॥ ९ ॥

अहो! भरत! सिद्धार्थः येन राजा त्वयाऽनघ!
शत्रुघ्नेन च सर्वेषु [4]प्रेतकृत्येषु सत्कृतः ॥ १० ॥

सत्कृत इति । संस्कारादिकर्मणा पूजित इत्यर्थः ॥ १० ॥

निष्प्रधाना‡मनेकाग्रां नरेन्द्रेण विनाकृताम् ।
निवृत्तवनवासोऽपि नायोध्यां गन्तुमुत्सहे ॥ ११ ॥

निष्प्रधानां–प्रधानप्रभुरहितां, अत एव–अनेकाग्रां–बहुनायकाम् । उक्तोभयहेतुः–नरेन्द्रेण विनाकृतामिति । गन्तुं–आगन्तुम् ॥

समाप्तवनवासं मां अयोध्यायां, परंतप!
[5]कोऽनु§शासिष्यति पुनः ताते लोकान्तरं गते ॥ १२ ॥

अनुशासिष्यति–हिताहितप्रवृत्तिनिवृत्तिं कारयिष्यति ॥ १२ ॥

---

* दिष्टां—कालकल्पितां, यद्वा दैवकल्पिताम्–गो. ‘दैवं दिष्टं भागधेयम्’। † राजवरात्—तृतीयार्थे पञ्चमी–गो. ‡ एकाग्रा—अनाकुला, ‘अनाकुलेऽपि चैकाग्रः’ इत्यमरः, सा न भवतीत्यनेकाग्रा, तां, आकुलामिति यावत्–गो. § शासिष्यति—कार्येषु नियोक्ष्यतीत्यर्थः–गो.

[1] ताते च त्रिदिवं–ङ. [2] राजवराधीनां–ङ. [3] दुर्जनेन–ङ. [4] प्रेतकार्येषु संस्कृतः–ङ. [5] को नु शासिष्यति–ङ.

पुरा प्रेक्ष्य *सुवृत्तं मां पिता यान्याह सान्त्वयन् ।
वाक्यानि तानि श्रोष्यामि कुतः [1] कर्णसुखान्यहम् ॥१३॥

एवमुक्त्वा स भरतं भार्यामभ्येत्य राघवः ।
उवाच शोकसन्तप्तः पूर्णचन्द्रनिभाननाम् ॥ १४ ॥

सीते! मृतस्ते श्वशुरः, पित्रा हीनोऽसि, लक्ष्मण!
†भरतो दुःखमाचष्टे [2] स्वर्गतं पृथिवीपतिम् ॥ १५ ॥

दुःखं यथा तथा आचष्टे ॥ १५ ॥

ततो बहुगुणं तेषां बाष्पं नेत्रेष्वजायत ।
तथा ब्रुवति काकुत्स्थे कुमाराणां यशस्विनाम् ॥ १६ ॥

ततस्ते भ्रातरस्सर्वे भृशमाश्वास्य [3] राघवम् ।
अब्रुवन् जगतीभर्तुः क्रियतामुदकं पितुः‡ ॥ १७ ॥

सा सीता §श्वशुरं श्रुत्वा स्वर्गलोकगतं नृपम् ।
नेत्राभ्यामश्रुपूर्णाभ्यां अशकन्नेक्षितुं पतिम् ॥ १८ ॥

सान्त्वयित्वा तु तां रामः [4] रुदन्तीं जनकात्मजाम् ।
उवाच लक्ष्मणं तत्र दुःखितो दुःखितं वचः ॥ १९ ॥

आनयेङ्गुदिपिण्याकं ‖चीरमाहर चोत्तरम् ।
जलक्रियार्थं तातस्य गमिष्यामि महात्मनः ॥ २० ॥

---

* सुवृत्तं— शोभनं नियोगाचरणरूपं वृत्तं यस्य तम्-गो. † दुःखमाचष्टे, स्वर्गतं पृथिवीपतिमाचष्टे—इति दुःखाधिक्यादुक्तिर्वा । ‡ एतदनन्तरं इतिकरणमूह्यम् । § श्वशुरं नृपं स्वर्गलोकगतं श्रुत्वेत्यन्वयः । ‖ चीरं— वासः, उदकदानार्थं, उत्तरं— उत्तरीयं च-गो.

[1] श्रोत्र—ङ. [2] स्वर्गतिं पृथिवीपतेः—च. [3] दुःखितम्—च. [4] रुदती—च.

इङ्गुद्याः पिण्याकम् । इदं वानप्रस्थपितृक्रियाप्रसिद्धम्, पवित्रं च । अनिस्सारिततैलं पिष्ट्वा चूर्णीकृतं इङ्गुदीबीजमेव पिण्याकत्वेनोपचर्यते ॥ २० ॥

सीता पुरस्तात् व्रजतु त्वमेना*मभितो व्रज ।
अहं पश्चात् गमिष्यामि गतिर्ह्येषा †सुदारुणा ॥ २१ ॥

एनामभित इति । परितो रक्षन्निति शेषः । एषा गतिरिति । पितृमरणदुःखप्राप्तिरित्यर्थः ॥ २१ ॥

ततो नित्यानुगस्तेषां विदितात्मा महामतिः ।
मृदुर्दान्तश्च ‡[1]शान्तश्च रामे च दृढभक्तिमान् ॥ २२ ॥
सुमन्त्रस्तैर्नृपसुतैः सार्धमाश्वास्य राघवम् ।
[2]अवतारयदालम्ब्य नदीं मन्दाकिनीं शिवाम् ॥ २३ ॥

नित्यानुगः—नित्यानुचरः । तेषां—कुमाराणाम् । अवतारयत्—अवातारयदिति यावत् ॥ २२-२३ ॥

ते सुतीर्थां ततः कृच्छ्रात् उपागम्य यशस्विनः ।
नदीं मन्दाकिनीं रम्यां सदापुष्पितकाननाम् ॥ २४ ॥
[3]शीघ्रस्रोतसमासाद्य तीर्थं [4]शिवमकर्दमम् ।
सिषिचुस्तूदकं राज्ञे [5]ततैतत्ते भवत्विति ॥ २५ ॥

अकर्दमं तीर्थं—अवतारः । एतत्तदुदकं भवत्विति सिषिचुरित्यन्वयः ॥ २५ ॥

---

* अभितः—पश्चात्-गो. † सुदारुणा—सुतरां दुस्सहा । गतिः-दुःखिनां गतिः एषा हि स्नानाद्यर्थं स्त्रीबालपुरस्सरा खल्वित्यर्थः । तथा च सूत्रं 'सर्वे कनिष्ठप्रथमा अनुपूर्वं इतरे स्त्रियोऽग्रे' इति-गो. ‡ कान्तः (पा.)—तेजस्वी-रा.

[1] कान्तश्च-च. [2] अवातारय-ङ. [3] दीर्घस्रोतस-ङ. [4] शुचि-ङ. [5] तत्रैतत्ते-ङ. तत एतत्-च.

प्रगृह्य च * महीपालः जलपूरितमञ्जलिम् ।
दिशं † याम्यामभिमुखः रुदन् वचनमब्रवीत् ॥ २६ ॥

अयमेवार्थो विव्रियते—प्रगृह्येत्यादि ॥ २६ ॥

एतत्ते, राजशार्दूल! विमलं तोयमक्षयम् ।
पितृलोकगतस्याद्य मद्दत्तमुपतिष्ठतु ॥ २७ ॥
ततो मन्दाकिनी[1]तीरं प्रत्युत्तीर्य स राघवः ।
पितुश्चकार तेजस्वी [2]निवापं ‡ भ्रातृभिस्सह ॥ २८ ॥

तीरं उत्तीर्य निवापं चकार—पिण्डं प्रददावित्यर्थः, 'निवापः पितृदानं स्यात्' ॥ २८ ॥

ऐङ्गुदं [3]बदरैर्मिश्रं पिण्याकं दर्भसंस्तरे ।
न्यस्य रामः सुदुःखार्तः रुदन् वचनमब्रवीत् ॥ २९ ॥

ऐङ्गुदं—इङ्गुदीपिण्याकपिण्डम् । बदरैः—बदरफलैः, 'तस्येदम्' इत्यण्; 'फले लुक्' इति लुक् ॥ २९ ॥

इदं भुङ्क्ष्व, महाराज! प्रीतो यदशना वयम् ।
[4]यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ॥ ३० ॥

---

* कविवाक्यमिदम् । एवमुत्तरत्रा(32)पि 'जगतीपतिः', इत्यादि द्रष्टव्यम् ।
† यत्तु आधुनिकनिबन्धेषु सुमन्तुनाम्ना लिखितं वचनं क्षत्रियाणामुदङ्मुखजलदान-बोधकं तन्निर्मूलम्—एतदाचारविरोधात् । निकृष्टक्षत्रियपरं वा । इदमित्यनेन पित्रादि-विषये रोदने न निषेध इति सूचितम्—ति. ‡ भ्रातृभिस्सह मन्दाकिनीतीरात् प्रत्युत्तीर्य ....मन्दाकिनीतीरात् समुत्तीर्येत्युदकदानदेशात् किञ्चित्प्रदेशान्तरगमनवचनात् सपिण्डीकरणमेव कृतमित्यवगम्यते । दशाहात्यये उदकदानं विना पिण्डदानस्याचोदि-तत्वात् । उदकसेचनवत् कनिष्ठेन लक्ष्मणेन पिण्डदानानुक्तेश्च—गो. न च यदाकदाचित् पितुर्मरणश्रवणे पुत्रस्य दशाहाशौचतायाः स्मृतिषूक्तत्वात् कथं कृतक्रियस्य पितुः प्रथमदिन एव पिण्डदानमिति वाच्यम्; तस्याः स्मृतेः क्षत्रियेतरविषयत्वात् कलिविषयत्वाद्वा न दोषः—ति.

[1] तीरात्—ङ. [2] निर्वापं—च. [3] बदरीमिश्रं—ङ. [4] यदन्नं पुरुषोऽश्नाति—ङ.

ततस्तेनैव मार्गेण प्रत्युत्तीर्य [1]नदीतटात् ।
आरुरोह नरव्याघ्रः रम्यसानुं महीधरम् ॥ ३१ ॥

ततः पर्णकुटीद्वारं आसाद्य जगतीपतिः ।
परिजग्राह [2]बाहुभ्यां उभौ भरतलक्ष्मणौ ॥ ३२ ॥

तेषां तु रुदतां शब्दात् [3]प्रतिशब्दोऽभवद्गिरौ ।
भ्रातॄणां सह वैदेह्या सिंहानामिव नर्दताम् ॥ ३३ ॥

प्रतिशब्दः—प्रतिध्वनिः ॥ ३३ ॥

महाबलानां रुदतां कुर्वतामुदकं पितुः ।
विज्ञाय तुमुलं शब्दं त्रस्ता भरतसैनिकाः ॥ ३४ ॥

त्रस्ताः—का वा विपत्तिः प्रादुरभूदिति भीता इत्यर्थः ॥ ३४ ॥

अब्रुवंश्चापि रामेण भरतः सङ्गतो ध्रुवम् ।
तेषामेव महान् शब्दः शोचतां पितरं मृतम् ॥ ३५ ॥

ततः निश्चित्य—अब्रुवन्निति ॥ ३५ ॥

*अथ [4]वासान् परित्यज्य तं सर्वेऽभिमुखाः स्वनम् ।
अप्येकमनसो जग्मुः यथास्थानं प्रधाविताः ॥ ३६ ॥

तं स्वनमभिमुखा इति । तमालक्ष्येत्यर्थः । यथास्थानं–यथोचितं हयादिभिः प्रधाविताः–त्वरिता गच्छन्ति स्म ॥ ३६ ॥

---

* स्वनमभिमुखाः—स्वनोत्पत्तिदिगभिमुखा इत्यर्थः । यथास्थानं -- शब्दोत्पत्तिप्रदेशमनतिक्रम्य प्रधाविताः—शीघ्रगतियुक्ताः—गो. 'अवकाशे स्थितौ स्थानं' इति कोशात्—यथास्थानं—यथावकाशमित्यर्थो वा । एतदेव विव्रियते समनन्तरश्लोकेन ।

[1] सरित्तटात्–च. [2] पाणिभ्यां–च. [3] प्रतिश्रुत्को–ङ. [4] वाहान्–घ.

हयैरन्ये गजैरन्ये रथैरन्ये स्वलङ्कृतैः ।
*सुकुमारास्तथैवान्ये पद्भिरेव नरा ययुः ॥ ३७ ॥

†अचिरप्रोषितं रामं चिरविप्रोषितं यथा ।
द्रष्टुकामो जनः सर्वः जगाम सहसाऽऽश्रमम् ॥ ३८ ॥

‡भ्रातृणां त्वरितास्तत्र द्रष्टुकामाः समागमम् ।
ययुर्बहुविधै[1]र्यानैः खुरनेमि[2]समाकुलैः ॥ ३९ ॥

खुरसमाकुलयानानि अश्वादीनि, नेमिसमाकुलयानानि रथ-शकटयः ॥ ३९ ॥

सा भूमिर्बहुभिर्यानैः [3]खुरनेमिसमाहता ।
मुमोच तुमुलं शब्दं द्यौरिवाभ्रसमागमे ॥ ४० ॥

समाहता—अभिहता—आक्रान्तेति यावत् ॥ ४० ॥

तेन वित्रासिता नागाः करेणुपरिवारिताः ।
§आवासयन्तो गन्धेन जग्मुरन्यद्वनं ततः ॥ ४१ ॥

गन्धेनावासयन्तः—मदगन्धेन दिङ्मुखान् सुरभीकुर्वन्तः ॥

वराह[4]वृकसङ्घाश्च महिषाः [5]सृमरास्तथा ।
व्याघ्रगोकर्णगवयाः वित्रेसुः पृषतैस्सह ॥ ४२ ॥

गोकर्णः—सृमरः—வாலைமான் । गवयः—மரை ॥ ४२ ॥

---

* सुकुमारा इति हयैरित्यादिभिरुक्तानां त्रयाणां विशेषणम् । सुकुमारत्वाभावे दुःखितं रामं प्रति पद्भ्यामेव गन्तव्यत्वात्—गो. अथवा—हयैः गजैरित्यादिना योधा अभिहिताः। तद्भिन्नाः सामान्यप्रजाः 'सुकुमारा नराः' इत्युच्यन्ते । † अचिरप्रोषितमपीति भावः । ‡ भ्रातृणां समागममित्यन्वयः । § गन्धेन—मदगन्धेन वनमावासयन्त इत्यर्थः ।

[1] युक्तैः—ङ. [2] स्वनाकुलैः—ङ. [3] रथ—च. [4] मृगसिंहाश्च—च. [5] सर्पवानराः—ङ.

रथाङ्गाह्वयनत्यूहाः हंसाः कारण्डवाः प्लवाः ।
तथा पुंस्कोकिलाः क्रौञ्चाः विसंज्ञा भेजिरे दिशः ॥ ४३ ॥

रथाङ्गाह्वयः—चक्रवाकः । 'नत्यूहो जलरङ्कुः स्यात्'—சிறங் கோழி । कारण्डवाः—महापक्षाः—கானங்கோழி । प्लवाः—स्थूलबकविशेषाः—மரக்கால்நாரை ॥ ४३ ॥

तेन शब्देन वित्रस्तैः आकाशं पक्षिभिर्वृतम् ।
मनुष्यैरावृता भूमिः *उभयं प्रबभौ तदा ॥ ४४ ॥

ततस्तं पुरुषव्याघ्रं यशस्विन[1]मरिन्दमम् ।
आसीनं स्थण्डिले रामं ददर्श सहसा जनः ॥ ४५ ॥

विगर्हमाणः कैकेयीं †सहितो मन्थरामपि ।
अभिगम्य जनो रामं बाष्पपूर्णमुखोऽभवत् ॥ ४६ ॥

तान् नरान् बाष्पपूर्णाक्षान् समीक्ष्याथ सुदुःखितान् ।
पर्यष्वजत धर्मज्ञः पितृवत् मातृवच्च सः ॥ ४७ ॥

पर्यष्वजतेति । परिष्वङ्गयोग्यानिति शेषः ॥ ४७ ॥

स तत्र कांश्चित् परिषस्वजे नरान्
नराश्च केचित्तु तमभ्यवादयन् ।
‡चकार सर्वान् सवयस्यबान्धवान्
यथार्हमासाद्य तदा नृपात्मजः ॥ ४८ ॥

तदेवोच्यते—स तत्रेत्यादि ॥ ४८ ॥

---

* उभयमित्यस्यैव प्रपञ्चः—आकाशं भूमिरिति । आकाशं पक्षिभिर्वृतं प्रबभौ, भूमिः मनुष्यैरावृता प्रबभाविति यावत् । † सहितः—अन्योन्यसंगतः—गो. सहितः अभिगम्येत्यन्वयः । ‡ चकार—संमानमिति शेषः—गो. यथार्हं सवयस्यबान्धवान् चकारेति वा ।

[1] मकरमपम्-च.

स तत्र तेषां रुदतां महात्मनां
भुवं च खं चानुनिनादयन् स्वनः ।
[1]गुहा गिरीणां च दिशश्च सन्ततं
*मृदङ्गघोषप्रतिमः प्रशुश्रुवे ॥ ४९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे त्र्युत्तरशततमः सर्गः

गिरीणां गुहाः दिशश्च अनुनादयन्--प्रतिध्वनयन् । षर्म-(४९)मानः सर्गः ॥ ४९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे त्र्युत्तरशततमः सर्गः

चतुरुत्तरशततमः सर्गः

[कौसल्यादिदर्शनम्]

†वसिष्ठः पुरतः कृत्वा दारान् दशरथस्य च ।
अभिचक्राम तं देशं रामदर्शन[2]तर्षितः ॥ १ ॥

अथ भरतेन रामाश्रमगमनसमये मातृगणानयनप्रहितवसिष्ठेन तासामानयनम् । वसिष्ठ इत्यादि । दारान् पुरतः कृत्वा ॥ १ ॥

राजपत्न्यश्च गच्छन्त्यः मन्दं मन्दाकिनीं प्रति ।
ददृशुस्तत्र तत्तीर्थं ‡रामलक्ष्मणसेवितम् ॥ २ ॥

तीर्थं--पुण्यतीर्थम् ॥ २ ॥

---

*अनुनिनादयन् सन्ततं प्रशुश्रुवे इत्यत्र दृष्टान्तः—मृदङ्गघोषप्रतिम इति । †पूर्वं 'ऋषिं वसिष्ठं संदिश्य मातॄन् मे शीघ्रमानय । इति त्वरितमग्रे स जगाम' (99–2) इत्युक्तं स्मर्तव्यमत्र । ‡तदानीमेव रामेण पिण्डप्रदानादिकं निर्वर्त्य गतत्वात्तत्तारिज्ञानेन एवं कथनम् ।

[1] महागिरीणां–ङ. [2] कर्शितः–ङ.

कौसल्या बाष्पपूर्णेन मुखेन परिशुष्यता ।
सुमित्रामब्रवीद्[1]दीना याश्चान्या *राजयोषितः ॥ ३ ॥

†इदं तेषामनाथानां क्लिष्टमक्लिष्टकर्मणाम् ।
वने [2]प्राक्कलनं तीर्थं ये ते निर्विषयीकृताः ॥ ४ ॥

इदमित्यादि । ये ते प्रसिद्धाः रामादयः, अक्लिष्टकर्मणां अनाथानां तेषां क्लिष्टं--क्लेशावहं वने--वनवासे प्राक्कलनं--बहुव्रीहिरयं, प्रथमपरिग्रहवत् तीर्थं--पुण्यतीर्थं आगङ्गायमुनं देशीयमेव तीर्थम् । एवं पाङ्क्ते पाठे 'प्राक्केवलं तीर्थं' इति पठित्वा असङ्गतान् यद्वापक्षानाहान्यः ॥ ४ ॥

इतः, सुमित्रे ! पुत्रस्ते सदा जलमतन्द्रितः ।
‡स्वयं हरति सौमित्रिः मम पुत्रस्य कारणात् ॥ ५ ॥

जघन्यमपि ते पुत्रः कृतवान् न तु गर्हितः ।
§भ्रातुर्यदर्थ[3]सहितं सर्वं ॥[4]तद्विहितं गुणैः ॥ ६ ॥

---

*राजयोषित इति द्वितीयाबहुवचनान्तम् । †ते प्रसिद्धाः ये रामादयः प्राक् निर्विषयीकृताः—राज्यान्निष्कासिताः--निराश्रयीकृता वा, तेषां क्लिष्टं— उपमर्दितं तीर्थं—अवतरणस्थलमित्यर्थः, केवलं निश्चितं ... ; इदं रामादीनां स्नानादिभिर्व्यवहितस्थलं नूनमिति भावः–ती. गो. क्लिष्टं—अहो क्लिष्टमित्यर्थे भावार्थको वा । वने अनाथानामित्यत्र हेतुः—ये ते निर्विषयीकृता इति । ‡'अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते' इति वदतो लक्ष्मणस्य स्वभावं जानन्ती कौसल्या एवं वदति । §भ्रातुः—ज्येष्ठभ्रातुः अर्थसहितं—प्रयोजनसहितं यत् कर्म, तत्सर्वं गुणैर्विहितं–'ज्येष्ठभ्राता पितृसमः' इति वचनात् पितृशुश्रूषावद्गुणाय कृतवत इत्यर्थः–गो. यत्—यस्मात् भ्रातुर्गुणैः विहितं तत् सर्वं जलाहरणादि अर्थसहितं—अर्थवद्भवति । 'गुणैर्दास्यमुपागतः' (किष्कि. 4–12) 'कृतार्थोऽहं भविष्यामि' (अयो. 31–24) इत्ययं खलु लक्ष्मणस्य स्वभाव इति भावः । ॥भ्रातुरर्थरहितं यत् तदेव सर्वं गुणैः—गुणवद्भिः गर्हितं–रा.

[1] दीनां–च. [2] प्राक्केवलं–ङ. [3] रहितं–ङ. [4] तद्गर्हितं–ङ.

जघन्यं—हीनमपि जलाहरणादिकं ते पुत्रः कृतवान्। अथाप्यसौ न गर्हितः। कुत इत्यतः—भ्रातुरित्यादि। यत् यस्मात् अर्थसहितं—प्रयोजनसहितं भ्रातुः गुणैः—ज्यैष्ठ्यसौभ्रात्रपरमधार्मिकत्वादिगुणैः हेतुभिः विहितम् ॥ ६ ॥

*[1] अद्यायमपि ते पुत्रः क्लेशानामतथोचितः।
नीचानर्थसमाचारं सज्जं कर्म प्रमुञ्चतु ॥ ७ ॥

तस्मादेव—अद्येत्यादि। क्लेशानां—अनुभूयमानानां अतथोचितः—यथानुभवमुचितो न भवतीत्यतथोचितः, सेऽयं पुत्रोऽपि नीचः—नीचार्हः—दासार्हः अनर्थः—क्लेशावहः समाचारः—अनुष्ठानं यस्मिन् भ्रातृशुश्रूषाकर्मणि तत्तथा, सज्जं-प्रस्तुतं कर्म यथोक्तरूपं प्रमुञ्चतु, भरतेन रामस्य प्रत्यावर्तयिष्यमाणत्वादिति शेषः ॥ ७ ॥

दक्षिणाग्रेषु दर्भेषु सा ददर्श महीतले।
† पितुरिङ्गुदिपिण्याकं न्यस्तमायतलोचना ॥ ८ ॥
तं भूमौ पितुरार्तेन न्यस्तं रामेण वीक्ष्य सा।
उवाच देवी कौसल्या सर्वा दशरथस्त्रियः ‡ ॥ ९ ॥
इदमिक्ष्वाकुनाथस्य राघवस्य महात्मनः।
राघवेण [2] पितुर्दत्तं पश्यतैतद्यथाविधि ॥ १० ॥

---

* क्लेशानामतथोचितः—इदानीं यादृशक्लेशानुभवः तादृशक्लेशानामनुचितः ते अयं पुत्रः नीचानर्थसमाचारं—निकृष्टदुःखप्रचुरसमाचारसहितं सज्जं-उपयुक्तं कर्म अद्य प्रमुञ्चत्वपि, अपिशब्दः संभावनायाम्। .... भरतप्रार्थनया रामेण स्वराज्ये स्वीकृते लक्ष्मणस्य नीचकर्मप्रमोचनं संभवेदेति भावः—गो. पूर्वश्लोके तथा वदन्त्या अपि कौसल्याया एवं वादः लोकानुसारेण। अथवा—भ्रातृशुश्रूषाया गुणत्वेऽपि राजकुमारस्य जलाहरणादिरूपसेवा अनुचितेति भावः। † पितुरिति चतुर्थ्यर्थे षष्ठी—गो. रामेणेत्यस्यानन्तरश्लोकादाकर्षः। ‡ स्त्रिय इति द्वितीयाबहुवचनान्तम्।

[1] अथायमपि—ङ. [2] पुनर्दत्तं—ङ.

तस्य देवसमानस्य पार्थिवस्य महात्मनः।
नैतदौपयिकं * मन्ये भुक्तभोगस्य भोजनम् ॥ ११ ॥

एतत् भोजनं औपयिकं—उचितं न भवतीति मन्ये। तत्र हेतुः—भुक्तभोगस्येति। भुक्ताः राजभोगाः येन स तथा ॥ ११ ॥

चतुरन्तां महीं भुक्त्वा महेन्द्रसदृशो [1] विभुः।
कथमिङ्गुदिपिण्याकं स भुङ्क्ते वसुधाधिपः ॥ १२ ॥

उक्तार्थ एव विव्रियते—चतुरन्तामित्यादि। चतुस्समुद्रावसानामित्यर्थः ॥ १२ ॥

अतो दुःखतरं लोके न किञ्चित् प्रतिभाति [2] मा।
यत्र रामः पितुर्दद्यात् इङ्गुदीक्षोदमृद्धिमान् † ॥ १३ ॥

क्षोदं—पिष्टम् ॥ १३ ॥

रामेणेङ्गुदिपिण्याकं पितुर्दत्तं समीक्ष्य मे।
कथं दुःखेन हृदयं न स्फोटति सहस्रधा ॥ १४ ॥

स्फोटति—'स्फुटविशरणे', अन्याय्यत्वात् ॥ १४ ॥

श्रुतिस्तु खल्वियं सत्या ‡ लौकिकी प्रतिभाति [3] मा।
यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ॥ १५ ॥

स्फोटो वा न युक्त इत्याश्वसिति—श्रुतिस्त्वित्यादि ॥ १५ ॥

[4] एवमार्ता सपत्न्यस्ताः जग्मुराश्वास्य तां तदा।
ददृशुश्चाश्रमे रामं स्वर्गाच्च्युतमिवामरम् ॥ १६ ॥

---

* औपयिकं—प्राप्तं 'युक्तं स्यादुचितं न्याय्यं प्राप्तमौपयिकं तथा' इति हलायुधः—गो. भुक्तभोगस्य एतत् भोजनं न औपयिकं—न युक्तं 'युक्तमौपयिकं' इत्यमरः। † राज्यैश्वर्ययोग्यतया ऋद्धिमानित्युक्तिः—गो. ‡ लौकिकी—लोकविदिता, लोकप्रसिद्धेति यावत्—गो.

[1] भुवि—च. [2] मे—च, मां—ङ. [3] मे—च. [4] एवमार्ताः—ङ.

सर्वभोगैः परित्यक्तं रामं संप्रेक्ष्य मातरः ।
आर्ता मुमुचुरश्रूणि [1]सस्वरं शोककर्शिताः ॥ १७ ॥

तासां रामः समुत्थाय जग्राह [2]चरणान् शुभान् ।
मातॄणां मनुजव्याघ्रः सर्वासां सत्यसङ्गरः ॥ १८ ॥

ताः पाणिभिः [3]सुखस्पर्शैः मृद्वङ्गुलि[4]तलैः शुभैः ।
प्रममार्जू रजः पृष्ठात् रामस्यायतलोचनाः ॥ १९ ॥

पृष्ठात्—पृष्ठदेशात्, 'पृष्ठं तु चरमं तनोः' ॥ १९ ॥

सौमित्रिरपि ताः सर्वाः मातॄः संप्रेक्ष्य [5]दुःखितः ।
अभ्यवादयदासक्तं* शनै रामादनन्तरम् ॥ २० ॥

आसक्तं—भावे निष्ठा, स्नेहासङ्गोपेतमिति यावत् ॥ २० ॥

यथा रामे तथा तस्मिन् सर्वा ववृतिरे स्त्रियः ।
†वृत्तिं दशरथाज्जाते लक्ष्मणे शुभलक्षणे ॥ २१ ॥

ववृतिरे—वर्तितवत्यः ॥ २१ ॥

सीताऽपि चरणांस्तासां उपसङ्गृह्य दुःखिता ।
श्वश्रूणामश्रुपूर्णाक्षी सा बभूवाग्रतः स्थिता ॥ २२ ॥

तां परिष्वज्य दुःखार्ता माता दुहितरं यथा ।
वनवास[6]कृशां दीनां कौसल्या वाक्यमब्रवीत् ॥ २३ ॥

---

* असक्तं—अविरतं 'अविरतमनवरतं स्यात् एकार्थमनारतमसक्तमपि' इति हलायुधः-गो. रामादनन्तरं, अविलम्बेनैव अभ्यवादयत—इत्यर्थ इति भावः।
† वृत्तिं ववृतिरे—पाकं पचतीतिवत् प्रयोगः ।

[1] सुस्वरं-ङ. [2] चरणाम्बुजान्-च. [3] शुभस्पर्शैः-ङ. [4] दलैः-ङ.
[5] दुःखिताः-ङ. [6] कृतां-च.

विदेहराजस्य सुता स्नुषा दशरथस्य च ।
रामपत्नी कथं दुःखं संप्राप्ता निर्जने वने ॥ २४ ॥

पद्ममातपसन्तप्तं परिक्लिष्टमिवोत्पलम् ।
काञ्चनं रजसा ध्वस्तं क्लिष्टं चन्द्रमिवाम्बुदैः ॥ २५ ॥

परिक्लिष्ट—परिमृदितं उत्पलं—रक्तोत्पलम् । ध्वस्तं—अभिभूतम् ॥

मुखं ते प्रेक्ष्य * मां शोकः दहत्यग्निरिवा[1]शयम् † ।
भृशं मनसि, वैदेहि! व्यसनारणिसंभवः ॥ २६ ॥

मनसि संक्रान्तः व्यसनारणिसम्भवः शोकः, अग्निः आशयं—गृहं, आशय्यते अस्मिन्नित्याशयः—गृहमिव मां दहति ॥ २६ ॥

ब्रुवन्त्यामेवमार्तायां जनन्यां भरताग्रजः ।
पादावासाद्य जग्राह वसिष्ठस्य च राघवः ॥ २७ ॥

पुरोहितस्याग्निसमस्य वै तदा
　बृहस्पतेरिन्द्र [2]इवामराधिपः ।
प्रगृह्य पादौ सुसमृद्धतेजसः
　सहैव तेनोपविवेश राघवः ॥ २८ ॥

‡ ततो [3]जघन्यः [4]सहितैः [5]समन्त्रिभिः
　पुरप्रधानैश्च [6]सहैव सैनिकैः ।
जनेन धर्मज्ञतमेन धर्मवान्
　§ उपोपविष्टो भरतस्तदाऽग्रजम् ॥ २९ ॥

---

* ते मुखं प्रेक्ष्य, स्थितामिति शेषः—गो. † आश्रयाश इत्यग्नेर्नामान्तरम् । ‡ ततो जघन्यं—वसिष्ठरामोपवेशादनन्तरं—गो. जघन्यं—निम्नदेशं—रा. § अग्रजमुपोपविष्टः ।

[1] श्रयम्—ङ. च.　[2] इवामराग्रजः—ङ.　[3] जघन्यं—ङ. च.
[4] सह तैः—ङ.　[5] स्वमन्त्रिभिः—च.　[6] तथैव—च.

तत इति। वसिष्ठसमोपवेशनानन्तरं जघन्यः–जघनभागाश्रितः–पृष्ठभागाश्रितः सन् उपोपविष्टो बभूवेत्यन्वयः ॥ २९ ॥

उपोपविष्टस्तु [1]तदा स वीर्यवान्
तपस्विवेषेण समीक्ष्य राघवम्।
श्रिया ज्वलन्तं भरतः *कृताञ्जलिः
यथा महेन्द्रः प्रयतः प्रजापतिम् ॥ ३० ॥

उपोपविष्ट इत्यादिकं जनाभिप्रायानुभाषणम् ॥ ३० ॥

किमेष वाक्यं भरतोऽद्य राघवं
प्रणम्य सत्कृत्य च साधु वक्ष्यति।
इतीव तस्यार्यजनस्य [2]तत्त्वतः
बभूव कौतूहलमुत्तमं तदा ॥ ३१ ॥

तत्त्वतः किं साधु वक्ष्यतीति योजना ॥ ३१ ॥

स राघवः सत्यधृतिश्च लक्ष्मणः
महानुभावो भरतश्च धार्मिकः।
वृताः सुहृद्भिश्च विरेजुरध्वरे
यथा सदस्यैः सहितास्त्रयोऽग्नयः † ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे चतुरुत्तरशततमः सर्गः

त्रयोऽग्नय इति शत्रुघ्नस्याप्राधान्येन परिहरणात्। रुद्र(३२)-मानः सर्गः ॥ ३२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे चतुरुत्तरशततमः सर्गः

---

* कृताञ्जलिः, अभूदिति शेषः–गो. कृताञ्जलिः उपोपविष्टः इति वा।

† लक्ष्मणशत्रुघ्नयोरेकोदरजत्वाद् वा शत्रुघ्नस्य पृथगनुक्तिः।

[1] तदातिवीर्यवान्–च. [2] सर्वतः–ङ.

पञ्चोत्तरशततमः सर्गः

[रामभरतसंवादः]

*ततः पुरुषसिंहानां वृतानां तैः सुहृद्गणैः।
शोचतामेव रजनी दुःखेन व्यत्यवर्तत ॥ १ ॥

एवं मन्त्रिपुरोहितादिसकलराजकर्तृसमागमे किं वदिष्यतीति जने चोत्सुके सति स्वमात्रा प्रापितं राज्यं रामाय समर्प्य तत्त्वतः प्रत्यावृत्तिं प्रार्थयानमपि भरतं रामः पितृवियोगशोकादेवमयं ब्रूत इति मन्वानः शोकापनोदपूर्वं उभयोः पितृवचने स्थितिमेव स्थापयति। ततः पुरुषेत्यादि। एवञ्च प्रस्पष्टायां पूर्वापरसर्गसंगत्यां अपरः 'तं तु रामः समाश्वास' इति सर्गमिह प्रक्षिप्य व्याकरोत्। तदनुचितमिति प्रागेवोक्तम्। सुहृद्गणैः वृतानामिति। पूर्वसर्गान्तोक्तरीत्या शोचतां-पितृमरणदुःखेन ॥ १ ॥

रजन्यां सुप्रभातायां भ्रातरस्ते सुहृद्वृताः।
मन्दाकिन्यां हुतं जप्यं कृत्वा †[1] द्वारमुपागमन् ॥ २ ॥

मन्दाकिन्यां–तत्तीरे। हुतं–प्रातरौपासनहोमम्। जप्यं–गायत्रीजपम्। द्वारं–उटजद्वारम् ॥ २ ॥

---

*एतत्पूर्वं 'तं तु रामः समाश्वास' इत्यादिरेव पठनीय इति गोविन्दराजः। यद्यपि गोविन्दराजदृशा एतत्पूर्वसर्गे रामभरतसंवादस्योपक्रान्तत्वात् 'वदतामेव रजनी' इति वक्तव्ये 'शोचतामेव रजनी' इत्युक्तिरस्वरसेव—तथाऽपि कतकदृष्टयाऽपि पूर्वसर्गान्ते शोकावर्णनात्, प्रत्युत 'किमेष वाक्यं भरतोऽद्य वक्ष्यति' इत्येव कथनात् अस्वरसाधिक्यमेव। 'सान्त्विता मामिका माता' (४) इत्यादिकमपि गोविन्दराजपक्ष एव स्वरसम्। अधिकं 357 पुटे द्रष्टव्यम्। ४ श्लोकटिप्पण्यपि द्रष्टव्या। †'द्वारं' इति पाठः, उटजद्वारमित्यर्थ इति केचित्—तन्न—उत्तरसर्गे मन्दाकिनीतीरे राममुवाचेत्युक्तेः–ति.

[1] राम–सर्वत्र.

तूष्णीं ते समुपासीनाः न कश्चित् किञ्चिदब्रवीत् ।
भरतस्तु सुहृन्मध्ये रामं वचनमब्रवीत् ॥ ३ ॥

*सान्त्विता मामिका माता दत्तं राज्यमिदं मम ।
तद्ददामि तवैवाहं भुङ्क्ष्व राज्यमकण्टकम् ॥ ४ ॥

सान्त्वितेत्यादि । मामिकेति । 'केवलमामक' इति ङीपश्छन्दोविषयत्वात् तथात्वस्येहानाश्रयात् टापि 'मामकनरकयोरुपसङ्ख्यानम्' इति कात्पूर्वस्य इत्—मामिका माता प्रथमं राज्ञा राज्यदानेन सान्त्विता—सञ्जातसान्त्वा, अनन्तरं मम तया इदं राज्यं दत्तम् । एवं तद्दत्तमिदं—तदिदं अहं तवैव ददामि । अतः अकण्टकं—उक्तप्रकारेण पितृवचनस्यापि परिपालितत्वात् प्रत्यूहरहितं इदं राज्यं भुङ्क्ष्व ॥ ४ ॥

†महतेवाम्बुवेगेन [1]भिन्नः सेतुर्जलागमे ।
दुरावारं त्वदन्येन राज्यखण्डमिदं महत् ॥ ५ ॥

जलागमे—वर्षाकाले । दुरावारं—आवरीतुमशक्यं, वृतः खलु, अशक्यरक्षणमित्यर्थः । राज्यस्य खण्डः—भागः तथा । अत्र खण्डशब्देनाल्पत्वप्रतीतिव्यावृत्त्यै उक्तं—महदिति । महानस्मदीयो देश इत्यर्थः ॥ ५ ॥

---

*दत्तमन्यथयितुं न शक्तोऽहमिति रामो वदेदिति मत्वा तस्य परिहारानुगुणं वचनमाह—सान्त्वितेति—गो. वस्तुतस्तु गोविन्दराजरीत्या पूर्वसर्गे 'मातापितृभ्यामुक्तोऽहं' (22) इत्यादे रामदत्तपरिहारानात्तदनुगुणोत्तरदानाशक्तेरेव 'शोचतामेव रजनी' इति शोकदर्शनात्, अत्रेऽपि तदनुगुणोत्तरदानमत्र । † जलागमे महताऽम्बुवेगेन भिन्नः सेतुः पुनः जलं यथा न वारयेत्तथेत्यर्थः ।

[1] भिन्नसेतुः-ङ

*गतिं खर इवाश्वस्य तार्क्ष्यस्येव पतत्रिणः ।
अनुगन्तुं न शक्तिर्मे गतिं तव, महीपते ! ॥ ६ ॥

ननु त्वयैव महावीरेण सुरक्षमेवेत्यत आह—गतिमित्यादि । तव गतिं—त्वदीयं राज्यपालनसामर्थ्यं अनुगन्तुं मे शक्तिर्नास्ति ॥ ६ ॥

†सुजीवं नित्यशस्तस्य यः परैरुपजीव्यते ।
राम! [1]तस्य तु दुर्जीवं यः परानुपजीवति ॥ ७ ॥

अत्रैव हेतुमाह—सुजीवमित्यादि । सुखेन जीवितुं शक्यं सुजीवम् । यः परैर्नित्यश उपजीव्यते तस्य—तेनेत्यर्थः; 'न लोक' इति निषेधेऽपि कर्तरि षष्ठ्यार्षी । सुजीवं, अनपेक्षत्वात् । हे राम ! यः परानुपजीवति तेन दुर्जीवं—जीवितुमशक्यम् ॥ ७ ॥

‡[2]यथा तु रोपितो वृक्षः पुरुषेण विवर्धितः ।
ह्रस्वकेन दुरारोहः रूढस्कन्धो महाद्रुमः ॥ ८ ॥

---

* खरेत्यविभक्तिकनिर्देशः, खरस्येत्यर्थः, प्रकृतिभाव आर्षः । पतत्रिणः—पक्षिमात्रस्य । अश्वस्य गतिमनुगन्तुं खरस्य यथा न शक्तिः, गरुडस्य गतिमनुगन्तुं केवलपक्षिणो यथा च शक्तिर्नास्ति, तथेत्यर्थः-**गो.** अश्वगतिमनुगन्तुं खरो यथा न शक्तः, तार्क्ष्यगत्यनुगमने यथेतरपक्षिणो न शक्ताः तथा तव गतिं—त्वदीयां राज्यपरिपालनशक्तिमनुगन्तुं न मे शक्तिः, इवशब्दः यथाऽर्थे-**ति.** † तव स्वतः शक्तिर्नास्ति चेद शक्तपुरुषोपसर्पणादिना राज्यं कुरु—इति चेत्तत्राह सुजीवमित्यादि । स्वयं शक्तस्य सुकरत्वाय मन्त्र्याद्यपेक्षण किल युक्तं, अशक्तस्य नित्यपरोपजीवनं तु हेयमेवेति भावः । ‡ लोकरक्षणार्थं दशरथेनोत्पाद्य वर्धितः सकलसद्गुणसंपन्नस्त्वं यदि लोकरक्षणं न कुर्याः, तदा तस्य लोकस्य दशरथस्य त्वया न प्रयोजनमिति उपदेशमुखेन फलादर्शनवृक्षोपन्यस्यमाह—यथा त्वित्यादिश्लोकत्रयेण-**ती.** रोपयितुः दशरथ उपमेयः, वर्धितमहावृक्षस्य भवान्, पुष्पदर्शनस्याभिषेचनोन्मुख्यं, फलाननुभवस्य भवतो राज्यापरिपालनम्-**गो.**

[1] तेन-ङ. [2] यथा त्वारोपितः-ङ.

[1]स यदा पुष्पितो भूत्वा फलानि न विदर्शयेत् ।
स तां नानुभवेत् प्रीतिं यस्य हेतोः [2]प्ररोपितः ॥ ९ ॥
एषोपमा, महाबाहो! [3]तमर्थं वेत्तुमर्हसि ।
यदि त्वमस्मान् वृषभः भर्ता भृत्यान् न शाधि हि ॥१० ।

अस्त्वेवं लोकस्थितिः; प्रकृते किमायातम्? इत्यत्र स्वेषामुपजीवित्वं सदृष्टान्तमन्यापदेशतो दर्शयति—यथा त्वित्यादि । यथैव वृक्षः फलार्थिना पुरुषेण आरोपितः—कृतबीजावापः अनन्तरं शनैः वर्धितः, अत एव ह्रस्वकेण—खर्वेण दुरारोहः, तदनन्तरं रूढस्कन्धः स महाद्रुमः यथा पुष्पितोऽपि भूत्वा यदा फलानि न विदर्शयेत्, तदा सः—तदारोपकः यस्य फलस्य हेतोः तद्द्रुमं प्रभावितः—उत्पादितवान्, स तां प्रीतिं—स्वाभिमतफलप्राप्तिजां प्रीतिं—यथा नानुभवेत्; हे महाबाहो ! वृषभः—श्रेष्ठः अत एव भर्ता भृत्यान्—त्वदुपजीविनः न शाधि—न शिक्षयसीत्येवंरूपे यत्र मया उपमा वक्तव्या तत्रैषोपमा—वृक्षोपमोक्ता । तस्य योऽर्थः तं वेत्तुं त्वमेवार्हसि । राज्ञा वृद्धेन स्वोपजीविसर्वजनोपजीविना महावृक्षवत् अफलं साधितेन त्वया त्वदुपजीविनामस्माकं उपजीवनासंपादनेन निष्प्रयोजनो राज्ञः त्वदुत्पादनरूपोऽर्थः । एवञ्च प्रकृते उपजीवित्वात् उपजीव्यसत्पदवी मनसाऽपि न मया शक्यकक्षीकारेति फलितम् ॥ ८–१० ॥

श्रेणयस्त्वां, महाराज! *पश्यन्त्वग्र्याश्च सर्वशः ।
प्रतपन्तमिवादित्यं राज्ये स्थितमरिन्दमम् ॥ ११ ॥

नानाजातीयाः सङ्घाः—श्रेणयः ॥ ११ ॥

---

* राज्ये स्थितं पश्यन्त्वित्यन्वयः ।

[1] स यथा—ङ. [2] प्रभावितः—ङ. [3] तदर्थं—ङ.

तवानुयाने, काकुत्स्थ! मत्ता नर्दन्तु कुञ्जराः ।
अन्तःपुर[1]गता नार्यः नन्दन्तु सुसमाहिताः ॥ १२ ॥
*** तस्य [2]साध्वित्यमन्यन्त नागरा विविधा जनाः ।**
भरतस्य वचः श्रुत्वा रामं प्रत्यनुयाचतः ॥ १३ ॥

तस्य साध्विति । वचः श्रुत्वा तस्य साध्वित्यमन्यन्तेति योजना ॥ १३ ॥

तमेवं दुःखितं [3]प्रेक्ष्य विलपन्तं यशस्विनम् ।
रामः † कृतात्मा भरतं समाश्वासयदात्मवान् ॥ १४ ॥

तमेवमित्यादि । एवं विलपन्तं तं दुःखितं प्रेक्ष्य—दुःखवशादेवं वक्तीत्यालक्ष्य तावद्दुःखादाश्वासयत् ॥ १४ ॥

‡ नात्मनः [4]कामकारो हि पुरुषोऽयमनीश्वरः ।
इतश्चेतरतश्चैनं कृतान्तः परिकर्षति ॥ १५ ॥

तस्यैव प्रकारः—नात्मन इत्यादि । आत्मनः—प्रत्यगात्मनः कामकारः—स्वेच्छया स्वोपग्रहसृष्टिधृतिसंहृतिप्रवर्तनसामर्थ्यं नास्ति । हि—यस्मात् अयं पुरुषः अनीश्वरः—ईश्वरवत् स्वोपाधिकसृज्यादिस्वतन्त्रशक्तिरहितः, तस्मात् एनं इतश्च—अस्माद्देहलोकाच्च इतरतश्च—परस्माद्देहलोकाच्च कर्मानुरूपं कृतान्तः कालः कर्षति ॥

---

* तस्य भरतस्य वचः श्रुत्वेत्यन्वयः । † कृतात्मा—सुशिक्षितबुद्धिः, धैर्यवान् वा—**गो.** कृतः आत्मा—वनगमनाय प्रयत्नः येन स रामः—**रा.** ‡ आत्मनः—चेतनस्य जीवस्य कामकारः स्वेच्छाचरणं नास्ति । यतोऽयमनीश्वरः—परतन्त्रः । कृतान्तः—दैवं 'दैवे कृतान्तः....' इति वैजयन्ती, एनं इतस्ततः स्वेच्छया परितः कर्षति । तस्य संपूर्णस्वातन्त्र्याभिप्रायेण 'इतश्चेतरतश्च' इत्युक्तिः ।

[1] चरा—ङ. [2] साध्वनुमन्यन्त—ङ. [3] वीक्ष्य—ङ. [4] कामकारोऽस्ति—ङ.

*सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ताः मरणान्तं च जीवितम् ॥ १६ ॥

न केवलं पुरुषस्य कालवशादनित्यत्वं, अपि तु सर्वस्यापी-त्याह—सर्व इत्यादि । क्षयान्ताः-नाशपर्यवसानाः । निचयाः-सङ्ग्रहाः । समुच्छ्रयाः-विभैश्वर्यादिकृतमौन्नत्यम् । मरणान्तं च जीवितमिति । सर्वत्र कालवशादिति शेषः । अतः कालगतिं गतो राजा न शोचनीय इत्यनुकर्षः ॥ १६ ॥

†यथा फलानां पक्कानां नान्यत्र पतनात् भयम् ।
एवं नरस्य जातस्य नान्यत्र मरणात् भयम् ॥ १७ ॥

पतनादन्यत्र न भयमिति । पतनस्यैवाशक्यपरिहारत्वात् भयम् । एवं जातस्य तत एव हेतोः अशक्यपरिहारं मरणभयमित्यर्थः ॥

यथाऽगारं दृढस्थूणं जीर्णं [1]भूत्वाऽवसीदति ।
[2]तथैव सीदन्ति नराः जरामृत्युवशं गताः ॥ १८ ॥

कालवशात् क्षये दृष्टान्तान्तरं—यथाऽगारमित्यादि ॥ १८ ॥

---

* निचयाः-धनसंचयाः सर्वे क्षयान्ताः-क्षयपर्यवसायिनः—चोरेण कामेन राज्ञा वा नश्यन्तीत्यर्थः . . . . . . अस्मिन् श्लोके पादत्रयोक्तार्थत्रयं दृष्टान्तार्थं, तुरीयपादस्तु दार्ष्टान्तिकं-गो. † प्रथमश्लोके वनगमनं न मया स्वतन्त्रेण कृतं, अपि त्वीश्वरकृत-मित्युक्तम् । द्वितीयश्लोके दशरथमरणं च कालकृतं, अतः तत्रापि न शोचनीयमित्युक्तम् । अथ द्वितीयश्लोकोक्तं सदृष्टान्तं प्रपञ्चयति—यथेत्यादिना-गो. यथा पक्कानां फलानां-तालादिजन्यानां पतनादन्यत्र-अन्यस्मिन् काले भयं-काकादिपक्षिभक्षणभीतिर्नास्ति, तथा जातस्य नरस्य मरणात्-मर्त्यलोकादन्यत्र भयं नास्ति । एतेन मर्त्यलोकादन्यत्र नयने यत्नः कर्तव्य इति सूचितम्-रा.

[1] भूत्वोपसीदति-च. [2] तथाऽवसीदन्ति -च.

[1]अतीता रजनी या तु सा न प्रतिनिवर्तते ।
यात्येव यमुना [2]पूर्णा *[3]समुद्रमुदकार्णवम् ॥ १९ ॥

अतीता रजनी न प्रतिनिवर्तत इत्यत्र यमुनादृष्टान्तः । यात्येवेति । न प्रतिनिवर्तत इत्यर्थः । उदकार्णवमित्यनेन पयोदध्यादिसमुद्रव्यावृत्तिः ॥ १९ ॥

अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह ।
आयूंषि क्षपयन्त्याशु ग्रीष्मे †जल[4]मिवाशवे ॥ २० ॥

'गच्छन्ति' इति शत्रन्तम् । आशये—जलाशये ॥ २० ॥

आत्मानमनुशोच त्वं किमन्यमनुशोचसि ।
[5]आयुस्ते हीयते यस्य स्थितस्य च गतस्य च ॥ २१ ॥

यदेवं कालवर्गो दुर्वारः, अतः आत्मानं—त्वामेव प्रति त्वमनुशोच—'मृत्युर्दुर्वार आयाति, का मे गतिरिहामुत्र ?' इति चिन्तय । अन्यं—राजानम् । स्वस्यैव शोचनीयत्वमस्तीत्याह—आयुस्त्वित्यादि । ‡यस्येति । यस्य कस्यापीत्यर्थः ॥ २१ ॥

§सहैव मृत्युर्व्रजति सह मृत्युर्निषीदति ।
‖गत्वा [6]सुदीर्घमध्वानं सह मृत्युर्निवर्तते ॥ २२ ॥

---

* समुद्रस्योदकाकुलत्वविशेषणं यमुनायाः सर्वथाऽनिवर्त्यत्वाय-गो. † जलमिवांशवः (पा.)—अंशवः, सूर्यस्येति शेषः—गो. ‡ स्थितस्य गतस्य च यस्य ते इति वाऽन्वयः । § अन्तर्यामिण एव मृत्युरूपत्वात् अपरिहार्यः स इति भावः—ति. ‖ एवं मृत्योरविनाभावात् सुदूरगमनेऽपि मृत्युर्न निवर्तत इत्याशयः ।

[1] अत्येति-ङ. [2] पूर्णा—च. [3] समुद्रमुदकाकुलम्, समुद्रं लवणार्णवम्—ङ. [4] मिवांशवः—ङ. च. [5] आयुस्तु—च. [6] सुदूर—ङ.

सह व्रजति, सह निषीदति, सह मृत्युर्निवर्तत इति। न तु दूरे देशे मृत्युं स्थापयित्वा स्वेनागन्तु शक्यमित्यर्थः ॥ २२ ॥

गात्रेषु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः।
जरया पुरुषो जीर्णः * किं हि कृत्वा प्रभावयेत् ॥ २३ ॥

वलयः जराकृताः। किं हि कृत्वा—किं बलं प्राप्य प्रभावयेत्—प्रभुत्वं भावयेत् ॥ २३ ॥

† नन्दन्त्युदित आदित्ये नन्दन्त्यस्तमिते[1] रवौ।
आत्मनो नावबुध्यन्ते मनुष्या जीवितक्षयम् ॥ २४ ॥
‡ [2] हृष्यन्त्यात्ममुखं दृष्ट्वा नवं नवमिहागतम्।
ऋतूनां परिवर्तेन प्राणिनां प्राणसंक्षयः ॥ २५ ॥

नवं नवमिव—प्रागप्राप्तमिव आत्ममुखं—स्वस्वाभिमुखागतं ऋतूनां परिवर्तनं दृष्ट्वा मोहात् हृष्यति, नेदं युक्तमित्याह—ऋतूनामित्यादि। परिवर्तः—पुनःपरिवृत्तिः ॥ २५ ॥

यथा काष्ठं च काष्ठं च समेयातां महार्णवे।
समेत्य च व्यपेयातां कालमासाद्य कश्चन ॥ २६ ॥

---

* किं हि कृत्वा—पूर्वोक्तोपद्रवपरिहारत्वेन कमुपायं कृत्वा आत्मानं प्रभुं कुर्यात् इत्यर्थः-गो. केन वोपायेन जरादिकं वारयेत्, न केनापीति भावः। † आदित्ये उदिते नन्दन्ति—अर्थार्जनकालोऽयमागत इति। रवौ अस्तमितेऽपि नन्दन्ति—कामोपभोगकालोऽयमागत इति-गो. अथवा अजामित्वादिना—'कथं क्षपयितव्यं अहः' 'कथं वेयं रजनी क्षपयितव्या' इत्यादिभावनया सूर्योदयं सूर्यास्तमयं च जनाः सानन्दं प्रतीक्षन्ते, जीवितक्षयं तु न जानन्त्यपि, अहो! इतितात्पर्यकं वचनमिदम्। ‡ हृष्यन्त्यृतुमुखं (पा.) ऋतुमुखं—ऋत्वागमं-गो.

[1] ऽहनि-च. [2] हृष्यन्त्यृतुमुखं-ङ. च.

एवं भार्याश्च पुत्राश्च ज्ञातयश्च [1]धनानि च ।
समेत्य व्यवधावन्ति ध्रुवो ह्येषां विनाभवः ॥ २७ ॥

काष्ठं च काष्ठं चेति । *पोतद्वयमित्यर्थः । कञ्चन कालं—वायुम् । विनाभवः—विप्रयोग इति यावत् ॥ २७ ॥

†नात्र कश्चिद्यथाभावं प्राणी [2]समतिवर्तते ।
तेन तस्मिन्न सामर्थ्यं प्रेतस्यास्त्यनुशोचतः ॥ २८ ॥

नात्रेत्यादि । अत्र—संसारे कश्चिदपि संसारिप्राणी यथाभावं—यथाप्राप्तस्वभावं—जनिमृति-मृतिजनिलक्षणं नातिवर्तते—न लङ्घयति, तेन—हेतुना, प्रेतस्यानुशोचतः इति षष्ठ्यार्षी, प्रेतमनुशोचतश्चापि तस्मिन्—स्वकप्रेतभावनिवर्तने सामर्थ्यं नास्त्येव ॥ २८ ॥

यथा हि ‡सार्थं गच्छन्तं ब्रूयात् कश्चित् पथि स्थितः ।
अहमप्यागमिष्यामि पृष्ठतो भवतामिति ॥ २९ ॥
एवं पूर्वैर्गतो मार्गः [3]पितृपैतामहो ध्रुवः ।
तमापन्नः कथं शोचेत् यस्य नास्ति व्यतिक्रमः ॥ ३० ॥

---

* काष्ठं—दारुखण्डो वा । अवशपतितं दारुखण्डद्वयं कदाचित् समेति, कदाचित् विभजते च, तथैव भार्यापुत्रादिसमागमवियोगाविति भावः । † अत्र—अस्मिन् लोके कश्चिदपि प्राणी यथाभावं न समभिवर्तते—यथाभिलाषं बन्धुभिस्सह न वर्तते। तेन—कारणेन प्रेतस्य-मृतस्य हेतोः अनुशोचतः पुरुषस्य तस्मिन्—मरणनिवारणे सामर्थ्यं नास्ति। यद्वा अस्मिन् लोके कश्चिदपि जन्तुः यथाभावं—यथाभिलाषं—अप्रतिहतसंकल्पतयेत्यर्थः, न समभिवर्तते . . . . तेन—एवमप्रतिहतसंकल्पत्वाभावेन प्रेतस्य—मृतस्य हेतोः—गो. अत्र—संसारे कश्चिदपि प्राणी यथाभावं—यथाप्राप्तं स्वभावं मृतिजनिलक्षणं न समतिवर्तते—न लङ्घयति। तेन हेतुना प्रेतस्य, सम्बन्धसामान्ये षष्ठी, प्रेतमनुशोचतोऽस्य तस्मिन्—स्वीयप्रेतभावनिवर्तने सामर्थ्यं नास्ति-ति. ‡ सार्थं—पथिकसमूहं—गो.

[1] वसूनि च—च. [2] समभिवर्तते—ङ. [3] पितृपैतामहैः—ङ. पैतृपितामहैः—च.

पूर्वगतिसमानगतित्वे दृष्टान्तः—यथा हीत्यादि । सार्थः—वणिक्समूहः । गच्छन्तमिति । पुरतो गच्छन्तमित्यर्थः । उक्ताया लोकस्थितेः प्रकृतोपयोगदर्शनं—एवमित्यादि । पितृपैतामहैः, वृद्धिः छान्दसी, पितृपितामहैरित्यर्थः । ध्रुवः—अवश्यंभावी । तं अवश्यप्राप्यं मार्गं, यस्य—यन्मार्गगमनस्य व्यतिक्रमः—लङ्घनं कस्यापि नास्ति, स्वयमपि तन्मार्गमापन्नः—कथं पूर्वं गतं प्रति शोचेत् ? अतः पितृशोको निष्प्रयोजनः ॥ २९-३० ॥

*वयसः पतमानस्य स्रोतसो वाऽनिवर्तिनः ।
आत्मा सुखे नियोक्तव्यः सुखभाजः प्रजाः स्मृताः ॥

अनुष्ठेयं त्वेतावादित्याह—वयस इत्यादि । स्रोतसो वा—गङ्गादिप्रवाहस्येव अनिवर्तिनः—प्रत्यावृत्तिरहितस्य पतमानस्य—गच्छतः वयसः मध्ये आत्मा सुखे—तत्साधने च नियोक्तव्यः । अतः सुखभाजः—सुखतत्साधनाप्तिनिमित्तजन्मभाजः स्मृताः ॥ ३१ ॥

†धर्मात्मा स शुभैः[1] कृत्स्नैः क्रतुभिश्चाप्तदक्षिणैः ।
[2][धूतपापो गतः स्वर्गं पिता नः पृथिवीपतिः ।
भृत्यानां भरणात् सम्यक् प्रजानां परिपालनात् ॥

---

* सप्तम्यर्थे षष्ठी । वाशब्द इवार्थः । अनिवर्तिनि स्रोतसीव वयसि पतमाने—अनिवर्तितया गच्छति सति आत्मा सुखे—सुखहेतौ धर्मे नियोक्तव्यः, परलोकचिन्तयेति शेषः । यतः प्रजाः सुखभाजः—धर्मसाध्यसुखासक्ताः स्मृताः—गो. पतमानस्य—गच्छतः वयसः, नाशं दृष्ट्वेति शेषः—ति. वयस इति अनादरे वा षष्ठी । सांसारिकं परिणामं अलक्षीकृत्य उत्तरभाविनिरतिशयसुखरूपपरमपुरुषार्थे आत्मा नियोक्तव्यः—यथा मुक्तः स्यात् तथा प्रयतितव्यम् । यतः प्रजानां जनिरेव तदर्था इति वा अर्थः ।
† धर्मात्मा स्वर्गतः स नः पिता न शोच्य इत्यन्वयः ।

[1] सर्वैः, क यैः-क [2] कुण्डलीकृतः पाठः गोविन्दराजसम्मतः ।

अर्थाऽऽदानाच्च धर्मेण पिता नः त्रिदिवं गतः ।
कर्मभिस्तु शुभैरिष्टैः क्रतुभिश्चाप्तदक्षिणैः ॥
स्वर्गं दशरथः प्राप्तः पिता नः पृथिवीपतिः ।
इष्ट्वा बहुविधैर्यज्ञैः भोगांश्चावाप्य पुष्कलान् ॥
उत्तमं चायुरासाद्य स्वर्गतः पृथिवीपतिः ।
आयुरुत्तममासाद्य भोगानपि च राघवः ॥]
स न शोच्यः पिता तातः स्वर्गतः सत्कृतः सताम् ॥ ३२ ॥

यदेवं, अतः—धर्मात्मेत्यादि । सतां सत्कृतः—सद्भिः पूज्यमान इति यावत ॥ ३२ ॥

स जीर्णं मानुषं देहं परित्यज्य पिता हि नः ।
*[1] दैवीमृद्धिमनुप्राप्तः ब्रह्मलोकविहारिणीम् ॥ ३३ ॥

ब्रह्मलोकविहारिणीं—ब्रह्मलोकविहारार्हां दैवीं ऋद्धिं—भूमानन्दपदाविर्भैश्वर्यपरिकरमित्यर्थः ॥ ३३ ॥

तं तु नैवंविधः कश्चित् प्राज्ञः शोचितुमर्हति ।
†[2] तद्विधो यद्विधश्चापि श्रुतवान् बुद्धिमत्तरः ॥ ३४ ॥

श्रुतवान्—अधीतवेदवेदान्तलक्षणविद्यावान् ॥ ३४ ॥

एते बहुविधाः शोकाः ‡ विलापरुदिते तथा ।
वर्जनीया हि धीरेण सर्वावस्थासु धीमता ॥ ३५ ॥

शोकः मानसः । तत्कार्ये विलापरुदिते वाक्कायस्थे ॥ ३५ ॥

---

* दैवीमृद्धिं—देवसम्बन्धिसंपदं दिव्यदेहादिलाभरूपां—गो. † श्रुतवान् बुद्धिमत्तरश्च यद्विधोऽसि तद्विध इत्यर्थः—गो. ‡ विलापरुदिते—प्रलापाश्रुमोचने—गो.

[1] दैवीं सिद्धिं, दैवीं वृत्तिं—ङ. [2] त्वद्विधो मद्विध—च.

*[1]स स्वस्थो भव मा [2]शोकः यात्वा चावस तां पुरीम् ।
तथा पित्रा नियुक्तोऽसि वशिना, [3]वदतां वर ! ॥ ३६ ॥

स स्वस्थ इति । एवं शोचन्नित्यर्थः । मा शोकः - शोको मा स्तु । तां पुरीं यात्वा— गत्वा—स्वस्थः त्वं वस । कथमेवं नियोग इत्यतः—तथेत्यादि । वशिना—सत्यवशगेन ॥ ३६ ॥

†यत्राहमपि तेनैव नियुक्तः पुण्यकर्मणा ।
तत्रैवाहं करिष्यामि पितुरार्यस्य शासनम् ॥ ३७ ॥

यत्र—यस्मिन् कृत्ये । तत्रैवाहमिति । तत्रैव प्रवृत्तः तत् करिष्यामि ॥ ३७ ॥

न मया शासनं तस्य त्यक्तुं न्याय्यं, अरिन्दम !
[4]तत् त्वयाऽपि सदा [5]मान्यं स वै बन्धुः स नः पिता ॥

तद्वचः पितुरेवाहं सम्मतं धर्म[6]चारिण ।
कर्मणा पालयिष्यामि वनवासेन, राघव ! ॥ ३९ ॥

पितुर्वच एवाहं कर्मणा—तदुचितव्यापारेण ॥ ३९ ॥

धार्मिकेणानृशंसेन नृपेण [7]गुरुवर्तिना ।
भवितव्यं, नरव्याघ्र ! परलोकं जिगीषता ॥ ४० ॥

नृपेण —क्षत्रियेण परलोकं जिगीषता—धार्मिकत्वादिस्वभाववता भवितव्यम् ॥ ४० ॥

---

* मद्विवासनं त्वयाऽपि मान्यमित्याह—स स्वस्थ इत्यादिना-गो. † यत्र—वनरूपे स्थाने-गो.

[1] तव-ङ. [2] शोचीः-ङ. [3] ददतां-ङ. [4] स-च. [5] मान्यः-च. [6] चारिणाम्-च. [7] गुणवर्तिना-ङ.

*आत्मानमनुतिष्ठ त्वं स्वभावेन, नरर्षभ !
निशाम्य तु शुभं वृत्तं पितुर्दशरथस्य नः ॥ ४१ ॥

आत्मानमित्यादि । नः पितुः वृत्तं शुभं निशाम्य—पर्यालोच्य, पिता नः परमां गतिं गत इति च पर्यालोच्य, त्वं स्वभावेन—प्रागुक्तधार्मिकत्वादिलक्षणनृपस्वभावेन उपलक्षितः सन् तव आत्मानं अनुतिष्ठ—अनुचिन्तय—त्वदात्मनः परलोकहितं चिन्तयेत्यर्थः ॥ ४१ ॥

इत्येवमुक्त्वा वचनं महात्मा
　पितुर्निदेशप्रतिपालनार्थम् ।
यवीयसं भ्रातरमर्थवच्च
　प्रभुर्मुहूर्ताद्विरराम रामः ॥ ४२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे पञ्चोत्तरशततमः सर्गः

रवि(४२)मानः सर्गः ॥ ४२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे पञ्चोत्तरशततमः सर्गः

षडुत्तरशततमः सर्गः

[भरतप्रार्थना]

†एवमुक्त्वा तु [1] विरते रामे वचनमर्थवत् ।
ततो मन्दाकिनीतीरे रामं प्रकृतिवत्सलम् ॥ १ ॥
उवाच भरतश्चित्रं‡ धार्मिको धार्मिकं वचः ।

---

* स्वभावेनात्मानं अनुतिष्ठ—राजभावेन भवन्तं योजय–गो. आत्मानं—आत्मनः परलोकहितं अनुतिष्ठ—चिन्तय–ति. † अस्मिन् सर्गे श्लोकव्यत्यासः सर्गभेदश्च दृश्यते । तच्छुद्धये क्रमेण व्याक्रियते–गो. ‡ निरुत्तरमुक्तवन्तं रामं प्रति मुखान्तरेणोत्तरस्योच्यमानत्वात् चित्रमित्युक्तम्–गो.

[1] विरतो रामो–ङ.

अथ भरतेन पुनः क्षत्रधर्मावष्टम्भेन रामप्रत्यावृत्तिप्रार्थनम्। एवमुक्त्वेत्यादि। चित्रमिति। उक्तियुक्तिविशेषोपपन्नत्वात् विस्मयावहं लोकस्येत्यर्थः॥ १॥

को हि स्यादीदृशो लोके यादृशस्त्वं, अरिन्दम!॥ २॥

को हि स्यात्—न कोऽपीत्यर्थः। यादृशः—यादृशमहिमा॥

न त्वां प्रव्यथयेद्दुःखं प्रीतिर्वा न प्रहर्षयेत्।
***सम्मतश्चापि वृद्धानां तांश्च पृच्छसि संशयान्॥ ३॥**

सम्मतश्चापि—धर्मविषये रामवदेव वर्तितव्यमिति दृष्टान्तभूतोऽपीत्यर्थः। तान्—वृद्धान्। संशयान्—संशयास्पदधर्मान्। सर्वज्ञोऽपि लोकमर्यादामनुसरन्निति शेषः॥ ३॥

†यथा मृतस्तथा जीवन् यथाऽसति तथा सति।
यस्यैष बुद्धिलाभः स्यात् परितप्येत केन सः॥ ४॥

---

* ये वृद्धाः त्वां विषयज्ञं मन्यन्ते, तानपि त्वं संशयान् पृच्छसि, को हि स्यादीदृशो लोके। † पितृवियोगादिजनितदुःखेन मया कथितमिति हि भवतोक्तं, मम तादृग्दुःखप्रसङ्ग एव नास्तीत्याह—यथा मृत इति। मृतः पुरुषो यथा द्वेषविषयो न भवति, जीवन्नपि तथा। यथा असति—अविद्यमाने वस्तुनि यथा रागो नास्ति, विद्यमाने वस्तुन्यपि तथा। इत्येषः बुद्धिलाभो यस्य स केन हेतुना परितप्येत—न केनापीत्यर्थः। भवदुक्तप्रकारेण मम दुःखलेशोऽपि नास्तीति भावः—गो. अस्य 'यथा जीवंस्तथा मृतः' इति वाक्यशेष आर्थिकः। यथा मृतः....त्यक्तदेहः आत्मा देहपुत्रादिभिरसंबद्धः, तथा जीवन्नपि तैरसम्बद्धः, नित्यशुचिसुखचिदात्मनः नित्याशुचिदुःखजडेन देहेन तदीयैश्चासम्बन्धात्। यथा च जीवन् स्वकर्मानुरूपं संसरति, तथा मृतोऽपि स्वकर्मानुरूपं परत्र। किञ्च यथा जीवन् सर्वैः संबद्धः, तथा मृतोऽपि, सर्वात्मत्वादस्य। किञ्च यथा असति—अविद्यमाने न रागो जायते, तथा सति विद्यमानेऽपि रागो न युक्तः। यथा वा सति—साधौ द्वेषो न युक्तः, तथा असति—असाधावपि द्वेषो न युक्तः। किञ्च यथाऽसति—प्रपञ्चेऽनुरागः, तथा सति—ब्रह्मणि युक्तः। किञ्च सति—ब्रह्मणि तन्निष्ठस्य यथा न बन्धः, मुक्तिश्च भवति, तथा लोकसंग्रहार्थमसन्निष्ठस्यापि न बन्धः, मुक्तिश्च भवतीति. जननमरणयोः, लाभालाभयोर्वा यस्य मतिः समा वर्तते, तस्य लोके न काऽपि परितापप्रसक्तिः इति मूलस्याशयः॥

यथा मृत इत्यादि। 'यथा मृतस्तथा जीवन्' 'यथा जीवंस्तथा मृतः' इति आर्थिको वाक्यशेषः। 'यथा सति तथा सति' इतीदं वाक्यमेकमेव पदच्छेदात् द्विवाक्यम्। एतदेवाभिप्रेत्य चित्रमित्युक्तं कविना। अयमर्थः—यथा मृतः–त्यक्तदेह आत्मा तदसम्बद्धः, नित्यशुचिसुखचिदात्मत्वादेव अनित्याशुचिदुःखजडदेहेन परमार्थतोऽसम्बद्ध एव। अथ यथेव जीवन् स्वकर्मानुरूपं संसरति, तथा मृतोऽपि स्वकर्मानुरूपं परत्र च संसरति। अथ यथा असति ज्ञाने तु न मुक्तिः, तथा सत्यप्यनन्तकाम्ये न मुक्तिः। अथ यथा सति ज्ञाने न बन्धः तथा सत्यपि लोकसङ्ग्रहार्थे नित्येऽपि न बन्धः। यस्य तु त्वादृशस्य राजयोगिनः एषः—उक्तार्थविषयको बुद्धिलाभः स्यात् संभवे स राजयोगी केन परितप्येत – न केनापि हेतुना। एतेन श्लोकेन तु 'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्' इति श्रुतिः वर्णितार्था, समग्राऽपि भगवद्गीता च। अस्माकं बहुप्रपञ्चविषयोऽयं श्लोकः, अस्मत्सहजबुद्धियोगार्थकत्वात्। मृदुमतिशिष्टार्थव्याख्याने तु तत्प्रपञ्चो न युक्त इति जोषं गम्यते॥ ४॥

*परावरज्ञो यश्च स्यात् [1]तथा त्वं, मनुजाधिप!
स एवं व्यसनं प्राप्य न विषीदितुमर्हति॥ ५॥

परावरज्ञः–कारणकार्यसपरिकरब्रह्मप्रत्यगात्मतत्त्वज्ञः। विषीदितुमित्यार्षम्; शिद्विषये किल सदेः सीदादेशः, विषत्तुमिति यावत्॥

---

*किमर्थं तर्हि शोकमूलवचनं त्वयोक्तमित्याशंक्य, भवद्व्यसनासहतयेत्याह—परावरज्ञ इति। यः परावरज्ञः—त्रिकालज्ञः आत्मानात्मज्ञः, परमात्मजीवात्मस्वरूपज्ञो वा, स एवं व्यसनं प्राप्यापि व्यथयितुं नार्हति, तथा त्वमपीति संबन्धः–गो. परावरज्ञः—सप्रपञ्चात्मतत्त्वज्ञः–ति

[1] यथा–च.

*अमरोपमसत्त्वस्त्वं महात्मा सत्यसङ्गरः ।
सर्वज्ञः सर्वदर्शी च बुद्धिमांश्चासि, राघव ! ॥ ६ ॥

सत्त्वं—सत्त्वोद्रिक्तसर्वप्रकृतिः ॥ ६ ॥

न त्वामेवंगुणैर्युक्तं प्रभवा[1]भवकोविदम् ।
†अविषह्यतमं दुःखं आसादयितुमर्हति[2] ॥ ७ ॥

प्रभवाभवकोविदं--सकलभूतप्रभवाप्ययप्रवृत्तिनिवृत्तिमार्गतत्त्वज्ञमित्यर्थः । आसादयितुं—अवसादयितुम् ॥ ७ ॥

प्रोषिते मयि यत्पापं मात्रा मत्कारणात् कृतम् ।
क्षुद्रया तदनिष्टं मे प्रसीदतु भवान् मम ॥ ८ ॥

मत्कारणात—मत्प्रयोजननिमित्ततः । मे अनिष्टं—असम्मतमेव । अतो भवान् प्रसीदतु— मम राज्यं परिगृह्णात्विति यावत् ॥

धर्मबन्धेन बद्धोऽस्मि तेनेमां नेह मातरम् ।
हन्मि तीव्रेण दण्डेन दण्डार्हां पापकारिणीम् ॥ ९ ॥

इहेमां मातरं—इहापराधे कैकेयीमित्यर्थः ॥ ९ ॥

कथं दशरथाज्जातः [3]शुद्धाभिजनकर्मणः ।
जानन् धर्म[4]मधर्मिष्ठं कुर्यां कर्म जुगुप्सितम् ॥ १० ॥
गुरुः क्रियावान् वृद्धश्च राजा प्रेतः पितेति च ।
तातं न परिगर्हेयं दैवतं चेति संसदि ॥ ११ ॥

---

* अमरोपमेति पृथक्पदम् । सत्त्वः- सत्त्वगुणसंपन्नः—गो. † अविषह्यतममपि, अस्मदादीनामिति शेषः—गो.

[1] भाव—च. [2] एतदनन्तरं—एवमुक्त्वा तु भरतः रामं पुनरथाब्रवीत्—इत्यधिकम्—ङ. [3] शुभा—च. [4] मधर्मं च—च.

मातृवत् पित्राऽप्यन्याय्यमेवाचरितमित्याह—गुरुः क्रियावा-नित्यादि। क्रियावान्—कर्तृश्रेष्ठ इति यावत्। राजा पितेति यत्, तत् तातं संसदि न परिगर्हेयम्। अपि चेदानीं प्रेतस्सन् दैवतं च—श्राद्धदैवतं च—वस्वादिस्वरूपत्वं च गत इति यत्, ततोऽपि न गर्हेयम् ॥ ११ ॥

को हि *धर्मार्थयोर्हीनं ईदृशं कर्म किल्बिषम्।
स्त्रियाः प्रियं चिकीर्षुः सन् कुर्यात्, धर्मज्ञ! धर्मवित् ॥

किं तर्हि वस्तुतोऽस्ति गर्ह्यत्वं? अस्त्येवेत्याह—को हीत्यादि। को हि धर्मविदिति योजना ॥ १२ ॥

अन्तकाले हि भूतानि †मुह्यन्तीति पुराश्रुतिः।
राज्ञैवं कुर्वता लोके [1]प्रत्यक्षं सा श्रुतिः कृता ॥ १३ ॥

प्रत्यक्षं—प्रत्यक्षार्थम् ॥ १३ ॥

‡साध्वर्थमभिसन्धाय क्रोधान्मोहाच्च साहसात्।
तातस्य यदतिक्रान्तं प्रत्याहरतु तद्भवान् ॥ १४ ॥

साध्वर्थं—ज्येष्ठाभिषेकलक्षणम् ॥ १४ ॥

---

* धर्मार्थयोर्हीनं—धर्मार्थाभ्यां हीनं, कामप्रधानमिति यावत्—गो.
† मुह्यन्ति—मोहं प्राप्नुवन्ति—विपरीतबुद्धिं प्राप्नुवन्तीति यावत्—गो. ‡ क्रोधात्—विषमद्यैव पास्यामीत्युक्तकैकेयीक्रोधात्। तत्क्रोधभयादिति यावत्—ति. मोहात्—कैकेयीविषयमोहात्। साहसात्—सहसाकरणात्—अविमृश्यकारित्वादिति यावत्। तातस्य यदतिक्रान्तं—यद्धर्मातिक्रमणं, तत् साध्वर्थमभिसन्धाय—समीचीनार्थं स्मृत्वा भवान् प्रत्याहरतु—निवर्तयतु—गो.

[1] प्रत्यक्षा—च.

पितुर्हि [1] यदतिक्रान्तं पुत्रो यः * साधु मन्यते ।
तदपत्यं मतं लोके विपरीतमतोऽन्यथा ॥ १५ ॥

अतिक्रान्तं—साध्वर्थस्याननुष्ठानं, भावे निष्ठा, साधु मन्यते—संपादयति, तत् अपत्यं—अपतनसाधकत्वात् अपत्यशब्दसम्मतमित्यर्थः ॥ १५ ॥

तदपत्यं भवानस्तु मा भवान् दुष्कृतं पितुः ।
† [2] अति यत् तत्कृतं कर्म लोके [3] धीरविगर्हितम् ॥ १६ ॥

भवान् अपत्यमेवास्तु—अन्वर्थापत्यशब्दवाच्य एवास्तु । अतो भवान् पितुः दुष्कृतं-मा, अनुमन्यतामिति शेषः । एवञ्च पितृवचसः परिपाल्यत्वाविशेषात् पितुरभिषेकवचनमेव परिपालयेत्युक्तं भवति । तत्कृतं—दशरथकृतं धीरैर्विगर्हितम् ॥ १६ ॥

कैकेयीं मां च तातं च सुहृदो बान्धवांश्च नः ।
पौरजानपदान् [4] सर्वान् ‡ [5] त्रातु सर्वमिदं भवान् ॥ १७ ॥
क्व चारण्यं क्व च क्षात्रं क्व जटाः क्व च पालनम् ।
ईदृशं व्याहतं कर्म न भवान् कर्तुमर्हति ॥ १८ ॥

तथा तत्कृतवनवासस्य गर्हितत्वमेव स्पष्टयति — क्व चेत्यादिना ॥ १८ ॥

---

* साधुमन्यता—साधुकर्तुं मन्यते—गो. † माऽभिपत्ता(पा.)—प्राप्तुं नार्हसि—गो. ‡ त्रातुं इदं सर्वं—मदुक्तं भवाननुमन्यतामिति भावः—ति.

[1] समति—च. [2] आसेवत्वा कृतं—ङ. [3] वीर—ङ. [4] एतान्—ङ. [5] त्रातुं—व.

एष हि प्रथमो धर्मः क्षत्रियस्याभिषेचनम् ।
* येन शक्यं, महाप्राज्ञ! प्रजानां परिपालनम् ॥ १९ ॥

ननु क्षत्रियस्याप्यस्ति वानप्रस्थाश्रमजटादिसम्बन्ध इत्याशङ्क्य, नायं प्रथमः कल्प इत्याह—एष इत्यादि । येन—अभिषेचनेन । परिपालनमिति । तद्रूपधर्मसंपादनमित्यर्थः ॥ १९ ॥

† कश्च प्रत्यक्षमुत्सृज्य ‡ संशयस्थमलक्षणम् ।
आयतिस्थं चरेद्धर्मं क्षत्रबन्धुरनिश्चितम् ॥ २० ॥

ननु अस्ति वनाश्रमेणापि धर्मसंपादनमित्यत्राह—कश्चेत्यादि । प्रत्यक्षं सुखसाधनधर्मं—प्रजापरिपालनं उत्सृज्य संशयस्थं—प्रत्यक्षागम्यत्वात् 'को हि तद्वेद? यद्यमुष्मिन् लोकेऽस्ति वा न वा?' इति श्रुत्याऽभिनीयमानसन्देहास्पदसुखसाधनम्, अलक्षणं—अश्रीलक्षणं—आयतिस्थं—'उत्तरः काल आयतिः', उत्तरवयःप्राप्यं अनिश्चितं—अनित्यानुष्ठानं; न हि क्षत्रियस्य परिपालनवत् नित्यप्राप्तो वनवासः । नित्यत्वे तद्रहितदशरथादेरेव पतितत्वप्रसङ्गात् । एतादृशे धर्मकाले क्षत्रबन्धुः—बन्धुच्प्रत्ययान्तः ब्रह्मक्षत्रादिशब्दो निन्दावाची । क्षत्राणां बन्धुरिति असमस्तपदं तु क्षत्रियकुलसम्मतत्वार्थवाची । कश्चरेत्—अनुतिष्ठेत, न कोऽपि ॥ २० ॥

§ अथ क्लेशजमेव त्वं धर्मं चरितुमिच्छसि ।
धर्मेण चतुरो वर्णान् पालयन् क्लेशमाप्नुहि ॥ २१ ॥

---

* अभिषेकस्य कथं धर्मत्वं? इत्यत्राह—येनेति । प्रजापालनं हि क्षत्रियस्य प्रथमो धर्मः ; स च मूर्धाभिषिक्ताधिकारक इति भावः । † 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः'—इति भावं हृदि निधायैवमुच्यते । ‡ संशयस्थं—अप्रत्यक्षं, अङ्गलोपादिसंभावनया संशयितफलसिद्धिकं, अलक्षणं—लक्षणरहितं, क्रियाशक्तिरपूर्वं चेति दुर्निरूपं—अनिश्चितं—शास्त्रेण प्रथममिदमनुष्ठेयमिति केनापि प्रमाणेनानिश्चितम्—गो. § राज्याभिषेकस्य भोगरूपत्वाभिमानवतः प्रत्याह—अथेति ।

ननु स्वशरीरप्रयाससाध्य एव धर्मः अन्तरङ्गः, अतस्तदेवानुष्ठेयमिति पक्ष आह—अथेत्यादि। अथशब्दः पक्षान्तरे ॥ २१ ॥

चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमाश्रमम्।
प्राहुः, धर्मज्ञ! धर्मज्ञाः तं कथं त्यक्तु[1]मर्हसि ॥ २२ ॥

ननु शरीरक्लेशजत्वमात्रमप्रयोजकम्। अपि तु श्रुतत्वाद्धर्मत्वं वनाश्रमस्येत्यत्राह—चतुर्णामित्यादि। श्रेष्ठमाहुरिति। 'तेषां गृहस्थो योनिः, अप्रजनत्वादितरेषाम्' इत्यादिभिः—गौतमादयो धर्मशास्त्रप्रवक्तार इति शेषः। यथावद्गार्हस्थ्यानुपपत्तौ वनाश्रमाद्यपेक्षा, न तु तदुपपत्ताविवतरापेक्षेत्याशयः ॥ २२ ॥

श्रुतेन बालः *[2]स्थानेन जन्मना [3]भवतो ह्यहम्।
स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥ २३ ॥

भवतोऽपेक्षयाऽहं श्रुतेन बालः—अवरः। तथा जन्मना संपादितेन स्थानेन—प्रथमस्थानेन च ॥ २३ ॥

†हीनबुद्धिगुणो बालः हीनः स्थानेन चाप्यहम्।
भवता च विनाभूतः न वर्तयितुमुत्सहे ॥ २४ ॥

हीनः स्थानेन चापीति। उपलक्षित इति शेषः। वर्तयितुं—जीवितुं, 'वृत्तिर्वर्तनजीवने' ॥ २४ ॥

इदं निखिल[4]मव्यग्रं राज्यं पित्र्यमकण्टकम्।
अनुशाधि स्वधर्मेण, धर्मज्ञ! ‡सह बान्धवैः ॥ २५ ॥

---

* स्थानेन—पदेन, प्राप्तिक्रमेणेति यावत्-गो. अत्र हेतुः 'जन्मना' इति इति भावः। † हीनबुद्धिगुणः—सद्गुणबुद्धिरहितः—गो. बुद्ध्या गुणादिभिश्च न्यून इति वा। ‡ सह—संभूय-गो.

[1] मिच्छसि—च. [2] स्थानेन—ङ. [3] भवतोऽप्यहम्-ङ. [4] मप्यग्रं—च.

इहैव त्वाऽभिषिञ्चन्तु सर्वाः प्रकृतयः सह ।
ऋत्विजः सवसिष्ठाश्च मन्त्रवन्मन्त्रकोविदाः ॥ २६ ॥

अभिषिक्तस्त्वमस्माभिः अयोध्यां पालने व्रज ।
* विजित्य तरसा लोकान् मरुद्भिरिव वासवः ॥ २७ ॥

पालने — राज्यपालननिमित्तम् । तरसा — बलेन । लोकान् मरुद्भिरिव अस्माभिस्सहेति योजना ॥ २७ ॥

ऋणानि त्रीण्यपाकुर्वन् दुर्हृदः साधु निर्दहन् ।
सुहृदस्तर्पयन् कामैः त्वमेवात्रानुशाधि माम् ॥ २८ ॥

ऋणानि त्रीण्यपाकुर्वन्निति । ननु 'जायमानो वै ब्राह्मणस्त्रिभिः ऋणवा जायते' (तै. सं. ६-३-११) इति श्रुतौ सत्यां कथं क्षत्रियस्य ऋणसम्बन्धः ? ब्राह्मणेन यैः स्वश्रुतैर्णत्रयमपाकरणीयं तेषां ब्रह्मचर्यादीनां क्षत्रियस्य विधानात् गायत्रीसम्बन्ध इवानुकल्पस्त्रयार्णसम्बन्धः क्षत्रियस्यापि । अत्रेति । अयोध्यायां स्थित्वेति शेषः ॥ २८ ॥

अद्यार्य ! मुदिताः सन्तु सुहृदस्तेऽभिषेचने ।
अद्य भीताः पलायन्तां [1]दुष्प्रदास्ते दिशो दश ॥ २९ ॥

दुष्प्रदाः—दुःखप्रदाः ॥ २९ ॥

† आक्रोशं मम मातुश्च प्रमृज्य, पुरुषर्षभ !
अद्य तत्रभवन्तं च पितरं रक्ष किल्बिषात् ॥ ३० ॥

आक्रोशं—निन्दाम् । तत्रभवन्तं—पूज्यम् ॥ ३० ॥

---

* विजित्य, स्थित इति शेषः–गो.　† आक्रोशं—शापं, 'शाप आक्रोश आक्षेपः' इति हलायुधः, जनकर्तृकमिति शेषः–गो.

[1] दुर्हृद, अरय–ङ.

शिरसा त्वाऽभियाचेऽहं कुरुष्व करुणां मयि ।
बान्धवेषु च सर्वेषु, भूतेष्विव * महेश्वरः ॥ ३१ ॥

त्वा—त्वाम् ॥ ३१ ॥

[1] अथवा पृष्ठतः कृत्वा वनमेव भवानितः † ।
गमिष्यति, गमिष्यामि भवता सार्धमप्यहम् ॥ ३२ ॥

पृष्ठतः कृत्वा—तिरस्कृत्येति यावत्, मत्प्रार्थनामिति शेषः । इतोऽपि वनमेवेति । जनसम्बाधभीत्या अस्माद्वनादपि वनान्तरमित्यर्थः ॥ ३२ ॥

तथा हि रामो भरतेन ताम्यता
प्रसाद्यमानः शिरसा महीपतिः ।
न चैव चक्रे ‡ गमनाय सत्त्ववान्
मतिं पितुस्तद्वचने [2] व्यवस्थितः ॥ ३३ ॥

ताम्यता—ग्लायता ॥ ३३ ॥

तदद्भुतं स्थैर्यमवेक्ष्य राघवे
§ समं जनो हर्षमवाप दुःखितः ।
न यात्ययोध्यामिति दुःखितोऽभवत्
स्थिरप्रतिज्ञत्वमवेक्ष्य हर्षितः ॥ ३४ ॥

तत् स्थैर्यं—पितृवचनस्थितिस्थैर्यम् । दुःखहर्षयोर्युगपत्प्रवृत्तिनिमित्तं स्वयमेव कविर्व्याकरोति—न यातीत्यादि ॥ ३४ ॥

---

* महेश्वरः—विष्णुः- गो. भूतेशत्वात्, पशुपतित्वाच्च—शिवो वा । † इतः—राज्यात् इति वा । ‡ गमनाय मतिं इत्यन्वयः । § दुःखितः जनः समं—युगपत् हर्षमवाप ।

[1] अथैतत्-ङ. झ. [2] प्रतिष्ठितः—ङ.

*तमृत्विजो नैगमयूथवल्लभाः
तदा विसंज्ञाश्रुकलाश्च मातरः ।
तथा ब्रुवाणं भरतं प्रतुष्टुवुः
प्रणम्य रामं च ययाचिरे सह † ॥ ३५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे षडुत्तरशततमः सर्गः

निगमे—पुरे भवाः—नैगमाः—पौराः, 'निगमो निश्चये वेदे पुरे पथि वणिक्पथे' वैजयन्ती, नैगमयूथानां वल्लभास्तथा । विसंज्ञाः–विचित्ताः, अश्रुकलाः–अश्रुप्रचुराश्च तथा । मृग(३५)मानः सर्गः ॥ ३५ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे षडुत्तरशततमः सर्गः

सप्तोत्तरशततमः सर्गः

[रामप्रतिवचनम्]

पुनरेवं ब्रुवाणं तं भरतं [1] लक्ष्मणाग्रजः ।
प्रत्युवाच ततः श्रीमान् ज्ञातिमध्येऽ[2]भिसत्कृतः ॥ १ ॥

अथ भरतोक्तं राजनि अधर्मं परिहरन् रामः राजनियोग एव परमो धर्म इति पुनश्च प्रतिष्ठापयति । पुनरित्यादि ॥ १ ॥

उपपन्नमिदं वाक्यं यत् त्वमेवमभाषथाः ।
‡जातः पुत्रो दशरथात् कैकेय्यां राजसत्तमात् ॥ २ ॥

उपपन्नमिति । ज्येष्ठपुत्रप्रतिपत्तिमूलं उक्तवचनजातमित्यर्थः ॥

§पुरा, भ्रातः! पिता नः सः मातरं ते समुद्वहन् ।
मातामहे समाश्रौषीत् राज्यशुल्कमनुत्तमम् ॥ ३ ॥

---

* तं भरतमित्यन्वयः । † सह—भरतेन सह ययाचिरे । ‡ जातः पुत्रः त्वमित्यन्वयः । § काममोहेन पित्रा कृतमिति पितरं निन्दन्तं भरतं प्रति रामः मोहहेतुप्रसक्तिरेव नास्तीति दुष्परिहरं हेत्वन्तरमाह—पुनरित्यादिना–गो.

[1] भरताग्रजः–ङ. [2] तिसत्कृतः–ङ.

तर्हि गन्तव्यमित्यत्राह—पुरेत्यादि । हे भ्रातः ! भरत ! नः पिता मातामहे—केकये त्वन्मातृपरिग्रहाय राज्यशुल्कं अश्रौषीत, 'पथि दये शुल्कमस्त्री जामात्रा यच्च दीयते', त्वद्दौहित्रस्य राज्यं दास्यामीति राज्यमेव शुल्कत्वेन प्रतिज्ञातवानित्यर्थः । ननु कैकेय्या वरणं किमर्थमुपात्तं राज्याय ? राज्यस्य स्वशुल्कत्वमेव कुतो न स्मारितम् ? उच्यते—'स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे । गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम्' इति स्मृतेः कौसल्यायां प्रधानमहिष्यां स्थितायां स्वविवाहस्य नर्मार्थविवाहमात्रत्वात् एतन्निमित्तवचनं राज्ञा न दीयेतापि इत्याशङ्कया, साक्षात् स्वोपकारप्रत्युपकारदत्तं वरमेव स्वप्रयोजनाय वृतवती* ॥ ३ ॥

---

* उमासंहितायां पार्वतीं प्रति शिववचनं 'पट्टाभिषेकसमये भवेयं स्मारितो ह्यहम् । त्वया वाऽन्येन भूपाल तथा चेत् करवाण्यहम् । इत्थं प्रतिज्ञामकरोत आहिताग्न्यग्रणीर्नृपः' इति कैकेयीविवाहसमये केकयदशरथसंकेतस्य विद्यमानत्वाच्चादोषः–ती. अत्रेदमवधेयम्—दशरथस्य पत्न्यः सार्धत्रिशतमिति सुविदितम् । (अयो. 34-13) । महिष्यस्तु तिस्र एव, कौसल्यासुमित्राकैकेय्यः । अत एव एताभ्य एव पायसदानम्, न सर्वाभ्यः । एतेन कैकेयीविवाहस्य नर्मविवाहत्वं न स्वरसम् । किन्तु कौसल्यायां अप्राप्तपुत्रस्य दशरथस्य पुत्रार्थमेव सुमित्राविवाहः । तस्यामपि पुत्रादर्शनात् कैकेयीविवाहः । तदा च, कैकेयीविवाहानन्तरं यदि दैवात् कौसल्यासुमित्रयोः पुत्रोत्पत्तिं शंकमानेन कैकेयीपित्रा कैकेयीपुत्राय राज्यशुल्कं प्रार्थितम् । परन्तु कैकेय्यामपि पुत्रो न जात एव । तेन च दशरथश्चिन्ताकुलो बभूव (बाल 8-1) । ततः पुत्रकामेष्ट्या देवानुग्रहबलात् सुतानवाप । एवञ्च यथामनीषितं कैकेय्यां पुत्रालाभात्, पुत्रकामेष्ट्या पुत्रप्राप्तेः महिषीत्रयसाधारण्यात्—कैकेयीविवाहकालिकी शुल्कप्रतिज्ञा स्वयं दुर्बला जातैव । अत एव कैकेयी न तत् स्मारितवतीति ज्ञायते । अत्रापि रामः अत एव—अनन्तरश्लोक एव 'देवासुरे च संग्रामे' इति हेत्वन्तरं वदतीति प्रतीयते । किञ्च विवाहकाले भरताभिषेकमात्रस्यैव प्रतिज्ञातत्वेन, तेन रामविवासनं प्रार्थयितुमशक्यमेव । रामविवासनाभावे भरतराज्यप्रतिष्ठा न संभाविनी । अतश्च वरद्वयं अत्यावश्यकमिति जानन्ती मन्थरा न वैवाहिकप्रतिज्ञां बोधितवती, कैकेय्यपि तथैव आचरितवतीति च ज्ञायते ॥

[1]देवासुरे च संग्रामे जनन्यै तव पार्थिवः।
संप्रहृष्टो ददौ राजा वरमाराधितः प्रभुः ॥ ४ ॥

देवासुरे—तत्सम्बन्धिनि तच्छब्द औपचारिकः ॥ ४ ॥

ततः सा संप्रतिश्राव्य तव माता यशस्विनी।
अयाचत [2]नरश्रेष्ठं द्वौ वरौ वरवर्णिनी ॥ ५ ॥
तव राज्यं, नरव्याघ्र! मम प्रव्राजनं तथा।
तौ च राजा तदा तस्यै नियुक्तः प्रददौ वरौ ॥ ६ ॥

नियुक्तः—वरबलेन नियोजितः ॥ ६ ॥

तेन पित्राऽहमप्यत्र नियुक्तः, पुरुषर्षभ!
चतुर्दश वने वासं वर्षाणि वरदानिकम् ॥ ७ ॥

वरदाननिमित्तरूपं निमित्तमस्यास्तीति वरदानिकम् ॥ ७ ॥

सोऽहं वनमिदं प्राप्तः निर्जनं लक्ष्मणान्वितः।
सीतया चाप्रतिद्वन्द्वः [3]सत्यवादे स्थितः पितुः ॥ ८ ॥

अप्रतिद्वन्द्वः—किञ्चित्प्रतिस्पर्धारहितः* ॥ ८ ॥

भवानपि तथेत्येव पितरं सत्यवादिनम्।
कर्तुमर्हति, [4]राजेन्द्र! क्षिप्रमेवाभिषेचनात् ॥ ९ ॥

तथेत्येवेति। तथैवेति—पितृनियुक्त एवेति कृत्वा ॥ ९ ॥

ऋणान्मोचय राजानं मत्कृते, भरत! प्रभुम्।
पितरं [5]चापि धर्मज्ञं मातरं चापि नन्दय ॥ १० ॥

मत्कृते—मत्प्रीत्यर्थमेवेत्यर्थः। नन्दय, न तु निन्दय ॥ १० ॥

---

* कामक्रोधादिरहित इति यावत्।

[1] देवासुरे–ङ.　[2] नराधीशं–ङ.　[3] तस्य वाक्ये–ङ.　[4] राजेन्द्रं–ङ.
[5] चापि धर्मज्ञ–च.

श्रूयते हि पुरा, तात! श्रुतिर्गीता यशस्विना ।
***गयेन यजमानेन गयेष्वेव पितॄन् प्रति ॥ ११ ॥**

श्रूयत इत्यादि । पितॄन् प्रति—पितृप्रीतिमुद्दिश्य अहं यक्ष्य इति संकल्प्य गयायां पितॄणां गतिं प्रति यजता यजमानेन यशस्विना गयेन पुरा गीता श्रूयते । हिः प्रसिद्धौ ॥ ११ ॥

पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः †पितॄन् यत् पाति वा सुतः ॥

का सा? इत्यतः—पुन्नाम्न इत्यादि । पुतः त्रायत इति पुत्रः—'सुपि स्थः' इत्यत्र 'सुपि' इति योगविभागेनाकर्मण्यपि सुपि आदन्तात् कः, सुतः । पितॄन् पातीति वा पुत्र इति । अत्र पितृशब्दस्य अदादेशः पृषोदरादित्वात् ॥ १२ ॥

एष्टव्या बहवः पुत्राः गुणवन्तो बहुश्रुताः ।
‡तेषां वै समवेतानां यदि कश्चित् गयां व्रजेत् ॥ १३ ॥

गयां व्रजेदिति । गयां—पितृमुक्तिपरमसाधनवृतगयाक्षेत्रं व्रजेत्, तदा मद्यत्नः सार्थो भवेदिति शेषः । इदं वचनं पितृत्राणं पुत्रेण कर्तव्यमित्यंशे सम्मतम् ॥ १३ ॥

एवं राजर्षयः सर्वे प्रतीताः, [1]राजनन्दन!
तस्मात् त्राहि, नरश्रेष्ठ! पितरं नरकात्, प्रभो! ॥ १४ ॥

एवं सर्वे इति । पितृरक्षका इत्यर्थः ॥ १४ ॥

---

* गयेन—गयाख्येन । गयेषु—गयाख्येषु प्रदेशेषु–**गो.** † पितॄन् पाति—तदुद्देशकृतेष्टापूर्तादिना स्वर्गलोकं प्रापय्य रक्षतीत्यर्थः–**गो.** व्युत्पत्त्यन्तरमाह–पितॄनिति–**ति.** ‡ तेषां वै समवेतानां—तत्समुदायमध्य इति यावत् ।

[1] रघुनन्दन–**च.**

अयोध्यां गच्छ, भरत! प्रकृतीरनुरञ्जय ।
शत्रुघ्नसहितः, वीर! सह सर्वैः द्विजातिभिः ॥ १५ ॥

प्रवेक्ष्ये दण्डकारण्यं अहमप्यविलम्बयन् ।
आभ्यां तु सहितः,[1] राजन्! वैदेह्या लक्ष्मणेन च ॥ १६ ॥

त्वं राजा, भरत! भव स्वयं नराणां
वन्यानामहमपि राजराण्मृगाणाम् ।
गच्छ त्वं पुरवरमद्य संप्रहृष्टः
संहृष्टस्त्वहमपि दण्डकान् प्रवेक्ष्ये ॥ १७ ॥

राजराडिति पृथक्पदम् । राडिति 'सत्सू....' इत्यादिना अनुपसर्गेऽपि क्विप् । मृगाणां राट्—दुष्टमृगाणां शिक्षक इति यावत् * ॥ १७ ॥

छायां ते † दिनकरभाः प्रबाधमानं
वर्षत्रं, भरत! करोतु मूर्ध्नि शीताम् ।
एतेषामहमपि काननद्रुमाणां
छायां ‡ तामतिशयिनीं [2] सुखी श्रयिष्ये ॥ १८ ॥

शीतां छायामित्यन्वयः ॥ १८ ॥

---

* अत्र मृगशब्देन तत्तुल्या मुनयो लक्ष्यन्ते । यद्वा भाविसुग्रीवरञ्जनवालिवधादी । बीजन्यासोऽयम्–गो. † दिनकरभा इति द्वितीयाबहुवचनान्तम् । ‡ ताम शयिनीं—छत्रच्छायाऽपेक्षयापि उत्तमां द्रुमच्छायाम् ।

[1] वीर–च. [2] सुखं–ङ., शनैः–च.

शत्रुघ्नः [1] कुशलमतिस्तु ते सहायः
सौमित्रिर्मम विदितः प्रधानमित्रम् ।
चत्वारस्तनयवरा वयं नरेन्द्रं
सत्यस्थं, भरत! चराम मा [2] विषादम् ॥ १९॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे सप्तोत्तरशततमः सर्गः

नरेन्द्रं सत्यस्थं चराम, विधौ लोट्, संपादयाम । मा विषादं चराम । धैर्य(१९)मानः सर्गः ॥ १२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे सप्तोत्तरशततमः सर्गः

अष्टोत्तरशततमः सर्गः

[जाबालिवचनम्]

आश्वासयन्तं भरतं जाबालिः * ब्राह्मणोत्तमः ।
उवाच रामं धर्मज्ञं धर्मापेतमिदं वचः ॥ १ ॥

एवं उभाभ्यां पितृवचनपरिपालनं कर्तव्यमिति रामेण सिद्धान्तिते पितृवचनसत्यश्रद्धाविघातद्वारा प्रत्यावृत्तिप्रयोजनाय जाबालिर्लोकायतिकमवलम्ब्याह । आश्वासयन्तमित्यादि । धर्मात् अपेतं—धर्मापेतम्, अधर्ममार्गमित्यर्थः ॥ १ ॥

† साधु, राघव! मा भूत्ते बुद्धिरेवं निरर्थिका ।
प्राकृतस्य नरस्येव [3] ह्यार्यबुद्धेस्तपस्विनः ॥ २ ॥

---

* ब्राह्मणोत्तम इत्यनेन वक्ष्यमाणं नास्तिकवचनं अहृदयमिति द्योत्यते-गो.

† 'साधु' इति वाक्योपक्रमसूचकं लोक इव । आर्यबुद्धेः, तपस्विनः ते एवं प्राकृतस्य नरस्येव निरर्थिका बुद्धिः मा भूत्—इत्यन्वयः ।

[1] स्तुक—च. [2] विषीद—च. [3] महाबुद्धे—ङ.

साधु—सम्यग्युक्तिमत् इदं वच उवाचेत्यन्वयः। इदं-शब्दार्थः—राघवेत्यादि। तपस्विनः—शोच्यस्य (तु) प्राकृतस्य—पामरस्य नरस्येव निरर्थिका एवम्बुद्धिः—पितृवचनं परिपालनीय-मित्येवंरूपिणी आर्यबुद्धेः ते मा भूत् ॥ २ ॥

*कः कस्य पुरुषो बन्धुः †[1]किमाप्यं कस्य केनचित्।
[2]एको हि जायते जन्तुः एक एव विनश्यति ॥ ३ ॥

कुतो मा भूत्? इत्यत्र, पितापुत्रसम्बन्धस्यैव मिथ्यात्वा-दित्याह—कः कस्येत्यादि। कस्य च केनचिदिति सम्बन्ध इति शेषः। किं नास्तिकस्य च केनापि न सम्बन्धः? इत्यत्र नेत्येवेत्याह—एको हीत्यादि ॥ ३ ॥

तस्मान्माता पिता चेति, राम! सज्जेत यो नरः।
उन्मत्त इव स ज्ञेयः नास्ति कश्चिद्धि कस्यचित् ॥ ४ ॥

यः सज्जेत, स उन्मत्तवत् ज्ञेयः ॥ ४ ॥

यथा ग्रामान्तरं गच्छन् नरः [3]कश्चिद्बहिर्वसेत्।
उत्सृज्य च तमावासं प्रतिष्ठेतापरेऽहनि ॥ ५ ॥
एवमेव मनुष्याणां पिता माता गृहं वसु।
‡आवासमात्रं, काकुत्स्थ! सज्जन्ते नात्र सज्जनाः ॥ ६ ॥

आवासमात्रं—पथ्यावासमात्रम्। यदेवं अतः—नात्र सज्जनाः सज्जन्ते ॥ ६ ॥

---

* 105 सर्गीयचत्वारः श्लोकाः (२६-२९) एतदादिचतुःश्लोकैः तोलनीयाः। अत्र षष्ठश्लोके सज्जनशब्दोऽध्यवधेयः। † आप्यं—प्राप्यम्। ‡ मार्गस्थसत्रशालादिकं आवासः। तेषां स्मरणस्यापि न आवश्यकता चेत्, किमु तत्प्रीत्यर्थराज्यत्यागादेरित्याशयः।

[1] किं कार्यं—ङ.　　[2] यदेको—ङ.　　[3] कश्चित्क्वचिद्वसेत्।

पित्र्यं राज्यं परित्यज्य स नार्हति, नरोत्तम !
आस्थातुं कापथं दुःखं विषमं बहुकण्टकम् ॥ ७ ॥

हे नरोत्तम! पित्र्यं राज्यं परित्यज्य भवान् बहुकण्टकं कापथं वनमार्गमास्थातुं नार्हति ॥ ७ ॥

समृद्धायामयोध्यायां आत्मानमभिषेचय ।
एकवेणीधरा हि त्वां नगरी संप्रतीक्षते ॥ ८ ॥

एकवेणीधरात्वं विरहिणीलक्षणं अयोध्यायाः स्त्रीसमाधिना वर्णितम् ॥ ८ ॥

राजभोगाननुभवन् महार्हान्, पार्थिवात्मज !
विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे ॥ ९ ॥
न ते कश्चिद्दशरथः त्वं च तस्य न कश्चन ।
अन्यो राजा [1] त्वमन्यः सः तस्मात् कुरु यदुच्यते ॥ १० ॥

उक्तं पितापुत्रासम्बन्धमुपसंहरति—न ते कश्चिदित्यादि। यदेवं अन्यो राजा, त्वमन्यः, तस्मान्मयोच्यते—मिथ्यापितृवचनाभिनिवेशं मुक्त्वा राज्यं कुर्विति—तत् कुरु ॥ १० ॥

* बीजमात्रं पिता जन्तोः [2] शुक्लं रुधिरमेव च ।
संयुक्तमृतुमन्मात्रा पुरुषस्येह जन्म तत् ॥ ११ ॥

---

* पिता जन्तोः बीजमात्रं—अल्पकारणम्। प्रधानकारणं तु ऋतुमन्मात्रा संयुक्त-धृतं शुक्लं रुधिरमेव च-शुक्लशोणितमेव, तत् शुक्लशोणितं पुरुषस्य जन्मकारणम्-गो. अत्र बीजमात्रं पिता इतिवत् 'क्षेत्रमात्रं माता' इत्यप्यूह्यम्। बन्धुसामान्याभावस्यैव विवक्षितत्वात्।

[1] त्वमप्यन्यः—ङ. [2] शुक्लं शोणितमेव च—च.

ननु यद्यप्यन्यत्वं सुखदुःखादिवैचित्र्यात् पितापुत्रयोः, अथाप्यसम्बन्धोऽसिद्धः, विना पितरं पुत्रोत्पत्तिप्रसङ्गादित्याशङ्क्य—सत्यमस्ति सम्बन्धः, अपि तु निमित्तनिमित्तिमात्रम्; नोपादानत्वम्, यतो मृद्धटवत् न कार्यरूपेण पुत्रेण सम्बन्धः। तर्हि किमुपादानं पुत्रस्य? इत्यत्र, मातापितृमलविशेषलवलेशमात्रमेवेत्याह—बीजमात्रमित्यादि। निमित्तमात्रवाचिमात्रचा उपादानत्वव्यावृत्तिः। ऋतुमन्मात्रेति पुंवद्भावः सामानाधिकरण्यात्। तथा गर्भभावेन धृतमपीति शेषः। तद्गर्भधृतशुक्लशोणितमिह लोके पुरुषस्य--पुरुषशरीरस्य जन्म—उत्पत्त्युपादानम् ॥ ११ ॥

*गतः स नृपतिस्तत्र गन्तव्यं यत्र तेन वै।
प्रवृत्तिरेषा [1]भूतानां त्वं तु मिथ्या विहन्यसे ॥ १२ ॥

उपपादितमातापितृसम्बन्धसङ्गस्य मोहमूलत्वमुपसंहरति—गत इत्यादि। यत्र गन्तव्यमिति। पथिकेन ग्रामान्तरवत् यत्र लोके गन्तव्यं तत्र गतः। उक्तरूपिणी प्रवृत्तिर्मर्त्यानां स्वभावप्राप्तेति शेषः। अतः—त्वं तु मिथ्या विहन्यसे। पुरुषार्थादिति शेषः ॥ १२ ॥

†[2]अर्थे धर्मपरा ये ये तांस्तान् शोचामि नेतरान्।
ते हि दुःखमिह प्राप्य विनाशं [3]प्रतिपेदिरे ॥ १३ ॥

---

* तेन—नृपेण यत्र—येषु भूतेषु गन्तव्यम्, स नृपतिः तत्र गतः—पञ्चभूतेषु लयं प्राप्तः इत्यर्थः (नास्तिकस्य लोकान्तराभावात्)। पञ्चभूतमयत्वान्नरपतिशरीरस्य तदतिरिक्तस्यात्मनोऽभावात्। मर्त्यानां—मरणशीलानां एषा प्रवृत्तिः—अयं स्वभाव इत्यर्थः। त्वं तु मिथ्या विहन्यसे—मिथ्याभूतेन सम्बन्धेन पीडयसे—**गो.** अर्थधर्मपराः—प्रत्यक्षसौख्यं विहाय केवलार्थसंपादनपराः, धर्मपराश्च। इतरान्—केवलप्रत्यक्षसुखानुभवपरान्। अर्थधर्मपरविषयशोकहेतुमाह—ते हीति। प्रेत्यापि विनाशं दुःखं भेजिर इति सम्बन्धः—**गो.**

[1] मर्त्यानां—ङ.   [2] अर्थधर्मपरा—ङ.   [3] प्रेत्य भेजिरे—ङ.

ननु अर्थपुरुषार्थविघातेऽपि धर्मपुरुषार्थो मुख्योऽस्तीत्यत्राह—अर्थ इत्यादि। अर्थे प्रत्यक्षसिद्धार्थपुरुषार्थे प्राप्ते तं परित्यज्य ये धर्मपराः, तान् शोचामि। ते हि धर्मपराः इह दुःखं प्राप्य अन्ते केवलं विनाशं प्रतिपेदिरे ॥ १३ ॥

*अष्टका पितृदैवत्यं इत्ययं प्रसृतो जनः।
अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति ॥ १४ ॥

ननु धर्मात् परलोकसुखं भविष्यतीत्यत्र, नात्र किञ्चित् प्रमाणमस्तीत्याह—अष्टेत्यादि। अष्टका नाम पितृदैवत्यं कर्मास्तीति तत्र प्रसृतः—प्रवृत्तः यो जनः तस्यान्नस्य स्वभोगसाधनस्य केवलं उपद्रवं—नाशमेव कुर्वन्ति। कुत एवम्? इत्यतः—मृतो हि किमशिष्यतीति। पश्य स्वानुभवादेव मिथ्याव्यापारत्वम् ॥ १४ ॥

†यदि भुक्तमिहान्येन देहमन्यस्य गच्छति।
दद्यात् [1]प्रवसतः श्राद्धं न तत् पथ्यशनं भवेत् ॥ १५ ॥

ननु तु माऽस्तु लोकान्तरगतपित्रादिना दीयमानस्यान्नस्य

---

* अयं जनः अष्टका—अष्टकाश्राद्धं पितृदैवत्यं—प्रतिसांवत्सरिकं इति यत्कर्म, कर्तुमिति शेषः, प्रसृतः—प्रवृत्तः, अत्र तत्सर्वमिति शेषः, अन्नस्य उपद्रवं—क्षयं पश्य-गो. अथाष्टका, अथ पितृदैवत्यं इत्येवं जनः प्रसृतः—प्रवृत्तः, परन्तु अन्नस्य उपद्रव एव तदिति लोकरीत्या वाक्यप्रवृत्तिः। † यद्यपि मृतः नाशिष्यति, तथाऽपि तदुद्देशेन तत्प्रतिनिधये दत्तं तं प्राप्नुयादित्यत्र—इदमपि अन्ननाशमात्रम्, अन्योदरगतं अन्यस्य तृप्तिं कथं जनयेत्? यद्यपि पुरोवर्तिनरस्य उदरपूरणं दृश्यते, अथापि तदपि स्वतृप्तिसाधनस्य परस्मै वृथा प्रतिपादनमात्रमिति भावः।

[1] प्रवसतां--ङ.

प्राशनम्; अथापि तदुद्देशेन दत्तमन्नं लोकान्तरे तमुपतिष्ठति इहान्येन भुक्तमपीत्यत्र तदपि तर्कहतमित्याह—यदीत्यादिना। यद्यन्यभुक्तान्नं अन्यदेहं गच्छेत् तदा प्रवसतः—देशान्तरगतान् उद्दिश्य श्राद्धमेव दद्यात्, प्राप्तकाले लिङ्, तथा दानमेवोचितम्, न तु तत्पथ्यशनं—तस्मै दीयमानपाथेयमन्याय्यं भवेत् ॥ १५ ॥

*दानसंवनना ह्येते ग्रन्था मेधाविभिः कृताः।
यजस्व देहि दीक्षस्व तपस्तप्यस्व †संत्यज ॥ १६ ॥

अर्थरूपपित्रर्थश्राद्धान्नदानदृष्टान्तेन देवार्थप्रदानमपि मिथ्या, तर्हि तत्प्रतिपादकागमप्रामाण्यादेव तदुच्यमानफलं सत्यं भविष्यतीत्याशङ्क्य, अनुभवादेव मिथ्यात्वे सिद्धे वचनं वार्तादिना जीवनोपायाशक्तैः कैश्चिन्मेधाविभिः पामरजनप्रतारणेन जीवनोपायतया कृतं इत्याह—दानेत्यादि। संवननं—कार्मणं वशीकरणम्। धनिभिः दानार्थं वशीकरणोपाया एव हि केवलं, यजस्व—देवपूजां कुरु, देहि—अन्नदानादिदानं कुरु, दीक्षस्व—यागं कुरु, तपः तप्यस्व—संपादय, सन्त्यज—प्रव्रज इत्येवंपराः ग्रन्थाः—वेदशास्त्रलक्षणाः कैश्चिन्मेधाविभिः मेधाशठदपरिश्रमकवित्ववञ्चनाचातुरीसाहसादिभ्यः कृताः ॥ १६ ॥

---

* एवं परत्र वैदिककर्मणि फलव्यभिचारदर्शनात् सर्वत्रापि वैदिके न फलप्रसक्तिरित्याह—दानसंवनना इत्यादिना-गो. † संत्यज-अर्थैषणादीन् सम्यक् त्यज-गो. संत्यज-इत्येते ग्रन्था इत्यन्वयः।

स नास्ति*पर[1]मित्येव कुरु बुद्धिं, महामते !
प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुरु ॥ १७ ॥

अतः—हे महामते ! स त्वं परं—अर्थपुरुषार्थात् परं—परलोकप्रयोजनं किञ्चित् प्रयोजनकं किञ्चित् धर्म इति नास्त्येवेति बुद्धिं कुरु। मथितसिद्धान्तमाह—प्रत्यक्षमित्यादि। प्रत्यक्षानुभवसिद्धं यत् सुखसाधनं तदेवानुतिष्ठ। परोक्षं—सुखसाधनकल्पितं धर्मं पृष्ठतः कुरु—त्यज ॥ १७ ॥

†सतां बुद्धिं पुरस्कृत्य सर्वलोकनिदर्शिनीम्।
राज्यं त्वं प्रतिगृह्णीष्व भरतेन प्रसादितः ॥ १८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे अष्टोत्तरशततमः सर्गः

सतां—प्रत्यक्षसिद्धसत्यार्थवादिनां सर्वलोकनिदर्शिनीं—सर्वलोकसंवादयित्रीं बुद्धिं पुरस्कृत्य राज्यं प्रतिगृह्णीष्व। दया(१८)-मानः सर्गः ॥ १८ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे अष्टोत्तरशततमः सर्गः

---

* परं—परलोकानुभाव्यम्–**गो**. स तव परं नास्तीति बुद्धिं कुर्वित्यन्वयः।
† तां बुद्धिं—प्रत्यक्षादन्यन्नास्तीति बुद्धिं–**गो**. स इति पृथक्पदं त्वमित्यनेनान्वेति।
[1] मित्येतव–ङ.

नवोत्तरशततमः सर्गः

[जाबालिवचननिराकरणम्]

जाबालेस्तु वचः श्रुत्वा रामः *[1]सत्यपराक्रमः ।
उवाच परया[2]सूक्त्या बुद्ध्या विप्रतिपन्नया ॥ १ ॥

एवं जाबालोक्तं भगवान् रामः पृष्ठीकरोति । जाबालेरित्यादि । सत्यः-सत्यमूलः सत्यप्रधानः पराक्रमः—प्रतापः यस्य स तथा । इदं साभिप्रायं विशेषणं वक्ष्यमाणार्थम् । विप्रतिपन्नया—जाबालोक्तार्थे प्रतिपत्तिरहितया बुध्या युक्तः सन् सूक्त्या—वेदशास्त्रलक्षणसुवचनावलम्बनेन उवाच ॥ १ ॥

भवान् †मे प्रियकामार्थं वचनं यदिहोक्तवान् ।
अकार्यं कार्यसङ्काशं अपथ्यं ‡पथ्य[3]सन्निभम् ॥ २ ॥

प्रियकामार्थं—प्रीतिहेतुकामभोगसंपादनार्थमित्यर्थः । अकार्यं—परमार्थतया कर्तुमनुचितं, पामरदृशा कार्यसङ्काशं—प्रमाणाभासोपपत्तिमत्त्वात् कार्यवत् भासमानम् । तथाऽग्रेऽपि ॥ २ ॥

§ निर्मर्यादस्तु पुरुषः पापाचारसमन्वितः ।
मानं न लभते सद्भिः ‖ भिन्नचारित्रदर्शनः ॥ ३ ॥

---

* सत्यात्मनां—सत्यबुद्धीनाम् । भक्त्या—वैदिकधर्मश्रद्धया अविपन्नया-जाबालिवचनैः सांदृष्टिकैरप्यचलितया-**गो.** † प्रियकामार्थं-अनुवर्तनार्थमिति भावः । अत्र उत्तरार्धे तदिति पूरणीयम् । ‡ पथ्यसम्मितं—पथ्यवदवभासमानम्-**गो.** § एवं वचनं दूषितं, अथ वक्तारं दूषयति —निर्मर्याद इत्यादिना-**गो.** ‖ दर्शनं - मतं वेदविहिताद्भिन्नाचारप्रतिपादकमतप्रवर्तक इत्यर्थः । एवंभूतः पुरुषः सत्सु मानं-पूजां न लभते-**गो.**

[1] सत्यात्मनां वरः-**ङ.** [2] भक्त्या स्वबुद्ध्या चाविपन्नया-**ङ.** [3] सम्मितम्-**ङ.**

निर्मर्यादः--वेदशास्त्रमर्यादालङ्घी। अत एव कामकारात् पापाचारसमन्वितः, अत एव भिन्नचारित्रदर्शनः--साधुसम्मतचारित्रप्रतिपादकशास्त्रात् वेदादिलक्षणात् विपरीतव्यवहारप्रतिपादकलोकायतशास्त्रप्रसक्तः, अत एव सद्भिः मानं न लभते। ३॥

कुलीनमकुलीनं वा वीरं *पुरुषमानिनम्।
चारित्रमेव व्याख्याति शुचिं वा यदि वाऽशुचिम्॥ ४॥

इदानीं स्वस्वजातिवर्णाश्रमोचिताचारलक्षणं चारित्रमेव साकल्यवैकल्यतः पुंसां इहामुत्रसन्मानासन्मानहेतुरित्याह--कुलीनमित्यादि। चारित्रं संपन्नं सत् तद्वन्तं कुलीनं ख्यापयति, असंपन्नं सत् अकुलीनम्; तथाऽग्रेऽपि। वीरमिति पदम्। तथा पुरुषमानिनं—मिथ्यावीरपुरुषत्वाभिमानिनमपि व्याख्याति--ख्यापयति॥ ४॥

†अनार्यस्त्वार्य[1]संस्थानः ‡शौचाद्धीनस्तथा शुचिः।
लक्षण्यवदलक्षण्यः दुश्शीलः शीलवानिव॥ ५॥
अधर्मं धर्मवेषेण [2]यद्यहं लोकसंकरम्।
अभिपत्स्ये शुभं हित्वा [3]क्रियां विधिविवर्जिताम्॥ ६॥

अस्त्वेवं लोकस्थितिः, किं प्रकृते? इत्यत्र - अर्थवदनर्थं त्वद्दर्शनसम्मतं चरित्रं यद्यभिपत्स्ये, तदाऽनर्थमेव सर्वथाऽपि प्राप्ताऽ-

---

* पुरुषमानिनं---अतिधीरमित्यर्थः-गो. वस्तुतस्तु अत्रापि वाकारः अध्याहार्यः। वीरं पुरुषमानिनं वा --केवलं तादृशाभिमानवन्तं -- अवीरमिति यावत्; एतादृशं चारित्रमेव व्याख्याति --इत्यर्थो युक्तः। † एतादृशपुरुषोपदेशश्रवणे स्वस्यानर्थं दर्शयति श्लोकत्रयेण ....त्वदुक्तमधर्मं धर्मवेषेण-धर्मत्वेन अभिपत्स्ये-स्वीकरिष्यामि यदि, दुर्वृत्तं मां चेतयानः---ज्ञानवान् कः पुरुषः लोके बहुमंस्यति-गो. ‡ आर्यसंस्थानः---तत्सदृशः-ति.

[1] संकाशः-ङ. [2] यदीमं-ङ. [3] क्रियाविधि-ङ.

स्मीत्याह—अनार्य इत्यादि। संस्थानं—विशेषः। सदा शुचिरिव—शुद्ध इव प्रविभासमानः। लक्षण्यः—लक्षणोपेतः धर्मवेषेण कञ्चुकितः अधर्ममहं यदीमं त्वदुपदिष्टं लोकसंकरकारकं मार्गमभिपत्स्ये, तदा विधिविवर्जितां—श्रुतिस्मृतिविधानरहितां क्रियां—कर्म कृत्वा तत एव हेतोः शुभं हित्वा *अशुभं प्राप्नुयाम्; 'यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः। न स सिद्धिमवाप्नोति न सुखं न परां गतिम्' इत्यादिस्मृतेरित्यर्थः ॥ ६ ॥

कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः।
[1]बहुमन्येत मां लोके दुर्वृत्तं लोकदूषणम् ॥ ७ ॥

उक्ताशुभप्राप्तिरेव प्रकाश्यते—कश्चेतयान इत्यादि। विद्वानिति यावत्। लोकदूषणं—परलोकदूषणमार्गावलम्बिनम् ॥ ७ ॥

†कस्य [2]यास्याम्यहं [3]वृत्तं केन वा स्वर्गमाप्नुयाम्।
अनया वर्तमानोऽहं वृत्त्या हीनप्रतिज्ञया ॥ ८ ॥

कस्य यास्याम्यहं वृत्तमिति। त्वदुपदिष्टमार्गावलम्बन इति शेषः; न कस्यापि, केनापीत्यर्थः। अनया—त्वदुपदिष्टया अर्थपरयेति यावत्। हीना सत्यपरिपालनविषयिणी प्रतिज्ञा यस्यां सा तथा, अनया वृत्त्या ॥ ८ ॥

[4]कामवृत्तोऽन्वयं लोकः कृत्स्नः समुपवर्तते।
यद्वृत्ताः सन्ति राजानः तद्वृत्ताः सन्ति हि प्रजाः ॥ ९ ॥

---

* अशुभं प्राप्नुयामिति शेषः-ति. † न केवलं बहुमानहानिः, परलोकहानिश्चेत्याह—कस्येत्यादिना। अहं हीनप्रतिज्ञया—वनवासप्रतिज्ञारहितया अनया वृत्त्या—परोक्ष 'पृष्ठतः कुरु' इति त्वदुक्तया वृत्त्या वर्तमानः सन् वृत्तं—त्वदुक्ताचरणं कस्य यास्यामि-आधास्यामि—उपदेक्ष्यामीत्यर्थः। दास्यामीति पाठान्तरम्-गो.

[1] बहुमंस्यति—ङ. [2] धास्याम्यहं-ङ. [3] वृत्ति—ङ. [4] कामवृत्तस्त्वयं-ङ.

प्रथमतः स्वयमहं कामवृत्तः—यथेष्टचारित्रं संपत्स्ये, अनन्तरं कृत्स्नोऽप्ययं लोकः कामवृत्तः समुपवर्तते—वर्तेतेति यावत्। कुत एवं निर्बन्ध इत्यतः— यद्वृत्ता इत्यादि ॥ ९ ॥

*सत्यमेवानृशंसं च राजवृत्तं सनातनम्।
तस्मात् सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः ॥ १० ॥

यदेवं स्वपरनाशहेतुः त्वदुपदिष्टमार्गः, तस्मादिमं पृष्ठीकृत्य 'तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि' इत्युपदेशावलम्बनेन शास्त्रीयं सत्यमेव मार्गमेवावस्थापय इत्याह—सत्यमेवेत्यादि। सनातनं—अनादिशास्त्रसिद्धम्। यस्मात् राज्ञां वृत्तं सत्यात्मकं, तस्मात् तेषां राज्यमपि सत्यात्मकं—सत्यैकप्रतिष्ठमित्यर्थः। न केवलं राज्यमात्रमेवं, अपि तु सर्वोऽपि लोकः सत्ये प्रतिष्ठितः ॥ १० ॥

ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे†।
सत्यवादी हि लोकेऽस्मिन् [1]परमं गच्छति क्षयम् ॥ ११ ॥

सत्यमेव हि मेनिर इति। सत्यलोकान्तसकललोकविजयार्थमिति शेषः। क्षयः—निवासः। परमं क्षयं—ब्रह्मलोकमिति यावत् ॥ ११ ॥

उद्विजन्ते‡ यथा सर्पात् नरादनृतवादिनः।
धर्मः [2]सत्यपरो लोके मूलं [3]सर्वस्य चोच्यते ॥ १२ ॥

सत्यं परं—श्रेष्ठं रूपं यस्य धर्मस्य स तथा ॥ १२ ॥

---

* अनृशंसं—भूतानुकम्पाप्रधानं-गो. † मेनिरे—उत्कृष्टमिति शेषः-गो.
‡ यथा सर्पात्—सर्पादिव।

[1] परं गच्छति चा—ङ. [2] सत्यं—ङ. [3] स्वर्गस्य—ङ.

सत्यमेवेश्वरो* लोके [1]सत्ये [2]पद्मा सदाऽऽ[3]श्रिता ।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥ १३ ॥

ईश्वर इति । आश्रित इति विपरिणामः । पद्मा—राजलक्ष्मीः । पदं—शाश्वतपदप्रतिष्ठासाधनमित्यर्थः ॥ १३ ॥

दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च ।
वेदाः सत्यप्रतिष्ठानाः तस्मात् सत्यपरो भवेत् ॥ १४ ॥

सत्यं प्रतिष्ठानं—–आधारः येषां ते तथा । सत्यपरः—–सत्यतत्पर इत्यर्थः ॥ १४ ॥

एकः पालयते लोकं एकः पालयते कुलम् ।
मज्जत्येको हि [4]निरये एकः स्वर्गे महीयते ॥ १५ ॥

अथ न केवलमागममात्रात् सत्यपरत्वमेव, अपि तु अनुभवादपीत्याह—–एक इत्यादि । एकः पुमान् कृत्स्नं लोकं पालयते । एकस्तु स्वीयं कुलमात्रं पालयते । एतेन पालनसाधनधर्मस्य इह लोके तारतम्यानुभव उक्तः । अथ परलोके तदन्वयव्यतिरेकसाध्यफलप्रदर्शनं—–मज्जतीत्यादि । निरयस्वर्गौ दुःखसुखार्थाश्रयौ ॥ १५ ॥

सोऽहं पितु[5]र्निदेशं तु किमर्थं नानुपालये ।
सत्यप्रतिश्रवः सत्यं सत्येन समधी[6]कृतम् ॥ १६ ॥

† नैव लोभान्न मोहाद्वा न चाज्ञानात्तमोऽन्वितः ।
सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः ॥ १७ ॥

---

* ईश्वरः–नियन्ता–व्यवस्थापक इति यावत्–गो. † लोभात्—राज्यलोभात् मोहात्–विप्रलंभवाक्यजनितचित्तविभ्रमात्–गो.

[1] सत्यं–ङ. [2] धर्मः–च. [3] श्रितः–ङ. [4] नरके–ङ. [5] नियोगं–ङ. [6] कृतः–ङ.

इहाप्युक्तफलप्रदर्शनं—सोऽहमिति। एवंविवेकवानित्यर्थः। ननु पितृनियोगस्यासत्यतः कथमनुष्ठेयत्वमित्यतः—सत्येत्यादि। स्वप्रतिज्ञातसत्यस्यैव प्रतिश्रवः—अङ्गीकारः यस्य स तथा। समर्यी—सदाचारवान्, तादृशेन राज्ञा सत्यपरिपालनेन हेतुना सत्यमेव कृतं, न तु लोभाद्युपाधिना अकार्षीत्। नापि च तमोऽन्वितः अकार्षीत्। अतः पारमार्थिकस्य गुरोः सत्यस्य सेतुं—मर्यादां सत्यप्रतिश्रवः—'वने वत्स्यामि' इति कृतसत्यप्रतिश्रववानहं न भेत्स्यामि ॥ १६-१७ ॥

असत्यसन्धस्य सतः *चलस्यास्थिरचेतसः।
नैव देवा न पितरः प्रतीच्छन्तीति नः श्रुतम् ॥ १८ ॥

एवं सत्यदृढस्थितौ हेतुमाह—असत्येत्यादि। सतः—संपन्नस्य। प्रतीच्छन्तीति। हव्यकव्यमिति शेषः ॥ १८ ॥

†प्रत्यगात्ममिमं धर्मं सत्यं पश्याम्यहं [1]ध्रुवम्।
भारः सत्पुरुषा[2]चीर्णः तदर्थमभि[3]नन्द्यते ॥ १९ ॥

प्रत्यगात्मं—प्रत्यगात्मनि भवं, प्रत्यगित्यव्ययं, विभक्त्यर्थेऽव्ययीभावः, 'अनश्च' इति टच् समासान्तः, स्वप्रतिष्ठितं वनवासनियोगात्मकं धर्मं सत्यमेव पश्यामि—वास्तवमेव पश्यामि। भारः—गुरुः—महानिति यावत्। सत्पुरुषाचीर्णः, सत्यरूपधर्म इति शेषः। तदर्थं—तादृशसत्यरूपधर्मसिध्यर्थं योऽसौ अभिनन्द्यते—उपश्लोक्यते ॥ १९ ॥

---

* चलस्य—चलस्वभावस्य—गो. † प्रत्यगात्मं स्वयं पश्यामि, आत्मानं प्रत्यविनाभूतत्वेन प्रवृत्तं पश्यामि इत्यर्थः। सत्पुरुषाचीर्णः—सत्पुरुषैराचरितः—संपादित इति यावत्, भारः—जटावल्कलादिभारः तदर्थं—सत्यरूपधर्मार्थं अभिमन्यते—अभिमतो भवति—गो.

[1] स्वयं—ङ. [2] कीर्णः—क. [3] मन्यते—ङ.

*क्षात्रं धर्ममहं त्यक्ष्ये ह्यधर्मं धर्मसंहितम् ।
क्षुद्रैर्नृशंसैर्लुब्धैश्च सेवितं पापकर्मभिः ॥ २० ॥

ननु स्वधर्मः किमिति नाभिनन्द्यते राज्यपरिपालनात्मा ? इत्यत्राह—क्षात्रमित्यादि । धर्मसंहितं—धर्मयुक्तवत् प्रतिभातः वस्तुतो ह्यधर्मभूतो यः क्षात्रधर्मः, तादृशं क्षुद्रादिभिः सेवितं त्वहं त्यक्ष्ये, अपि तु शुद्धमेव क्षात्रधर्मं सेविष्य इत्यर्थः ॥ २० ॥

†कायेन कुरुते पापं मनसा [1]संप्रधार्यते ।
अनृतं जिह्वया चाह त्रिविधं कर्म पातकम् ॥ २१ ॥

इदानीं वाचिकपापप्रसङ्गात् क्षात्रधर्मो नाश्रीयते इत्याशयेन पापभेदत्रैविध्यमुपन्यस्यति—कायेनेत्यादि । कायेन हत्यादिलक्षणं क्रियापापं कुरुते । परदाराद्यभिध्यानरूपं पापं मनसा संप्रधार्यते—साध्यत इति यावत् । अनृतं जिह्वया साध्यते । उक्तरूपमिदं पातकं कर्म एवं त्रिविधं भवति ॥ २१ ॥

भूमिः ‡कीर्तिर्यशो लक्ष्मीः पुरुषं प्रार्थयन्ति हि ।
[2]सत्यं समनुवर्तन्ते सत्यमेव भजेत्ततः ॥ २२ ॥

अथ सत्यस्य सर्वार्थसाधनत्वोपदेशः—भूमिरित्यादि । प्रार्थयन्तीति । सत्यवन्तमिति शेषः । यद्देवं तत् सत्यमेव भजेत् ॥ २२ ॥

---

* अधर्मप्रचुरधर्मलेशयुक्तक्षत्रधर्मं अहं त्यक्ष्ये इत्यर्थः—गो. ईदृशं क्षात्रधर्मं—पित्राज्ञाभङ्गेन राज्यकरणरूपं—ति. † अस्य पापस्य शरीरसाध्यत्वेऽपि कायिकवाचिकमानसिकसकलपापप्रसक्तिरित्याह—कायेनेति—ति. ‡ कीर्तिः—वितरणजनिता प्रथा । यशः—पौरुषनिबन्धनम् । अनुपश्यन्ति अनुसृत्य पश्यन्ति—अनुबध्नन्तीति यावत्—गो.

[1] संप्रधार्य च—ङ. [2] स्वर्गस्थं चानुपश्यन्ति, स्वर्गस्थं चानुबध्नन्ति—ङ.

*श्रेष्ठं ह्यनार्यमेव स्यात् यत् भवानवधार्य माम् ।
आह युक्तिकरैर्वाक्यैः इदं भद्रं कुरुष्व ह ॥ २३ ॥

एतावतोक्तं जाबालवचःपूष्ठीकारमुपसंहरति—श्रेष्ठमित्यादि । यत् भवान् मामवधार्य—लक्षीकृत्य युक्तिकरैः–युक्त्यैव केवलं करण-संपादनं येषां तानि तथा, तादृशैर्वाक्यैः—वचेर्ण्यत्, ततः कुत्ववृद्धी, वचनैः इदं भद्रं वाक्यस्वीकाररूपं कुरुष्वेति श्रेष्ठं हि—श्रेष्ठमिवाह, इदं अनार्यं—अनार्यमेव स्यात्—भवेत् ॥ २३ ॥

†कथं ह्यहं प्रतिज्ञाय वनवासमिमं [1]गुरोः ।
भरतस्य करिष्यामि वचो हित्वा गुरोर्वचः ॥ २४ ॥

तदेव प्रकाश्यते—कथमित्यादि । गुरोः वनवासं, गुरोर्वच इत्यन्वयः ॥ २४ ॥

‡स्थिरा मया प्रतिज्ञाता प्रतिज्ञा गुरुसन्निधौ ।
[2]नाप्रहृष्टा च सा देवी कैकेयी चाभवत्तदा ॥२५ ॥

नाप्रहृष्टा—प्रहृष्टेति यावत्, परिपालन इत्यर्थः ॥ २५ ॥

वनवासं वसन्नेव शुचिर्नियतभोजनः ।
मूलपुष्पफलैः पुण्यैः [3]पितॄन् देवांश्च तर्पयन् ॥ २६ ॥

सन्तुष्टपञ्चवर्गोऽहं लोकयात्रां प्रवाहये ।
अकुहः श्रद्दधानः सन् कार्याकार्यविचक्षणः ॥ २७ ॥

---

* श्रेष्ठमिति अवधार्य—निश्चित्य इदं भद्रं कुरुष्वेति भवान् युक्तिकरैः वाक्यैः यदाह तदनार्यमेव स्यात्–गो. अवधार्य—युक्तत्वेन निश्चित्य–ति. † गुरोः—पितुः वनवासं प्रतिज्ञाय, तस्य गुरोः वचः हित्वा भरतस्य वचः कथं करिष्यामि । ‡ मया स्थिरा– दृढा प्रतिज्ञा प्रतिज्ञाता—कृता, पाकं पचतीतिवत् ।

[1] गुरौ–ङ. [2] प्रहृष्यमाणा–ङ. [3] पितृदेवांश्च–ङ.

पञ्चवर्गः—पञ्चेन्द्रियवर्गः। लोकयात्रा—लोकसामान्यप्राप्ता यात्रा—व्यवहारः—देहरक्षेत्यर्थः। अकुहः—अकुहबुद्धिः। श्रद्दधानः—आस्तिक इति यावत् ॥ २७ ॥

*कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम्।
अग्निर्वायुश्च सोमश्च कर्मणां फल[1]भागिनः ॥ २८ ॥

कर्मभूमिमिमां प्राप्य स्थितेन मया यत् शुभं कर्म, तदेव कर्तव्यम्। कर्मणां—स्वकृतपुण्यकर्मणां फलभागिनः—अग्न्यादिपदं प्राप्येति शेषः। तथात्वं—'अग्निर्वा अकामयत। अन्नादो देवानां स्याम्' इत्यादिश्रुतिप्रसिद्धम् ॥ २८ ॥

शतं क्रतूनामाहृत्य † देवराट् त्रिदिवं गतः।
तपांस्युग्राणि चास्थाय दिवं प्राप्ता महर्षयः ॥ २९ ॥

अमृष्यमाणः पुनरुग्रतेजसा
निशम्य तन्नास्तिक[2]वाक्यहेतुम्।
अथाब्रवीत्तं नृपतेस्तनूजः
‡ विगर्हमाणो वचनानि तस्य ॥ ३० ॥

नास्तिकवाक्यहेतुं—नास्ति परलोक इति वचनोपपादकं 'यदि भुक्तमिहान्येन' इत्याद्युक्तशुष्कतर्करूपमित्यर्थः, तममृष्यमाणः। तस्येति। जाबालस्येत्यर्थः ॥ ३० ॥

---

* अष्टकोदाहरणेन वैदिककर्मणां निष्फलत्वं यदुक्तं तत्र परिहारमाह—कर्मभूमिमित्यादिना। यच्छुभं कर्म तत् कर्तव्यं, जनैरिति शेषः। तत्र फलवदनुष्ठानं दर्शयति—अग्निरित्यादि। कर्मणां कर्मभूमिकृतस्वस्वकर्मणां फलभागिनः—अग्नित्वादिफलं प्राप्तवन्तः—गो. † भाविफलाविवक्षया देवराडिति निर्देशः। व्यासः वेदान् विभक्तवानितिवत्। वेदविभागकरणानन्तरं हि व्यासनामप्राप्तिः। ‡ विगर्हमाणः—मनसि विगर्हमाणः—गो.

[1] गामिनः—ङ. [2] हेतुवाक्यम्—ङ.

सत्यं च धर्मं च पराक्रमं च
भूतानुकम्पां प्रियवादितां च ।
द्विजातिदेवातिथिपूजनं च
पन्थानमाहुस्त्रिदिवस्य सन्तः ॥ ३१ ॥

सन्त आहुरिति । विशिष्य क्षत्रियस्येति द्रष्टव्यम् ॥ ३१ ॥

*तेनैवमाज्ञाय यथावदर्थं
एकोदयं संप्रतिपद्य विप्राः ।
धर्मं चरन्तः सकलं यथावत्
काङ्क्षन्ति लोकागममप्रमत्ताः ॥ ३२॥

तेनेत्यादि । एवमुक्तरूपेण तेन पथैव एकोदयं—मुख्यफलं यथावदर्थं—परमार्थं मोक्षरूपं पुरुषार्थं प्राप्यं आज्ञाय—ज्ञात्वा तमेव धर्ममार्गं संप्रतिपद्य—परिगृह्य धर्मं चरन्तः अप्रमत्ता विप्राः सकलं यथावत्—परमार्थं लोकागमं—सालोक्यादिसायुज्यान्ताशेषमुक्तिप्राप्तिं काङ्क्षन्ति ॥ ३२ ॥

निन्दाम्यहं कर्म कृतं पितुस्तत्
[1]यस्त्वामगृह्णात् †[2]विषमस्थबुद्धिम् ।
बुध्याऽनयैवंविधया चरन्तं
सुनास्तिकं धर्मपथादपेतम् ॥ ३३ ॥

---

* तेन हेतुना विप्राः एवमर्थं यथावत् आज्ञाय—ज्ञात्वा एकोदयं संप्रतिपद्य—ऐककण्ठ्यं प्राप्य सकलं धर्मं—स्वस्ववर्णाश्रमोचितधर्मं अप्रमत्ताः—सावधानाः यथावत् चरन्तः—अनुतिष्ठन्तः लोकागमं—स्वर्गादिलोकप्राप्तिं काङ्क्षन्ति–गो. † विषमस्थबुद्धिं—अवैदिकमार्गेनिष्णातबुद्धिं.... .. ....निन्दामि—वैदिककर्मभ्यो बहिष्करोमि–गो. वस्तुतस्तु—भवानत्र निन्द्यः, भवन्तं मन्त्रित्वे पुरोहितत्वे चागृह्णात् खलु दशरथः, तत्कर्मैव निन्द्यं इति नर्मोक्तिरियम् ।

[1] यस्त्वा–ङ. [2] विषय–ङ.

विषमस्थबुद्धिं-दुर्मार्गप्रतिष्ठितबुद्धिं त्वां अगृह्णत्—याजकत्वेन पर्यगृह्णादिति यत्, तत् पितुः कर्म निन्दामि, अपि चार्यः परिगृहीतवानिति शोचामीत्यर्थः। विषमस्थबुद्धित्वमेव स्पष्टीक्रियते—बुध्येत्यादि। एवंविधयाऽनया बुध्या चरन्तं लोकनाशाय मज्जन्तं उच्यमानविशेषणं त्वां पर्यगृह्णादिति पूर्वेण सम्बन्धः ॥ ३३ ॥

*यथा हि चोरः स तथा हि बुद्धः
तथागतं नास्तिकमत्र विद्धि।
तस्माद्धि यः शक्यतमः प्रजानां
[1]न नास्तिकेनाभिमुखो बुधः स्यात् ॥ ३४ ॥

अथ अतिकोपात् नास्तिकोऽपि बौद्धवद्दण्डार्हो राज्ञ इत्याह—यथा हीत्यादि। यथा हि चोरो दण्ड्यः प्रसिद्धः, बुद्धोऽपि तथा दण्ड्यः प्रसिद्धः। नास्तिकं चार्वाकमपि अत्र—वेदमार्गविषये तथागतमेव विद्धि, तेनापि वेदप्रामाण्यं न स्वीक्रियते, तथा नास्तिकेनापीति। तस्माद्धि—तत एव हेतोः प्रजानां अनुग्रहाय राज्ञा चोरवदेव दण्डयितुं शक्यतमः, द्विजोऽपीति शेषः। ततश्च 'कथाऽपि खलु पापानां अलमश्रेयसे यतः' इतिन्यायेन बुधः—विद्वान् नास्तिकेनाभिमुखो न स्यात्। एवञ्च दण्डाशक्तैर्ब्राह्मणैः नास्तिकः संभाषणीयो न भवतीत्युक्तं भवति ॥ ३४ ॥

---

*यथा हि चोरः प्रजानां बाह्यं धनं अपहरति, तथा केवलबुद्धिवादरतोऽपि जनानां उत्तमसंस्कारादिरूपं आन्तरं धनं अपहरति। अतः तादृशः बुद्धिवादरतः शून्यवादी यावच्छक्ति दूरतः परिहरणीय इत्यर्थः। अधिकं रामायणभूमिकायां स्पष्टीभविष्यति।

[1] स--ङ.

*[1] त्वत्तो जनाः पूर्वतरे [2] द्विजाश्च
शुभानि कर्माणि बहूनि चक्रुः ।
†[3] छित्त्वाऽऽसतेमं च परं च लोकं
तस्मात् द्विजाः स्वस्ति कृतं हुतं च ॥ ३५ ॥

अथ सर्वात्मना तिरस्करोति—त्वत्त इत्यादि । अन्य इत्यध्याहार्यः । त्वत्तोऽन्ये ये द्विजा जनाः पूर्वतरे—पराः श्रेष्ठाः बहूनि शुभानि कर्माणि चक्रुः, त एते इमं च परं च लोकं छित्वा आसत—आसेर्लङ्, स्थितवन्त इति यावत् । तस्मात् अद्यापि द्विजाः स्वस्ति—अहिंसासत्यादिकं, हुतं—यज्ञादिकं, कृतं—परोपकारादिलक्षणं धर्मं च कुर्वते, वेदप्रामाण्यात् ॥ ३५ ॥

धर्मे रताः सत्पुरुषैः समेताः
तेजस्विनो दान[4]गुणाः प्रधानाः ।
अहिंसका वीतमलाश्च लोके
भवन्ति पूज्या मुनयः प्रधानाः ॥ ३६ ॥

यस्मादेवं तस्मात् धर्मरतत्वादिस्वभाववन्तः प्रधानाः—श्रेष्ठा वसिष्ठाद्या मुनय एव लोके अस्मदादिभिः पूज्याः, न त्वादृशा इत्यर्थः ॥ ३६ ॥

---

* त्वत्तः पूर्वतरे—पुरातनाश्च वराश्च—ज्ञानतपःश्रेष्ठाश्च जनाः बहूनि शुभानि कर्माणि चक्रुः । ते इमं परं च लोकं जित्वा सदा वर्तन्त इति शेषः । सदा वर्तमानत्वं च ग्रहनक्षत्रादिरूपेण दृश्यमानत्वात्, 'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणि' इति श्रुतेः । तस्मात् कर्मानुष्ठानस्य ऐहिकामुष्मिकसकलफलसाधनत्वात् द्विजाः स्वस्ति—मङ्गलात्मकं कर्म हुतं—यज्ञादि कृतं च—तपोदानादिकं च कुर्वन्तीति शेषः–गो. † इमं लोकं परं च लोकं छित्वा—ऐहिकामुष्मिकफलकामनां त्यक्त्वाऽपि–ति.

[1] वृत्ताः पराः–ङ. [2] वराश्च ङ, जनाश्च–च. [3] छित्वा सदेमं–ङ, जित्वा सदेमं–ञ. [4] गुण–ङ.

इति ब्रुवन्तं वचनं [1]सरोषं
रामं महात्मानमदीनसत्त्वम् ।
उवाच *[2]तथ्यं पुनरास्तिकं च
सत्यं वचः सानुनयं च विप्रः ॥ ३७ ॥

एवं धिक्कृतो जाबालिः स्वविषयं कोपं रामस्य शमयति—इति ब्रुवन्तमित्यादि । तथ्यं—परमार्थम् । विप्रः—जाबालिः ॥ ३७ ॥

†न नास्तिकानां वचनं ब्रवीम्यहं
[3]न नास्तिकोऽहं न च नास्ति किञ्चन ।
‡समीक्ष्य कालं पुनरास्तिकोऽभवं
भवेय काले पुनरेव नास्तिकः ॥ ३८ ॥

नास्तिकानां वचनमहं न ब्रवीमि, निर्निमित्तमिति शेषः । न च नास्ति किञ्चनेति । मे प्रयोजनं नास्तिकवादेनेति शेषः । कथमेवं प्रत्यक्षापलाप इत्यत्राह—समीक्ष्येत्यादि । कालं समीक्ष्येति ।

---

* तथ्यं—यथार्थं, सत्यं—सद्भ्यो हितम्–गो. † धर्मसंकटे प्राप्ते सर्वमतज्ञेन विदुषा यत्किञ्चिन्मतमवलम्ब्यापि तस्य परिहरणीयत्वात् महतो राज्यस्यानायकत्वरूपसंकट-परिहाराय त्वां निवर्तयितुं मया नास्तिकमुपन्यस्तं, न त्वहं वस्तुतो नास्तिक इत्याह—न नास्तिकानामित्यादिना । किञ्चन—परलोकादिकं नास्तीति न—अस्त्येव । समीक्ष्य कालं पुनरास्तिकोऽभवं—यदा वादिनाऽन्येन नास्तिकमतमवलम्ब्यते तं कालं समीक्ष्य अहं पुनरास्तिकमतावलम्ब्यभवम् । अन्यैः वादिभिः नास्तिकमतमवलम्ब्य कुतर्कोद्घाटने तदानीमहमेव त्वदुक्तरीत्या शतशस्तत्खण्डनमकार्षमित्यर्थः । तर्हीदानीं नास्तिकमतं कुतोऽवलम्बितवानसीत्यत्राह—भवेय काले पुनरेव नास्तिक इति । काले—धर्मसंकटकाले–गो. ‡ प्रमाणानुगुणत्वात् पुरुषव्यापारस्य तत्तत्प्रमाणप्रवृत्तिकालानुगुणं आस्तिकत्वनास्तिकत्वादिकं वर्तन एवेत्याशयः । अधिक अन्यत्र ॥

[1] सदोषं–च.   [2] पथ्यं–च.   [3] न चास्तिकोऽहं–ङ.

पारलौकिकव्यवहारकालं समीक्ष्येत्यर्थः । काल इति । परलोका-विरोधिलौकिकव्यवहारप्रयोजनकाल इत्यर्थः ॥ ३८ ॥

स चापि कालोऽयमुपागतः शनैः
यथा मया नास्तिकवागुदीरिता ।
***निवर्तनार्थं तव, राम! कारणात्**
प्रसादनार्थं च मयैतदीरितम् ॥ ३९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे नवोत्तरशततमः सर्गः

स चापि काल इति । लौकिकव्यवहारप्रयोजन इत्यर्थः । किं तल्लौकिकं प्रयोजनमित्यत्र—निवर्तनार्थमित्यादि । हे राम! तव निवर्तनप्रयोजनमुद्दिश्य तस्य कारणात् तव प्रसादनार्थं च मयैतन्नास्तिकवचनमीरितमित्यर्थः । देव(४३)मानः (?) सर्गः ॥ ३९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे नवोत्तरशततमः सर्गः

दशोत्तरशततमः सर्गः

[रामसान्त्वनम्]

क्रुद्धमाज्ञाय रामं तु वसिष्ठः प्रत्युवाच ह ।
जाबालिरपि जानीते लोकस्यास्य गतागतिम् ॥ १ ॥
[1] निवर्तयितुकामस्तु त्वामेतद्वाक्यमब्रवीत् ।

---

* निवर्तनार्थं—तव निवृत्तिज्ञापनार्थं—तव वेदमार्गादविचाल्यत्वस्य लोकानां प्रकटीकरणार्थमित्यर्थः । कारणात्—भरतकारणात् । भरतमुखोल्लासाय तव प्रसादनार्थं चेत्यर्थः—गो. निवर्तनार्थं नास्तिकामुक्तम् । अद्य तु प्रसादनार्थं एतत- आस्तिक्य-मुक्तमिति वा ॥

[1] निवर्तनार्थं तव तु—ङ.

अथ वसिष्ठो भगवान् जाबालिविषयकं रामकोपमुपशमयन्, ब्रह्माणमारभ्य प्रवृत्तकुलाचारो ज्येष्ठाभिषेकः; अतस्त्वयाऽभिषेकः स्वीकार्य इति बोधनशेषतया* भगवन्तमारभ्य कुलक्रमं कथयति। क्रुद्धमित्यादि। अस्य लोकस्येति। आद्यन्तसंसक्तस्यो सामित्यर्थः। गतागतिमिति। गतिपूर्विका आगतिः—गतागतिः, प्रवृत्तिनिवृत्ती इत्यर्थः † ॥ १ ॥

इमां लोकसमुत्पत्तिं, लोकनाथ! निबोध मे ॥ २ ॥

लोकसमुत्पत्तिं कथयिष्यन् सर्वज्ञो भगवान् वसिष्ठस्तु रामं लोकनाथावतारमेव जानानः लोकनाथेति सम्बोधयति। अज्ञास्तु तदर्थं सभावर्तिजनेश्वरमिति गृह्णन्ति ॥ २ ॥

सर्वं सलिलमेवासीत् पृथिवी [1] यत्र निर्मिता।
ततः समभवत् ब्रह्मा स्वयंभूर्दैवतैः सह ॥ ३ ॥

सर्वं सलिलमेवासीदिति। अहरादौ पूर्वाह्णान्तेऽपहृतस्रोतः-पुनस्सर्गकाले सर्वं—वैराजत्रिस्रोतोजातं सलिलमेवासीत्—सलिल-सत्त्वमूर्तविराड्विग्रहब्रह्मात्मकसोपादानात्मनाऽवस्थितमभूत्। यत्र—सलिले तस्यैव विराजः—प्रजापतेः—विष्ण्वाकारप्रयोजिका पृथिवी निर्मिता—प्रतिष्ठिताऽपि तादृक्सलिलप्रधानविराड्ब्रह्मस्वरूपैवाभूदित्यर्थः। 'सहस्र-युगपर्यन्तमहर्यद्ब्रह्मणो विदुः। रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः' इतिन्यायेन कालात्मकेन सम्राजस्तावद्रात्रिजालक्षपणानन्तरं चिदाकाशमयो भगवान् स्वयंभूः स्वेच्छया स्वभूमव्युत्ग्रहेषु सन्निधानवान्

---

* कुलमाहात्म्यस्मारणेन मनःप्रसादनार्थं च—इत्यप्यूह्यम्। † गतं—गमनं—परलोकप्राप्तिं तत इहागतिं च—गो.

[1] तत्र—ङ.

ब्रह्मा—हिरण्यगर्भः, वयमस्मत्स्थूलदेह इव 'अग्निर्वाग्भूत्वा मुखं प्राविशत्' इति, 'वायुः प्राणो भूत्वा नासिके प्राविशत्' इत्याद्युपदिष्टभूमविराट्पुरुषाधिष्ठात्र्यग्न्यादिदैवतैस्सह विराडात्मना समभवत्—तद्रूपग्रहमनुगृह्णाति स्म ॥ ३ ॥

स वराहस्ततो भूत्वा प्रोज्जहार वसुन्धराम् ।
असृजच्च जगत्सर्वं सह पुत्रैः कृतात्मभिः ॥ ४ ॥

अथ विराडुपग्रहः स भगवान् ब्रह्मा वराहः—स्वपरमूर्तिपृथिवीतत्त्वप्रधानधरणीवराहविष्ण्वात्मकः सन् वसुन्धरां प्रोज्जहार—उद्धृतवान् । कृतात्मभिः पुत्रैः निजानुग्रहसंप्राप्तसृष्ट्यादिशक्तिमद्भिः सप्तर्षिदक्षादिभिः पुत्रैः सह यथायोगं सर्वं जगदसृजत् । तथा हि—'महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा । मद्भावा मानसा जाताः येषां लोक इमाः प्रजाः' इति ॥ ४ ॥

***आकाशप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ।**
तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ॥ ५ ॥

अथ यो भगवान् ब्रह्मा विराडुपग्रहमाविश्य तत्स्थमर्त्यसर्वस्रोतांस्यसृजत् सोऽसौ स्वयंभूरपि किमात्मना सर्वादौ स्वयमेव वा भवतीत्यत्राह—आकाशप्रभव इत्यादि । स्वराडान्तरभूमविग्रहभूम्हृदयहेमकोशान्तरा[1]काशात्मना शुद्धब्रह्मश्रीहिरण्यगर्भात्मना प्राभवदित्यर्थः । तथा हि 'हिरण्यगर्भः समवर्तताग्रे' इत्यादि । सोऽसौ भगवान् सर्वसंसारसाक्षात्पञ्चकृत्यप्रवर्तकत्वात् शाश्वतः—नित्यजाग्रन्निस्तुला-

---

* आकाशशब्दः परब्रह्मपरः । इत्थमेव 'अव्यक्तप्रभवो ब्रह्मा' इति बालकाण्डोक्तमपि—गो.

[1] काशशुद्ध—ट.

धिकसहजसमग्रभूमविद्यैश्वर्यानन्तशक्तित्वात् वैराजसकलसंहारोपादानादि-स्वभावोऽपि स्वयं शाश्वतो भवति—सततोदितैकरूपो भवति। तथा नित्यश्च भवति—सकलसंसारसाक्षादनित्यत्वसाधकभूमसम्राडात्मत्वात् स्वस्यानित्यत्वसाधकवस्त्वन्तराभावात् स्वयं नित्यः। स्वसंपादितकाल-त्रयाननुयायिसंसारे स्वयमेक एव सर्वकालानुस्यूतः। तथा अव्ययः—विविधं विकारं षड्भावलक्षणमयमाने सर्वस्मिन्नपि संसारे स्वयमेक एवाविकारः सकलविकारोत्पत्तिज्ञप्तिसाक्षात्साधकनित्यजाग्रद्भूमलिङ्ग-ज्योतिरात्मकत्वात्। एवंस्वभावात्तस्मात् भगवतः भूमविराडुपग्रहप्रधानात् मरीचिः—सप्तर्षिलक्षणभगवत्प्रधानपुत्रेषु एकः मरीचिः। तथा हि—'सप्तर्षयो मरीच्यत्रिमुखाः' इति। मरीचिकश्यपविवस्वन्तः क्रमात् भगवतः पुत्रपौत्रप्रपौत्ररूपाः। मनुपर्यन्तास्तु मरीच्या-द्युपहितब्रह्मणः मानसपुत्राः। तथा प्रागेवोक्तं—'महर्षयः सप्त' इत्यादिश्लोकेन ॥ ५ ॥

*विवस्वान् कश्यपात् जज्ञे मनुर्वैवस्वतः [1]सुतः।
[2]स तु प्रजापतिः पूर्वं इक्ष्वाकुस्तु मनोः सुतः ॥ ६ ॥
[3]यस्येयं प्रथमं दत्ता समृद्धा मनुना मही।
तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ॥ ७ ॥

स मनुस्तु प्रजापतिः—रेतोमूलमर्त्यप्रजासर्गाधिकारी। तेन स्वरेतसा प्रजाः सृष्टाः। तस्मान्मनोः क्षत्रक्षेत्रे इक्ष्वाकुः।

---

* वैवस्वतः—विवस्वत्सम्बन्धी। तस्येक्ष्वाकुवंशकूटस्थत्वं च दर्शयति—स त्वित्यादिना। 'मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम्' (बाल. ५–६) इति तस्यायोध्यानिर्मातृत्वाक्तः—गो.

[1] स्मृतः-ङ, स्वयम्—च. [2] एतदर्धस्थाने—स तु प्रजापतिः पूर्वं इक्ष्वाकूणां महात्मनाम्। जजनाङ्गिरसं ब्रह्मा प्रचेतसमथाङ्गिराः। मनुः प्रचेतसः पुत्रः इक्ष्वाकुस्तु मनोः सुतः इत्यर्धत्रयम्—ङ. [3] तस्येयं—ङ.

सोऽसौ साक्षात् क्षत्रियः । अस्य चतुस्समुद्रवसना इयं मही—सर्वाऽपि भूमिरित्यर्थः । दत्ता, पित्रा मनुनेति शेषः ॥ ६-७ ॥

इक्ष्वाकोस्तु सुतः श्रीमान् कुक्षिरित्यत्र [1]विश्रुतः ।
कुक्षेरथात्मजो [2]वीरः विकुक्षिरुदपद्यत ॥ ८ ॥

विश्रुतः—प्रसिद्धः ॥ ८ ॥

विकुक्षेस्तु महातेजाः बाणः पुत्रः प्रतापवान् ।
बाणस्य च महाबाहुः अनरण्यो [3]महायशाः ॥ ९ ॥
[4]नानावृष्टिः बभूवास्मिन् न दुर्भिक्षं सतां वरे ।
अनरण्ये महाराजे तस्करो [5]वाऽपि कश्चन ॥ १० ॥

सतां वरे—श्रेष्ठे अनरण्ये महाराजे राज्यं कुर्वाणे सति अनावृष्टिः, दुर्भिक्षं, तन्मूलः कश्चन तस्करोऽपि न बभूव ॥ १० ॥

अनरण्यान्महा[6]बाहुः पृथू राजा बभूव ह ।
तस्मात् पृथोर्महा[7]तेजाः त्रिशङ्कुरुदपद्यत ॥ ११ ॥
स सत्यवचना[8]द्वीरः सशरीरो दिवं गतः ।
त्रिशङ्कोरभवत् सूनुः धुन्धुमारो महायशाः ॥ १२ ॥
*[9]धुन्धुमारान्महातेजाः युवनाश्वो व्यजायत ।
युवनाश्वसुतः श्रीमान् मान्धाता समपद्यत ॥ १३ ॥

---

* युवनाश्व एव महातेजःप्रभावेन महाबलधुन्धुनामकासुरमारणात् धुन्धुमारसंज्ञामलभतेत्यर्थः–गो. (धुन्धुमारो महातेजाः—इति पाठः) त्रिशंकुसुतो युवनाश्वः इत्यन्यत्र श्रूयमाणं कल्पान्तरविषयम् । यद्वा त्रिशंकोः सूनुरित्यत्र तत्पौत्र इत्यर्थः इति केचित् ।

[1] नः श्रुतम्–ङ. [2] वीर–च. [3] महातपाः–च. [4] न चावृष्टिः–ङ. [5] नापि–ङ. [6] तेजाः–ङ, राज–च. [7] राजः–ङ. [8] द्वीरः–ङ. [9] धुन्धुमारो महा–ङ.

सः—त्रिशङ्कुः सत्यवचनात् स्वीयात्, भगवतो विश्वामित्रस्य सत्यप्रतिज्ञानाच्चेत्यर्थः। त्रिशङ्कोः धुन्धुमारः, धुन्धुमारात् युवनाश्वः—इत्यादिकान्हिोच्यमानपरंपरावैलक्षण्यम्। अन्यत्र श्रूयमाणं कल्पान्तरविषयं इति द्रष्टव्यम् ॥ १२-१३ ॥

मान्धातुस्तु [1] महातेजाः सुसन्धिरुदपद्यत।
सुसन्धेरपि पुत्रौ द्वौ [2] ध्रुवसन्धिः प्रसेनजित् ॥ १४ ॥
यशस्वी [2] ध्रुवसन्धेस्तु भरतो [3] रिपुसूदनः।

ध्रुवसन्धिः ज्येष्ठः। अतस्तत्पुत्रावलम्बनेन अयोध्याराजपरंपरोच्यते—ध्रुवसन्धेस्तु भरत इति ॥ १४ ॥

भरताच्च [4] महाबाहोः असितो नाम जायत ॥ १५ ॥
यस्यैते * प्रतिराजानः उदपद्यन्त शत्रवः।
हैहयास्तालजङ्घाश्च शूराश्च [5] शशबिन्दवः ॥ १६ ॥

यस्य—असितस्येत्यर्थः। यस्योदपद्यन्त, सोऽभवदित्यन्वयः ॥

तांस्तु सर्वान् प्रतिव्यूह्य युद्धे राजा प्रवासितः।
स च शैलवरे रम्ये † बभूवाभिरतो मुनिः ॥ १७ ॥

तांस्त्विति। हैहयादिचतुर्विधशत्रून् युद्धे प्रतिव्यूह्य—प्रतिस्पर्धितया कृतस्वबहुव्यूहतयाऽवस्थितोऽपि असौ शत्रुप्राबल्यात् अशक्यार्थधिया प्रवासितः—सञ्जातप्रवासो बभूव। पुरं च त्यक्त्वा हिमवद्गिरिं शत्रुजयादिहेतवे तपसे जगामेत्यर्थः। शैलवरः–हिमवान् ॥

* प्रतिराजानः—सामन्ताः- **गो.**　　† मुनिस्सन्नभिरतो बभूव। अन्यथा तस्मादपि शैलात् प्रवासयेयुरिति भावः–**गो.**

[1] सुतः श्रीमान्–ङ.　[2] दृढ-ङ.　[3] रघुनन्दन–ङ.　[4] महाबाहुः–ङ.
[5] शशि–ङ.

द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति * [1]श्रुतिः ।
[2]तत्र चैका महाभाग भार्गवं देववर्चसम् ॥ १८ ॥
ववन्दे पद्मपत्राक्षी काङ्क्षिणी पुत्रमुत्तमम् ।

तत्र चेत्यादिश्लोकाः बालकाण्डेन गतार्थाः ॥ १८ ॥

एका [3]गर्भविनाशाय सपत्न्यै गरलं ददौ ॥ १९ ॥
भार्गवश्च्यवनो [4]नाम हिमवन्तमुपाश्रितः ।
तमृषिं [5]साऽभ्युपागम्य कालिन्दी त्वभ्यवादयत् ॥ २० ॥
स तामभ्यवदत् [6]प्रीतः वरेप्सुं पुत्रजन्मनि ।
पुत्रस्ते भविता, देवि! महात्मा लोकविश्रुतः ॥ २१ ॥
धार्मिकश्च [7]सुशीलश्च वंशकर्ताऽरिसूदनः ।
[8]श्रुत्वा प्रदक्षिणं [9]कृत्वा मुनिं [10]तमनुमान्य च ॥ २२ ॥
पद्मपत्र[11]समानाक्षं पद्मगर्भसमप्रभम् ।
ततः सा गृहमागम्य [12]पत्नी पुत्रमजायत ॥ २३ ॥
सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया ।
गरेण सह तेनैव [13]जातः स सगरोऽभवत् ॥ २४ ॥
स राजा सगरो नाम यः समुद्रमखानयत् ।
इष्ट्वा पर्वणि वेगेन त्रासयान इमाः प्रजाः ॥ २५ ॥

अखानयदिति । स्वपुत्रैरिति शेषः । पर्वणि इष्ट्वा—दीक्षितो भूत्वा । वेगेन—खननवेगेन । त्रासयानः—उद्वेजयन् ॥ २५ ॥

---

* इति श्रुतिरिति। इति प्रसिद्धिरित्यर्थः ॥

[1] श्रुतम्–ङ [2] अयं श्लोकः ङ. पुस्तके कुण्डलितः । [3] पुत्र–ङ. [4] राम–ङ. [5] समुपागम्य–ङ. [6] विप्रः–ङ. [7] सुभीमश्च–च. [8] कृत्वा–ङ. [9] स्तुत्वा, दृष्टा–ङ. [10] तमभिवाद्य–ङ. [11] समानाक्षी, विशालाक्षी–ङ. [12] देवी–ङ. [13] तस्माद–च.

असमञ्जस्तु पुत्रोऽभूत् सगरस्येति नः श्रुतम् ।
जीवन्नेव स पित्रा तु निरस्तः *पापकर्मकृत् ॥ २६ ॥
[1]अंशुमानपि पुत्रोऽभूत् असमञ्जस्य वीर्यवान् ।
दिलीपोंऽशुमतः पुत्रः दिलीपस्य भगीरथः ॥ २७ ॥
भगीरथात् ककुत्स्थश्च काकुत्स्था येन तु स्मृताः ।
काकुत्स्थस्य तु पुत्रोऽभूत् रघुः, येन तु राघवाः ॥ २८ ॥

येन तु स्मृता इति । येन तु कूटस्थेन सर्वे तद्वंश्याः काकुत्स्थाः स्मृताः, सोऽभूदित्यर्थः । राघवा इति । राघवशब्दवाच्या इत्यर्थः ॥ २८ ॥

†रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ।
कल्माषपादः सौदासः इत्येवं प्रथितो भुवि ॥ २९ ॥

रघोस्तु तेजस्वी प्रवृद्धादिनामवत्तया चतुष्पर्यायनामवत्तया प्रथितः पुत्रोऽभूत् ॥ २९ ॥

‡कल्माषपादपुत्रोऽभूत् शङ्खणस्त्विति नः श्रुतिः ।
[2]यस्तु तद्वीर्यमासाद्य सहसैन्योऽप्यनीनशत् ॥ ३० ॥

कल्माषपादस्य पुत्रः शङ्खण इति नः—अस्माकं श्रुतिः—प्रसिद्धिः अस्तीत्यर्थः, तस्यापि पुरोऽतीतत्वात् । यस्तु शङ्खणः

---

* पापकर्मकृत्-एव इवार्थे—पापकर्मकृदिव—रा. † प्रवृद्धनामकः वसिष्ठशापात् पुरुषादकः—राक्षसो भूतः, वसिष्ठशापायोद्धृतजलस्य स्वभार्यानुनयनात् स्वपादे प्रक्षेपेण पादयोः दाहात् कल्माषपादः जातः । अथवा नाम्ना सौदास एव प्रवृद्धः—इत्यन्वयः । ‡ तद्वीर्यं—वसिष्ठशापात् राक्षसत्वं प्राप्तस्य कल्माषपादस्य पराक्रमं आसाद्य अप्यनीनशत्—विनाशं प्राप्तवान् । राक्षसत्वात् कल्माषपादेन स्वपुत्र एव विनाशित इत्यर्थः-गो.

[1] अंशुमानस्य—ङ. [2] स तु दैवेन विधिना ससैन्योऽप्यनशत्पुरा—ङ.

तद्वीर्यं—तत्तादृशपराक्रमं युद्धे प्राप्यापि दैवाद्युद्धे सहसैन्योऽप्यनीनशत्—आर्षः स्वार्थणिः, नाशं गतोऽभूदित्यर्थः ॥ ३० ॥

शङ्खणस्य तु पुत्रोऽभूत् शूरः श्रीमान् सुदर्शनः ।
सुदर्शनस्याग्निवर्णः अग्निवर्णस्य शीघ्रगः ॥ ३१ ॥

शूरः—शौर्यगुणयुक्तः ॥ ३१ ॥

शीघ्रगस्य मरुः पुत्रः मरोः पुत्रः प्रशुश्रुवः ।
प्रशुश्रुवस्य पुत्रोऽभूत् अम्बरीषो[1] महाद्युतिः ॥ ३२ ॥
अम्बरीषस्य पुत्रोऽभूत् नहुषः सत्यविक्रमः ।
नहुषस्य च नाभागः पुत्रः परमधार्मिकः ॥ ३३ ॥
अजश्च सुव्रतश्चैव नाभागस्य सुतावुभौ ।

अजः नाभागस्य ज्येष्ठः पुत्रः ॥ ३३ ॥

अजस्य चैव धर्मात्मा राजा दशरथः[2] सुतः ॥ ३४ ॥
तस्य ज्येष्ठोऽसि *दायादः राम इत्यभिविश्रुतः ।
तद्गृहाण स्वकं राज्यं अवेक्षस्व[3] जगत्, नृप ! ॥ ३५ ॥

दायादः—पुत्रः, 'दायादौ सुतबान्धवौ'। यस्मात् ज्येष्ठः तत्—तस्मात् इत्यर्थः। स्वकं—जनम्—इक्ष्वाकुमुखस्ववंशानुष्ठानमित्यर्थः ॥ ३५ ॥

इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः ।
पूर्वजे नावरः पुत्रः ज्येष्ठो[4] राज्येऽभिषिच्यते ॥ ३६ ॥

तमेवार्थं विवृणोति—इक्ष्वाकूणामित्यादि । पूर्वजे स्थिते अवरः पुत्रो नाभिषिच्यते ॥ ३६ ॥

---

* दायादः—सुतः-गो. राज्यस्य न्यायप्राप्तत्वसूचनाय एवमुक्तिः ।

[1] महामतिः-च. [2] स्मृतः-ङ. [3] जनं नृप, गतं नृप-ङ. [4] राजा-च.

स राघवाणां कुलधर्ममात्मनः
सनातनं नाद्य[1] विहन्तुमर्हसि ।
प्रभूतरत्नामनुशाधि मेदिनीं
*प्रभूतराष्ट्रां पितृवन्महायशाः ॥ ३७ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे दशोत्तरशततमः सर्गः

सः त्वं कुलक्रमागतज्येष्ठाभिषेकधर्मं विहन्तुं—विघ्नितुम् । प्रभूतराष्ट्रां—प्रभूतावान्तरदेशवतीम् । सर्ग(३७)मानः सर्गः ॥ ३७ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे दशोत्तरशततमः सर्गः

एकादशोत्तरशततमः सर्गः

[भरतप्रायोपवेशः]

स वसिष्ठः तदा रामं उक्त्वा राजपुरोहितः ।
अब्रवीद्धर्मसंयुक्तं पुनरेवापरं वचः ॥ १ ॥

पुनश्च वसिष्ठेन भरतेन च धर्मन्यायावलम्बनेनैव प्रवर्त्यमानप्रतिनिवर्तनोऽपि रामः स्वसत्यमेव परिगृह्णाति । स वसिष्ठ इत्यादि ॥ १ ॥

†पुरुषस्येह जातस्य भवन्ति गुरवः [2]त्रयः ।
आचार्यश्चैव, काकुत्स्थ ! पिता माता च, राघव ! ॥ २ ॥

गुरव इति । उपास्या इत्यर्थः ॥ २ ॥

---

* प्रभूतराष्ट्रां— बहुविधावान्तरजनपदयुक्ताम्–गो. † एवं कुलधर्मोपपादनेऽपि सर्वं तव पितृनियोगव्यतिरिक्तविषयमिति मत्वा तूष्णीं स्थितस्य रामस्याशयं जानन् वसिष्ठः पुनः निवर्तनहेत्वन्तरमाह—पुरुषस्येत्यादिना–गो.

[1] विहातु–ङ. [2] सदा–च.

*पिता ह्येनं जनयति पुरुषं, पुरुषर्षभ !
प्रज्ञां ददाति चाचार्यः तस्मात् स गुरुरुच्यते ॥ ३ ॥

प्रज्ञां ददातीति । उपनयनसंस्कारपूर्वं ब्राह्मीं विद्यां मूलविद्या-साधनां ददाति । यदेवं आचार्यः ब्राह्मीं विद्यातनुं जनयति, तस्मादाचार्य एव गुरुममवाये गुरुरुच्यते । तथा आपस्तम्बः—'आचार्यः श्रेष्ठो गुरूणम्' † इति । पित्रपेक्षया आचार्यस्यैव गौरवाधिक्येऽपि स एव हेतुमाह—'स हि विद्यातस्तं जनयति । तच्छ्रेष्ठं जन्म' इति । पित्रे गौरवन्यूनतायामप्याह—'शरीरमेव मातापितरौ जनयतः' इति शीर्यत्स्वभावं सर्वयोनिसुलभं प्राकृतं मलशरीरं मलमूलकं जनयतः, न तु परमदुर्लभशाश्वतब्राह्मविद्यादेहम् ॥ ३ ॥

सोऽहं ते पितुराचार्यः तव चैव, परंतप !
मम त्वं वचनं कुर्वन् नातिवर्तेः सतां गतिम् ॥ ४ ॥

उक्ताया लोकस्थितेः प्रकृतोपयोगः प्रदर्श्यते—स इत्यादि । नातिवर्तेरिति । नातिवर्तेथा इति यावत् । सद्गतिभ्रंशो न त इत्याशयः ॥ ४ ॥

इमा हि ते परिषदः [1] ज्ञातयश्च नृपास्तथा ।
‡एषु, तात ! चरन् धर्मं नातिवर्तेः सतां गतिम् ॥ ५ ॥

---

* पितेति मातुरप्युपलक्षणम् । शरीरमेव मातापितरौ जनयतः इत्यर्थः—गो.
† 'स हि विद्यातस्तं जनयति, तच्छ्रेष्ठं जन्म । शरीरमेव मातापितरौ जनयतः शीर्यत्स्वभावं सर्वयोनिसुलभं प्राकृतं मलजं शरीरम्' इति सूत्रशेषः । ‡ एषु—एतेषां विषये ; एतदर्थं इति यावत् ।

[1] श्रेणयश्च द्विजास्तथा—ङ.

वृद्धाया धर्मशीलायाः मातुर्नार्हस्यवर्तितुम् * ।
[1] तस्या हि वचनं कुर्वन् नातिवर्तेः सतां गतिम् ॥ ६ ॥
भरतस्य वचः कुर्वन् याचमानस्य, राघव !
† आत्मानं नातिवर्तेस्त्वं, सत्यधर्मपराक्रम ! ॥ ७ ॥

आत्मानं याचमानस्य—त्वां स्वराज्याधिपत्यपणपूर्वकं प्रति-
निवृत्तिं याचमानस्येत्यर्थः । अत्र 'आत्मानं नातिवर्तेथाः' इति
यथापाठमेवान्वीय, यद्वाकश्मलान्यन्वभूत् परः ॥ ७ ॥

एवं ‡ मधुरमुक्तः सः गुरुणा राघवः स्वयम् ।
प्रत्युवाच समासीनं वसिष्ठं पुरुषर्षभः ॥ ८ ॥
§ यन्मातापितरौ वृत्तं तनये कुरुतः सदा ।
न सुप्रतिकरं तत्तु मात्रा पित्रा च यत् कृतम् ॥ ९ ॥

---

* अवर्तितुं—शुश्रूषामकर्तुं नार्हसि–गो. † आत्मानं—आत्मभूतं भरतं नातिवर्तेथा इत्युदारधीः । सत्यधर्मलक्षणात्स्वस्वभावमित्यपरे । स्वासाधारणधर्मस्वादाश्रितपारतन्त्र्यं नातिवर्तेथा इत्याचार्याः–गो. वस्तुतः—न स्वमर्यादातिक्रमणं भवेदिति वा, न स्वरूपातिक्रमणं—स्वरूपनाशः भवेदिति वाऽर्थः स्वरसः । ‡ 'मधुरमुक्तः' इत्यनेन आदेशरूपत्वं वार्यते । तेन रामस्य न गुर्वाज्ञातिलङ्घनदोषः । उक्तवासिष्ठवाक्यं तु अनुज्ञारूपमेव 'एवं करणेऽपि न दोषप्रसक्तिः' इत्येवम् । दशरथवाक्यं तु आज्ञारूपं (११ श्लो.) अतो न दोष इति भावः । 'स याच्यमानो गुरुणा' (113-9) इत्युत्तरत्र वचनं चात्र स्वरसम् । § 'सति धर्मिणि धर्माश्चिन्त्यन्ते' इति न्यायेन सर्वधर्मोपादनबीजभूतशरीरोत्पादकत्वात्, अत्यन्ताज्ञानदशायामपि सर्वप्रकारसंरक्षणेन बहुविधोपकारकत्वाच्च आचार्यवचनादपि पितृवचनं अवश्यं कर्तव्यम् । अत एव 'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव' इति चरमपर्वण्याचार्य उपात्त इत्यभिप्रायेणाह–यन्मातेत्यादि श्लोकद्वयेन–गो.

[1] अस्यास्तु -च.

यत् वृत्तं तनये कुरुत इति। यादृशं पुत्रस्योपकारमित्यर्थः। कृतं न सुप्रतिकरमिति। खलन्तोऽयम्, अशक्यप्रत्युपकारमित्यर्थः। यत् कृतमिति। यच्छब्दः प्रसिद्धिवाची, किं कृतमिति ॥ ९ ॥

*यथाशक्तिप्रदानेन स्नापनोच्छादनेन च।
नित्यं च प्रियवादेन तथा संवर्धनेन च ॥ १० ॥

अतः—यथाशक्तीत्यादि। यथाशक्ति बालस्य जीवनार्थपदार्थस्वीकारशक्त्यनुरोधतः प्रदानेन — तैलक्षीरान्नादिप्रदानेन। उच्छादनं—उद्वर्तनं—लेपपिष्टादिना ॥ १० ॥

स हि राजा दशरथः †पिता जनयिता मम।
[1]आज्ञापयन्मां यत्तस्य न तन्मिथ्या भविष्यति ॥ ११ ॥

जनयिता—उत्पादकः पिता—पातेस्तृचि औणादिकमित्त्वम्, उक्तरीत्या रक्षिता चेत्यर्थः ॥ ११ ॥

एवमुक्तस्तु रामेण भरतः प्रत्यनन्तरम्।
उवाच [2]परमोदारः सूतं परमदुर्मनाः ॥ १२ ॥

प्रत्यनन्तरं—आसन्नम् ॥ १२ ॥

इह तु स्थण्डिले शीघ्रं कुशानास्तर, सारथे!
आर्यं ‡प्रत्युपवेक्ष्यामि यावन्मे [3]संप्रसीदति§ ॥ १३ ॥

---

* यथाशक्तिप्रदानेन— स्तन्यान्नादिप्रदानेन—गो. † 'जनयिता पिता' इति गौणपितृव्यावृत्तिः-गो. ‡ प्रत्युपवेक्ष्यामि—प्रतिरोत्स्यामीत्यर्थः-गो. § एतदुत्तरं 'निराहारः' इत्यादिपद्यं प्रक्षिप्तमिति कतकः स्वरसः-ति. परन्तु सर्गान्ते श्लोकसंख्या इति कतक एवोक्तं विमृष्टव्यम्।

[1] आज्ञातं यन्मया तस्य—ङ. [2] विपुलोरस्कः—च. [3] न प्रसीदति—ङ.

निराहारो * निरालोकः धनहीनो यथा द्विजः ।
[1] शेष्ये पुरस्ताच्छालाया [2] यावन्मां प्रतियास्यति ॥ १४ ॥

आर्यं प्रत्युपवेक्ष्यामीति । आर्यमुद्दिश्य प्रत्युपवेशनकर्म करिष्य इत्यर्थः । तच्च उपरोद्धव्यस्य गृहद्वारपुरः कुशेषु यावत्कार्यसिद्धि निराहारतया एकपार्श्वेनैव पार्श्वान्तरपरिवृत्तिराहित्येन शयनम् ॥ १३-१४ ॥

स तु राममवेक्षन्तं सुमन्त्रं प्रेक्ष्य दुर्मनाः ।
† कुशोत्तरमुपस्थाप्य भूमावेवा[3]स्थित स्वयम् ॥ १५ ॥

स तु--भरत इत्यर्थः । राममवेक्षन्तमिति । रामनियोगं प्रतीक्षमाणं, तद्वशात् कुशानयने विलम्बमानमित्यर्थः । कुशोत्तरं—कुशश्रेष्ठं स्वयमेवोपस्थाप्य भूमौ आस्थित-लिङ्, 'स्थाघ्वोरिच्च' इतीत्त्वम्, प्रत्युपवेशनमनुष्ठितवानित्यर्थः ॥ १५ ॥

तमुवाच महातेजाः रामो राजर्षिसत्तमः ।
‡ किं मां, भरत! कुर्वाणं, तात! प्रत्यु[4]पवेक्ष्यसि ॥ १६ ॥

किं कुर्वाणमिति । किमन्याय्यं कुर्वाणमित्यर्थः ॥ १६ ॥

ब्राह्मणो ह्येकपार्श्वेन § नरान् रोद्धुमिहार्हति ।
न तु मूर्धा[5]भिषिक्तानां विधिः प्रत्युपवेशने ॥ १७ ॥

---

* निरालोकः—अवकुण्ठिताननः । धनहीनः—वृद्ध्यर्थं ऋणप्रदानाभिर्धनः—गो.
† कुशोत्तरं—कुशास्तरणं उपस्थाप्य—आनीय स्वयमेवास्तरत्—आस्तृणात्—शयनं कृतवानित्यर्थः—गो. ‡ किं कुर्वाणं—किमपकारं कुर्वाणम्—गो. § एकपार्श्वेन—एकपार्श्वशयनेन—गो.

[1] शये—च. [2] यावन्न—ङ. [3] स्तरत—ङ. [4] पवेक्ष्यसे—च. [5] वसिक्तानां—ङ

उत्तिष्ठ, नरशार्दूल! हित्वैतद्दारुणं व्रतम् ।
पुरवर्यामितः क्षिप्रं अयोध्यां याहि, राघव! ॥ १८ ॥
आसीनस्त्वेव भरतः पौरजानपदं जनम् ।
उवाच सर्वतः प्रेक्ष्य *[1] किमार्यं नानुशासथ ॥ १९ ॥

आसीनस्त्वेवेति । प्रत्युपवेशकर्मणीति शेषः । नानुशासथेति । नानुशिष्टेति यावत् ॥ १९ ॥

ते तदोचु[2]र्महात्मानं पौरजानपदा जनाः ।
† काकुत्स्थ[3]मपि जानीमः [4]सम्यग्वदति राघवः ॥ २० ॥
‡ एषोऽपि हि [5]महाभागः पितुर्वचसि तिष्ठति ।
अत एव न शक्ताः स्म व्यावर्तयितुमञ्जसा § ॥ २१ ॥

राघवः—भरतः भवानपि काकुत्स्थं—राघवं प्रति सम्यग्वदतीति जानीमः। महाभाग एष रामश्च पितुर्वचसि तिष्ठति, तदपि सम्यगेव । यद्येवं—अत एवेत्यादि ॥ २०–२१ ॥

तेषामाज्ञाय वचनं रामो वचनमब्रवीत् ।
एवं निबोध वचनं सुहृदां धर्मचक्षुषाम् ॥ २२ ॥
[6] एतच्चैवोभयं श्रुत्वा सम्यक् [7]संपश्य, राघव!
उत्तिष्ठ त्वं [8]महाबाहो! ‖ मां च स्पृश तथोदकम् ॥२३॥

---

* इदं भरतवचनं—अतः इतिकरणं द्रष्टव्यम् । † काकुत्स्थं—रामं अभिजानीमः—अभितो जानीमः, सत्यसंधं जानीम इत्यर्थः-गो. ‡ सम्यग्वदतीत्येतदुपपादयति—एष इत्यादिना-गो. § अञ्जसा—शीघ्रं-गो. तत्त्वत इति वा । ‖ क्षत्रियाविहितप्रत्युपवेशनप्रायश्चित्तार्थमित्यर्थः ।

[1] किमर्थं-ङ. [2] महात्मानः-ङ. [3] मभि-ङ. [4] सत्यं वदति-ङ. [5] महाबाहुः-ङ. [6] ततश्चैनो-ङ. [7] त्वं पश्य-ङ. [8] महाभाग-ङ.

रामो वचनमब्रवीदिति । भरतं प्रतीति शेषः । एवमित्यादि । धर्मचक्षुषां—धर्मदर्शिनां सुहृदां एवं—उक्तरूपं युष्मदस्मद्विषयकं वचनं निबोध—शृणु । एतदुभयं—त्वद्विषयकं मद्विषयकं च वचनं श्रुत्वा ततः परं कर्तव्यं सम्यक् पश्य—चिन्तय । कर्तव्यं निश्चेतुमशक्यश्चेत् उच्यते मया । उत्तिष्ठ, मां च स्पृश—मद्विषयकप्रत्युपवेशदोषविमोचनार्थं मां, अज्ञानतः कृतप्रत्युपवेशनप्रायश्चित्तं उदकं च स्पृश—शुद्धाचमनं कुर्विति यावत् ॥ २२-२३ ॥

अथोत्थाय जलं स्पृष्ट्वा भरतो वाक्यमब्रवीत् ।
शृण्वन्तु मे परिषदः मन्त्रिणः [1]श्रेणयस्तथा ॥ २४ ॥

परिषदः—सभ्याः ॥ २४ ॥

न याचे पितरं राज्यं *नानु[2]शासामि मातरम् ।
[3]आर्यं परमधर्मज्ञं †[4]नानुजानामि राघवम् ॥ २५ ॥

न याच इति । नायाचिषमित्यर्थः । अथापि तदर्थप्रवृत्तां मातरमपि नानुशासामि—सर्वत्रात्र शासिरार्षः शब्विकरणः ॥ २५ ॥

यदि त्ववश्यं वस्तव्यं कर्तव्यं च पितुर्वचः ।
‡अहमेव निवत्स्यामि चतुर्दश वने समाः ॥ २६ ॥

---

*नानुशासामि—'एवं कुरु' इति नानुशिष्टवान्-गो. †नानुजानामि—वनवासाय नानुज्ञातवानस्मीत्यर्थः-गो. वस्तुतस्तु अनन्तरश्लोकानुसारात्—'रामवनगमनं न सहेयमेव' इत्यर्थः स्वरसः । ‡त्वत्प्रतिनिधितयेति शेषः ।

[1] शृणुयु-च. [2] शासामि-ङ. [3] एतं-घ. [4] नाभिजानामि-ङ.

धर्मात्मा तस्य [1] सत्येन भ्रातुर्वाक्येन विस्मितः ।
उवाच रामः संप्रेक्ष्य पौरजानपदं जनम् ॥ २७ ॥

तस्य—भरतस्य ॥ २७ ॥

विक्रीतमाहितं क्रीतं यत् पित्रा जीवता मम ।
न तल्लोपयितुं शक्यं मया वा भरतेन वा ॥ २८ ॥

विक्रीतमित्यादि । जीवता मम पित्रा यत् विक्रीतं—स्वीयस्य वस्तुनः किञ्चिन्मूल्यं गृहीत्वा दानं विक्रयः । क्रयस्तु अन्यदीयवस्तुनो मूल्यं दत्त्वा आदानम् । आधिरूपेण निहितं क्षेत्रादिकं—आहितम् । तत्सर्वं मया भरतेन वा लोपयितुं न शक्यम् ॥ २८ ॥

*उपाधिर्न मया कार्यः वनवासे जुगुप्सितः ।
युक्तमुक्तं च कैकेय्या पित्रा मे सुकृतं कृतम् ॥ २९ ॥

अस्तु, किं तत इत्यतः—उपाधिरित्यादि । पित्रा अनुष्ठेय-विहिते वनवासे क्रीतादितुल्ये मया जुगुप्सित उपाधिः—स्वाशक्या-नुष्ठानेन प्रतिनिध्यनुष्ठापनं उपाधिः, मुख्ये पक्षे संभवति गौणाश्रयणतो न मया संपाद्यः । कैकेय्या च युक्तमेवोक्तम्, वरद्वयरूपर्णापाकरणार्थ-त्वात् मत्पितुः । मया च तद्वचनमेव कार्यं, तस्याः—मातुः, तस्य—पितुश्चेत्यर्थः ॥ २९ ॥

जानामि भरतं [2] क्षान्तं गुरुसत्कारकारिणम् ।
सर्वमेवात्र कल्याणं † सत्यसन्धे महात्मनि ॥ ३० ॥

क्षान्तं—क्षमायुक्तम् । अत्र—भरते ॥ ३० ॥

---

* अल्पेन व्याजेन स्वीकृतभरात् प्रच्युतिः न युक्तेत्यर्थः । तदिदं मद्दौर्बल्यहेतुक-मेव किल स्यात् । अतः जुगुप्सितमिदम् इति भावः । † कल्याणं जानामीत्यनुकर्षः ।

[1] तथ्येन–ङ. [2] शान्तं–ङ.

*अनेन धर्मशीलेन वनात् प्रत्यागतः पुनः ।
भ्रात्रा सह भविष्यामि पृथिव्याः पतिरुत्तमः ॥ ३१ ॥

वृतो राजा हि कैकेय्या मया तद्वचनं कृतम् ।
अनृतान्मोचयानेन † पितरं तं महीपतिम् ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकादशोत्तरशततमः सर्गः

मोचयानेनेति । मोचयमानेनेति यावत् । राग(३२)मानः सर्गः ॥ ३२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकादशोत्तरशततमः सर्गः

द्वादशोत्तरशततमः सर्गः

[पादुकाग्रहणम्]

तमप्रतिमतेजोभ्यां ‡ भ्रातृभ्यां रोमहर्षणम् ।
विस्मिताः सङ्गमं प्रेक्ष्य [1] समवेता महर्षयः ॥ १ ॥

अथान्तर्हितदेवगणैः ग्राहितरामवाक्यकरणनियोगेनापि भरतेन पुनश्च प्रार्थितेन रामेण पादुकयोः प्रतिनिधित्वेन प्रदानम् । तमित्यादि । तं सङ्गमं प्रेक्ष्येत्यन्वयः । तत्र स्थले समवेता वसिष्ठाद्या महर्षयो विस्मिता बभूवुः ॥ १ ॥

---

*धर्मशीलेनानेन भ्रात्रा सहेति अन्वयः । † पितरं अनेन—राज्यपरिपालनेन अनृतान्मोचयेत्यर्थः–गो. ‡ भ्रातृभ्यां अन्योन्यसौहार्देन कृतं संगमं–गो.

[1] समुपेता–ङ.

*अन्तर्हिता [1]मुनिगणाः [2]सिद्धाश्च परमर्षयः ।
तौ भ्रातरौ [3]महात्मानौ काकुत्स्थौ प्रशशंसिरे ॥ २ ॥

अन्तर्हिताः—अदृश्यरूपाः, आकाशस्थाश्चेति शेषः ॥ २ ॥

[4]स धन्यो यस्य पुत्रौ द्वौ धर्मज्ञौ †धर्म[5]विक्रमौ ।
‡श्रुत्वा वयं हि संभाषां [6]उभाभ्यां स्पृहयामहे ॥ ३ ॥

वयं उभयोः संभाषां श्रुत्वा उभाभ्यां स्पृहयामहे—प्रीता भवाम इति यावत् ॥ ३ ॥

ततस्त्वृषिगणाः [7]सिद्धाः दशग्रीववधैषिणः ।
भरतं राजशार्दूलं इत्यूचुः §सङ्गता वचः ॥ ४ ॥

सङ्गता ऊचुरिति । एकवाक्यतया ऊचुरित्यर्थः ॥ ४ ॥

कुले जात महाप्राज्ञ [8]महावृत्त महायशः !
ग्राह्यं रामस्य वाक्यं ते‖ पितरं यद्यवेक्षसे ॥ ५ ॥

ते ग्राह्यमिति । त्वया ग्राह्यमित्यर्थः । पितरमिति । पितृसङ्गतिमित्यर्थः ॥ ५ ॥

सदाऽऽनृणमिमं रामं वयमिच्छामहे पितुः ।
अनृणत्वाच्च कैकेय्याः स्वर्गं दशरथो गतः ॥ ६ ॥

---

*सप्तमश्लोको द्रष्टव्यः । †धर्मविक्रमौ—धर्मशूरौ–गो. ‡वयं उभयोः संभाषां श्रुत्वा स्पृहयामहे– पुनःपुनः श्रोतुं वाञ्छामः–गो. वस्तुतस्तु 'स्पृहेरीप्सितः' इति चतुर्थी । उभावपि वाञ्छामहे, इत्यर्थः. §संगताः—रहसि मिलिता इति वा । ‖यद्यपि भवतो भावः शुद्धः; तथाऽपि पितृसद्गतिं यदि वाञ्छसि, तदा रामवचनं कुर्विति भावः ।

[1]ऋषि–ङ. [2]स्थिताश्च–च. [3]महाभागौ–ङ. च. [4]सदाऽऽयौ राजपुत्रौ–च. [5]वत्सलौ–ङ. [6]उभयोः–ङ. [7]क्षिप्रं–च. [8]महाव्रत–ङ.

रामवचोप्रशस्त्वे हेतुमाहुः—सदाऽऽनृणमित्यादि। इमं रामं पितुस्सदाऽऽनृणं—अनृणस्य भावः—आनृणम्, सत्—समीचीनानुष्ठितं—अप्रतिनिघितयाऽनुष्ठितं आनृणं—अनृणत्वं यस्य स तथा, तथैवेच्छामहे, तथाविधादेव कैकेय्या अनृणत्वात्। दशरथोऽद्य स्वर्गं गतः। आनृण्यस्य रामेणाकरणे, उपाधिकरणे च स्वर्गात् भ्रंश एवेति शेषः॥ ६॥

एतावदुक्त्वा वचनं गन्धर्वाः समहर्षयः।
राजर्षयश्चैव तथा सर्वे स्वां स्वां गतिं गताः॥ ७॥
ह्लादितस्तेन वाक्येन [1]शुभेन शुभदर्शनः।
रामः संहृष्टवदनः तानृषीनभ्यपूजयत्[*]॥ ८॥

तानभ्यपूजयत्–सम्यगनुगृहीतवन्तः अस्मदुपकाराय भगवन्तो देवा इत्युक्तवानित्यर्थः॥ ८॥

†[2]त्रस्तगात्रस्तु भरतः स वाचा सज्जमानया।
कृताञ्जलिरिदं वाक्यं राघवं पुनरब्रवीत्॥ ९॥

त्रस्तगात्रस्त्विति। दैवतानां रामवनवासस्य पितुरानृण्यार्थं इष्टत्वे, मया मोहात् प्रत्युपवेशनान्तो रामोपरोधः कृत इति भीत्या कम्पितगात्रः, अत एव—सज्जमानयेत्यादि॥ ९॥

‡राजधर्म[3]मथ प्रेक्ष्य [4]कालधर्मांश्च संततम्।
कर्तुमर्हसि, काकुत्स्थ! मम मातुश्च याचनाम्॥ १०॥

---

* स्वपक्षसंरक्षणादिति भावः। † स्वमनोरथस्य सर्वथाऽसिद्धत्वात् शिथिलगात्रत्वं (पाठान्तरे), सज्जमानवाक्त्वं च–गो. ‡ राजधर्म—राज्यपरिपालनधर्मं, कुल-(पाठान्तरे)धर्मानुसन्ततिं—ज्येष्ठाभिषेकरूपकुलधर्मस्यानुस्यूतिं–गो.

[1] शुशुभे च. [2] स्रस्त- ङ. [3] मनु–ङ. [4] कुलधर्मानुसंततिं–ङ.

राजधर्मे—ज्येष्ठस्य राज्यमित्येवंरूपम् । अथ—अथवा । कालधर्मान्— कालधर्मकृतरक्षणशक्तितदभावलक्षणांश्च प्रेक्ष्य — विचार्य मम मातुः कौसल्यायाश्च याचनां वक्ष्यमाणलक्षणां कर्तुमर्हसि ॥ १० ॥

रक्षितुं सुमहद्राज्यं अहमेकस्तु नोत्सहे ।
पौरजानपदांश्चापि रक्तान् रञ्जयितुं तथा ॥ ११ ॥

अथकालस्वभावकृतां स्वस्य रक्षणाऽशक्तिं दर्शयति—रक्षितु-मित्यादि । एकः—असहायः । तथा नोत्सह इत्यनुकर्षः ॥ ११ ॥

ज्ञातयश्चापि [1]योधाश्च मित्राणि सुहृदश्च नः ।
त्वामेव हि प्रतीक्षन्त पर्जन्यमिव कर्षकाः ॥ १२ ॥
*इदं राज्यं, महाप्राज्ञ! [2]स्थापय प्रतिपद्य हि ।
[3]शक्तिमानसि, काकुत्स्थ! लोकस्य परिपालने ॥ १३ ॥

हि—यस्मात् त्वामेव प्रतीक्षन्ते, अत इदं राज्यं प्रतिपद्य—स्वीकृत्य स्वीयमेव राज्यं पश्चान्मया रक्षणीयत्वेन स्थापय। स्वीकार-मात्रेण लोकस्य परिपालने शक्तिमानसि, रामस्य राज्यमित्येतावन्मात्रं लोकस्य परिपालनेऽपेक्षितम् । १२-१३ ॥

†इत्युक्त्वा न्यपतत् भ्रातुः पादयोः भरतस्तदा ।
भृशं संप्रार्थयामास [4]राममेव प्रियंवदः ॥ १४ ॥

इत्युक्त्वा—एवं प्रार्थनां कृत्वा ॥ १४ ॥

---

*अतः इदं राज्यं प्रतिपद्य—स्वीकृत्य कस्मिंश्चित्स्थापय। हि—यतः सः—त्वद्दत्तराज्यः लोकपालने शक्तिमान् भवति। 'शक्तिमानसि' इति पाठे अयं मदीय इति स्वीकारमात्रेण लोकस्य समस्तस्य पालने शक्तिमानसि-ति. †एवं स्वबुद्धिशक्त्यु-पन्यस्तोपायान्तरवैफल्यदर्शनेन गत्यन्तराभावात् भरतो राममेव प्रपद्यत इत्याह—इत्युक्त्वेति-गो.

[1] पौराश्च-ङ. [2] पालय-ङ. [3] शक्तिमान् स हि-च. [4] राघवेऽतिप्रियं वदन्-च.

*तमङ्के [1]भ्रातरं कृत्वा रामो वचनमब्रवीत् ।
श्यामं नलिनपत्राक्षं मत्तहंस[2]स्वरः स्वयम् ॥ १५ ॥

स्वयं अङ्के कृत्वेति योजना ॥ १५ ॥

आगता त्वामियं बुद्धिः स्वजा वैनयिकी च या ।
भृशमुत्सहसे, तात! रक्षितुं पृथिवी[3]मपि ॥ १६ ॥

इयं बुद्धिरिति । मद्वनवासाविरुद्धा स्वीयतया स्थापनविषयिणी येयं बुद्धिरागता, इयमेव ते स्वजा—स्वाभाविकी, वैनयिकी—गुरुसेवया सिद्धा विनयमूला च । अथ या अशक्तिरुक्ता भरतेन स्वस्य, सा नास्त्येवेत्याह—भृशमित्यादि ॥ १६ ॥

†अमात्यैश्च सुहृद्भिश्च बुद्धिमद्भिश्च मन्त्रिभिः ।
सर्वकार्याणि संमन्त्र्य महान्त्यपि च कारय ॥ १७ ॥

कारयेति । मदाज्ञयेति शेषः ॥ १७ ॥

लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान् वा हिमं त्यजेत् ।
अतीयात् सागरो वेलां न प्रतिज्ञामहं पितुः ॥ १८ ॥

अथ मातुश्च याचनयाऽपि इदानीमागमनमशक्यमित्याह—लक्ष्मीरित्यादि ॥ १८ ॥

---

* स्वप्रपदनस्यामोघत्वात् तदानीं पूर्वकृतदेवसंघशरणागतिफलप्रदानप्रवृत्त्यनुकूलपितृवचनपरिपालनावरुद्धावसरतया तन्निर्वर्तनानन्तरं फलं प्रदित्सुः तावद्विलम्बसहनाय सान्त्वपूर्वमङ्कमारोपयति–**गो**. † अमात्यैः—प्रधानसचिवैः । मन्त्रिभिः—उपमन्त्रिभिः–**गो**. वस्तुतस्तु—अमात्याः—कर्मसचिवाः । मन्त्रिणः—धीसचिवाः ।

[1] भरतं–ङ. [2] स्वरं–ङ. [3] मिमाम्–ङ.

कामाद्वा, तात! लोभाद्वा मात्रा *तुभ्यमिदं कृतम्।
न तन्मनसि कर्तव्यं वर्तितव्यं च मातृवत् ॥ १९ ॥

कामात्—त्वद्गतस्नेहात्। लोभात्—राज्यलाभात्। तुभ्यं मात्रा—तव मात्रेति यावत्। सर्वथा इह चतुर्थ्यर्थे 'बहुलं छन्दसि' इति बहुलग्रहणात् षष्ठ्यर्थेऽपि चतुर्थी, यदिदं कृतं—त्वदनिष्टमेव कृत्यं कृतं, तन्मनसि न कर्तव्यं; दैवाधीनत्वात्। अतः मातृवदेव वर्तितव्यं, 'तस्यां शुश्रूषा नित्या पतितायामपि' इति शास्त्रात् ॥ १९ ॥

एवं ब्रुवाणं भरतः कौसल्यासुतमब्रवीत्।
तेजसाऽऽदित्यसंकाशं †प्रतिपच्चन्द्रदर्शनम् ॥ २० ॥
‡अधिरोहार्य! पादाभ्यां पादुके हेमभूषिते।
एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥ २१ ॥

हे आर्य! हेमभूषिते पादुके अधिरोह। किं प्रयोजनमित्यपेक्षायामाह—एत इत्यादि। राजासनसन्निहिते इति शेषः ॥ २१ ॥

सोऽधिरुह्य नरव्याघ्रः पादुके [1]व्यवमुच्य च।
प्रायच्छत् सुमहातेजाः भरताय महात्मने ॥ २२ ॥

स रामः पादुके अधिरुह्य व्यवमुच्य—अवरुह्य भरताय प्रायच्छत्। एवं भरतभद्रासनस्थापनीयपादुकयोः स्वप्रतिनिधिभूतयोः

---

* तुभ्यं—त्वदर्थम्। † पुण्यदर्शनत्वे दृष्टान्तोऽयम्। ‡ अथ मध्यस्थेन उभयोर्हितपरेण वसिष्ठेन नियुक्तो भरतः प्रार्थयते—अधिरोहेत्यादिना। अत एव भरद्वाजं प्रति भरतो वसिष्ठोक्तिमनुवदिष्यति—'एते प्रयच्छ संहृष्टः पादुके हेमभूषिते' (113-14) इति–गो. अनन्तरसर्गस्य 11–12 श्लोकौ, टिप्पणी च द्रष्टव्या।

[1] व्यवरुह्य च-ङ.

आरोहतः राज्यानुमतेः भरतहस्ते स्थापनात् प्रतिनिधिपुरस्कारेण राज्याश्व-मेधवत् राज्यरक्षानियोगं च भरतस्य कृतवान् रामः। एवञ्च 'प्रतिपद्य स्थापय' इति चिरं भरतप्रार्थनं च साधितं भगवता ॥ २२ ॥

स पादुके संप्रणम्य रामं वचनमब्रवीत्।
चतुर्दश हि वर्षाणि जटाचीरधरो ह्यहम् ॥ २३ ॥
फलमूलाशनः, वीर! भवेयं, रघुनन्दन!
तवागमनमाकाङ्क्षन् वसन् वै नगराद्बहिः ॥ २४ ॥
तव पादुकयो[1]र्न्यस्य राज्यतन्त्रं, परंतप!
*चतुर्दशे हि संपूर्णे [2]वर्षेऽहनि, रघूत्तम! ॥ २५ ॥
न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् †।

राज्यतन्त्रं—राज्यव्यापारं तव पादुकयोर्न्यस्येति। स्वबुध्या विनिवेद्येति यावत् ॥ २५ ॥

तथेति च प्रतिज्ञाय तं परिष्वज्य सादरम् ॥ २६ ॥
शत्रुघ्नं च परिष्वज्य [3]वचनं चेदमब्रवीत्।
मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति ॥ २७ ॥
मया च सीतया चैव शप्तोऽसि, [4]रघुनन्दन!
इत्युक्त्वाऽश्रुपरीताक्षः भ्रातरं विससर्ज ह ॥ २८ ॥

शप्तोऽसीति। रोषाकरणायेति शेषः ॥ २८ ॥

---

* एतदनन्तरं प्रतिकरणं द्रष्टव्यम्। इत्यब्रवीदित्यन्वयः। † चतुर्दशे वर्षे संपूर्णे सति अहनि— उत्तरवर्षादिमदिने-गो. अहनि—समनन्तरदिन एवेति यावत्।

[1] र्न्यस्तराज्यतन्त्रः-ङ. [2] वर्षे हि रघुनन्दन-ङ. [3] भरतं-ङ.

[4] रघूत्तम-ङ.

स पादुके ते भरतः [1] स्वलङ्कृते
महोज्ज्वले संपरिगृह्य [2] धर्मवित् ।
प्रदक्षिणं चैव चकार राघवं
चकार चैवोत्तमनागमूर्धनि ॥ २९ ॥

उत्तमनागमूर्धनि—राजौपवाह्यगजमूर्धनि, तत्कालाभिषिक्तराजाधिरोहणधिया परिषदः प्रख्यापनार्थमिति शेषः ॥ २९ ॥

अथानुपूर्व्यात् [3] प्रतिपूज्य तं जनं
गुरूंश्च मन्त्रीन् प्रकृतीस्तथाऽनुजौ ।
व्यसर्जयद्राघववंशवर्धनः
[4] स्थितः स्वधर्मे हिमवानिवाचलः ॥ ३० ॥

तं मातरो बाष्पगृहीतकण्ठ्यः
दुःखेन नामन्त्रयितुं हि शेकुः ।
स चैव मातॄरभिवाद्य सर्वाः
*रुदन् कुटीं स्वां प्रविवेश रामः ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे द्वादशोत्तरशततमः सर्गः

पाल(३१)मानः सर्गः ॥ ३१ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे द्वादशोत्तरशततमः सर्गः

---

* रुदन्—रुदन्निव—ति.

[1] प्रतापवान्—स्वलंकृते संपरिपूज्य—ङ. [2] राघवः—ङ. [3] प्रतिनन्द्य—ङ.
[4] स्थिरः—ङ.

त्रयोदशोत्तरशततमः सर्गः

[भरतप्रत्यागमनम्]

ततः *शिरसि कृत्वा तु पादुके भरतस्तदा ।
आरुरोह रथं [1]हृष्टः शत्रुघ्नसहितस्तदा ॥ १ ॥

अथ पादुकादानेन कृतराज्यनियोगस्य भरतस्य अयोध्यां प्रति निवृत्तिः । तत इत्यादि ॥ १ ॥

वसिष्ठो वामदेवश्च जाबालिश्च दृढव्रतः ।
अग्रतः प्रययुः सर्वे मन्त्रिणो †मन्त्रपूजिताः ॥ २ ॥
मन्दाकिनीं नदीं रम्यां प्राङ्मुखास्ते ययुस्तदा ।
प्रदक्षिणं च कुर्वाणाः चित्रकूटं महागिरिम् ॥ ३ ॥

मन्दाकिनीं—चित्रकूटोत्तरपार्श्ववर्तिनीं, प्राप्येति शेषः । प्रदक्षिणं च कुर्वाणा इति । उत्तरपार्श्ववर्तिमन्दाकिनीं प्राप्य प्राङ्मुखतया गमनादेव सिद्धं प्रदक्षिणतया गमनम् ॥ ३ ॥

‡पश्यन् [2]धातुसहस्राणि रम्याणि विविधानि च ।
प्रययौ तस्य पार्श्वेन ससैन्यो भरतस्तदा ॥ ४ ॥

पार्श्वेनेति । उत्तरपार्श्वेनेति यावत् ॥ ४ ॥

---

* पादुके शिरसि कृत्वा—शत्रुघ्नमूर्ध्नि निक्षिप्ते पादुके सादरमादाय स्वमूर्ध्नि वाधायेत्यर्थः । पादुके शिरसि कृत्वा हृष्टः—'यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ । शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति' इति स्वप्रार्थितानुगुणकिरीटधारणं कृत्वा हृष्टः–गो. यद्वा शिरसीत्यस्य गजशिरसीत्येवार्थः–ति. अत्र 115-13 श्लोको द्रष्टव्यः । † मन्त्रपूजिताः—अमोघकार्यविचारनैपुण्यात् पूजिताः–गो. ‡ अनेन आगमनकाल एव स्वराभावः सूच्यते ।

[1] प्रीतः–ङ.   [2] सानु–ङ.

*अदूराच्चित्रकूटस्य ददर्श भरतस्तदा ।
आश्रमं यत्र स मुनिः भरद्वाजः कृतालयः ॥ ५ ॥
स तमाश्रम[1]मागम्य भरद्वाजस्य [2]बुद्धिमान् ।
अवतीर्य रथात् पादौ ववन्द [3]भरतस्तदा ॥ ६ ॥
ततो हृष्टो भरद्वाजः भरतं वाक्यमब्रवीत् ।
†अपि कृत्यं कृतं, तात! रामेण च [4]समागतम् ॥ ७ ॥

कृत्यं—कर्तव्यं कर्म कृतमपि? अपिः प्रश्ने। तदपि कृत्यमाह—रामणेत्यादि ॥ ७ ॥

एवमुक्तः स तु [5]ततः भरद्वाजेन धीमता ।
प्रत्युवाच भरद्वाजं भरतो [6]भ्रातृवत्सलः ॥ ८ ॥
‡स याच्यमानो गुरुणा मया च दृढविक्रमः ।
राघवः परमप्रीतः वसिष्ठं वाक्यमब्रवीत् ॥ ९ ॥

परमप्रीत इति। पितुः सत्यपरिपालनविषय इति शेषः ॥ ९ ॥

पितुः प्रतिज्ञां तामेव पालयिष्यामि तत्त्वतः ।
चतुर्दश हि वर्षाणि या प्रतिज्ञा पितुर्मम ॥ १० ॥

---

* अदूरादिति। चित्रकूटसौन्दर्यदर्शनाकृष्टचित्ततया अदूरादिव भासमानम्—गो. यत्र—यमुनादक्षिणकूले, अत एव चित्रकूटस्यादूरादिति। अनेन यमुनादक्षिणतटेऽपि क्वचित् भरद्वाजाश्रम इति ज्ञायते। अत एवाग्रे भरद्वाजामन्त्रणोत्तरं 'ततस्ते यमुनां तीर्त्वा' इति वक्ष्यति—ति. उत्तरत्र 21 श्लोकटिप्पणी द्रष्टव्या। † किं रामेण समागतम्? भवदिष्टं च साधितम्? इति प्रश्नद्वयं वा। ‡ रामनिष्ठायाः न्याय्यत्वात् आज्ञातुमशक्तया 'गुरुणा याच्यमानः' इति।

[1] मासाद्य—ङ. [2] वीर्यवान्—च. [3] कुलनन्दनः—च. [4] समागतः—ङ. [5] तदा—ङ. [6] धर्मवत्सलः—च.

एवमुक्तो महाप्राज्ञः वसिष्ठः प्रत्युवाच ह ।
वाक्यज्ञो वाक्यकुशलं राघवं वचनं महत् ॥ ११ ॥

एवमुक्त इति । रामेणेति शेषः ॥ ११ ॥

*एते प्रयच्छ संहृष्टः पादुके हेमभूषिते ।
अयोध्यायां, महाप्राज्ञ! योगक्षेम[1]करो भव ॥ १२ ॥

प्रयच्छेति । प्रतिनिधित्वेनेति शेषः । भवेति । एतत्प्रतिनिधिद्वारेति शेषः ॥ १२ ॥

एवमुक्तो वसिष्ठेन राघवः प्राङ्मुखः स्थितः ।
पादुके [2]हेमविकृते †मम राज्याय ते ददौ ॥ १३ ॥

हेम्ना विचित्रतया कृते तथा । ते इति स्त्रीलिङ्गद्वितीयाद्विवचनान्तम् । मम राज्यायेति । राज्यरक्षाशक्त्यनुग्रहार्थमित्यर्थः ॥

निवृत्तोऽहमनुज्ञातः रामेण सुमहात्मना ।
अयोध्यामेव गच्छामि गृहीत्वा पादुके शुभे ॥ १४ ॥

---

*'हेमभूषिते' इत्यनेन रामाय प्रीत्या समर्पयितुं अभिनवतया निर्माय नगराद् भरतेनानीते इति गम्यते-**गो.** वने सज्जीकृतायाः पादुकाया हेमभूषितत्वं न स्वरसमिति भावः । केचित्तु 'यदि त्वार्यं न शक्ष्यामि विनिवर्तयितुं वनात्' (82-18) इत्याद्युक्त्या रामपुनरावृत्तिं सन्दिहानो भरतः उद्देशपूर्वकमेव हेमभूषिते पादुके सज्जीकृत्याऽऽददौ इत्यप्याहु । परन्तु रामेण वनवासप्रस्थानकाले सहैवानीतत्वमेव स्वरसम् । 'एते प्रयच्छ' इति च तदेव स्वरसम् । 'अधिरोहार्य पादाभ्यां' इति च सभासमक्षं तादात्विकभावपूर्वकपादसंयोगप्रदर्शनाय । मुनिवृत्त्या वनं गच्छतः हेमभूषितपादुकाऽऽनयनं कथमिति चेत्, अङ्गुलीयकवत् (किष्कि. 44-12) संभवः द्रष्टव्यः । नगरादानीतत्वराजार्हत्वादिकमेव वा 'हेमभूषिते' इति सूचयति । †मम—मयि न्यासत्वेन मह्यम् ।

[1] करे तव—ङ. [2] अभिवृतौते—ङ.

एतच्छ्रुत्वा शुभं वाक्यं भरतस्य महात्मनः ।
भरद्वाजः [1]शुभतरं मुनिर्वाक्यमुदाहरत् ॥ १५ ॥
नैतच्चित्रं, [2]नरव्याघ्र! शीलवृत्तविदां वरे ।
*यदार्यं त्वयि तिष्ठेत्तु [3]निम्ने वृष्टमिवोदकम् ॥ १६ ॥

नैतदित्येतच्छाठरार्थः—यदार्यमित्यादि । आर्यं-शोभनचरित्रम् । आर्यं त्वयि तिष्ठेदिति यत् तदेतत्तु वृष्टमुदकं निम्न इव न चित्रमित्यन्वयः ॥ १६ ॥

†[4]अनृणः स महाबाहुः पिता दशरथस्तव ।
यस्य त्वमीदृशः पुत्रः [5]धर्मात्मा धर्मवत्सलः ॥ १७ ॥
तमृषिं तु [6]महात्मानं उक्तवाक्यं कृताञ्जलिः ।
‡आमन्त्रयितुमारेभे चरणावुपगृह्य च ॥ १८ ॥

उक्तवाक्यमिति । उक्तरीत्येति शेषः । आमन्त्रयितुमारेभ इति । आमन्त्रणं कृतवानित्यर्थः ॥ १८ ॥

ततः प्रदक्षिणं कृत्वा भरद्वाजं §पुनः पुनः ।
भरतस्तु ययौ श्रीमान् अयोध्यां सह मन्त्रिभिः ॥ १९ ॥

---

* आर्यं—ज्येष्ठानुवर्तनरूपं श्रेयः-गो. † 'प्रजामनु प्रजायसे । तदु ते मर्त्यामृतम्' इति श्रुत्युक्तरीत्या सत्पुत्रलाभात् मृतोऽपि दशरथः 'अमृतः' (पाठान्तरं) इत्याह-गो. ‡ आमन्त्रयितुमारेभे—विनयेन आमन्त्रणोद्युक्त इव स्थित इत्यर्थः-गो. § अत्र पुनःपुनरित्यनेन एकं प्रदक्षिणं न कार्यमित्युक्तम् । प्रदक्षिणविशेषणेन प्रणामस्तु सकृदेवेत्युक्तं भवतीत्याचार्याः । केचित्तु एकहस्तप्रणामैकप्रदक्षिणयोरिव एकप्रणामस्यापि निषिद्धत्वात् पुनःपुनरितिविशेषणस्य अत्र आर्थिके वा पूर्वश्लोकोक्ताभिवादनबललब्धे वा प्रणामेऽप्यन्वयेन न कोऽपि विरोध इत्याहुः-गो.

[1] तु भरतं-ङ. [2] नरव्याघ्रे-च. [3] निम्ने सृष्ट-ङ. निम्नोत्सृष्ट-च.
[4] अमृत-ङ. [5] धर्मज्ञो-ङ. [6] महाप्राज्ञं-च.

यानैश्च शकटैश्चैव हयैर्नागैश्च सा चमूः।
पुनर्निवृत्ता विस्तीर्णा भरतस्यानुयायिनी ॥ २० ॥
*ततस्ते यमुनां दिव्यां नदीं तीर्त्वोर्मिमालिनीम् ।
ददृशुस्तां पुनः सर्वे गङ्गां [1]शिवजलां नदीम् ॥ २१ ॥

यमुनां तीर्त्वा गङ्गां ददृशुरिति। यमुनां तीर्त्वा, तस्मिन्नेव दिवसे भरद्वाजं च दृष्ट्वा गङ्गां च ददृशुरित्यर्थः ॥ २१ ॥

[2]तां रम्यजलसंपूर्णां सन्तीर्य सहबान्धवः ।
शृङ्गिबेरपुरं रम्यं प्रविवेश ससैनिकः ॥ २२ ॥
शृङ्गिबेरपुरात् भूयः अयोध्यां संददर्श ह ।

भूय अयोध्यामिति छान्दसम् ॥ २२ ॥

अयोध्यां तु तदा दृष्ट्वा पित्रा भ्रात्रा विवर्जिताम् ॥ २३ ॥
भरतो दुःखसन्तप्तः सारथिं चेदमब्रवीत् ।
सारथे! पश्य विध्वस्ता अयोध्या न प्रकाशते ॥ २४ ॥
†निराकारा निरानन्दा दीना प्रतिहतस्वना ।

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे त्रयोदशोत्तरशततमः सर्गः

विध्वस्ता—विध्वस्तशोभा। निराकारा—निरलङ्कारा। अवर-(२४ १/२)मानः सर्गः ॥ २४ १/२ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे त्रयोदशोत्तरशततमः सर्गः

---

*भरतमनुसृत्य सेनानुयानप्रकारमाह—तत इति। यमुनां तीर्त्वा गच्छन्तस्ते सर्वे गङ्गां ददृशुरिति सम्बन्धः–गो. यमुनां तीर्त्वा तस्मिन्नेव दिने भरद्वाजं दृष्ट्वा गङ्गां ददृशुरित्यर्थ इति कश्चित्। तत्तु पूर्वोक्तरीत्या असामञ्जस्यात् हेयम्–ति.
†निराकारा—निर्गतशोभनाकारा–गो.

[1] शुभजला–ङ. [2] रम्यां तां जल–ङ.

चतुर्दशोत्तरशततमः सर्गः

[अयोध्याऽऽगमनम्]

*स्निग्धगम्भीरघोषेण स्यन्दनेनोपयान् प्रभुः ।
अयोध्यां भरतः क्षिप्रं प्रविवेश महायशाः ॥ १ ॥

अथ मातृगणस्थापनार्थमयोध्याप्रवेशो भरतस्य । स्निग्धेत्यादि । उपयान्—उपगच्छन् ॥ १ ॥

[1]बिलालोलूकचरितां आलीननरवारणाम् ।
तिमिरा[2]लक्ष्यतां †कालीं अप्रकाशां निशामिव ॥ २ ॥

बिलालः—मार्जारः, डलभेदः । चरिता—सञ्चरिता । आलीननरवारणां—सन्तोषाभावात् स्वगृहनिलीनानां नराणां वारणानि—कपाटाद्याच्छादनानि यस्यां सा तथा । तिमिरेण अलक्ष्यतां प्राप्तां, अत एव कालीं, अत एव अप्रकाशां—अनुज्ज्वलां, अत एव विडालयुक्तपञ्चविशेषणवतीं निशामिव स्थितां अयोध्यां प्रविवेशेति पूर्वेणान्वयः अग्रिमाणामपि ॥ २ ॥

राहुशत्रोः प्रियां पत्नीं श्रिया प्रज्वलितप्रभाम् ।
‡ग्रहेणा[3]भ्युदितेनैकां रोहिणीमिव पीडिताम् ॥ ३ ॥

राहुः शत्रुः यस्य स तथा—चन्द्र इति यावत् । श्रिया—दिव्यैश्वर्येण युक्ताम् । प्रज्वलिता प्रभा यस्याः सा तथा । अभ्युदितेन ग्रहेण—राहुणा पीडितां—पीडितभर्तृकाम्, अत एव एकां—असहायां रोहिणीमिव स्थिताम् ॥ ३ ॥

---

* पूर्वसर्गान्तिमश्लोकोक्तं विस्तरेण अत्र दर्शयति—गो. † कालीं—कृष्णपक्षसम्बन्धिनीम्—गो. ‡ ग्रहेण पीडितां चन्द्रपत्नीं रोहिणीमिवेति यथाश्रुतो ऽर्थः ।

[1] बिडालो—ङ. [2] भ्याहतां—ङ. [3] भ्युत्थितेनैकां—ङ.

अल्पोष्णक्षुब्धसलिलां [1]घर्मतप्तविहङ्गमाम् ।
लीनमीनझषग्राहां कृशां गिरिनदीमिव ॥ ४ ॥

आतपवशात् अल्पोष्णं क्षुब्धं—कलुषं च सलिलं यस्याः सा तथा । मन्थनदण्डातिरिक्तेऽपि यस्मिन् कस्मिंश्चित् द्रवद्रव्यक्षोभ-साधनमात्रे विवक्षितेऽपि क्षुब्ध इतीण्णिषेधनिपातनं भवत्येव । झषाः—मत्स्यविशेषाः ॥ ४ ॥

विधूमामिव हेमाभां [2]शिखामग्नेः [3]समुत्थिताम् ।
हविरभ्युक्षितां पश्चात् शिखां विप्रलयं गताम् ॥ ५ ॥

विधूमां, अत एव हेमाभां अग्नेः समुत्थितां शिखामिव पूर्वं रामस्थितिसमये जाज्वल्यमानतया स्थितां, पश्चात् रामविवासकाले हविरभ्युक्षितां—पयोहोमाभ्युक्षितां–सिक्तां, अत एव विप्रलयं गतां शिखामिव स्थिताम् । एवं पाङ्क्तः पाठः । अन्यस्तु 'अध्वराग्नेः समुत्थिताम्'* इति पठित्वा, महाध्वरान्तर्गततप्ताज्यस्थाग्नेः शिखामिव स्थितामिति व्याकरोति । तप्ताज्यस्थाग्नेस्तु शिखेति मिथ्या ॥ ५ ॥

विध्वस्तकवचां रुग्णगजवाजिरथध्वजाम् ।
हतप्रवीरामापन्नां चमूमिव महाहवे ॥ ६ ॥
[4]सफेनसस्वनां [5]भूत्वा सागरस्य समुत्थिताम् ।
† प्रशान्त[6]मरुतोद्धूतां जलोर्मिमिव निस्वनाम् ॥ ७ ॥

---

* गोविन्दराजीयेऽप्येवमेव पाठः । † प्रशान्ता च सा मारुतोद्धूता चेति विशेषणोभयपदकर्मधारयो वा । प्रशान्तामित्यत्रोपपादकं विशेषणान्तरं मारुतोद्धूतामिति ।

[1] घर्माभितप्त–ङ [2] अध्वराग्नेः–ङ. [3] समुच्छ्रिताम्–ङ. [4] [illegible]–[illegible]. झ. [5] काले–ङ. [6] मारुतोद्धूतां–ङ.

सफेनेत्यादि। प्रबलमारुतेन समुत्थितां, अत एव सफेनां सस्वनां च भूत्वा स्थितां, पश्चात् प्रशान्तमरुता उद्धूतां—ईषदल्पं कम्पितां, अत एव निस्वनां सागरस्य जलोर्मिमिव स्थिताम् ॥ ७ ॥

त्यक्तां यज्ञायुधैः सर्वैः अभिरूपैश्च याजकैः ।
सुत्याकालेऽभिनिर्वृत्ते वेदिं गतरवामिव ॥ ८ ॥

'स्फ्यश्च कपालानि च' इत्यादिना उक्तानि दशयज्ञायुधानि। अभिरूपाः—प्रशस्ताः। सुत्याकालः—यागकालः, 'संज्ञायां....' इत्यादिना सुञः क्यपि तुक्, क्यबन्तस्य स्त्रियां प्रयोगः समज्यादेः। अभिनिर्वृत्ते—समाप्ते सति ॥ ८ ॥

गोष्ठमध्ये [1]स्थितां मत्तां *अचरन्तीं नवं तृणम् ।
गोवृषेण परित्यक्तां गवां [2]पङ्क्तिमिवोत्सुकाम् ॥ ९ ॥

गोष्ठेत्यादि। गोष्ठमध्ये गोवृषेण—पुङ्गवेन, गोशब्दः धेनुबलीवर्दसामान्यवाची, तद्व्यावृत्त्यर्थो वृषशब्दः, तेन सह स्थितिकाले मत्तां, पश्चात् तेन परित्यक्तां, अत एव नवं तृणमपि अचरन्तीं, गवां—तरुणवत्सानां पङ्क्तिमिव स्थिताम् ॥ ९ ॥

प्रभाकराद्यैः सुस्निग्धैः प्रज्वलद्भिरिवोत्तमैः ।
[3]वियुक्तां मणिभिः जात्यैः नवां मुक्तावलीमिव ॥ १० ॥

प्रभाकराद्यैः—प्रभाकरार्कादिपर्यायः स्फटिकः, स्फटिकादिभिः उच्यमानविशेषणकैः मणिभिः अन्तरालनवरत्नैः वियुक्ताम् ॥ १० ॥

---

* नवं तृणमपि अचरन्तीं—अभक्षयन्तीम्।

[1] स्थितामार्तां-ङ. झ. [2] पत्नी-ङ. [3] विमुक्तां-ङ.

*सहसा [1]चलितां स्थानात् महीं पुण्य[2]क्षयाद्गताम् ।
संहृतद्युति[3]विस्तारां तारामिव दिवश्च्युताम् ॥ ११ ॥

संहृतः द्युतिविस्तारः यस्यां सा तथा ॥ ११ ॥

†पुष्पनद्धां वसन्तान्ते मत्तभ्रमर[4]नादिताम् ।
[5]द्रुतं दावाग्निविप्लुष्टां [6]क्लान्तां वनलतामिव ॥ १२ ॥

द्रुतं–शीघ्रं ॥ १२ ॥

‡संमूढनिगमां [7]सर्वां संक्षिप्तविपणापणाम् ।
प्रच्छन्नशशिनक्षत्रां द्यामिवाम्बुधरैर्युताम् ॥ १३ ॥

संमूढाः–शोकाकुलितचित्ताः निगमाः–वणिजः यस्यां सा तथा । अत एव सङ्क्षिप्ताः विपणाः—आपणाः—पण्यवीथयः यस्यां सा तथा । सर्वां द्यामित्यन्वयः ॥ १३ ॥

क्षीणपानोत्तमै[8]र्भग्नैः शरावैरभिसंवृताम् ।
हतशौण्डा[9]मिव ध्वस्तां पानभूमिमसंस्कृताम् ॥ १४ ॥

क्षीणानि पानोत्तमानि—सुराश्रेष्ठानि येषां ते तथा, 'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युडन्तः पानशब्दः । हताः शौण्डाः—मद्यपाः यस्यां सा तथा ॥ १४ ॥

---

*स्थानाच्चलितां, दिवः च्युतां, महीं गतां, संहृतद्युतिविस्तारां तारामिव । †वसन्तान्ते—ग्रीष्मे द्रुतदावाग्निविप्लुष्टां—वेगवद्दावाग्निना ईषद्दग्धां–गो. ‡संमूढनिगमां—जनसञ्चाररहितमार्गां, 'निगमो निश्चये वेदे पुरे पथि वणिक्पथे' इति वैजयन्ती–गो.

[1] चरितां–च. [2] क्षयोद्गताम्–च. [3] विस्तीर्णां–ङ. [4] शालिनीम्–च. [5] द्रुत–च. [6] क्लान्तामिव च दुर्बलाम्–ङ. [7] स्तब्धां–ङ. [8] र्भिन्नैः–ङ. [9] मिवाकाशे–ङ.

* वृक्णभूमितलां निम्नां वृक्णपात्रैः समावृताम् ।
उपयुक्तोदकां [1] भग्नां प्रपां निपतितामिव ॥ १५ ॥

वृक्णेति । 'निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः' इति नत्वस्य सिद्धत्वात 'झलि' इति षत्वं न भवति, कुत्वं प्रसिद्धमेवेति कुत्वं भवति, ततः संप्रसारणादिना रूपम्—विध्वस्तभूतलामित्यर्थः । उपयुक्तोदकां-उच्छिष्टोदकवर्ताम् । भग्नां-भग्नस्तम्भाम् । अत एव-निपतिताम् ॥ १५ ॥

विपुलां विततां चैव †[2]मुक्तपाशां तरस्विनाम् ।
भूमौ बाणैर्विनिकृत्तां पतितां ज्यामिवायुधात् ॥ १६ ॥

विपुलां-विशालाम् । विततां-धनुष्याततताम् । मुक्तपाशां-धनुष्कोट्याः ज्याबन्धनार्थः पाशोऽस्ति, तद्रहिताम् । तरस्विनां बाणैः विनिकृत्तां-लूनामिति यावत् । अत एव आयुधात्-धनुषः पतिताम् ॥ १६ ॥

सहसा युद्धशौण्डेन हयारोहेण वाहिताम् ।
‡[3] निहतां प्रतिसैन्येन वडवामिव पातिताम् [4] ॥ १७ ॥

---

* वृक्णभूमितलां—विदीर्णभूमितलां-गो. † विततां—आरोपितामिति यावत् । युक्तपाशां (पाठान्तरं)—युक्तर्ज्जुं-गो. ‡ निक्षिप्तभाण्डां-अवरोपिताश्वभूषां उत्सृष्टां (पाठान्तरं) — वाहनानर्हां किशोरीं-बालवडवाम्-गो.

[1] भिन्नां-ङ. [2] युक्तपाशां-ङ. [3] निक्षिप्तभाण्डामुत्सृष्टां किशोरीमिव दुर्बलाम्-ङ. [4] एतदनन्तरं—शुष्कतोयां महामत्स्यैः कूर्मैश्च बहुभिर्वृताम् । प्रभिन्नतटविस्तीर्णां वापीमिव हृतोत्पलाम् ॥ पुरुषस्य प्रहृष्टस्य प्रतिषिद्धानुलेपनाम् । सन्तप्तामिव शोकेन गात्रयष्टिमभूषणाम् ॥ प्रावृषि प्रविगाढायां प्रविष्टस्याभ्रमण्डलम् । प्रच्छन्नां नीलजीमूतैः भास्करस्य प्रभामिव ॥ इत्यधिकम्-ङ.

सहसा—बलात्कारेण वाहितां—प्रधाव्यमानामित्यन्वयः। युद्धे शौण्डः—समर्थस्तथा। प्रतिसैन्येन निहतां, अत एव पातिताम्। अत्र द्वित्राः श्लोकाः परेण प्रक्षिप्य व्याकृताः ॥ १७ ॥

भरतस्तु [1]ततस्तत्र श्रीमान् दशरथात्मजः।
वाहयन्तं रथश्रेष्ठं सारथिं वाक्यमब्रवीत् ॥ १८ ॥

ततस्तत्रेति। अयोध्यायामित्यर्थः ॥ १८ ॥

किं नु खल्वद्य गंभीरः मूर्छितो न निशाम्यते।
यथापुरमयोध्यायां गीतवादित्रनिस्वनः ॥ १९ ॥

न निशाम्यते खलु, अत्र किं कुर्म इति योजना। मूर्छितः—व्याप्तः ॥ १९ ॥

वारुणीमदगन्धश्च माल्यगन्धश्च मूर्छितः।
[2]चन्दनागरुगन्धश्च न प्रवाति समन्ततः ॥ २० ॥

मदकरः गन्धः—मदगन्धः। चन्दनागरुगन्धाः—चन्दनादिगन्धद्रव्याणीत्यर्थः ॥ २० ॥

*यानप्रवरघोषश्च सुस्निग्धहयनिस्वनः।
प्रमत्तगजनादश्च महांश्च रथनिस्वनः ॥ २१ ॥
नेदानीं श्रूयते पुर्यां अस्यां रामे विवासिते।
चन्दनागरुगन्धांश्च महार्हांश्च [3]नवस्रजः ॥ २२ ॥
गते रामे हि तरुणाः सन्तप्ता नोपभुञ्जते।
बहिर्यात्रां न गच्छन्ति चित्रमाल्यधरा जनाः ॥ २३ ॥

---

* सार्धश्लोकमेकं वाक्यम्।

[1] रथस्थः सन्—ङ.　[2] धूपिता—ङ.　[3] वन—च.

नोत्सवाः संप्रवर्तन्ते रामशोकार्दिते पुरे।
*[1]सह नूनं [2]मम भ्रात्रा पुरस्यास्य [3]गतैव भा ॥ २४ ॥

भा—प्रभा ॥ २४ ॥

न हि राजत्ययोध्येयं †सासारेवार्जुनी क्षपा।

सासारा—'धारा संपात आसारः', प्रवर्षधारेति यावत्। अर्जुनः—धवलः—शरत्काल इति यावत्। आर्जुनी—शारदीति यावत्। द्रमिडदेशे तस्याः सासारता प्रसिद्धा ॥ २४ ॥

कदा नु खलु मे भ्राता ‡महोत्सव इवागतः ॥ २५ ॥
जनयिष्यत्ययोध्यायां हर्षं ग्रीष्म इवाम्बुदः।

ग्रीष्म इति। ग्रीष्मान्त इत्यर्थः ॥ २५ ॥

तरुणैश्चारुवेषैश्च नरैरुन्नतगामिभिः ॥ २६ ॥
संपतद्भिरयोध्यायां नाभिभान्ति महापथाः।

उन्नतगामिभिः—सन्तोषात् उद्धतगामिभिरित्यर्थः ॥ २६ ॥

§[4]इति ब्रुवन् सारथिना दुःखितो भरतस्तदा ॥ २७ ॥
अयोध्यां संप्रविश्यैव विवेश वसतिं पितुः।
तेन हीनां नरेन्द्रेण सिंहहीनां गुहामिव ॥ २८ ॥

---

* मम भ्रात्रा सह—इत्यन्वयः। † सासारा—वेगवद्वृष्टिसहिता। अर्जुनी—शुक्लपक्षसम्बन्धिनी-गो. ‡ महोत्सव इव, ग्रीष्मे अम्बुद इव च आगतः मे भ्राता—इत्यन्वयः। § सारथिना सह इति—एवं ब्रुवन्—इत्यन्वयः।

[1] सा हि—च. [2] सह भ्रात्रा—ङ. [3] द्युतिर्गता—ङ. [4] एवं बहुविधं जल्पन् विवेश वसतिं पितुः—इति, अर्धद्वयस्थाने एकमेवार्धं—ङ.

तदा तदन्तःपुरमुज्झितप्रभं
*सुरैरिवो[1]त्कृष्टमभास्करं दिनम् ।
निरीक्ष्य सर्वत्र †[2]विभक्तमात्मवान्
मुमोच बाष्पं भरतः सुदुःखितः ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे चतुर्दशोत्तरशततमः सर्गः

सुरैः उत्कृष्टं अभास्करं दिनमिति । रामादिभिस्त्यक्तायाः विनष्टराजकाया अयोध्याया अभूतोपमेयम्, न हि किल मण्डलस्य पातः समस्ति । घरा(२९)मानः सर्गः ॥ २९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे चतुर्दशोत्तरशततमः सर्गः

पञ्चदशोत्तरशततमः सर्गः

[पादुकापट्टाभिषेकः]

ततो निक्षिप्य मातृस्ताः अयोध्यायां दृढव्रतः ।
भरतः शोकसन्तप्तः गुरूनिदमथाब्रवीत् ॥ १ ॥

अथ भरतस्य तत्रैव मातृस्थापनानन्तरं नन्दिग्रामे राज्यपरिपालनम् । ततो निक्षिप्येत्यादि ॥ १ ॥

---

* सुरैः उत्सृष्टं अभास्करं दिनमिव उज्झितप्रभं अन्तःपुरं निरीक्ष्येति सम्बन्धः । विविक्तं—विजनम् । पुरा किल देवासुरयुद्धे असुरैः देवाः पराजिताः, स्वर्भानुना च भानुः पातितः । तदानीं कियान् कालो दिवारात्रिविभागरहितोऽभूत् । ततः परं ब्रह्मनियोगात् अत्रिः स्वतेजसा सप्तरात्रं सूर्याधिपत्यं चकारेति पौराणिकी कथा । अत्रिः स्वतेजसेति पाठान्तरम्—गो. † विभक्तं—विगतसंस्कारं—ति.

[1] त्सृष्ट—ङ. [2] विविक्त—ङ.

नन्दिग्रामं गमिष्यामि सर्वानामन्त्रयेऽत्र वः ।
तत्र दुःखमिदं सर्वं सहिष्ये *राघवं विना ॥ २ ॥

अत्र — अयोध्यायाम् । सर्वमिदं दुःखमिति । पितृवियोग-रामवियोगादिजदुःखमित्यर्थः ॥ २ ॥

गतश्चाहो दिवं राजा वनस्थः स गुरुर्मम ।
रामं प्रतीक्षे राज्याय स हि राजा महायशाः ॥ ३ ॥

तदेव प्रकाश्यते — गतश्चेत्यादि ॥ ३ ॥

एतच्छ्रुत्वा शुभं वाक्यं भरतस्य महात्मनः ।
अब्रुवन्मन्त्रिणः सर्वे वसिष्ठश्च पुरोहितः ॥ ४ ॥
†[1] सुभृशं श्लाघनीयं च यदुक्तं, भरत! त्वया ।
वचनं भ्रातृवात्सल्यात् अनुरूपं तवैव तत् ॥ ५ ॥
नित्यं ते बन्धुलुब्धस्य तिष्ठतो भ्रातृसौहृदे ।
मार्गमार्यं प्रपन्नस्य नानुमन्येत कः पुमान् ॥ ६ ॥

बन्धुलुब्धस्येति । बन्धुजनपरिपालनाधिकस्पृहावत इत्यर्थः । नानुमन्येतेति । त्वद्वचनमिति शेषः ॥ ६ ॥

मन्त्रिणां वचनं श्रुत्वा ‡यथाऽभिलषितं प्रियम् ।
अब्रवीत् सारथिं वाक्यं रथो मे युज्यतामिति ॥ ७ ॥

यथाऽभिलषितं — स्वाभिलषितमनतिक्रम्य प्रवृत्तम् ॥ ७ ॥

---

*राघवं विना — रामवियोगेन यद्दुःखं तत् सहिष्य इत्यर्थः । † सदृशमिति पाठे कुलस्य सदृशमित्यर्थः.–गो. ‡ यथाऽभिलषितं, अत एव प्रियम् अत एव प्रहृष्टवदनः (अनन्तरश्लोके) ।

[1] सदृशं–ङ.

प्रहृष्ट[1]वदनः सर्वाः मातृः समभिभाष्य च ।
आरुरोह रथं [2]श्रीमान् शत्रुघ्नेन समन्वितः ॥ ८ ॥

आरुह्य तु रथं [3]क्षिप्रं शत्रुघ्नभरतावुभौ ।
ययतुः परमप्रीतौ वृतौ मन्त्रिपुरोहितैः ॥ ९ ॥

अग्रतो गुरवः सर्वे वसिष्ठप्रमुखाः द्विजाः ।
प्रययुः प्राङ्मुखाः सर्वे *[4]नन्दिग्रामो यतो भवेत् ॥ १० ॥

नन्दिग्रामो यतो भवेदिति । येन मार्गेण प्राप्तो भवेत् तेन प्रययुरित्यर्थः ॥ १० ॥

[5]बलं च तदनाहूतं गजाश्वरथसङ्कुलम् ।
प्रययौ भरते याते सर्वे च पुरवासिनः ॥ ११ ॥

तदनाहूतमिति । तेन भरतेनाकृताह्वानमपि स्नेहवशादिति शेषः ॥ ११ ॥

रथस्थः स तु धर्मात्मा भरतो भ्रातृवत्सलः ।
नन्दिग्रामं ययौ तूर्णं शिरस्यादाय पादुके ॥ १२ ॥

भरतस्तु ततः क्षिप्रं नन्दिग्रामं प्रविश्य सः ।
अवतीर्य रथात्तूर्णं गुरूनिदमभाषत ॥ १३ ॥

एतद्राज्यं मम भ्रात्रा दत्तं सन्न्यास[6]वत् स्वयम् ।
†योगक्षेमवहे [7]चेमे पादुके हेमभूषिते ॥ १४ ॥

---

* प्राङ्मुखगमने उद्देशमाह—नन्दिग्रामो यतो भवेदिति । † निक्षेपवत् दत्तस्य राज्यस्य रक्षणादिस्वातन्त्र्यमपि नास्तीति दर्शयति—योगक्षेमवहे चेति–गो.

[1] मनसः–ङ. [2] धीमान्–ङ. [3] शीघ्रं, दीप्तं–ङ. [4] नन्दिग्रामं समन्ततः–ङ. [5] तद्बलं च यथाभूतं–ङ. [6] मुत्तमम्–च. [7] नस्य–ङ.

एतदिति । एतदयोध्याराज्यं मम भ्रात्रा स्वयं—साक्षात् सन्न्यासवत्—समीचीननिक्षेपवत् मयि दत्तं—स्थापितम् । कालान्तरे ग्रहणाय स्वविस्रम्भास्पदपुरुषे रक्षणार्थं स्थापितस्तु निक्षेपः । एवं निक्षेपभूतस्य रामराज्यस्य रक्षणमप्यचिन्त्यवैभवभगवत्पादुकाधीनमित्याह—योगेत्यादि । पादुके एव योगक्षेमवहे चेत्युवाचेति पूर्वेणान्वयः ॥ १४ ॥

भरतः शिरसा कृत्वा[1] स न्यासं पादुके ततः ।
अब्रवीद्दुःखसंतप्तः सर्वं प्रकृतिमण्डलम् ॥ १५ ॥

भरत इत्यादि । स भरतः पादुके न्यासं, वेदाः प्रमाणमितिवत्, पादुकात्मकन्यासं शिरसा कृत्वा—अङ्गीकृत्य, प्रणम्येति यावत् ॥ १५ ॥

***छत्रं धारयत क्षिप्रं आर्यपादाविमौ मतौ ।**
आभ्यां राज्ये स्थितो धर्मः पादुकाभ्यां गुरोर्मम ॥१६॥

इमौ आर्यपादाविति । विधेयाभिप्रायेण पादुकावाचिन इदंशब्दस्य पुल्लिङ्गनिर्देशः—'शैत्यं हि यत् सा प्रकृतिर्जलस्य' इतिवत् । पादशब्दः पूज्यवाची । आर्य इति रामः, परमपूज्यरामभावनास्पदभूते इमे पादुके इत्यर्थः । अत एवानयोरेव राज्येऽपेक्षितो धर्मः व्यवहारश्च स्थितः—प्रतिष्ठितः । अत आभ्यां पादुकाभ्यां क्षिप्रं छत्रं धारयत ॥ १६ ॥

---

* छत्रमित्येतत् चामरादीनामप्युपलक्षणम् । अत एव धारयतेति बहुवचनम् । पादुकाभ्यामिति हेतौ तृतीया-गो.

[1] सन्न्यासं-ङ.

[1]भ्रात्रा तु मयि सन्न्यासः निक्षिप्तः सौहृदादयम् *।
तमिमं पालयिष्यामि [2]राघवागमनं प्रति ॥ १७॥

अयमिति । देश इत्यर्थः ॥ १७ ॥

क्षिप्रं संयोजयित्वा तु राघवस्य पुनः [3]स्वयम् ।
चरणौ तौ तु रामस्य द्रक्ष्यामि सहपादुकौ ॥ १८ ॥

पुनः संयोजयित्वेति । मयि न्यासीकृतदेशमिति शेषः । पादुकाभ्यामाभ्यां सहितौ सहपादुकौ ॥ १८ ॥

ततो निक्षिप्त[4]भारोऽहं † राघवेण समागतः ।
‡ निवेद्य गुरवे राज्यं भजिष्ये [5]गुरुवृत्तिताम् ॥ १९ ॥

गुरौ—पितरि कर्तव्या वृत्तिः यस्य स तथा, तस्य भावः, ताम् ॥ १९ ॥

राघवाय च सन्न्यासं दत्त्वेमे वरपादुके ।
राज्यं चेद[6]मयोध्यायां धूतपापो भवाम्यहम् ॥ २० ॥

सन्न्यासं—राज्यं, इमे पादुके चायोध्यायां दत्त्वा ॥ २० ॥

स वल्कलजटाधारी मुनिवेषधरः प्रभुः ।
नन्दिग्रामेऽ[7]वसद्वीरः ससैन्यो भरतस्तदा [8] ॥ २१ ॥

अवसत् धीरः—धीमान् ॥ २१ ॥

---

* अयं—सन्न्यासः—पादुकारूपप्रतिनिधिः–गो. अनन्तरश्लोको द्रष्टव्यः ।
† राघवेण समागतः—सङ्गतः–गो. ‡ गुरवे—रामाय राज्यं निवेद्य—प्रत्यर्प्य–गो.

[1] मम भ्राता हि ङ. [2] भ्रातुरागमनं–ङ. [3] स्त्वहम्–ङ. [4] पादोऽहं–ङ. [5] गुरुवर्तिताम्–च. [6] मयोध्यां च–ङ. [7] वसद्वीरः–ङ. [8] एतदनन्तरं—रामागमनमाकाङ्क्षन् भरतो भ्रातृवत्सलः । भ्रातुर्वचनकारी च प्रतिज्ञापारगस्तथा । पादुके त्वभिषिच्याथ नन्दिग्रामेऽवसत्तदा—इत्यधिकम्–ङ,

[1] सवालव्यजनं छत्रं धारयामास स स्वयम् ।
भरतः शासनं सर्वं पादुकाभ्यां न्यवेदयत् ॥ २२ ॥
ततस्तु भरतः श्रीमान् अभिषिच्यार्यपादुके ।
तदधीनस्तदा राज्यं कारयामास सर्वदा ॥ २३ ॥
*तदा हि यत्कार्यमुपैति किञ्चित्
उपायनं चोपहृतं महार्हम् ।
स पादुकाभ्यां प्रथमं [2] निवेद्य
चकार पश्चात् भरतो यथावत् ॥ २४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे पञ्चदशोत्तरशततमः सर्गः

यथावदिति । विनियोगमिति शेषः । वी(२४)मानः सर्गः ॥ २४ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे पञ्चदशोत्तरशततमः सर्गः

षोडशोत्तरशततमः सर्गः

[रामेण खरवृत्तान्तश्रवणम्]

[3] प्रतियाते तु भरते वसन् राम[4]स्तदा वने ।
† लक्षयामास [5] चोद्वेगं अथौत्सुक्यं तपस्विनाम् ॥ १ ॥

एवं भरतवृत्तान्तमुपवर्ण्य, कविः प्रकृतं रामवृत्तान्तं वर्णयति — प्रतियात इत्यादि । तपस्विनां उद्वेगं—भयं, अथ तद्वशात्

---

* तदा—पादुके पुरस्कृत्य राज्यपालनसमये–गो. † लक्षयामास । इङ्गिताकारादिभिरिति शेषः–गो.

[1] इदमर्धमधिकं–ङ. [2] निवेदयन्–च. [3] प्रतिप्रयाते–ङ. [4] स्तपोवने–ङ. [5] सोद्वेगं–ङ.

औत्सुक्यं—स्थानान्तरगमनौत्सुक्यं च लक्षयामास। अयं व्यापारो भरतनिवृत्त्यनन्तरमपि बहुकालात् परम् ॥ १ ॥

*ये तत्र चित्रकूटस्य पुरस्तात्तापसाश्रमे ।
राममाश्रित्य निरताः तानलक्षयदुत्सुकान् ॥ २ ॥

तदेव प्रदर्श्यते—ये तत्रेत्यादि। तापसाश्रम इति सन्धिरार्षः, पुरस्तात्–पूर्वं ये तापसाः चित्रकूटस्य सम्बन्धिनि तत्राश्रमे राममाश्रित्य निरताः–प्रतिष्ठिताः, तान् उत्सुकान् अलक्षयत्—देशान्तरगमनोत्सुकानित्यर्थः ॥ २ ॥

नयनैर्भ्रूकुटीभिश्च रामं [1]निर्दिश्य †शङ्किताः ।
अन्योन्यमुपजल्पन्तः शनैश्चक्रुर्मिथः कथाः ॥ ३ ॥

कथमलक्षयदित्यतः—नयनैरित्यादि। शनैः—उपांशु। कथाश्चक्रुरिति। अयं रामः इहाश्रमे सस्त्रीको वर्तते। राक्षसा एतत्पीडार्थमिह सञ्चरन्तः अस्मानपि बाधन्ते। अतोऽवश्यं हित्वेममाश्रमं गन्तव्यं–इत्येवमात्मिकाः कथाः ॥ ३ ॥

तेषामौत्सुक्यमालक्ष्य रामस्त्वात्मनि ‡[2]शङ्कत ।
कृताञ्जलिरुवाचेदं ऋषिं कुलपतिं ततः ॥ ४ ॥

---

* अत्रेदं बोध्यम्—चैत्रशुक्लदशम्यां पुष्ये रामवनप्रस्थानम्। ततः पूर्णिमायां अर्धरात्रे दशरथमरणम्। ततः पक्षेण भरतागमनमयोध्यायाम्। तत और्ध्वदेहिकेन पक्षो गतः। एवं वैशाखे गते ज्येष्ठे भरतस्य चित्रकूटं प्रति प्रस्थानम्। अग्रे वर्षाकाले सन्निहिते सति कार्तिकान्तं चित्रकूटे वासः। तदनन्तरं तापसौत्सुक्यलक्षणम्। न तु भरतनिवृत्त्यनन्तरमेवैतत्–इति तिलके उक्तं, प्रदर्शितश्लोक्तार्थे प्रमाणं पाद्मपुराणम् ॥

† शङ्किताः—रामः किं मंस्यत इति शङ्किताः–ति. ‡ शङ्कत–अशङ्कत–ति.

[1] उद्दिश्य–ङ. [2] शङ्कितः–ङ.

आत्मनि शङ्कतेति। तेषां एतदाश्रमत्यागकारणं आत्मनिष्ठो दोषः ? अन्यो वा ? इति शङ्कते स्म। अत एव कृताञ्जलिस्सन् कुलपतिं—आश्रमपतिं ऋषिं उवाच। 'कुलमन्वयसङ्घातगृहो-त्पत्त्याश्रमेषु च' ॥ ४ ॥

न कच्चित, भगवन्! किञ्चित् पूर्ववृत्तमिदं मयि।
दृश्यते विकृतं, येन विक्रियन्ते तपस्विनः ॥ ५ ॥

न कच्चिदित्यादि। येन तपस्विनो विक्रियन्ते, तद्विकृतिसाधनं मया पूर्ववृत्तं—पूर्वमनुष्ठितं किञ्चित् विकृतं— अपराधः मयि तापसैः न दृश्यते कच्चित् ॥ ५ ॥

प्रमादाच्चरितं किञ्चित् कच्चिन्नावरजस्य मे।
[1]लक्ष्मणस्यर्षिभिर्दृष्टं * [2]नानुरूपमिवात्मनः ॥ ६ ॥

आत्मन इव—ममेव लक्ष्मणस्य च नानुरूपं- -न समान्यतः अयुक्ताचरणं—ऋषिभिः न दृष्टं कच्चित् ॥ ६ ॥

कच्चिच्छुश्रूषमाणा वः शुश्रूषणपरा मयि †।
[3]प्रमदाभ्युचितां वृत्तिं सीताऽयुक्ता न वर्तते।' ७ ॥

वः शुश्रूषमाणा— अर्घ्यपाद्यादिना सेवमाना। न वर्तत इति। युष्मास्विति शेषः ॥ ७ ॥

---

* आत्मनः अनुरूपं--स्वबाहुल्यायनुगुणमिति यावत्। † मयि शुश्रूषणपरेत्यादि। पतिशुश्रूषणमेव प्रमदायाः प्रथमो धर्म इति भावनया मच्छुश्रूषणात्यासक्त्या भवतां शुश्रूषणे कदाचित् किञ्चित् प्रच्युता वा सीता—इति भावः।

[1] लक्ष्मणस्यापि निर्दिष्टं-ङ. [2] नानुकूलं महात्मनः—ङ. [3] प्रमादा—ङ.

अथर्षिर्जरया वृद्धः *तपसा च जरां गतः ।
वेपमान इवोवाच रामं भूतदया[1]परः ॥ ८ ॥

तपसा चेति । वृद्ध इत्यनुकर्षः ॥ ८ ॥

कुतः कल्याण[2]सत्त्वायाः कल्याणाभिरतेः सदा ।
[3]स्खलनं, तात ! वैदेह्याः तपस्विषु विशेषतः ॥ ९ ॥
†त्वन्निमित्तमिदं [4]तावत् तापसान् प्रतिवर्तते ।
रक्षोभ्यस्तेन संविग्नाः कथयन्ति मिथः कथाः ॥ १० ॥

त्वन्निमित्तं रक्षोभ्यो भयमित्यन्वयः ॥ १० ॥

रावणावरजः कश्चित् खरो नामेह राक्षसः ।
‡उत्पाट्य तापसान् सर्वान् जनस्थाननिवासिनः ॥ ११ ॥
धृष्टश्च §जितकाशी च नृशंसः पुरुषादकः ।
अवलिप्तश्च पापश्च त्वां च, तात ! न मृष्यते ॥ १२ ॥

किं तद्रक्षः ? कुतश्च मन्निमित्तं ततो भयम् ? इत्यतः तत् प्रतिपादयति—रावणावरज इत्यादि । जितकाशी—जितभयः । तापसान् उत्पाट्य—पीडयित्वा त्वां च न मृष्यते—पीडयितुमिच्छतीत्यर्थः ॥ ११-१२ ॥

---

*तपसा च जरां गतः—तपसाऽपि वृद्ध इति वा अर्थः । †त्वन्निमित्तं—त्वत्तो हेतोः रक्षोभ्यः समागतं इदं—वक्ष्यमाणं उपद्रवजातं तापसान् प्रति वर्तते—गो. ‡उत्पाट्य—उत्खाय, निष्कास्येति यावत्—गो. §जितेन—जयेन काशते—प्रकाशत इति जितकाशी । यद्वा-जिताहवः, 'जितकाशी जिताहवः' इति हलायुधः—गो.

[1] परम्—च　[2] वृत्तायाः—ङ.　[3] चलनं—च.　[4] तात—ङ.

त्वं यदाप्रभृति ह्यस्मिन् आश्रमे, तात! वर्तसे।
तदाप्रभृति रक्षांसि विप्रकुर्वन्ति तापसान्॥ १३॥

विप्रकुर्वन्ति—विरोधं—अनिष्टं कुर्वन्ति। एतदाश्रमस्थानमिति शेषः॥ १३॥

दर्शयन्ति हि बीभत्सैः क्रूरैर्भीषणकैरपि।
नानारूपैः विरूपैश्च [1]रूपैरसुखदर्शनैः॥ १४॥

कोऽसौ विप्रकार इत्यतः तत् प्रदर्शयति—दर्शयन्तीत्यादि। बीभत्सैः—जुगुप्सितैः वेषैः क्रूरैः—दुर्दर्शैः भीषणैः—भयंकरैः एवमादिनानारूपैः—नानाप्रकारैः विरूपैः—विपरीतवेषैः स्वात्मानो दर्शयन्तीत्यन्वयः॥ १४॥

*अप्रशस्तैरशुचिभिः [2]संप्रयुज्य च तापसान्।
प्रघ्नन्ति चापरान् क्षिप्रं [3]अनार्याः पुरतः [4]स्थितान्॥

अप्रशस्तैः—पापावहैः अशुचिभिश्चापि तापसान् संप्रयुज्य विप्रकुर्वन्ति। अपरान्—अतिमृदून् तापसान् प्रघ्नन्ति—प्रहरन्त्यपि॥

तेषु तेष्वाश्रमस्थानेष्व†[5]बुध्यमवलीय च।
रमन्ते तापसांस्तत्र नाशयन्तो विचेतसः॥ १६॥

अबुध्यन् निद्रां अवलीय—निर्भयं संश्लिष्य च नाशयन्तः, तथा विचेतसः—व्याक्षिप्तानपरांश्च तापसान् तत्र तत्र नाशयन्तः रमन्ते॥

---

* अप्रशस्तैः—अशुभैः, अशुचिभिः—अशुचिद्रव्यैः—गो. † अबुद्धं यथा तथा निलीयेत्यर्थः (पाठान्तरे)।

[1] रूपैर्विकृतदर्शनैः—क. [2] संप्रहृष्य—क. [3] मानवा—क. [4] स्थिताः—क. [5] बुद्धमव—क.

[1] अवक्षिपन्ति स्रुग्भाण्डान् अग्नीन् सिञ्चन्ति वारिणा ।
कलशांश्च प्रमृद्नन्ति हवने समुपस्थिते ॥ १७ ॥

अवक्षिपन्ति—अवस्कन्दयन्ति । स्रुग्भाण्डान्—स्रुङ्मुखयज्ञसंभारान् । कलशान्—उदकपात्राणि । हवने—यागे ॥ १७ ॥

तैर्दुरात्मभि[2]राविष्टान् आश्रमान् [3]प्रजिघांसवः ।
गमनायान्यदेशस्य चोदयन्त्यृषयो[4]ऽद्य माम् ॥ १८ ॥

प्रजिघांसव इति । हन्तिरिह गत्यर्थः—'अज्झनगमां सनि' इति दीर्घः, 'अभ्यासाच्च' इति कुत्वम्, परित्यक्तुमिच्छव इत्यर्थः । चोदयन्तीति । मामिति शेषः ॥ १८ ॥

तत्पुरा, राम! *शारीरीं उपहिंसां तपस्विषु ।
दर्शयन्ति हि दुष्टास्ते त्यक्ष्याम इममाश्रमम् ॥ १९ ॥

शारीरीं—शरीरसम्बन्धिनीं उपहिंसां तपस्विषु दर्शयन्ति पुरा, 'यावत्पुरा' इति लट्—दर्शयिष्यन्तीति यत्; ततः—तस्मादेव इमं आश्रमं त्यक्ष्यामः ॥ १९ ॥

बहुमूलफलं चित्रं अविदूरादितो [5]वनम् ।
†[6]अश्वस्याश्रममेत्राहं [7]श्रयिष्ये सगणः पुनः ॥ २० ॥

---

* एतावता विप्रकरणमात्रं, क्रमशः विनाशायापि यावन्न प्रवर्तेरन्, तावदेवान्यत्र गच्छाम इति भावः । शरीरनाशमपि अलं मन्यमान आह—उपहिंसामिति ।
† 'पुराणाश्रमं' इति पाठे—चित्रकूटे रामनिवासं ज्ञात्वाऽत्रागता एते इति ज्ञायते ।

[1] अवक्षिपन्त्यस्रुग्भाण्डान्—ङ. [2] रामृष्टान्—ङ. [3] प्रजिहासवः—ङ.
[4] मिथः—ङ. [5] ऽपरम्—ङ. [6] कण्वस्याश्रम, पुराणाश्रम—ङ. [7] गमिष्ये—ङ.

अश्वस्य—न विद्यते श्वः-सञ्चयः यस्य स तथा। एतेन रक्षोभयनिवारणक्षमं तपो दिव्यं—लक्ष्यते—एवं च अश्वाख्यस्य महर्षेरित्यर्थः ॥ २० ॥

खरस्त्वय्यपि चायुक्तं पुरा, [1]राम! प्रवर्तते ।
सहास्माभिरितो गच्छ यदि बुद्धिः प्रवर्तते ॥ २१ ॥

त्वय्यपीति । एतावत्कालमस्मद्रक्षकत्वापराधादिति शेषः । प्रवर्तते पुरेति—प्रवर्तयिष्यतीति यावत् ॥ २१ ॥

सकलत्रस्य *सन्देहः [2]नित्यं युक्तस्य, राघव!
समर्थस्यापि [3]सहितः वासो दुःख इहाद्य ते ॥ २२ ॥

सकलत्रस्येति । नित्यं युक्तस्य—सदा सावधानस्य रक्षोनिग्रहे समर्थस्यापि सतः तव च इहाश्रमे सन्देहः-मत्वर्थीयान्तः-रक्षःपीडा-सन्देहवान् वासः दुःखो हि ॥ २२ ॥

इत्युक्तवन्तं [4]रामस्तं राजपुत्रस्तपस्विनम् ।
न शशाकोत्तरैः वाक्यैः [5]अवबद्धुं [6]समुत्सुकम् ॥ २३ ॥

उत्तरैर्वाक्यैरवबद्धुमिति । मया निवार्यते रक्षः पीडा, तस्मात् स्थातव्यमिति वचनैः निवारयितुं न शशाक । दैवादपाये कस्यचिदृषेः ब्रह्महत्यासदृशपापप्रसङ्गात् † ॥ २३ ॥

---

* संदेहः - सन्देहजनकः । यत्तस्य— सन्नद्धस्य (पाठान्तरं)—गो. † पूर्णमानुषभावाश्रयणाद्वा ।

[1] तात—ङ. [2] नित्यं यत्तस्य—ङ. [3] वमतः—ङ. [4] बहुधा—ङ. [5] अवरोद्धुं—ङ. [6] समुत्सुकः—ङ.

अभिनन्द्य [1] समापृच्छय समाधाय च राघवम् ।
स जगामाश्रमं त्यक्त्वा कुलैः कुलपतिः सह ॥ २४ ॥

अभिनन्द्य—उपश्लोक्य। ऋषिगणवियोगखिन्नं राघवं समाधाय—समाश्वास्य ॥ २४ ॥

रामः संसाध्य ऋषिगणमनुगमनात्
देशात्तस्मात् कुलपतिमभिवाद्य ऋषिम् ।
सम्यक् प्रीतैस्तै[2]रनुमत [3] उपदिष्टार्थं
पुण्यं वासाय स्वनिलयमुपसंपेदे ॥ २५ ॥

रामः तस्मात् देशात् अपरं देशं यान्तं ऋषिगणं तु अनुगमनात्—अनुव्रजनेन संसाध्य—प्रस्थाप्य कुलपतिं ऋषिं च अभिवाद्य, ऋषिमिति 'इकोऽसवर्णे' इति प्रकृतिभावः, सम्यक्प्रीतैः तैः अनुमतः—अनुज्ञातः (सं)—उपदिष्टार्थं—उपदिष्टरक्षःपीडासन्देहवृत्तकं पुण्यं—स्वनिलयनं वासायोपसंपेदे। एवमयं श्लोकः चतुर्दशाक्षरचतुष्पादात्मकः। अतः उपसंपेद इति उपसर्गद्वयम् ॥ २५ ॥

[4] आश्रमम् ऋषिविरहितं प्रभुः
*क्षणमपि न जहौ स राघवः ।
राघवं हि सततमनुगताः
तापसाश्चर्षिचरिते धृतगुणाः ॥ २६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे षोडशोत्तरशततमः सर्गः

---

* मुनिशून्यतया तदैव त्याज्यमप्याश्रमं मुनिविषयप्रेम्णा क्षणं न त्यक्तवानित्यर्थः। आर्षचरितधृतगुणाः—रामस्य आर्षचरित्रेण संचितगुणाः हि—यस्मात् कारणात् तापसाः राममनुगताः, तस्मात्—तत्प्रेम्णा क्षणं न जहाविति। वृत्तं तु श्लोकद्वयस्यापि चिन्त्यम्—गो. क्षण न विजहौ—किञ्चित्कालं तत्रैव स्थितवानिति भावः।

[1] समाश्वास्य—ङ. [2] रनुगमने—ङ. [3] उपदिष्टार्थः—ङ. [4] आश्रमं ऋषिगणरहितं—ङ

आश्रममित्यादि । प्रभुः—असहायतयाऽवस्थानसमर्थो राघवः ऋषिविरहितमाश्रमं तु क्षणमपि न जहौ सीतारक्षणार्थम् । ऋषिचरिते—ऋषितुल्यवृत्ते राघवे धृतगुणाः—निश्चितनिजरक्षा-सामर्थ्यगुणाः केचन तापसाः तं राममेव सततमनुगताः–आश्रितवन्तः, नाश्रमान्तरं जग्मुरित्यर्थः । तरु(२६)मानः सर्गः ॥ २६ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे षोडशोत्तरशततमः सर्गः

सप्तदशोत्तरशततमः सर्गः

[अत्र्याश्रमगमनम्]

राघवस्त्वपयातेषु [1] सर्वेष्वनुविचिन्तयन् ।
न तत्रारोचयद्वासं कारणैर्बहुभिस्तदा ॥ १ ॥

अथ नानोपाधिविमर्शनेन परित्यक्तचित्रकूटाश्रमस्य रामस्य अत्र्याश्रमे अनसूयासमागमः । राघव इत्यादि । अनुविचिन्तयन्—वक्ष्यमाणमुपाधिमिति शेषः ॥ १ ॥

इह मे भरतो दृष्टः मातरश्च सनागराः ।
[2] तयोश्च स्मृतिरन्वेति * तान्नित्यमनुशोचतः ॥ २ ॥

तस्यैव प्रदर्शनं—इह म इत्यादि । मयेति यावत् । तयोरिति । मात्रोरिति यावत् ॥ २ ॥

† स्कन्धावारनिवेशेन तेन तस्य महात्मनः ।
हयहस्तिकरीषैश्च उपमर्दः कृतो भृशम् ॥ ३ ॥

राजधानीतो निर्गता सेना स्कन्धावारः, तस्य निवेशः तथा ॥ ३ ॥

---

* 'पुमांस्त्रिया' इति समासः । † तस्य महात्मनः—भरतस्य तेन स्कन्धा-वारनिवेशेनेत्यन्वयः । स्कन्धावारः—सेनासमूहः–रा.

[1] तपस्विषु–ङ. [2] सा च मे–ङ.

[1]तस्मादन्यत्र [2]गच्छामः इति संचिन्त्य राघवः ।
प्रातिष्ठत स वैदेह्या लक्ष्मणेन च [3]सङ्गतः ॥ ४ ॥
सोऽत्रेराश्रममासाद्य तं ववन्दे महायशाः ।
तं चापि भगवानत्रिः पुत्रवत् प्रत्यपद्यत ॥ ५ ॥

प्रत्यपद्यतेति । राममिति शेषः ॥ ५ ॥

स्वयमातिथ्यमादिश्य [4]सर्वमस्य सुसत्कृतम् ।
सौमित्रिं च [5]महाभागं सीतां च समसान्त्वयत् ॥ ६ ॥

स्वयमिति । वृद्धां पत्नीमक्षयन् आतिथ्यं आदिश्य–विज्ञाप्य तत्सर्वमातिथ्यं सुसत्कृतं कृत्वा असान्त्वयत्—अप्रीणयत् ॥ ६ ॥

पत्नीं च *[6]तमनुप्राप्तां वृद्धामामन्त्र्य सत्कृताम् ।
सान्त्वयामास धर्मज्ञः सर्वभूतहिते रतः ॥ ७ ॥

तदनन्तरं अनुप्राप्तां वृद्धां वाचा सत्कृतां आमन्त्र्य – संबोध्य वैदेह्याः पुत्रीवत्परिग्रहार्थं सान्त्वयामास ॥ ७ ॥

अनसूयां महाभागां तापसीं धर्मचारिणीम् ।
प्रतिगृह्णीष्व वैदेहीं अब्रवीदृषिसत्तमः ॥ ८ ॥

अनन्तरं तां अनसूयां, उच्यमानलक्षणां वैदेहीं प्रतिगृह्णीष्वेत्यब्रवीत् ॥ ८ ॥

---

* तं—अत्रिं अनु—अनुसृत्य ।

[1] अस्मा–ङ.   [2] गच्छामि–ङ.   [3] संवृतः–ङ.   [4] सर्वमर्घ्य–ङ.
[5] महाभागां–ङ.   [6] समनु–ङ.

रामाय चाचचक्षे तां तापसीं धर्मचारिणीम् ।
दशवर्षाण्यनावृष्ट्या दग्धे लोके निरन्तरम् ॥ ९ ॥
यया मूलफले सृष्टे जाह्नवी च प्रवर्तिता ।
[1]मन्त्रेण तपसा युक्ता नियमैश्चाप्यलंकृता ॥ १० ॥
दशवर्षसहस्राणि यया तप्तं महत्तपः ।
अनसूया[2]व्रतैः, तात! प्रत्यूहाश्च [3]निबर्हिताः ॥ ११ ॥
*देवकार्यनिमित्तं च यया संत्वरमाणया ।
दशरात्रं कृता रात्रिः सेयं मातेव तेऽनघ! ॥ १२ ॥
तामिमां सर्वभूतानां नमस्कार्यां [4]तपस्विनीम् ।
अभिगच्छतु वैदेही वृद्धामक्रोधनां [5]सदा ॥ १३ ॥

तामाचचक्ष इति । तद्वैभवमाख्यातवानित्यर्थः । तदेव प्रदर्श्यते—दशेत्यादि । मूलफले सृष्टे इति । ऋषीणामुपजीवनायेति शेषः । जह्नवी—गङ्गा च तेषां स्नानाद्यर्थं आवाहिता । मन्त्रेण—मन्त्रसिद्धिवैभवेन । अनसूयाया व्रतानि तथा । प्रत्यूहा इति । ऋषीणां

---

*अत्रेयं पौराणिकी कथा—अनसूयायाः काचन सखी पतिव्रताऽभूत् । सा च, काञ्चन वेश्यां दृष्ट्वा तत्सङ्गं कामयमानं स्वपतिं स्वस्कन्धे समारोप्य तद्गृहं गन्तुमारेभे । तत्समये माण्डव्यर्षिः चोरबुध्या राजभटैः शूले समारोपितः । स च मार्गे पतिव्रतायाः पत्या पदा स्पृष्टः अतीव व्यथितोऽभूत् । तं च दशाहाभ्यन्तरे सूर्योदये सति म्रियस्वेति शशाप माण्डव्यः । ततः तद्भार्या सूर्योदयानन्तरं किल मद्भर्तुः मरणं, स एव मा भूदित्यूचे । ततश्च तत्प्रभावात् सूर्येऽनुदिते यज्ञादिलोपे प्राप्ते देवा ब्रह्माणमासाद्य प्रार्थयामासुः । स चावादीत्—तत्सखीमनसूयां प्रार्थयत, सा भवत्कार्यं करोतीति । ततस्तैः प्रार्थिता सती अनसूया दशरात्रावधिकालं एकरात्रित्वेन कृत्वा सूर्योदयानन्तरं तद्भर्तुर्मरणे सति पुनरुज्जीवयिष्याम इति वरं ददतेत्युक्त्वा तैर्वरं गृहीत्वा देवकार्यं कृतवतीति—ति.

[1]उग्रेण—ङ. [2]व्रतस्नाता—ङ. [3]निवर्तिताः. [4]यशस्विनीम्—ङ. [5]सतीम्—ङ.

तप प्रयुक्ता इत्यर्थः। न केवलं ऋष्यनुग्रहः, अपि तु देवानुग्रहोऽपीत्याह—देवेत्यादि। रात्रिरिति। 'प्रातर्विधवा भव' इति माण्डव्यऋषिशप्तनालायिन्या 'मा प्रातर्भूयात्' इति शापतो व्युष्टि(रिष्ट)निहता रात्रिः देवप्रार्थनया नालायिनीसख्याऽनयाऽनसूयया दशरात्रं कृतं—दशरात्रमात्रं संकुचितं वैधव्यं सख्याः परिहृतम्। सप्तम्यर्थे द्वितीया। एवं महाप्रभावा इयं हे अनघ! हे—त्वया मातेव प्रतिरक्ष्या। अभिगच्छतु—मातृवद्भजतु॥ ९-१३॥

एवं ब्रुवाणं तमृषिं तथेत्युक्त्वा स राघवः।
सीतामालोक्य धर्मज्ञां इदं वचनमब्रवीत्॥ १४॥
राजपुत्रि! श्रुतं त्वेतत् मुनेरस्य समीरितम्।
श्रेयोऽर्थमात्मनः शीघ्रं अभिगच्छ तपस्विनीम्॥ १५॥

हे राजपुत्रि! अस्य मुनेः समीरितं—वचनं च यस्मात् श्रुतं, अतः—श्रेयोऽर्थमित्यादि॥ १५॥

*अनसूयेति या लोके कर्मभिः ख्यातिमागता।
[1]तां शीघ्रमभिगच्छ त्वं अभिगम्यां तपस्विनीम्॥ १६॥

अनसूयेति। अन्वर्थनाम्नीति यावत्॥ १६॥

सीता त्वेतद्वचः श्रुत्वा राघवस्य [2]यशस्विनी।
तामत्रिपत्नीं धर्मज्ञां अभिचक्राम मैथिली॥ १७॥

राघवस्य वचः श्रुत्वेत्यन्वयः॥ १७॥

---

* यद्वा—कर्मभिः पातिव्रत्यवर्धकैः अन्याभिः कर्तुमशक्यैः पतिरक्षणादिकर्मभिः अनसूया–असूयितुमशक्या–गो.

[1] इदमर्धं कुण्डलितं–ङ.　[2] हितैषिणः, हितैषिणी–ङ.

शिथिलां *वलितां वृद्धां जरापाण्डरमूर्धजाम् ।
सततं वेपमानाङ्गीं प्रवाते कदलीं [1] यथा ॥ १८ ॥
[2] तां तु सीता महाभागां अनसूयां पतिव्रताम् ।
अभ्यवादयदव्यग्रा [3] स्वनाम समुदाहरत् ॥ १९ ॥

शिथिलां — शिथिलसन्धिबन्धां वलितां — सञ्जातवलीमतीं वृद्धां — इदं सर्वोपपादकं विशेषणम्; सततं वेपमानाङ्गीं, अत एव प्रवाते कदलीं यथा—इव स्थिताम् । अव्यग्रा - अव्याक्षिप्ता । स्वनाम समुदाहरदिति । अभिवादनाङ्गत्वेनेति शेषः ॥ १८–१९ ॥

अभिवाद्य च वैदेही तापसीं तां दमान्विताम् ।
बद्धाञ्जलिपुटा हृष्टा पर्यपृच्छदनामयम् ॥ २० ॥
ततः सीतां महाभागां दृष्ट्वा तां धर्मचारिणीम् ।
सान्त्वयन्त्यब्रवीत् [4] हृष्टा दिष्ट्या धर्ममवेक्षसे ॥ २१ ॥

तां सीतां धर्मचारिणीं दृष्ट्वा हृष्टा । दिष्ट्या—दैवयोगेन ॥

त्यक्त्वा ज्ञातिजनं, सीते! मानवृद्धिं च, मानिनि!
†अवरुद्धं वने रामं दिष्ट्या त्वमनुगच्छसि ॥ २२ ॥

मानेति । राजसुता राजपत्नी चाहं तापसीवद्वनं कथं गच्छेयमिति प्रवृद्धाभिमानं हित्वेत्यर्थः ॥ २२ ॥

---

* वलिताः—वलयः वार्धक्यनिबन्धनत्वग्वैरूप्यजन्याः—सञ्जातवलयाम् । † वने अवरुद्धं—चतुर्दशवर्षाणि प्राप्तनिर्बन्धवनवासम् ।

[1] इव—च. [2] ततः सीता महाभागा दृष्ट्वा तां धर्मचारिणीम्—ङ. [3] स्वं नाम—ङ. [4] पुण्या—च.

नगरस्थो वनस्थो वा [1]शुभो वा यदि वाऽशुभः ।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥२३॥

भर्ता प्रिय इति । लौकिकालौकिकनिमित्तविशेषतः विप्रियानास्पदभूत इत्यर्थः ॥ २३ ॥

दुःशीलः कामवृत्तो वा [2]धनैर्वा परिवर्जितः ।
स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥ २४ ॥

आर्यस्वभावानां—पूज्यस्वभावानाम् ॥ २४ ॥

नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम् ।
*सर्वत्र योग्यं, वैदेहि! तपःकृतमिवाव्ययम् ॥ २५ ॥

अतः—भर्तुः । बान्धवं—इष्टबन्धुम् । सर्वत्र योग्यं—इहामुत्रसुखसाधनतया भजनयोग्यम् । तत्र दृष्टान्तः—तपःकृतमिति । भावे निष्ठा, तपोऽनुष्ठानमिति यावत् ॥ २५ ॥

[3]न त्वेवमनुगच्छन्ति गुणदोषमसत्स्त्रियः ।
†[4]कामवक्तव्यहृदया भर्तृनाथाश्चरन्ति याः ॥ २६ ॥

कामवक्तव्यहृदयाः—कामाधीनचित्ताः, 'गृह्याधीनौ तु वक्तव्यौ', अत एव भर्तृनाथाः—भर्त्रपेक्षावत्यः ॥ २६ ॥

---

*सर्वत्र योग्यं—सर्वावस्थासु रक्षणसमर्थम्–गो. †कामवक्तव्यहृदयाः—कामवैषयवक्तव्यहृदयाः ; कामरूपार्थाभिलाषिण्य इति यावत् । यद्वा मदनविधेयहृदयाः । भर्तृनाथाः—भर्तॄणां नाथभूताः, भर्तृनियामका इत्यर्थः । यद्वा भर्तारं नाथन्ते—याचन्ते इति तथा, परपुरुषाकाङ्क्षिण्य इत्यर्थः–गो.

[1] पापो–ङ. [2] धनी वा यदि वाऽधनः–ङ. [3] न त्वेनमव–ङ.
[4] काममव्यक्तहृदयाः–ङ.

प्राप्नुवन्त्ययशश्चैव धर्मभ्रंशं च, मैथिलि !
*अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः ॥ २७ ॥

याः तद्विधाः—उक्तासद्गुणवत्यः (ताः) खलु अयशआदिकं प्राप्नुवन्ति ॥ २७ ॥

[1]त्वद्विधास्तु गुणैर्युक्ताः दृष्टलोकपरावराः ।
स्त्रियः स्वर्गे चरिष्यन्ति यथा [2]पुण्यकृतस्तथा ॥ २८ ॥

दृष्टः लोकः परः अवरश्च याभिस्ताः तथा ॥ २८ ॥

तदेवमेतं त्वमनुव्रता सती
पतिप्रधाना समयानुवर्तिनी ।
†भवस्व भर्तुः सहधर्मचारिणी
यशश्च धर्मं च ततः समाप्स्यसि ॥ २९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे सप्तदशोत्तरशततमः सर्गः

समयः—आचारः । वरा(२९)मानः सर्गः ॥ २९ ॥

इति श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे सप्तदशोत्तरशततमः सर्गः

---

* अकार्ये—अकृत्यं—पापपरवशा इति यावत् । † भवस्व—भव, आर्षमात्मनेपदम् । ततः भर्तुः सहधर्मचारित्वेन यशश्च धर्मं च कालान्तरानुभाव्यसुखसाधनं अदृष्टं च समाप्स्यसि । यद्वा भर्तुः सहधर्मचारिणी, एवंभूता त्वं ततः—भर्तुः सहधर्मचारित्वहेतोः यशश्च भवस्व—प्राप्नुहीत्यर्थः । धर्मं च समाप्स्यसि । ' भूप्राप्तावात्मनेपदी ' इति गणपाठात् प्राप्त्यर्थस्य भवतेरात्मनेपदम्—गो.

[1] तद्विधा—ङ. [2] धर्मकृत—ङ.

अष्टादशोत्तरशततमः सर्गः

[सीताऽनसूयासंवादः]

सा त्वेवमुक्ता वैदेही त्वनसूयाऽनसूयया ।
प्रतिपूज्य वचो मन्दं प्रवक्तुमुपचक्रमे ॥ १ ॥

अथ अनसूयासीतासंवादः । सा त्वित्यादि । अनसूया—असूयारहिता । एवमिति । एवं धर्मबोधनमित्यर्थः ॥ १ ॥

नैतदाश्चर्य[1]मार्याया यन्मां त्वमनुभाषसे ।
विदितं तु ममाप्येतत् यथा नार्याः पतिर्गुरुः ॥ २ ॥

नार्याः पतिः गुरुः—परमोपास्य इति यथा भवत्या उपदिष्टं, एतत् विदितं—एतद्विषयकं वेदनं—ज्ञानं ममाप्यस्ति ॥ २ ॥

यद्यप्येष भवेद्भर्ता[2] अनार्यो[3] वृत्तिवर्जितः ।
*[4]अद्वैधमत्र वर्तव्यं तथाऽप्येष मया भवेत् ॥ ३ ॥

तदेव प्रदर्श्यते—यद्यपीत्यादि । मम—अस्मदादिकायाः आर्यः—पूज्य एव भर्ता यद्यपि वृत्तिवर्जितः भवेत्—वृत्तिरहितः—जीवनरहितः—दरिद्रोऽपि वा एष भवेदपि; तथाऽपि मया—अस्मदादिकया अत्र—भर्तरि अद्वैधं—अद्वैविध्यं—प्रकारद्वयराहित्यं वर्तव्यं—वर्तितव्यमिति यावत्, प्रीतिप्रकारमेवात्र वर्तितव्यमित्यर्थः । परन्तु—एषोऽद्वैविध्यमिति योजयित्वा वृथा क्लेशमनुभवति। अस्माभिस्तु स्वरसयोजना दर्शितैव ॥ ३ ॥

---

* अद्वैधं—द्वैधीभावरहितम् । उपचर्तव्यः—गुणवत्त्वनिर्गुणत्वभेदं विहाय सम्यगुपचरणीय इत्यर्थः—गो.

[1] मार्यायाः—ङ. [2] ममार्ये—ङ. [3] वृत्त, वित्त—ङ. [4] अद्वैधमुपचर्तव्यं, अवद्यमुपचर्तव्यः—ङ.

किं पुनर्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः ।
स्थिरानुरागो धर्मात्मा *[1] मातृवत् पितृवत् प्रियः ॥ ४ ॥

किं पुनरिति । विप्रकारनिमित्तप्रसङ्गरहिते अस्मद्भर्तरि नित्यप्रियैकप्रकारवृत्तौ किं पुनः । उक्तनिमित्ताभाव एव प्रपञ्च्यते—गुणश्लाघ्य इत्यादि । प्रिय इति । मयीति शेषः ॥ ४ ॥

यां वृत्तिं वर्तते रामः कौसल्यायां [2] महायशाः ।
तामेव † नृपनारीणां अन्यासामपि वर्तते ॥ ५ ॥

अन्यासामपीति । सुमित्रादीनां विषयेऽपीत्यर्थः ॥ ५ ॥

सकृद्दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः ।
मातृवद्वर्तते [3]वीरः मानमुत्सृज्य धर्मवित् ॥ ६ ॥

नृपेणेति । दशरथेनेत्यर्थः । मानमुत्सृज्येति । अहं महाप्रभुरित्यभिमानमुत्सृज्येत्यर्थः ॥ ६ ॥

आगच्छन्त्याश्च विजनं वनमेवं भयावहम् ।
‡ समाहितं हि मे श्वश्र्वा हृदये [4] यत् स्थिरं मम ॥ ७ ॥

श्वश्र्वा यत् समाहितं—यया बुद्ध्या चित्तसमाधानं कृतं, तन्मम हृदये स्थिरम् ॥ ७ ॥

---

* मातृवत् प्रियः—प्रियपरत्वात् । पितृवत् प्रियः—अत्यन्तहितपरत्वात्—गो. मातृवर्ती—मातृशुश्रूषकः—ती. † नृपनारीणां—सप्तम्यर्थे षष्ठी—गो. ‡ समाहितं—उपदिष्टं—गो.

[1] मातृवर्ती पितृप्रियः—ङ. [2] महायशाः—च. [3] रामः—ङ. [4] तव श्रुतं—ङ.

*पाणि[1]प्रदानकाले च यत् पुरा त्वग्निसन्निधौ ।
[2]अनुशिष्टं जनन्या मे वाक्यं तदपि मे धृतम् ॥ ८ ॥

तदपि धृतमिति । जनन्यनुशासनमपि धृतं— अवधृतं— हृद्गतमित्यर्थः ॥ ८ ॥

[3]न विस्मृतं तु [4]ते सर्वं वाक्यैः [5]स्वैः, धर्मचारिणि !
पतिशुश्रूषणान्नार्याः तपो नान्यद्विधीयते ॥ ९ ॥

पतिशुश्रूषणं नार्यास्तपः, नान्यत्तपो विधीयत इत्येवंप्रकारकैस्ते वाक्यैस्तन्न विस्मृतम् ॥ ९ ॥

सावित्री पतिशुश्रूषां कृत्वा स्वर्गे महीयते ।
तथावृत्तिश्च † याता त्वं पतिशुश्रूषया दिवम् ॥ १० ॥

सावित्रीति काचन पुण्यस्त्री । देव्याः सावित्र्याः मूलविद्याविग्रहायाः सकलसंसारवर्गदायाः केनचित्साधनेन न हि किञ्चिल्लोकप्राप्तिः । तथावृत्तिरिति । सावित्रीसमानवृत्तिरित्यर्थः । त्वमित्यनसूयार्थकम् । पतिशुश्रूषया दिवं मूर्त्यन्तरेण याता; तपोऽर्थमिह वर्तमानैवेति शेषः । तथात्वं वसिष्ठारुन्धत्यादिसपत्नीकसप्तर्षीणां प्रसिद्धम् ॥ १० ॥

वरिष्ठा सर्वनारीणां एषा च दिवि देवता ।
‡रोहिणी न विना चन्द्रं मुहूर्तमपि दृश्यते ॥ ११ ॥

---

* पाणिप्रदानं—पाण्यादानं— पाणिग्रहणमिति यावत् । † याता—यास्यसीति यावत् । करगतत्वाभिप्रायेण वा लुट्प्रयोगः । ‡ रोहिणीति । पूर्वकृतपतिशुश्रूषावशादेवं पतिसाहित्यं प्राप्तमिति भावः—ति.

[1] ग्रहण—ङ. [2] अनुशिष्टा—ङ. [3] नत्रीकृतं च—ङ. [4] मे—च. [5] ते—ङ.

एवंविधाश्च * प्रवराः स्त्रियो भर्तृदृढव्रताः ।
देवलोके महीयन्ते पुण्येन स्वेन कर्मणा ॥ १२ ॥

ततोऽनसूया संहृष्टा श्रुत्वोक्तं सीतया वचः ।
शिरस्याघ्राय चोवाच मैथिलीं [1] हर्षयत्युत ॥१३ ॥

हर्षयत्युत—हर्षयत्यपि इत्यर्थः ; 'उताप्यर्थविकल्पयोः' ॥

नियमैर्विविधैराप्तं [2] तपो हि महदस्ति मे ।
† तत्संश्रित्य बलं, सीते ! छन्दये त्वां, [3] शुचिव्रते ! ॥

छन्दये—प्रीणये ॥ १४ ॥

उपपन्नं [4] च युक्तं च वचनं तव, मैथिलि !
प्रीता चास्म्युचितां, सीते ! करवाणि प्रियं च किम् ? ॥

तस्यास्तद्वचनं श्रुत्वा ‡ [5] विस्मिता [6] मन्दविस्मया ।
कृतमित्यब्रवीत् सीता तपोबलसमन्विताम् ॥ १६ ॥

मन्दः विस्मयः—स्मितं यस्याः सा तथा । कृतमित्यब्रवीदिति । भवत्या अनुग्रहेणैव सिद्धं, नातः परं भवत्या किञ्चित् कर्तव्यमित्युक्तमित्यर्थः ॥ १६ ॥

सा त्वेवमुक्ता धर्मज्ञा तया प्रीततराऽभवत् ।
सफलं च [7] प्रहर्षं ते हन्त, सीते ! करोम्यहम् ॥ १७ ॥

तयेति । लोभरहितत्वाचेत्यर्थः ॥ १७ ॥

---

* प्रवराः स्त्रियः—अरुन्धत्यादयः—ति. † तव बलं संश्रित्य—तपोबलमाश्रित्य । ‡ अविस्मिता तदैश्वर्यविषयकविस्मयरहिता—रा.

[1] हर्षयन्त्युत—ङ. [2] तपोभिः—ङ. [3] शुचिस्मिते—ङ. [4] मनोज्ञं च—ङ. [5] ऽविस्मिता—ङ. [6] मन्दविस्मिता—च. [7] प्रकर्षं च—ङ.

इदं दिव्यं [1]वरं माल्यं वस्त्रमाभरणानि च ।
*अङ्गरागं च, वैदेहि! महार्हमनुलेपनम् ॥ १८ ॥

अङ्गरागं—अङ्गाञ्जनकरं अनुलेपनं— अनुलेपनसाधनदिव्य-गन्धद्रव्यविशेषमित्यर्थः ॥ १८ ॥

मया दत्तमिदं, सीते! तव गात्राणि शोभयेत् ।
†[2]अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति ॥ १९ ॥

अनुरूपं—त्वदेकोचितम् । असंक्लिष्टं- उपभोगेऽपि अशुचित्वादि-दोषरहितम् । अतः नित्यमेव भविष्यतीति । धृतमाल्यादिकं सर्वं तदा तदा धृतमिव भविष्यतीत्यर्थः ॥ १९ ॥

अङ्गरागेण दिव्येन लिप्ताङ्गी, जनकात्मजे!
शोभयिष्यति भर्तारं यथा श्रीर्विष्णुमव्ययम् ॥ २० ॥
सा वस्त्रमङ्गरागं च भूषणानि स्रजस्तथा ।
मैथिली प्रतिजग्राह ‡प्रीतिदानमनुत्तमम् ॥ २१ ॥
प्रतिगृह्य च तत् सीता प्रीतिदानं यशस्विनी ।
श्लिष्टाञ्जलिपुटा धीरा समुपास्त [3]तपोधनाम् ॥ २२ ॥

श्लिष्टेति । रचितेति यावत् ॥ २२ ॥

तथा सीतामुपासीनां अनसूया दृढव्रता ।
वचनं प्रष्टुमारेभे §[4]कथां काञ्चिदनु प्रियाम् ॥ २३ ॥

---

* अङ्गरागः— कुङ्कुमहरिचन्दनादिः । अनुलेपनं — कर्पूरागरुकस्तूरीप्रमुखपरि-मलमिलितम्—गो. † अनुरूपं त्वद्भावानुरूपम् । असंक्लिष्टं—अबाधितशोभम्—गो. ‡ प्रीतिदानं—क्षत्रियात्वात् प्रतिग्रहानधिकारेण प्रीतिदानमित्युक्तम्—ति. § प्रियकथा-मनु – प्रियां कथामुद्दिश्य सीतां प्रष्टुं वचनमारेभे—गो.

[1] परं—ङ. [2] अनुरूपं तु मश्लिष्टं—ङ. [3] तपस्विनीम्—ङ. [4] काञ्चित प्रियकथामनु—ङ.

अनु प्रियामिति। अनु—अनन्तरं प्रियां काञ्चित्कथां व्याजीकृत्य वचनं प्रचुक्रमे ॥ २३ ॥

स्वयंवरे किल प्राप्ता त्वमनेन [1]यशस्विना ।
राघवेणेति मे, सीते! कथा श्रुतिमुपागता ॥ २४ ॥

अनेन राघवेण। मे श्रुतिं—मम श्रोत्रपथम् ॥ २४ ॥

तां कथां श्रोतुमिच्छामि विस्तरेण च, मैथिलि!
[2]यथाभूतं च कार्त्स्न्येन तन्मे त्वं वक्तुमर्हसि ॥ २५ ॥
एवमुक्ता तु सा सीता तापसीं धर्मचारिणीम् ।
श्रूयतामिति चोक्त्वा वै कथयामास तां कथाम् ॥ २६ ॥
मिथिलाधिपतिर्वीरः जनको नाम धर्मवित् ।
[3]क्षत्रधर्मे ह्यभिरतः न्यायतः शास्ति मेदिनीम् ॥ २७ ॥
तस्य लाङ्गलहस्तस्य [4]कृषतः क्षेत्रमण्डलम् ।
अहं किलोत्थिता भित्त्वा जगतीं नृपतेः सुता ॥ २८ ॥

लाङ्गलहस्तस्य क्षेत्रमण्डलं कृषत इति। 'षड्गवेन कृषति' इति श्रुतेः अग्निचयनार्थमिति शेषः; भावलक्षणे षष्ठी, कृषति सतीत्यर्थः। तस्य पुरः जगतीं—भुवम् ॥ २८ ॥

स मां दृष्ट्वा नरपतिः *मुष्टिविक्षेपतत्परः ।
पांसुकुण्ठितसर्वाङ्गीं विस्मितो जनकोऽभवत् ॥ २९ ॥

---

* मुष्टिविक्षेपतत्परः—'या जाता ओषधयः इति चतुर्दशभिः ओषधीर्वपति' इत्युक्तप्रकारेण ओषधिमुष्टिविकिरणतत्परः—गो.

[1] यशस्विनी—ङ. [2] यथाऽनुभूतं—ङ. [3] क्षत्रकर्मण्यभिरतः—च. [4] कर्षतः—ङ.

मुष्टिविक्षेपतत्परः स इति। कृष्टक्षेत्रसमीकरणाय उन्नत-मृत्तिकामुष्टिविक्षेपतत्परः। पांसुकुण्ठितसर्वाङ्गी—लाङ्गलपद्धतिनिम्न-प्रदेशगतत्वादेव तथात्वम् ॥ २९ ॥

*अनपत्येन च स्नेहात् अङ्कमारोप्य च स्वयम्।
[1]ममेयं तनयेत्युक्त्वा स्नेहो मयि निपातितः ॥ ३० ॥
अन्तरिक्षे च वागुक्ता †प्रतिमामानुषी किल।
एवमेतन्नरपते! धर्मेण तनया तव ॥ ३१ ॥

प्रतिमामानुषी—प्रतिमास्वरूपेण वाक्—मनुष्यवाक्तुल्या अन्तरिक्षे एवं वागुक्ता किल। एवंशब्दार्थः—एतदित्यादि। तदेतद्वचनं तु, हे नरपते! धर्मेण—न्यायेन तव तनया-तनयैवेति; त्वद्यागभुवि त्वत्कर्षणोत्थत्वात् त्वत्क्षेत्रजातेव—साक्षात् कन्यैवेत्यर्थः ॥

ततः प्रहृष्टो धर्मात्मा पिता मे मिथिलाधिपः।
अवाप्तो मिथिलामृद्धिं मामवाप्य नराधिपः ॥ ३२ ॥

मामवाप्येति। यज्ञभूमेरिति शेषः ॥ ३२ ॥

दत्ता चास्मी‡ष्टवद्देव्यै ज्येष्ठायै पुण्य[2]कर्मणे।
तया संभाविता चास्मि स्निग्धया मातृसौहृदात् ॥ ३३ ॥

इष्टवत्—स्वार्थे वतिः, इष्टायै इत्यर्थः। पुण्यकर्मण इति। मन इति न ङीप् ॥ ३३ ॥

---

*अनपत्येन—तेन जनकेन। †मा प्रति—मामुद्दिश्य, एवमेतन्नरपते धर्मेण तनया तवेति अन्तरिक्षे अमानुषी वागुक्ता। यद्वा, वागुक्ताप्रतिमेत्यत्र अप्रतिमेति छित्वा वाग्विशेषणतया योज्यम्—गो. अप्रतिमा—उच्चारयितृस्वरूपरहिता अमानुषी—मानुषवाक्सदृशी—रा. ‡इष्टवद्देव्यै—इच्छावत्यै देव्यै—गो. इष्टं इति भावे क्तः। इष्टं—इच्छा—सन्तानेच्छावत्यै—ति.

[1] ममैव—ङ. [2] कर्मणा—ङ.

* [1] पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता ।
चिन्तामभ्यगमद्दीनः † वित्तनाशादिवाधनः ॥ ३४ ॥

सुलभमिति । उचितमिति यावत् ॥ ३४ ॥

‡ सदृशाच्चापकृष्टाच्च लोके कन्यापिता जनात् ।
§ प्रधर्षणामवाप्नोति शक्रेणापि समो भुवि ॥ ३५ ॥

कन्यायाः पिता—कन्यापिता तु भुवि शक्रेण समोऽपि लोके सदृशात् जनात् अपकृष्टाच्च वरवर्गात् प्रधर्षणां—सम्मानादिविषयक्लेश-मेवावाप्नोति, किमुताधिकादिति शेषः ॥ ३५ ॥

तां धर्षणामदूरस्थां संदृश्यात्मनि पार्थिवः ।
चिन्तार्णवगतः पारं नाससादाप्लवो यथा ॥ ३६ ॥

प्लवः—पोतः ॥ ३६ ॥

अयोनिजां हि मां ज्ञात्वा नाध्यगच्छत् स चिन्तयन् ।
‖ सदृशं [2] चाभिरूपं च महीपालः [3] पतिं मम ॥ ३७ ॥

तस्य बुद्धिरियं जाता चिन्तयानस्य सन्ततम् ।
स्वयंवरं तनूजायाः करिष्यामीति [4] धीमतः ॥ ३८ ॥

---

* पतिसंयोगे सति सुलभं, अन्यथा दुर्लभमित्यर्थः । पतिसंयोगं विना स्थातुमशक्यं यौवनावस्थावदित्यर्थः—गो. पतिसंयोगः सुलभः यस्मिन्—रा. † वित्तनाशात्—आर्जितवित्तनाशात् अधन—रा. अधनः— दरिद्र इव, वर्धक्षत्प्राप्तवित्तनाशादिव, मां प्राप्य, ममानुरूपपत्यलाभात् मत्प्राप्त्यानन्दक्षयात् दीनः— इति वा । ‡ सदृशादपि, अपकृष्टादपि ; किमुत उत्कृष्टादिति भावः । § प्रधर्षणां— तिरस्कारं—गो. ‖ सदृशं—अभिजनवृत्तादिना तुल्यं, अनुरूपं— प्रादुर्भूतयौवनाप्रतिमरूपलावण्यादिना योग्यं—गो.

[1] भर्तृ—ङ. [2] चानुरूपं—ङ. [3] पतिः—ङ. [4] धर्मतः—घ.

*महायज्ञे तदा तस्य वरुणेन महात्मना ।
दत्तं धनुर्वरं प्रीत्या तूणी चाक्षयसायकौ ॥ ३९ ॥

महायज्ञ इति । मदुत्पत्तिसमानकालीन इति शेषः । वरुणेनेति । देवैः प्रेरितेनेति शेषः । एवञ्च 'सदसि देवैः दत्तम्' इति बालकाण्डोक्तमप्यविरुद्धम् ॥ ३९ ॥

असञ्चाल्यं मनुष्यैश्च[1] यत्नेनापि च गौरवात् ।
तन्न शक्ता †नमयितुं स्वप्नेष्वपि नराधिपाः ॥ ४० ॥

गौरवात्–भारात् ॥ ४० ॥

तद्धनुः प्राप्य मे पित्रा व्याहृतं[2] सत्यवादिना ।
समवाये नरेन्द्राणां पूर्वमामन्त्र्य पार्थिवान् ॥ ४१ ॥
इदं च धनुरुद्यम्य सज्यं यः कुरुते नरः ।
तस्य मे दुहिता भार्या भविष्यति न संशयः ॥ ४२ ॥
तच्च दृष्ट्वा धनुःश्रेष्ठं ‡गौरवाद्गिरिसन्निभम् ।
§अभिवाद्य नृपा जग्मुः अशक्तास्तस्य तोलने ॥ ४३ ॥

अभिवाद्य केवलं जग्मुः ॥ ४३ ॥

---

* महायज्ञे—दक्षयज्ञे तस्य—मत्पितृपूर्वजस्य देवरातस्य तदा शत्रुजयसमर्थधनुर्लाभाय तपःकरणकाले । दक्षयज्ञे हि शिवेन पीडिता देवाः शिवं संप्रार्थ्य धनुर्याचितवन्तः । स च देवेभ्यो दत्त्वोक्तवान् इदं देवराताय दीयतामिति । ततो देवैः वरुणद्वारा देवराताय दत्तम् । यद्वा–व्रियते सर्वैर्देवैरिति व्युत्पत्त्या वरुणः शिव एव–ति. वरुणेन दत्तं–वरुणेनातिसहकारिणा दत्तम् गो. † नमयितुं—नामयितुं । ‡ गौरवात्—भारात् तस्य तोलनेऽशक्ता इत्यन्वयः । § नमोक्तिरियम् ।

[1] बलेनापि–ङ. [2] सुमहवादिना–ङ.

सुदीर्घस्य तु कालस्य राघवोऽयं महाद्युतिः ।
विश्वामित्रेण सहितः यज्ञं द्रष्टुं समागतः ॥ ४४ ॥
लक्ष्मणेन सह भ्रात्रा रामः सत्यपराक्रमः ।
विश्वामित्रस्तु धर्मात्मा मम पित्रा सुपूजितः ॥ ४५ ॥
प्रोवाच पितरं तत्र [1] राघवौ * रामलक्ष्मणौ ।
सुतौ दशरथस्येमौ धनुर्दर्शनकाङ्क्षिणौ[2] ॥ ४६ ॥
इत्युक्तस्तेन विप्रेण तद्धनुः समुपानयत् ।
[3] तद्धनुर्दर्शयामास राजपुत्राय दैविकम् ॥ ४७ ॥

दैविकं—देवनिर्मितम् ॥ ४७ ॥

निमेषान्तरमात्रेण तदानम्य [4] महाबलः ।
ज्यां समारोप्य झटिति [5] पूरयामास वीर्यवान् ॥ ४८ ॥

पूरयामासेति । सज्यं कृत्वा आकृष्टवानित्यर्थः ॥ ४८ ॥

† तेनापूरयता वेगात् मध्ये भग्नं [6] द्विधा धनुः ।
तस्य शब्दोऽभवत् भीमः पतितस्याशनेर्यथा ॥ ४९ ॥
ततोऽहं तत्र रामाय पित्रा सत्याभिसन्धिना ।
‡ [7] उद्यता दातुमुद्यम्य जलभाजनमुत्तमम् ॥ ५० ॥

---

* रामलक्ष्मणावुद्दिश्य पितरं प्रोवाच । † तेन—रामेण । ‡ जलभाजनमुद्यम्य दातुमुद्यता—मां दातुं उद्युक्तवानिति यावत् ।

[1] भ्रातरौ—ङ. [2] एतदनन्तरं—धनुर्दर्शय रामाय राजपुत्राय दैविकम्—इत्यधिकं—ङ. [3] इदमर्धं कुण्डलितं—ङ. [4] स वीर्यवान्, सुवीर्यवान्; स राघवः—ङ. [5] पूरयामास वीर्यवत्, वीर्यवद्बलवद्धनुः—ङ. [6] महत्—ङ. [7] निश्चिता—ङ.

दीयमानां न तु तदा प्रतिजग्राह राघवः ।
अविज्ञाय पितुश्छन्दं अयोध्याधिपतेः प्रभोः ॥ ५१ ।

छन्दं—अभिप्रायम् ॥ ५१ ॥

ततः श्वशुरमामन्त्र्य वृद्धं दशरथं नृपम् ।
[1]मम पित्रा त्वहं दत्ता रामाय विदितात्मने ॥ ५२ ॥
*मम चैवानुजा साध्वी ऊर्मिला [2]शुभदर्शना ।
भार्यार्थे लक्ष्मणस्यापि दत्ता पित्रा मम स्वयम् ॥ ५३ ॥
एवं दत्ताऽस्मि रामाय तथा तस्मिन् स्वयंवरे ।
अनुरक्ताऽस्मि धर्मेण पतिं वीर्यवतां वरम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे अष्टादशोत्तरशततमः सर्गः

आगम(५३ १/२)मानः सर्गः ॥ ५४ ॥

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे अष्टादशोत्तरशततमः सर्गः

एकोनविंशत्युत्तरशततमः सर्गः

[दण्डकारण्यप्रवेशः]

अनसूया तु धर्मज्ञा श्रुत्वा तां महतीं कथाम् ।
पर्यष्वजत बाहुभ्यां शिरस्याघ्राय मैथिलीम् ॥ १ ॥

अथ अनसूयासम्मानितसीतया सह रामस्य अत्र्याश्रमे रात्रौ निविष्टस्य प्रातर्वनान्तरप्रस्थानम् । अनसूयेत्यादि ॥ १ ॥

---

* सीताप्राप्त्यनन्तरं जनकस्येयं जातेति वदन्ति ।

[1] मात्रा–ङ. [2] प्रिय–ङ.

व्यक्ताक्षरपदं चित्रं भाषितं मधुरं त्वया।
*यथा [1]स्वयंवरं वृत्तं तत्सर्वं च श्रुतं मया॥ २॥

स्वयंवरं वृत्तमिति। स्वयंवरविषयकवृत्तान्तमिति यावत्॥

[2]रमेऽहं कथया ते तु दृढं, मधुरभाषिणि!
रविरस्तंगतः श्रीमान् †उपोह्य रजनीं [3]शिवाम्॥ ३॥

उपोह्येति। अतिवाह्येति यावत्॥ ३॥

दिवसं [4]परिकीर्णानां आहारार्थं पतत्रिणाम्।
सन्ध्याकाले निलीनानां ‡निद्रार्थं श्रूयते ध्वनिः॥ ४॥

दिवसमिति। अत्यन्तसंयोगे द्वितीया, दिवसे आहारार्थं परितः कीर्णानां—सञ्चरताम्। निलीनानामिति। निलीयमानानामित्यर्थः॥

एते चाप्यभिषेकार्द्राः मुनयः कलशोद्यताः।
सहिता उपवर्तन्ते सलिलाप्लुतवल्कलाः॥ ५॥

कलशोद्यताः—उद्यतकलशा इति यावत्, आहिताग्न्यादिः। सहिताः—परस्परसमेताः॥ ५॥

अग्निहोत्रे च ऋषिणा हुते च विधिपूर्वकम्।
§कपोताङ्गारुणो धूमः दृश्यते पवनोद्धतः॥ ६॥

कपोताङ्गवत्—पारावतकवत् अरुणः—मेचकः, 'श्यामे रक्तेऽरुणेऽर्के च'॥ ६॥

---

* यथा—येन प्रकारेण स्वयंवरं वृत्तं—प्रवर्तितम्। † उपोह्य—समीपं प्राप्य-गो. ‡ निद्रार्थं निलीनानामित्यन्वयः। § धूममिश्रितज्वालायाः तादृक्त्वं प्रत्यक्षसिद्धम्।

[1] स्वयंवरे—ङ. [2] रमेयं—च. [3] शुभाम्—च. [4] प्रतिकीर्णानां—ङ.

*अल्पपर्णा हि तरवः घनीभूताः समन्ततः ।
[1]विप्रकृष्टेन्द्रिये देशे न प्रकाशन्ति वै दिशः ॥ ७ ॥

अल्पपर्णाः तरवोऽपि हि समन्ततः घनीभूता इव दृश्यन्ते; तमोवशादिति शेषः । अत एव विप्रकृष्टेन्द्रिये–दूरे देशेऽस्मिन् दिशो न प्रकाशन्ति –प्रकाशन्त इति यावत् ॥ ७ ॥

†रजनीचरसत्त्वानि प्रचरन्ति समन्ततः ।
‡तपोवनमृगा ह्येते §वेदितीर्थेषु शेरते ॥ ८ ॥

वेदितीर्थेषु– अग्निहोत्रवेदिसहिताश्रमप्रदेशेषु । तीर्थशब्दः पुण्यक्षेत्रसामान्यवाची, आश्रमाश्च पुण्यक्षेत्राणि ॥ ८ ॥

[2]संप्रवृद्धा निशा, सीते ! नक्षत्रसमलंकृता ।
ज्योत्स्नाप्रावरणश्चन्द्रः दृश्यतेऽभ्युदितोऽम्बरे ॥ ९ ॥
गम्यतामनुजानामि रामस्यानु[3]चरा भव ।
कथयन्त्या हि मधुरं त्वयाऽहं [4]परितोषिता ॥ १० ॥

अनुचरा भव–शुश्रूषुर्भव ॥ १० ॥

---

* विप्रकृष्टेऽपि देशे अल्पपर्णाः ये तरवः, तेऽपि समन्ततः घनीभूता हि –अव्यक्तपर्णान्तरालत्वात् सान्द्रीभूता इव । तत्र हेतुमाह –न प्रकाशन्ति वै दिश इति–गो. वस्तुतः विरलपर्णा अपि क्रमक्रमशः अन्धकारव्याप्त्या घनीभूता इव दृश्येयुः । † रजनीचरसत्त्वानि–रात्रिसंचारिव्याघ्रादीनि । ‡ अत एवेत्यादिः । § वेदितीर्थेषु–वेद्यवतरणप्रदेशेषु । वेदिप्रान्तेष्विति यावत् ।

[1] विप्रकृष्टेऽपि देशेऽस्मिन्–ङ. [2] संप्रवृत्ता–च. [3] चरी भव–ङ. [4] अपि–च.

*अलङ्कुरु च तावत् त्वं प्रत्यक्षं [1]मम, मैथिलि !
प्रीतिं जनय मे, वत्से ! [2]दिव्यालङ्कारशोभिनी ॥ ११ ॥

प्रीतिं जनयेति । अलङ्कृतत्वद्दिव्यरूपानुभावनेनेति शेषः ॥

सा तदा समलङ्कृत्य सीता सुरसुतोपमा ।
प्रणम्य शिरसा [3]पादौ रामं त्वभिमुखी ययौ ॥ १२ ॥
तथा तु भूषितां सीतां ददर्श वदतांवरः ।
राघवः प्रीतिदानेन तपस्विन्याः, जहर्ष च ॥ १३ ॥
न्यवेदयत् ततः सर्वं सीता रामाय मैथिली ।
प्रीतिदानं तपस्विन्याः वसनाभरण[4]स्रजाम् ॥ १४ ॥

सर्वं न्यवेदयदित्यस्यैव प्रपञ्चनं—प्रीतिदानमित्यादि ॥ १४ ॥

प्रहृष्टस्त्वभवत् रामः लक्ष्मणश्च महारथः ।
मैथिल्याः सत्क्रियां दृष्ट्वा [5]मानुषेषु सुदुर्लभाम् ॥ १५ ॥

मानुषेषु—मनुष्यलोकेषु ॥ १५ ॥

†ततः स शर्वरीं प्रीतः पुण्यां शशिनिभा[6]ननाम् ।
अर्चितस्तापसैः [7]सर्वैः उवास रघुनन्दनः ॥ १६ ॥
तस्यां रात्र्यां [8]व्यतीतायां [9]अभिषिच्य हुताग्निकान् ।
आपृच्छेतां नरव्याघ्रौ तापसान् वनगोचरान् ॥ १७ ॥

आपृच्छेतामिति । वनान्तरगमनार्थमिति शेषः ॥ १७ ॥

---

* अलङ्कुरु—आत्मानमिति शेषः—गो. † शशिनिभाननां सीतां प्रति प्रीतः शर्वरीं उवास इत्यन्वयः ।

[1] देवि—ङ. [2] सर्वा—ङ. [3] तस्यै—ङ. [4] स्रजम्—ङ. [5] मानुषेष्वति—ङ. [6] ननः—ङ. [7] सिद्धैः—ङ. [8] प्रभातायां—ङ. [9] अभिषिक्तान्—ङ.

तावूचुस्ते वनचराः तापसा धर्मचारिणः ।
*वनस्य तस्य सञ्चारं राक्षसैः समभिप्लुतम् ॥ १८ ॥

सञ्चारं—सञ्चरन्त्यस्मिन्निति अधिकरणे 'हलश्च' इति घञ्, 'गोचरसञ्चर' इति निपातनाभावः छान्दसः, देशमिति यावत् । समभिप्लुतं—व्याप्तम् ॥ १८ ॥

रक्षांसि पुरुषादानि नानारूपाणि, राघव !
वसन्त्यस्मिन् महारण्ये †व्यालाश्च रुधिराशनाः ॥ १९ ॥

व्यालाः—श्वापदानि, 'भेद्यलिङ्गः शठो व्यालः पुंसि श्वापदसर्पयोः' ॥ १९ ॥

उच्छिष्टं वा प्रमत्तं वा तापसं [1]ब्रह्मचारिणम् ।
अदन्त्यस्मिन् महारण्ये तान् निवारय, राघव ! ॥ २० ॥

उच्छिष्टं—अशुचिं । प्रमत्तं—असावधानम् । तान्—रक्षोव्यालान् ॥ २० ॥

एष पन्था महर्षीणां ‡फलान्याहरतां वने ।
अनेन तु वनं दुर्गं गन्तुं, राघव ! ते क्षमम् ॥ २१ ॥

---

* वनस्य सञ्चारं—कन्दमूलफलाद्याहरणार्थं सञ्चारं राक्षसैः समभिप्लुतं—सम्यगुपद्रुतं ऊचुः–गो. † व्यालाः—हिंस्रपशवः–गो. ‡ फलान्याहरतां—फलाद्याहरणार्थं गच्छतां आगच्छतां चेति यावत् ।

[1] धर्मचारिणम्–ङ.

[1] इतीरितः प्राञ्जलिभिस्तपस्विभि-
र्द्विजैः कृतस्वस्त्ययनः परंतपः ।
वनं सभार्यः प्रविवेश राघवः
सलक्ष्मणः सूर्य इवाभ्रमण्डलम् ॥ २२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्रिकायां संहितायां अयोध्याकाण्डे एकोनविंशत्युत्तरशततमः सर्गः

समाप्तश्चायमयोध्याकाण्डः

इतीरित इति । एवमुपदिष्टमार्ग इत्यर्थः । रेखा(२२)मानः सर्गः ॥ २२ ॥

इति श्रीमन्माधवयोगिविरचितायां श्रीमद्रामायणामृतकतकटीकायां अयोध्याकाण्डे एकोनविंशत्युत्तरशततमः सर्गः

समाप्तश्चायमयोध्याकाण्डः

---

[1] इतीव तैः-ङ.